मुनिश्रीकमलसंयमोपाध्यायविरचित-
सर्वार्थसिद्धिटीकया समलङ्कृतानि
मुनिश्रीजयन्तविजयसंशोधितानि च

# उत्तरज्झयणाणि

## भाग-1

• सहयोगी •
साध्वी चन्दनबालाश्री

• नवीनसंस्करणसम्पादकः •
पंन्यास श्रीवज्रसेनविजयगणिवर्यः

• प्रकाशकः •
भद्रंकर प्रकाशन - अहमदाबाद

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"अप्पा चेव दमेयव्वो,
अप्पा हु खुलु दुद्दमो ।
अप्पा दंतो सुही होइ;
अस्सिं लोए परत्थ य ।।"

– उत्तरज्झयणाणि
अध्य–१/गा.१५

"ઈષ્ટ–અનિષ્ટ વિષયોમાં
રાગદ્વેષના વશથી
ઉન્માર્ગે જનાર
આત્મા જ
દમન કરવા યોગ્ય છે.
ઉપશાંત એવો આત્મા
આ લોકમાં અને
પરલોકમાં
સુખી થાય છે."

– ઉત્તરાધ્યયનસૂત્ર
અધ્ય–૧/ગા.૧૫

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मुनिश्रीकमलसंयमोपाध्यायविरचित-
सर्वार्थसिद्धिटीकया समलङ्कृतानि
मुनिश्रीजयन्तविजयसंशोधितानि च

# उत्तरज्झयणाणि

## भाग-१

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नवीनसंस्करणसम्पादकः

पंन्यास श्रीवज्रसेनविजयः

सहयोगी

साध्वी चन्दनबालाश्री

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सर्वार्थसिद्धिटीकया समलङ्कृतानि

# उत्तरज्झयणाणि

## भाग-१

• वृत्तिकारः •

परमपूज्यआचार्यवर्यश्रीजिनभद्रसूरिशिष्य-
परमपूज्योपाध्यायश्रीकमलसंयमविजयमहाराजः

• संशोधकः •

शास्त्रविशारदजैनाचार्यश्रीविजयधर्मसूरिशिष्याणु-
मुनिश्रीजयन्तविजयमहाराजः

• नवीनसंस्करणसम्पादकः •

पंन्यास श्रीवज्रसेनविजयः

• सहयोगी •

साध्वी चन्दनबालाश्री

• प्रकाशकः •

भद्रंकर प्रकाशन

अहमदाबाद

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ग्रन्थनाम : उत्तरज्झयणाणि भाग-१

वृत्तिकार : परमपूज्योपाध्यायश्रीकमलसंयमविजयमहाराजः

संशोधक : मुनिश्रीजयन्तविजयमहाराजः

नवीनसंस्करण
सम्पादक : पंन्यासश्रीवज्रसेनविजयः

सहयोगी : साध्वीश्रीचन्दनबालाश्री

प्रकाशक : भद्रंकरप्रकाशन

नवीनसंस्करण : वीर सं. २५३५ वि.सं. २०६५

मूल्य : रु. ३००-००

पत्र : ३२+४६४

© : BHADRANKAR PRAKASHAN, 2009

## प्राप्तिस्थान

अहमदाबाद : भद्रंकर प्रकाशन
४९/१ महालक्ष्मीसोसायटी
शाहीबाग, अहमदाबाद-३८०००४
फोन : ०७९-२२८६०७८५

अहमदाबाद : सरस्वती पुस्तक भंडार
हाथीखाना, रतनपोल, अहमदाबाद-३८०००१
फोन : ०७९-२५३५६६९२

अक्षरांकन : विरति ग्राफिक्स, अहमदाबाद
फोन : ०७९-२२६८४०३२

मुद्रक : तेजस प्रिन्टर्स अहमदाबाद
फोन : ०७९-२२१७२२७१
(मो.) ९८२५३ ४७६२०

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# શ્રુતભક્તિ-અનુમોદના

## લાભાર્થી

પરમપૂજ્ય વ્યાખ્યાનવાચસ્પતિ આચાર્યભગવંતશ્રીમદ્વિજય રામચંદ્રસૂરીશ્વરજીમહારાજાના શિષ્યરત્ન પરમપૂજ્ય અધ્યાત્મયોગી પંન્યાસપ્રવર શ્રીભદ્રંકરવિજયજીમહારાજાના શિષ્યરત્ન પરમપૂજ્ય હાલારના હીરલા આ. શ્રી. વિ. કુંદકુંદસૂરીશ્વરજીમહારાજા અને પરમપૂજ્ય હાલારરત્ન મુ. શ્રીમહાસેનવિજયમહારાજસાહેબની સ્મૃતિમાં

પરમપૂજ્ય પંન્યાસ શ્રીવજ્રસેનવિજયજીમહારાજસાહેબના સદુપદેશથી

શ્રીશ્વેતાંબર મૂર્તિપૂજક તપગચ્છ જૈનસંઘ
નાનીબજાર
મહાલક્ષ્મી મંદિર પાસે
ધ્રાંગધ્રા

આ ગ્રંથ પ્રકાશનનો લાભ લીધેલ છે.

આપે કરેલી શ્રુતભક્તિની અમો હાર્દિક અનુમોદના કરીએ છીએ અને ભવિષ્યમાં પણ આપ ઉત્તરોત્તર ઉત્તમકક્ષાની શ્રુતભક્તિ કરતાં રહો એવી શુભેચ્છા પાઠવીએ છીએ.

લિ. ભદ્રંકર પ્રકાશન

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

असंखयं जीविय मा पमायए जरोवणीयस्स हु नत्थि ताणं ।
एयं वियाणाहि जणे पमत्ते कन्नु विहिंसा अजया गहिंति ॥४।१

"હે ભવ્ય ! આ જીવિત અસંસ્કૃત છે એટલે કે સેંકડો યત્નથી પણ સાંધી કે વધારી શકાય તેવું નથી, તેથી તું પ્રમાદ ન કર. કારણ કે જરાવસ્થા પામેલા પુરુષને કોઈ શરણ નથી. તથા આ તું વિશેષ કરીને જાણ કે પ્રમાદી, ઈંદ્રિયોને વશવર્તી અને મહાપાપી એવા મનુષ્યોને જરા-મરણાદિકની પ્રાપ્તિ વખતે કોઈ પણ શરણરૂપ નથી." ૪।૧

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# પ્રકાશકીય

**"દુષમકાળ જિનબિંબ જિનાગમ ભવિયણકું આધારા".....!!**

અનંતકાળચક્ર છે, દરેક કાળચક્રમાં ઉત્સર્પિણી—અવસર્પિણી હોય છે. તેમાં ત્રીજા અને ચોથા આરામાં તારક તીર્થંકર પરમાત્માઓ ઉત્પન્ન થઈને સર્વવિરતિ અંગીકાર કરીને, કેવલજ્ઞાનને પામીને શાસનની સ્થાપના કરે છે અને પરમાત્મા અર્થથી જે દેશના આપે છે તેને ગણધરભગવંતો સૂત્રમાં ગૂંથે છે, એ આગમ તરીકે પ્રસિદ્ધ થાય છે.

આ આગમગ્રંથોમાં પ્રથમગ્રંથ **"ઉત્તરાધ્યયન"** છે. જે સાધુ-સાધ્વીજી ભગવંતોને આરાધનામય સંયમજીવન જીવવા માટે અત્યંત ઉપયોગી ગ્રંથ છે.

ઉત્તરાધ્યયનસૂત્ર ઉપર પૂર્વના મહર્ષિઓએ ઘણી ટીકાઓ રચી છે. તેમાંથી આ બૃહદ્‌ખરતરગચ્છીય પૂજ્યશ્રી**જિનભદ્રસૂરિશિષ્ય**-મુનિશ્રી**કમલસંયમ**ઉપાધ્યાયવિરચિત તથા શાસ્ત્રવિશારદ જૈનાચાર્યશ્રીવિજય**ધર્મસૂ**રિશિષ્ય-મુનિશ્રી**જયંતવિજય**સંશોધિત **'સર્વાર્થસિદ્ધિ'** ટીકા છે. આ 'સર્વાર્થસિદ્ધિ'ટીકા સરળ, સુબોધ અને ભાવગર્ભિત છે. આમાં કથાનકો સંસ્કૃતભાષામાં છે, પદ્યલાલિત્ય ખૂબ સુંદર છે.

આગ્રામાં રહેનાર ઉપકેશજ્ઞાતિના શ્રેષ્ઠિ છોગમલ્લના સુપુત્ર લક્ષ્મીચંદ્રવૈદે કરેલ જ્ઞાનપંચમી ઉદ્યાપન નિમિત્તે આવેલ દ્રવ્યની સહાયથી **"લક્ષ્મીચંદ્ર જૈન લાયબ્રેરી"** નામની સંસ્થા દ્વારા આ **'સર્વાર્થસિદ્ધિ'**ટીકા સહિત **'ઉત્તરાધ્યયન'**સૂત્ર પ્રતાકારે ચાર ભાગમાં વીરસંવત્—૨૪૪૯, વિક્રમસંવત્—૧૯૮૦, સન્ ૧૯૨૩માં પ્રકાશિત થયેલ છે.

ઘણા વર્ષો પૂર્વે પ્રકાશિત થયેલ ઉત્તરાધ્યયનસૂત્ર ઉપરની આ ટીકા સ્વ-પરને વાંચન માટે ઉપયોગી બને તે હેતુથી અમારા ઉપકારી અધ્યાત્મયોગી પંન્યાસપ્રવર

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

શ્રી**ભદ્રંકરવિજયજી** ગણિવર્યશ્રીના પ્રશિષ્યરત્ન પંન્યાસ શ્રી**વજ્રસેનવિજયજી** ગણિવર્યશ્રીના સંપાદન હેઠળ પરમપૂજ્ય વ્યાખ્યાનવાચસ્પતિ **રામચંદ્રસૂરીશ્વરજી** મહારાજાના સામ્રાજ્યવર્તી તથા પ્રશાંતમૂર્તિ પ્રવર્તિની પૂ.સા.શ્રી**રોહિતાશ્રીજી** મ.ના શિષ્યરત્ના વિદુષી **સા. ચંદનબાલાશ્રીજી** મ.ના સંપૂર્ણ સહયોગથી અમારી સંસ્થા દ્વારા પ્રકાશિત થઈ રહેલ છે, તે અમારી સંસ્થા માટે અતિ આનંદનો વિષય છે.

અમે આ તકે પૂર્વે પ્રકાશિત કરનાર **લક્ષ્મીચંદ્ર જૈન લાયબ્રેરી**નો, પૂર્વના સંશોધનકર્તાનો તથા નવી આવૃત્તિના સંપાદક અને સહયોગ આપનાર પૂજ્યોનો તથા ગ્રંથને પ્રકાશિત કરવામાં આર્થિક સહયોગ આપનાર ધ્રાંગધ્રા સંઘ આદિનો ખૂબ ખૂબ આભાર માનીએ છીએ.

કંપોઝના કાર્ય માટે **વિરતિગ્રાફિક્સ**ના અખિલેશ મિશ્રાએ અક્ષરમૂલ્યાંકન કાર્ય સુંદર કરી આપેલ છે અને પ્રીન્ટીંગના કામ માટે **તેજસ પ્રીન્ટર્સ**ના તેજસભાઈએ ખંતપૂર્વક સુંદર કાર્ય કરી આપેલ છે. તે બદલ તેમનો આભાર માનીએ છીએ.

પ્રાંતે આ ગ્રંથના વાંચન-મનન અને નિદિધ્યાસન દ્વારા આપણા આત્માને જાગૃત કરીને પરમપદને પામનારા બનીએ.

**— પ્રકાશક**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# સંપાદકીય

આગમગ્રંથોમાં પ્રથમગ્રંથ **'ઉત્તરાધ્યયન'** છે. શ્રીઉત્તરાધ્યયનસૂત્ર એટલે યોગમાર્ગનો સંદર્શક એક અદ્ભુત ગ્રંથ, સાધુ-સાધ્વીજી ભગવંતો માટે આચારપાલનનો માર્ગદર્શક ગ્રંથ !! ઉત્તમ પ્રકારના આચારો અને ઉત્તમ પ્રકારના આચારપાલકોના દૃષ્ટાંતોથી ભરપૂર પ્રત્યક્ષ પરમાત્માની દેશનાનો આ ગ્રંથ !!

આ ગ્રંથના ૩૬ અધ્યયનો છે. આ ગ્રંથ ઉપર નિર્યુક્તિ, ચૂર્ણિ અને અનેક વૃત્તિઓની રચના પૂર્વના મહાપુરુષોએ કરેલ છે અને અત્યાર સુધીમાં અનેક સંસ્થાઓ દ્વારા તે તે પ્રકાશનો પ્રકાશિત થયા છે.

ઉત્તરાધ્યયનસૂત્ર ઉપર પરમપૂજ્ય **શાન્ત્યાચાર્ય** મહારાજારચિત **'શિષ્યહિતા'** નામક બૃહદ્ટીકાની રચના થયેલ છે, એ શિષ્યહિતા વૃત્તિના આધારે ખરતરગચ્છીય મુનિશ્રી-**કમલસંયમ**ઉપાધ્યાયવિરચિત **'સર્વાર્થસિદ્ધિ'**ટીકા સમલંકૃત તથા શાસ્ત્રવિશારદ જૈનાચાર્ય **શ્રીવિજયધર્મસૂરિશિષ્ય-મુનિશ્રીજયંતવિજય**સંશોધિત ઉત્તરાધ્યયનસૂત્ર **"લક્ષ્મીચંદ્ર જૈન લાયબ્રેરી"** આ સંસ્થા દ્વારા આગ્રાથી પ્રકાશિત થયેલ છે, તે પ્રકાશનના આધારે આ નવીન સંસ્કરણનું સંપાદન કાર્ય કરવામાં આવેલ છે.[1]

આ ઉત્તરાધ્યયનસૂત્ર **'સર્વાર્થસિદ્ધિ'** વૃત્તિ સહિત બે ભાગમાં **'ભદ્રંકરપ્રકાશન'** તરફથી પ્રકાશિત થઈ રહેલ છે. આ કાર્યમાં હું તો માત્ર નિમિત્તરૂપ છું. આવા ઉત્તમગ્રંથના સંપાદન કાર્યમાં મારી પ્રેરણાને ઝીલીને પરમપૂજ્ય પરમારાધ્યપાદ શ્રી**રામચંદ્રસૂરીશ્વરજી** મહારાજાના સામ્રાજ્યવર્તી તથા પ્રશાંતમૂર્તિ પ્રવર્તિની પૂજ્યસાધ્વીવર્યા **શ્રીરોહિતાશ્રીજી** મહારાજાના શિષ્યરત્ના **સા. ચંદનબાલાશ્રી**એ પોતાની નાદુરસ્ત રહેતી તબીયતમાં પણ

---

૧. પૂ. ઉપા. કમલસંયમકૃત ટીકા સાથે—યશોવિજય જૈન ગ્રંથમાલા, ભાવનગર, ઈ. સં. ૧૯૨૭માં ઉત્તરાધ્યયનસૂત્ર પ્રકાશિત થયેલ છે, પરંતુ તે પ્રતો અમને પ્રાપ્ત થયેલ નથી.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

સંપૂર્ણ સહયોગ આપી ઉત્તમ એવી શ્રુતભક્તિ કરવા દ્વારા સ્વ-પર ઉપકારક એવું કાર્ય કરીને સ્વઆત્મશ્રેયઃ સાધ્યું છે.

મારી પણ નાદુરસ્ત રહેતી તબીયતમાં મારા દરેક કાર્યોમાં પોતાનું વિશિષ્ટ યોગદાન અને સહકાર આપનાર પંન્યાસ **શ્રીહેમપ્રભવિજયગણીનું** કૃતજ્ઞભાવે સ્મરણ કર્યા વગર રહી શકાતું નથી. **'સર્વાર્થસિદ્ધિ'** વૃત્તિ સહિત **ઉત્તરાધ્યયન સૂત્ર ભાગ ૧-૨** પુસ્તકાકારે સંપાદિત થઈને પ્રકાશિત થઈ રહેલ છે, તે મારા માટે ખૂબ આનંદનો વિષય છે.

આ ગ્રંથના વાચન, મનન અને નિદિધ્યાસન દ્વારા સમ્યગ્જ્ઞાન, સમ્યગ્દર્શન અને સમ્યક્ચારિત્રરૂપ રત્નત્રયીની પરિણતિને વિકસાવીને આપણે સૌ કોઈ મુક્તિસુખના અર્થી મુમુક્ષુ ભવ્યાત્માઓ નિજસ્વરૂપના ભોગસ્વરૂપ મુક્તિસુખના ભોક્તા બનીએ એ જ એક અંતરની શુભાભિલાષા....!!

**– પંન્યાસ શ્રીવજ્રસેનવિજય**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# પ્રાક્કથન[1]

''श्राद्धः श्रोता सुधीर्वक्ता, युज्येयातां यदीश ! तत् ।
त्वच्छासनस्य साम्राज्य-मेकच्छत्रकलावपि'' ॥ – वीत०स्तो० ९।३

કલિકાલસર્વજ્ઞ આચાર્યભગવંત શ્રી**હેમચંદ્રાચાર્ય**મહારાજા **વીતરાગસ્તોત્ર**માં કહે છે કે– હે નાથ ! જો પરમ શ્રદ્ધાળુ શ્રોતા અને આગમના રહસ્યોને જાણનાર વક્તા એ બેનો સુયોગ થાય તો કલિકાલમાં પણ આપના શાસનનું સામ્રાજ્ય એકછત્ર બને = સર્વત્ર પ્રસરે. ૯।૩

અનંતકાળ ચક્ર છે, દરેક કાળચક્રમાં ઉત્સર્પિણી કાળ અને અવસર્પિણી કાળ હોય છે. તેમાં ત્રીજા ચોથા આરામાં તારક શ્રીતીર્થંકર પરમાત્માઓ ઉત્પન્ન થાય છે અને સર્વવિરતિ અંગીકાર કરીને કેવલજ્ઞાન પ્રાપ્ત કરીને ચતુર્વિધસંઘરૂપ શાસનની સ્થાપના કરે છે. પરમાત્મા અર્થથી જે દેશના આપે છે, તેને ગણધરભગવંતો સૂત્રમાં ગૂંથે છે તે આગમગ્રંથ તરીકે પ્રસિદ્ધ થાય છે.

જૈન આગમ ચાર વર્ગોમાં વિભક્ત છે–(૧) અંગ (૨) ઉપાંગ (૩) મૂલ અને (૪) છેદ.

ઉત્તરાધ્યયનસૂત્રની 'મૂલવર્ગ'ની અંદર પરિગણના થાય છે. જૈન આગમોમાં મૂલસૂત્રોનું સ્થાન ઘણું મહત્ત્વપૂર્ણ છે. ખાસ કરીને ઉત્તરાધ્યયનસૂત્ર અને દશવૈકાલિકસૂત્ર ભાષા અને વિષયની દૃષ્ટિએ અત્યંત પ્રાચીન મૂલસૂત્ર છે. આ સિવાય પિંડનિર્યુક્તિ અને ઓઘનિર્યુક્તિમાં સાધુભગવંતોના આચાર-વિચારોનું વિસ્તૃત વર્ણન હોવાના કારણે તે તે સૂત્રો દ્વારા સાધુસંસ્થાના ઇતિહાસ ઉપર પ્રકાશ પડે છે.

મૂલસૂત્રોની સંખ્યા અને તેના ક્રમમાં મતભેદ જોવા મળે છે. કેટલાક લોકો ઉત્તરાધ્યયન, આવશ્યક અને દશવૈકાલિક આ ત્રણ સૂત્રોને જ મૂલસૂત્રો માને છે. પિંડનિર્યુક્તિ અને ઓઘનિર્યુક્તિને મૂલસૂત્રોમાં ગણતા નથી, તો વળી કેટલાક લોકો

---

૧. પ્રાક્કથનરૂપ આ લખાણમાં જૈનબૃહદ્સાહિત્યનો ઇતિહાસ ભાગ-૩ ગુજરાતી આવૃત્તિ અને જૈનસાહિત્યનો સંક્ષિપ્ત ઇતિહાસ નવી આવૃત્તિમાંથી અમુક લખાણ સાભાર ઉદ્ધૃત કરી સંકલિત કરેલ છે.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

પિંડનિર્યુક્તિ અને ઓઘનિર્યુક્તિને પણ મૂલસૂત્ર તરીકે સ્વીકારે છે.

ઉત્તરજ્ઝયણાણિ–ઉત્તરાધ્યયનસૂત્ર જૈન આગમોમાં પ્રથમ મૂલસૂત્ર છે. ઉત્તરાધ્યયનસૂત્રના ટીકાગ્રંથો પરથી જાણી શકાય છે કે, પરમાત્મા મહાવીરદેવે પોતાના અંતિમ ચાતુર્માસમાં અપાપાપુરીમાં સોળ પ્રહરની છેલ્લી ધર્મદેશના આપી, તેમાં જે વણપૂછ્યા છત્રીસ પ્રશ્નોનાં ઉત્તર આપ્યા, તેનો આ ગ્રંથમાં સંગ્રહ હોવાથી આ ગ્રંથનું નામ ઉત્તરાધ્યયન પડ્યું.[૨]

નિર્યુક્તિકાર શ્રી**ભદ્રબાહુ**સ્વામીમહારાજ આ ઉત્તરાધ્યયનસૂત્રનું માહાત્મ્ય બતાવતા કહે છે કે, જે સમ્યગ્દર્શનાદિ ગુણયોગ્ય ભિન્નગ્રંથિવાળા આસન્નસિદ્ધિક ભવ્યજીવો છે તે જ આ છત્રીશ ઉત્તરાધ્યયનો ભણે છે. તેથી શ્રુતજિન વગેરે વડે કહેવાયેલા અનંતગમ-પર્યાયયુક્ત છત્રીશ ઉત્તરાધ્યયનો ઉપધાનાદિ ઉચિત વ્યાપારપૂર્વક યથાયોગ ગુરુના પ્રસાદથી ભણવા જોઈએ.[૩]

શ્રી**ભદ્રબાહુ**સ્વામીમહારાજની ઉત્તરાધ્યયન–નિર્યુક્તિ અનુસાર છત્રીશ અધ્યયનોમાંથી કેટલાક અંગગ્રંથોમાંથી લેવામાં આવ્યા છે, કેટલાક જિનભાષિત છે, કેટલાક પ્રત્યેકબુદ્ધો દ્વારા નિરૂપિત છે અને કેટલાંક સંવાદરૂપે કહેવાયેલાં છે.[૪]

ઉત્તરાધ્યયનસૂત્ર ઉપર બૃહટ્ટીકાકાર વાદિવેતાલ શ્રી**શાન્તિસૂરિ**મહારાજ અનુસાર ઉત્તરાધ્યયનસૂત્રનું પરીષહ નામક બીજું અધ્યયન દૃષ્ટિવાદમાંથી લેવામાં આવ્યું છે, દ્રુમપુષ્પિકા નામક દસમું અધ્યયન મહાવીર પરમાત્માએ પ્રરૂપિત કર્યું છે, કાપિલીયનામક આઠમું અધ્યયન પ્રત્યેકબુદ્ધ કપિલે પ્રતિપાદન કર્યું છે તથા કેશીગૌતમીયનામક ત્રેવીસમું અધ્યયન સંવાદરૂપે પ્રતિપાદિત કરવામાં આવ્યું છે.

**ઉત્તરાધ્યયનસૂત્ર ઉપર નિર્યુક્તિ, ચૂર્ણિ અને વૃત્તિઓની રચના :–**

પરમપૂજ્ય આચાર્યભગવંત શ્રી**ભદ્રબાહુ**સ્વામીમહારાજાએ આ ગ્રંથ ઉપર 'નિર્યુક્તિ' લખી

---

२. "इइ पाउकरे बुद्धे नायए परिनिव्वुए ।
छत्तीसं उत्तरज्झाए भवसिद्धीयसंमए" ॥ – उत्तरा० ३६ । गा० २६८

३. "जे किर भवसिद्धीया परित्तसंसारिया य जे भव्वा ।
ते किर पढंति एए छत्तीसं उत्तरज्झाए ॥१॥
तम्हा जिणपन्नत्ते अणंतगम-पज्जवेहि संजुत्ते ।
अज्झाए जहजोगं गुरुप्पसाया अहिज्जेज्जा" ॥२॥ – उत्त० नि० गा० ५५८।५५९

४. "अंगप्पभवा जिणभासिया पत्तेयबुद्धसंवाया ।
बंधे मुक्खे य कया छत्तीसं उत्तरज्झयणा" ॥ – उत्त० नि० गा० ४

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

છે. પરમપૂજ્ય શ્રી**જિનદાસ**ગણિ મહત્તરે આ ગ્રંથ ઉપર 'ચૂર્ણિ' લખી છે, પરમપૂજ્ય વાદિવેતાળ શ્રી**શાંતિસૂરિ**મહારાજાએ આ ગ્રંથ ઉપર 'શિષ્યહિતા' નામની બૃહટ્ટીકાની રચના કરી છે, પરમપૂજ્ય આચાર્યભગવંત શ્રી**નેમિચંદ્ર**સૂરિમહારાજાએ બૃહટ્ટીકાના આધારે આ ગ્રંથ ઉપર 'સુખબોધા' નામની ટીકા રચી છે. પરમપૂજ્ય શ્રી**ભાવવિજયજી**મહારાજાએ આ ગ્રંથ ઉપર ટીકા રચી છે, પરમપૂજ્ય આચાર્યભગવંત શ્રી**લક્ષ્મીવલ્લભ**સૂરિ મહારાજાએ 'લક્ષ્મીવલ્લભા' ટીકા રચી છે. પરમપૂજ્ય શ્રી**જયકીર્તિ**મહારાજે 'ઉત્તરાધ્યયનદીપિકા' નામની ટીકા રચી છે. પરમપૂજ્ય ઉપાધ્યાય શ્રી**કમલસંયમ**વિજયમહારાજે 'સર્વાર્થસિદ્ધિ' ટીકા રચી છે. આ રીતે અનેક આચાર્યભગવંતો અને વિદ્વાનોએ સમયે સમયે આ ગ્રંથ ઉપર ટીકાઓ લખી છે અને આ બધી ટીકાઓ અનેક સંસ્થાઓ દ્વારા અત્યાર સુધી પ્રકાશિત થયેલ છે.

**પૂજ્ય ઉપાધ્યાય કમલસંયમવિજયરચિત ઉત્તરાધ્યયન સર્વાર્થસિદ્ધિવૃત્તિ :–**

બૃ.ખ.પૂ.જિનભદ્રસૂરિમહારાજાના શિષ્ય પૂજ્ય ઉપાધ્યાય શ્રી**કમલસંયમ**વિજય મહારાજાએ સં. ૧૫૪૪માં ઉત્તરાધ્યયનસૂત્ર ઉપર 'બૃહટ્ટીકા'ના આધારે '**સર્વાર્થસિદ્ધિ**' નામની વૃત્તિ સંક્ષેપથી રચી છે.[૫]

**પૂજ્ય ઉપાધ્યાય કમલસંયમવિજયમહારાજરચિત અન્ય કૃતિઓ :–**

સં. ૧૫૪૯માં કર્મસ્તવવિવરણની રચના કરેલ છે. તે ઉપરાંત તેમણે સિદ્ધાંતસારોદ્ધાર, સમ્યક્ત્વોલ્લાસ ટિપ્પન (ગૂ. ગદ્યમાં) રચ્યું છે આ સિવાય એમના ઉપદેશથી અન્ય ગ્રંથો પણ લખાવાયા છે.[૬]

---

૫. "श्रीउत्तराध्ययनसूत्रसमासवृत्तिं, स्पष्टैकपाठविवृत्तिप्रगुणां प्रकुर्वे ।
नानार्थसार्थमहतीरुपजीव्य टीकाः, श्रौतार्थलीनभविकोपचिकीर्षयाऽयम्" ॥

—सर्वार्थसिद्धिटीका-भूमिकायाम्

अयमर्थो निक्षेप-नयानुयोगादिविस्तरश्च विस्तारार्थिना बृहट्टीकातः परिकलनीयः ।

—सर्वार्थसिद्धिटीका-भूमिकायाम्

૬. આ. પૂ. ઉપા. કમલસંયમ મ.ના ઉપદેશથી અણહિલ્લપુર પત્તનમાં સ્થાનાંગવૃત્તિ સં. ૧૫૭૦માં જિનહર્ષસૂરિના પટ્ટધર જિનચંદ્રસૂરિના રાજ્યે લખાઈ. (સંઘનો ભં. પાટણ)

—જૈ.સા.સં.ઈ. નવી આ. પૃ. ૩૪૦

- સં. ૧૫૨૪માં ખ. કમલસંયમ ઉપાધ્યાયે રાજગૃહીના વૈભારગિરિ પર જિનભદ્રસૂરિની પાદુકા પ્રતિષ્ઠિત કરી કે જે હાલ વિદ્યમાન છે.
- સં. ૧૫૨૬માં તે ઉપાધ્યાયના ઉપદેશથી યવનપુરમાં (જોનપુર ? માં) શ્રીમાલી મલ્લરાજે સર્વ સિદ્ધાંતો લખાવ્યા. (તે પૈકી ભગવતીની પત્ર ગુ.નં. ૩૬૮માં વિદ્યમાન છે

—જૈ.સા. સં. ઈ.—નવી આ. પૃ. ૩૩૦-૩૩૧

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

આ ઉત્તરાધ્યયન ઉપરની 'સર્વાર્થસિદ્ધિ' ટીકા સરળ અને સુબોધ છે આમ છતાં ખૂબ સુંદર ભાવો તેમાં ખોલેલ હોવાથી ભાવગર્ભિત છે. ટીકામાં અન્ય અન્ય ગ્રંથોના અનેક ઉદ્ધરણો આપ્યા છે, અને કથાનકોની સંસ્કૃતરચના હોવાથી પદ્યલાલિત્ય અતિસુંદર છે. કથાનકોમાં વચ્ચે વચ્ચે પરમાત્માની, સદ્ગુરુની દેશના તેમજ અનેક તાત્ત્વિકશ્લોકો અને અન્ય ગ્રંથના ઉદ્ધરણો વૃત્તિકારે ટાંક્યા છે. ઉદ્ધરણો બધા અમે બોલ્ડ કરેલ છે અને તાત્ત્વિકશ્લોક વિ. ઇટાલિક બોલ્ડ ફોન્ટમાં લીધેલ છે. મૂળગાથાના દરેક શબ્દો ટીકામાં બોલ્ડ કરેલ છે. **'ગીતાર્થગંગા'** સંસ્થાના જ્ઞાનભંડારમાંથી જૂની પ્રતો અમને ઉપલબ્ધ થયેલ છે, તેના આધારે આ નવીનસંસ્કરણનું કામ શુદ્ધિકરણ કરવા પૂર્વક કરવામાં આવેલ છે. પૂર્વ પ્રકાશનમાં પ્રસ્તાવના, વિષયાનુક્રમણિકા, પરિશિષ્ટો વિ. કશું ઉપલબ્ધ નથી. આ નવી આવૃત્તિમાં અમે તે તૈયાર કરેલ છે.

**ઉત્તરાધ્યયનસૂત્ર—૩૬ અધ્યયનો :—**

| | | |
|---|---|---|
| ૧. વિનય અધ્યયન | ૧૩. ચિત્રસંભૂતીય અધ્યયન | ૨૫. યજ્ઞીય અધ્યયન |
| ૨. પરીષહ અધ્યયન | ૧૪. ઈષુકારીય અધ્યયન | ૨૬. સામાચારી અધ્યયન |
| ૩. ચતુરંગીય અધ્યયન | ૧૫. સભિક્ષુ અધ્યયન | ૨૭. ખલુંકીય અધ્યયન |
| ૪. પ્રમાદ- અપ્રમાદ અધ્યયન | ૧૬. બ્રહ્મચર્ય અધ્યયન | ૨૮. મોક્ષમાર્ગગતિ અધ્યયન |
| ૫. અકામમરણ અધ્યયન | ૧૭. પાપશ્રમણીય અધ્યયન | ૨૯. સમ્યક્ત્વપરાક્રમ અધ્યયન |
| ૬. ક્ષુલ્લકનિર્ગ્રંથીય અધ્યયન | ૧૮. સંયતીય અધ્યયન | ૩૦. તપોમાર્ગગતિ અધ્યયન |
| ૭. ઔરભ્રીય અધ્યયન | ૧૯. મૃગાપુત્રીય અધ્યયન | ૩૧. ચરણવિધિ અધ્યયન |
| ૮. કાપિલીયાખ્ય અધ્યયન | ૨૦. મહાનિર્ગ્રન્થીય અધ્યયન | ૩૨. પ્રમાદસ્થાન અધ્યયન |
| ૯. નમિપ્રવ્રજ્યા અધ્યયન | ૨૧. સમુદ્રપાલીય અધ્યયન | ૩૩. કર્મપ્રકૃતિ અધ્યયન |
| ૧૦. દ્રુમપત્રક અધ્યયન | ૨૨. રથનેમીય અધ્યયન | ૩૪. લેશ્યા અધ્યયન |
| ૧૧. બહુશ્રુતપૂજા અધ્યયન | ૨૩. કેશિગૌતમીય અધ્યયન | ૩૫. અણગારમાર્ગગતિ અધ્યયન |
| ૧૨. હરિકેશીય અધ્યયન | ૨૪. પ્રવચનમાતૃ અધ્યયન | ૩૬. જીવાજીવવિભક્તિ અધ્યયન |

૧. **વિનય** :— ધર્મ વિનયમૂલ છે, તેથી પ્રથમ વિનયનો અધિકાર આમાં આપ્યો છે.

૨. **પરીષહ** :— વિનય સ્વસ્થચિત્તવાળાએ તથા પરીષહોથી પીડાતાએ પણ કરવાનો છે. તો તે પરીષહો કયા કયા છે તથા તેનું સ્વરૂપ આમાં બતાવ્યું છે.

૩. **ચતુરંગીય** :— પરીષહ શું આલંબન લઈને સહેવા તેના ઉત્તરમાં મનુષ્યત્વ, ધર્મશ્રવણ, શ્રદ્ધા અને સંયમમાં વીર્યની સ્ફુરણા કરવી એ ધર્મના ચાર અંગો દુર્લભ છે તે આમાં બતાવેલા છે.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

૪. **પ્રમાદાપ્રમાદ** :— ત્રીજામાં ચાર દુર્લભ અંગો કહ્યા તે પ્રાપ્ત થવા છતાં પ્રમાદ સેવાય તો મહાદોષ થાય છે, તેથી તેના પ્રકાર સહિત પ્રમાદનો ત્યાગ કરવા માટે અને અપ્રમાદ કરવાનું કહેવા માટે આ અધ્યયન છે.

૫. **અકામમરણ** :— મરણવિભક્તિ જ્યાં સુધી શરીરનો ભેદ-નાશ થાય ત્યાં સુધી ગુણની અભિલાષા કરવી એમ ચોથાને અંતે કહ્યું, તેથી મરણકાળે પણ પ્રમાદ ન કરવાનું કહ્યું છે માટે મરણ કેટલા પ્રકારના છે, તે અકામરણ, સકામમરણ, પંડિતમરણ વગેરે જાણવા માટે આ અધ્યયન છે.

૬. **ક્ષુલ્લકનિર્ગ્રંથીય** :— પંડિતમરણ વિદ્યા-જ્ઞાન તથા ચારિત્રવાળા સાધુ-નિર્ગ્રંથને હોય છે. તેથી તેવા ક્ષુલ્લક-નાના સાધુનું સ્વરૂપ આમાં કહ્યું છે.

૭. **ઔરભ્રીય** :— નિર્ગ્રંથપણું રસગૃદ્ધિના ત્યાગથી પ્રાપ્ત થઈ શકે, ને તે ત્યાગ તેના દોષ જાણવાથી બરાબર થઈ શકે, તે દોષ દેખાડવા માટે ઉરભ્ર(ઘેટું) કાગણી, આમ્રફળ, વ્યવહાર-વેપાર અને સમુદ્ર એ પાંચના દૃષ્ટાંતો આપે છે.

૮. **કાપિલીય** :— રસગૃદ્ધિનો ત્યાગ નિર્લોભીને થઈ શકે, તેથી આમાં નિર્લોભપણું બતાવે છે. તેમાં કપિલમુનિનું ચરિત્ર હોવાથી તે અધ્યયનું નામ કાપિલીય છે.

૯. **નમિપ્રવ્રજ્યા** :— નિર્લોભી આ ભવમાં પણ ઇંદ્રાદિથી પૂજાય છે, તે દેખાડવા આ અધ્યયન કહેવાય છે. આમાં નમિનામના પ્રત્યેકબુદ્ધની પ્રવ્રજ્યા-દીક્ષાનું વર્ણન છે. તે નમિની પેઠે બીજા ત્રણ પ્રત્યેકબુદ્ધ કરકંડુ, દ્વિમુખ અને નગ્ગતિ થયા છે તેનું પણ વર્ણન છે.

૧૦. **દ્રુમપત્રક** :— દ્રુમ એટલે ઝાડનું, પત્ર એટલે પાંદડું પાકી જતાં પડી જાય છે, તેમ જીવન ક્રમે કરી ક્ષીણ થાય, છે માટે હે ગૌતમ ! એક સમય માત્ર પણ પ્રમાદ કરવો નહિ એ પ્રકારથી ભગવાન મહાવીર પરમાત્મા અનુશાસન-શિક્ષા આપે છે.

૧૧. **બહુશ્રુતપૂજા** :— દશમામાં પ્રમાદના ત્યાગનો જે ઉપદેશ આપ્યો તે ઉપદેશ વિવેકથી ધારી શકાય ને તે વિવેક બહુશ્રુતની પૂજાથી પ્રાપ્ત થાય છે. આમાં અબહુશ્રુતપણું અને બહુશ્રુતપણું સમજાવી તે શાથી પ્રાપ્ત થાય તે અવિનીત-વિનીતનાં સ્થાનો વગેરે બતાવેલ છે.

૧૨. **તપઃસમૃદ્ધિ-હરિકેશીય** :— બહુશ્રુતે તપ પણ કરવો જોઈએ, તેથી તપની સમૃદ્ધિનું વર્ણન ને હરિકેશબલ નામના સાધુનું આમાં ચરિત્ર છે.

૧૩. **ચિત્રસંભૂતીય** :— તપ કરનારે નિદાન (નિયાણા)નો ત્યાગ કરવો ઘટે, તે માટે નિદાનનો દોષ બતાવવા ચિત્ર અને સંભૂતનું ઉદાહરણ અહીં અપાય છે.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**૧૪. ઈષુકારીય** :– આમાં નિર્નદાનતા–નિયાણરહિતપણાનો ગુણ કહ્યો છે. એક જ વિમાનમાં રહેલ છ જીવો ત્યાંથી ચ્યવી ઈષુકાર નામના પુરમાં ઉપજ્યા અને તે છ પૈકી એક ઈષુકાર નામનો રાજા થયો, તેથી આ અધ્યયનનું નામ ઈષુકારીય છે.

**૧૫. સભિક્ષુક** :– નિયાણા રહિતપણાનો ગુણ ભિક્ષુ-સાધુને થાય છે, તેથી ભિક્ષુના ગુણો આમાં કહેવાયા છે.

**૧૬. બ્રહ્મચર્યગુપ્તિ** :– બ્રહ્મચર્યસમાધિ–સાધુના ગુણો બ્રહ્મચર્યમાં જે સ્થિર હોય તેને તત્ત્વથી સંભવે. બ્રહ્મચર્ય તેની ગુપ્તિઓથી પાળી શકાય. તે ગુપ્તિઓ મન, વચન અને કાયાની છે. પછી બ્રહ્મચર્યનાં દશ સ્થાનો-સમાધિસ્થાનો કહ્યાં છે (કે જેની અંદર બ્રહ્મચર્યની નવવાડ સમાઈ જાય છે) કે જેથી તે સમાધિથી પાળી શકાય.

આ પ્રમાણે ભાગ-૧માં ૧-૧૬ અધ્યયનોનું વિવેચન કરવામાં આવેલ છે.

વૃત્તિના અંતે ૧થી ૨૦ શ્લોકમાં ટીકાકારે પોતાના ગુરુવર્યોની પ્રશસ્તિ આપેલ છે, તેમાં જણાવેલ છે કે સં. ૧૫૪૪માં ઉત્તરાધ્યયનની આ વૃત્તિ પૂ. ઉપા. **કમલસંયમ** વિજયમહારાજે રચેલ છે અને તેઓને પૂ.શ્રીમદ્ મુનિશ્રી**મેરુવિજય**વાચકવર્યે આ વૃત્તિ રચનામાં સહાય કરેલ છે અને આ વૃત્તિ રચનામાં જે કાઈ ઉત્સૂત્ર હોય તે કૃપા સહિત શ્રુતધરો શોધન કરે. જેસલમેર દુર્ગમાં વિજયાદશમીના દિવસે પૂ. શ્રી**જિનભદ્ર**સૂરિના સ્મરણપ્રસાદથી બૃહદ્વૃત્તિના આધારે આ સંસ્કૃતકથાવિશેષયુક્ત વૃત્તિ પ્રાયઃ સંક્ષેપથી રચેલ છે તે જિનશાસન જયવંતુ વર્તે ત્યાં સુધી જય પામો.[૭]

**પૂર્વ પ્રકાશન અંગે :–**

બૃ.ખ.પૂ. શ્રી**જિનભદ્ર**સૂરિશિષ્ય-મુનિશ્રી**કમલસંયમ**ઉપાધ્યાયવિરચિત તથા શાસ્ત્રવિશારદ જૈનાચાર્ય શ્રીવિજયધર્મસૂરિશિષ્ય-મુનિશ્રી**જયંત**વિજયસંશોધિત આ **'સર્વાર્થસિદ્ધિ'**વૃત્તિ સહિત ઉત્તરાધ્યયનસૂત્ર આગ્રામાં રહેનાર ઉપકેશ-જ્ઞાતિના શ્રેષ્ઠિ

---

૭. "तेष्वन्वहं विजयवैभवराजिषूपाध्यायाग्रणीः **कमलसंयम एष** सोऽहम् ।
**अम्भोधि-वारिनिधि-बाण-शशाङ्क**वर्षे [१५४४], **श्रीउत्तराध्ययवृत्ति**मिमां चकार ॥१६॥

साहाय्यमत्र चक्रुः श्रीमन्**मुनिमेरु**वाचका वर्याः ।
यत् किञ्चिदिहोत्सूत्रं तच्छोध्यं श्रुतधरैः सकृपैः ॥१७॥

**जेसलमेरौ** दुर्गे विजयदशम्यां समर्थिता सेयम् ।
श्री**जिनभद्र**मुनीश्वरणस्मरणप्रसादेन ॥१८॥

उपजीव्य **बृहद्वृत्तिं** विहितेयं प्रायशः समासेन ।
संस्कृतकथाविशेषा यावज्जिनशासनं नन्द्यात्" ॥१९॥ – टीकाकृत्प्रशस्तौ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

છોગમલ્લના સુપુત્ર લક્ષ્મીચંદવૈદે કરેલ જ્ઞાનપંચમી ઉદ્યાપન નિમિત્તે આવેલ દ્રવ્યની સહાયથી **"લક્ષ્મીચંદ્ર જૈન લાયબ્રેરી"** નામની સંસ્થા દ્વારા પ્રતાકારે ચાર ભાગમાં વીરસંવત્ ૨૪૯૯, વિક્રમસંવત્ ૧૯૮૦ સન્ ૧૯૨૩માં પ્રકાશિત થયેલ છે.[૮]

**ઉત્તરાધ્યયનસૂત્ર અને તેની સર્વાર્થસિદ્ધિટીકામાં આવતી વિશેષ બાબતો : અધ્યયન ૧થી ૧૫:–**

**૧. વિનય** :– **ગાથા-૧**માં દ્રવ્ય અણગાર અને ભાવઅણગારનું સ્વરૂપ તથા પાંચ પ્રકારના વિનયો બતાવવામાં આવેલ છે–(૧) લોકોપચારવિનય, (૨) અર્થવિનય, (૩) ભયવિનય, (૪) કામવિનય અને (૫) મોક્ષવિનય.

**ગાથા-૧૩**માં ચંડરુદ્રાચાર્યશિષ્યની કથામાં **શ્લોક-૨૯માં** વિનયનું મહત્ત્વ બતાવ્યું છે.[૯]

**ગાથા-૧૫ની** ટીકામાં દાંત આત્માનું સ્વરૂપ બતાવતાં કહ્યું છે કે, "दान्तात्मानो हीहैव सूरैरपि पूज्यन्ते, मोक्षं च साधयन्ति, अदान्तात्मनस्तु शब्दादिविषयगृद्धा इहैव विनश्यन्ति" ।

ચૌરદ્વયની કથામાં **શ્લોક ૨૦થી ૨૫માં** રાત્રિભોજનવિરતિ નામના વ્રતનું માહાત્મ્ય બતાવ્યું છે.

**ગાથા-૪૦ની** ટીકામાં કુશિષ્યની કથામાં કહ્યું છે કે, દુરાશયવાળા જીવો રત્નપ્રાયઃ ગુરુનો યોગ પામીને પણ અનર્થને કરતાં તેમની ભક્તિમાં ઉદ્વિગ્ન ચિત્તવાળા બને છે.[૧૦]

**ગાથા-૪૬ની** ટીકામાં વાચકના શ્લોકોના ઉદ્ધરણપૂર્વક વિનયનું ફળ બતાવવામાં આવેલ છે.

**૨. પરીષહ** :– **ગાથા-૧૧ની** ટીકામાં સુમનોભદ્રમુનિની કથામાં **શ્લોક-૫થી ૮માં** નરકના દુઃખનું વર્ણન કરેલ છે.

**ગાથા-૧૬ની** ટીકામાં આત્માનો ભવથી નિસ્તાર કરવા માટે આત્મગવેષક બનવા કહ્યું અને સ્ત્રીપરીષહ શ્રીરામચંદ્રર્ષિની જેમ સહન કરવાં કહ્યું છે. ત્યાં વિસ્તારથી 'પદ્મચરિત્ર'માંથી ૧થી ૨૩૪ શ્લોકોના વર્ણન દ્વારા રામચંદ્રની કથા કહેલ છે.

**ગાથા-૨૩ની** ટીકામાં પુરંદર કથાનકમાં વજ્રબાહુરાજકુમાર મુનિની સ્તુતિ કરે છે તે

---

૮. આ સિવાય કમલસંયમકૃત ટીકા સાથે યશોવિજય જૈન ગ્રંથમાલા, ભાવનગર, ઈ. સં. ૧૯૨૭માં પ્રકાશિત થયાનો ઉલ્લેખ જૈ.બૃ.સા.ઈ. ગુ. ભા. ૩ પૃ. ૧૧૬ ઉપર છે.

૯. "विनयः शासने मूलं विनीतः संयतो भवेत् ।
आराध्या गुरुवश्चेति वेद तत्त्वं स तत्क्षणात्" ॥ – अ० १ गा० १३ श्लो० २९

१०. "रत्नप्रायं गुरोर्योगं प्राप्यापि हितहेतुकम् ।
अनर्थयन्तस्तद्भक्त्युद्विग्नचित्ता दुराशयाः" ॥ – अ० १ गा० ४० श्लो० ७

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**શ્લોક ૧૨થી ૧૬**માં અને મુનિદેશના આપે છે તે **શ્લોક ૨૦થી ૨૫**માં વર્ણન કરેલ છે.

**ગાથા-૨૬ની** ટીકામાં કહ્યું છે કે, મુનિ દંડાદિ વડે તાડન કરાયેલા પણ તિતિક્ષા-ક્ષમાને ધારણ કરે "यतः क्षमामूल एव मुनिधर्मो" यदुक्तम्—થી ત્યાં પ્રશમરતિનો **શ્લોક-૧૬૮** ઉદ્ધરણ તરીકે આપેલ છે.[11]

**ગાથા-૨૭ની** ટીકામાં પણ આજ વાત અન્ય પ્રકારે જણાવી છે કે, શ્રમણ, સંયત, દાંત એવા મહાત્માને કોઈ અનાર્ય ગ્રામાદિમાં હણે ત્યારે શું કરે ? તો કહે છે કે, 'જ્ઞાનસ્વરૂપ એવા જીવનો નાશ થતો નથી પરંતુ દેહનો જ નાશ થાય છે' એ પ્રમાણે સંયત વિચારે અને આક્રોશ અને વધને દૃઢપ્રહારીની જેમ સહન કરે અને ત્યાં દૃઢપ્રહારીની કથામાં **શ્લોક ૩૨થી ૩૬**માં દૃઢપ્રહારીની ઉત્તમભાવના બતાવેલ છે.

**ગાથા-૨૯ની** ટીકામાં યાંચા પરિષહના વિષયમાં બલદેવર્ષિની કથામાં શ્લોક ૫૦થી ૫૩માં કુરંગની (હરિણની) દાન વિશેની ભાવના બતાવેલ છે. અને મહાત્મા, કુરંગ અને રથી ત્રણે મૃત્યુ પામીને પાંચમા દેવલોકમાં ઉત્પન્ન થાય છે તે બતાવેલ છે.[12]

**ગાથા-૪૦ની** ટીકામાં કહ્યું છે કે, સાધુ પ્રજ્ઞાપરીષહને સમ્યગ્ સહન કરે અને પ્રજ્ઞાવિકલ હોવાથી વિચારે કે "नूनं मया पूर्वं कर्माण्यज्ञानफलानि ज्ञानावरणीयादीनि कृतानि निन्दादिभिरर्जितानि" । અને જ્ઞાનાવરણીય કર્મ કેવી રીતે બંધાય તેમાં यदुक्तम्—થી ઉદ્ધરણ આપેલ છે.[13]

**ગાથા-૪૩ની** ટીકામાં કહ્યું છે કે, "इत्थमज्ञाने वैकलव्यं, ज्ञाने च नोत्सेकः कार्यं । यतः-થી તેમાં ઉદ્ધરણ આપેલ છે.[14]

---

११. यदुक्तम्—"धर्मस्य दया मूलं न चाक्षमावान् दयां समाधत्ते ।
तस्माद् यः क्षान्तिपरः स साधयेत्युत्तमं धर्मम्" ॥ — अ० २ गा० २६ वृत्तौ

१२. "अत्रान्तरे महावातप्रहतः स महीरुहः
निपपात तदाघातात् ते त्रयोऽपि मृतिं गताः ॥
तपसा पात्रदानेन सादुदानप्रमोदतः ।
अभूवन् पञ्चमे कल्पे ते त्रयोऽपि दिवौकसः" ॥
— अ० २ गा० २९ वृत्तौ बलदेवर्षिकथा-श्लो० ५४-५५

१३. "ज्ञानस्य ज्ञानिनां वाऽपि निन्दा-प्रद्वेष-मत्सरैः ।
उपघातैश्च विघ्नैश्च ज्ञानघ्नं कर्म बध्यते" ॥ — अ० २ गा० ४० वृत्तौ

१४. "ज्ञानं मददर्पहरं माद्यति यस्तेन तस्य को वैद्यः ? ।
अमृतं यस्य विषायति तस्य चिकित्सा कथं क्रियते" ? ॥ — अ० २ गा० ४३ वृत्तौ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**ગાથા-૪૫ની** ટીકામાં સમ્યક્ત્વપરીષહના વિજય માટે જૈનપ્રવચનમાં દૃઢતાપૂર્વક સુલસાની જેમ આ પરીષહ મુનિએ સહન કરવો જોઈએ એમ કહેલ છે અને સુલસાનું કથાનક ૧૧૦ શ્લોકમાં વર્ણન કરેલ છે.

**૩. ચતુરંગીય :–** મુક્તિની પ્રાપ્તિમાં આસન્નઉપકારીપણું હોવાથી ધર્મના દુર્લભ એવા ચાર અંગો બતાવ્યા છે–(૧) મનુષ્યપણું, (૨) શ્રુતિ, (૩) શ્રદ્ધા અને (૪) સંયમમાં સામર્થ્ય અને મનુષ્યત્વાદિ દુર્લભપણામાં ચોલ્લક આદિ દશ દૃષ્ટાંતો બતાવેલ છે અને તેમાં છઠ્ઠા સ્વપ્નના દૃષ્ટાંતમાં મૂલદેવનું કથાનક ૨૮૬ શ્લોકોમાં વર્ણવેલ છે. તેમાં **શ્લોક-૪૯માં** કહ્યું છે કે ઉપકાર, પ્રિયઆલાપ અને સ્થિરપ્રીતિ આ ત્રણ ચંદ્રમામાં શિશિરતાની જેમ સજ્જનોમાં સ્વભાવથી સિદ્ધ છે.[૧૫]

**શ્લોક-૧૧૭ના** ઉત્તરાર્ધમાં કહ્યું છે કે લક્ષ્મી વગેરે સર્વ સુખે પ્રાપ્ત થઈ શકે છે. ગુણવાન મનુષ્ય દુઃખે પ્રાપ્ત થાય છે.[૧૬]

**ગાથા ૨થી ૭માં** મનુષ્યપણાની દુર્લભતા. **ગાથા-૮માં** શ્રુતિની દુર્લભતા **ગાથા-૯માં** શ્રદ્ધાની દુર્લભતા અને **ગાથા-૯ની** ટીકામાં આઠ નિહ્નવોના દૃષ્ટાંત બતાવેલ છે અને **ગાથા-૧૦માં** સંયમમાં વીર્યની દુર્લભતા બતાવતાં કહ્યું કે, ચારિત્રમોહનીય કર્મના ઉદયથી શ્રેણિકાદિની જેમ ઘણાં જીવો શ્રદ્ધા કરવા છતાં પણ સંયમધર્મને સ્વીકારી શકતા નથી.[૧૭]

**ગાથા-૧૪માં** "विसालिसेहिं सीलेहिं" અહીં 'विसालिस' શબ્દ માગધીભાષાનો પ્રયોગ છે તેનો અર્થ 'विसदृशैः शीलैः' થાય છે.

**૪. અસંસ્કૃત :– ગાથા-૧માં** કહ્યું છે કે આયુષ્ય અસંસ્કૃત છે. ઇન્દ્રાદિ દેવો વડે પણ ત્રુટિત આયુષ્ય સંધાવા માટે શક્ય નથી અને તેમાં यतः- થી ઉદ્ધરણ આપેલ છે[૧૮] અને ત્યારપછી કહ્યું છે કે 'अतो मा प्रमादीः' । જરાગ્રસ્ત અર્થાત્ મૃત્યુની સમીપે ગયેલાને કોઈ શરણ નથી તેથી જ્યાં સુધી મૃત્યુ વગેરે ન આવે ત્યાં સુધી ધર્મમાં પ્રમાદ ન કરવો તેમાં यदुक्तम्–થી ઉદ્ધરણ આપેલ છે.[૧૯]

---

१५. "उपकारः प्रियालापः स्थिरा प्रीतिरिति त्रयम् ।
सतां स्वभावतः सिद्धमिन्दौ शिशिरता यथा" ॥ – अ० ३ गा० १ वृत्तौ स्वप्नदृष्टान्ते

१६. लक्ष्म्यादि सर्वं सुप्रापं दुष्प्रापो गुणवान् जनः ॥ – अ० ३ गा० १ वृत्तौ स्वप्नदृष्टान्ते

१७. "सुइं च लद्धुं सद्धं च वीरियं पुण दुल्लहं ।
बहवे रोयमाणा वि नो एणं पडिवज्जए" ॥ – अ० ३ गा० १०

१८. "मङ्गलैः कौतुकैर्योगैर्विद्यामन्त्रैस्तथोषधैः ।
न शक्ता मरणात् त्रातुं सेन्द्रा देवगणा अपि" ॥ – अ० ४ गा० १ वृत्तौ

१९. "तद् यावदिन्द्रियबलं जराय रोगैर्न बाध्यते प्रसभम् ।
तावच्छरीरमूर्च्छां त्यक्त्वा धर्मे कुरुष्व मतिः" ॥ – अ० ४ गा० १ वृत्तौ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**ગાથા-૯માં** કહ્યું છે કે, "सुत्तेसु आवी पडिबुद्धजीवी".....!! એ ગાથાની ટીકામાં કહ્યું છે કે 'धर्मिणो जागरणस्यैव बहुफलत्वेन बहुमतत्वात्' ॥ અને તેમાં જયંતીશ્રાવિકાએ વીર પરમાત્માને પૂછેલ પ્રશ્નો અંગે પંચમાંગ ભગવતીનો આલાપક "सुत्ततं भंते ! साहू ? जागरियन्तं भंते साहू ?... ઇત્યાદિ ઉદ્ધરણ આપેલ છે.

**ગાથા-૧૨માં** કહ્યું છે, કે મંદ એવા સ્પર્શો બહુ લોભનીય છે માટે મૃદુસ્પર્શ, મધુરરસ વગેરે લોભનીય પદાર્થોમાં મન ન કરવું અને તેમાં મન કેવી રીતે ન થાય ? તે બતાવતાં કહ્યું છે કે "रक्षेत क्रोधं, विनयेत्-स्फेटयेद् मानं, माया परचञ्चनात्मिकां न सेवत-न कुर्यात्, प्रजह्यात् परित्येजेल्लोभं" ।

ચતુર્થ અસંસ્કૃત અધ્યયનની ૧૩ ગાથાઓ અત્યંત ભાવનીય છે. વારંવાર ભાવન કરવાથી આત્મજાગૃતિ આવે છે.

**૫. અકામમરણ** :– પાંચમા અધ્યયનમાં નિર્યુક્તિની બે ગાથા બતાવીને સત્તર પ્રકારના મરણો બતાવ્યા છે.[૨૦] તે મરણોના પ્રકારોને જાણીને બાલમરણનો ત્યાગ કરવા કહ્યું છે અને પંડિત મરણ ઉપાદેય બતાવેલ છે અને તે રીતે અપ્રમત્તપણું થાય છે તેમ જણાવેલ છે.

**ગાથા ૨।૩માં** સકામરણ અને અકામમરણ અંગે સ્પષ્ટતા કરીને **ગાથા-૩માં** વાચકનું ઉદ્ધરણ આપેલ છે તે અત્યંત મહત્ત્વનું છે.[૨૧]

**ગાથા-૧૮માં** કહ્યું છે કે "मरणं पि सुपुण्णाणं जहा मे तमणुस्सुयं । विप्पसन्नमणाघायं संजयाणं वुसीमओ ॥५-१८॥ **ગાથા-૧૮ની** ટીકામાં કહ્યું છે કે "अंते समाहिमरणं अभव्वजीवा न पावंति" त्ति वचनात् ॥ – ५-१८ वृत्तौ

**ગાથા-૩૨માં** છેલ્લે કહ્યું કે "अह कालंमि संपत्ते आघायाय समुस्सयं । सकाममरणं मरइ तिण्हमन्नयरं मुणी" ॥५-३२॥ મરણકાલ પ્રાપ્ત થાય ત્યારે સંલેખનાદિ વડે ભક્તપરિજ્ઞા, ઇંગિની અને પાદપોગમન અનશન કરીને બાહ્ય ઔદારિક શરીર અને અંતરંગ કાર્મણશરીરનો નાશ કરીને સકામમરણથી મુનિ-તપસ્વી મૃત્યુ પામે.

---

२०. "आवीइ ओहि अंतिय वलायमरणं वसट्टमरणं च ।
अंतोसल्लं तब्भव बालं तह पंडियं मीसं ॥१॥
छउमत्थमरण केवलि वेहायस गिद्धपिट्ठमरणं च ।
मरणं भत्तपरिन्ना इंगिणी पओवगमणं च" ॥२॥ – अ० ५ भूमिकायाम्

२१. "सञ्चिततपोधनानां नित्यं व्रतनियमसंयमरतानाम् ।
उत्सवभूतं मन्ये मरणमनपराधवृत्तीनाम्" ॥ – अ० ५ गा० ३ वृत्तौ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**૬. ક્ષુલ્લકનિર્ગ્રંથીય :–** છઠ્ઠા અધ્યયનની શરૂઆતમાં નિર્ગ્રંથના સ્વરૂપને બતાવતાં નિર્યુક્તિકારે કહેલ પાંચ નિર્ગ્રન્થના સ્વરૂપનું ઉદ્ધરણ આપેલ છે.[૨૨] અને તે નિર્ગ્રન્થો જ્ઞાનીઓ જ હોય છે, તેથી પ્રથમ તેનાથી વિપરીત અજ્ઞાનીનું સ્વરૂપ સૂત્રકારે બતાવેલ છે

**ગાથા-૧૨માં** જણાવેલ છે કે, શરીરનું પાલનપોષણ, સ્નાનાદિમાં બદ્ધાગ્રહવાળા શરીરમાં આસક્ત કેટલાક જીવો આ પ્રમાણે વિચારતા નથી અને ટીકામાં અપ્રભ્રંશ ભાષામાં તે શ્લોક બતાવેલ છે.[૨૩]

**ગાથા-૧૩માં** ઉપદેશનું સર્વસ્વ બતાવતાં કહે છે કે, પૃથિવ્યાદિ અઢાર પ્રકારના એકેન્દ્રિય જીવોની વિરાધના ન થાય તે રીતે સંયમમાર્ગમાં પ્રવર્તવું જોઈએ. ત્યાં પૃથિવી આદિ ૧૮ ભેદોનું ઉદ્ધરણ નીચે પ્રમાણે આપેલ છે.[૨૪]

**૭. ઔરભ્રીય :–** સાતમા ઔરભ્રીય અધ્યયનની શરૂઆતમાં કહ્યું છે કે, નિર્ગ્રન્થપણું રસગૃદ્ધિના ત્યાગથી જ થાય છે, અને રસગૃદ્ધિના દોષદર્શક ઉરભ્રાદિ પાંચ દષ્ટાંત નિર્યુક્તિકારે કહ્યાં છે તે નિર્યુક્તિકારની ગાથા ઉદ્ધરણમાં આપેલ છે.[૨૫] અને ત્યારપછી સૂત્રકારે ઉરભ્રાદિ પાંચ દષ્ટાંતો દાર્ષ્ટાંતિક ઘટના સાથે બતાવ્યા છે.

વ્યવહારવિષયક ઉપમાને ધર્મવિષયક બતાવતાં **ગા. ૧૬ની** ટીકામાં કહે છે કે अत्र संसारित्रयसम्प्रदायः–ત્રણ સંસારી જીવોનો સંપ્રદાય બતાવે છે–એક સંસારીજીવ માર્દવાદિગુણોપેત છે, તે આર્જવપરિણામથી હજાર કાર્षાપણ તુલ્ય ફરી સંસારીપણું પ્રાપ્ત કરે છે. બીજો સંસારીજીવ સમ્યગ્દર્શન અને જ્ઞાનમાં સુસ્થિત છે, તે સરાગસંયમ દ્વારા લાભ

---

૨૨. "बउस पुलाय कुसीला निग्गंथ सणायगा य नायव्वा ।
एएसिं पंचण्हं वि होइ विभासा इमा कमसो" ॥१॥ – अ० ६ भूमिकायाम्

૨૩. "तह तह लालिओ निच्चकालुजोडिओ रुच्चंतइ
खलु जिम थक्कइं वलि विवंठ जीवि चलंतइ ।
दड्डसरीरह तासु रे सिजण पाउ म किज्जओ
थरहर जीविउ जाइ चित्त परलोयह दिज्जओ" ॥१॥ – अ० ६ गा० १२ वृत्तौ

૨૪. "पुढवि जलजलणवाया मूला खंधग्गपोरबीया य ।
बितिचउपणिंदितिरिया य नारया देवसंघाया ॥१॥
सम्मुच्छिमकम्माकम्मभूमिगनरा तहंतरद्दीवा ।
भावदिसा दिस्सइ जं संसारी निययमेयाहिं" ॥२॥ – अ० ६ गा० १३ वृत्तौ

૨૫. "उरब्भे कागिणी अंबए य ववहारे सायरे चेव ।
पंचेए दिट्ठंता ओरब्भीयंमि अज्झयणे" ॥१॥ – अ० ७ भूमिकायाम्

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

સમાન દેવપણું પામે છે અને ત્રીજો સંસારીજીવ હિંસાદિસાવદ્યાચારયુક્ત છે, તે છિન્નમૂલવણિક્ સમાન તિર્યંચ-નરકભાવને પામે છે.[૨૬]

**૮. કાપિલીય :**– આઠમા અધ્યયનના પ્રારંભમાં કપિલઋષિનું ચરિત્ર ૮૮ શ્લોક દ્વારા વૃત્તિકારે કહેલ છે, તેમાં તેમાં **૫૯-૬૦માં** શ્લોકમાં સત્કર્મના પરિપાક દ્વારા તૃષ્ણાથી અતિશય નિર્વેદ પામેલા વિરાગથી કપિલ ચિંતવે છે કે, માષ સુવર્ણના કાર્ય માટે પ્રાપ્ત થયેલું મારું મન કોટિ સુવર્ણની યાચના માટે પણ સ્થિર થતું નથી. અહો ! તૃષ્ણાનો વિલાસ તો જુઓ ![૨૭]

ત્યારપછી **શ્લોક-૭૨માં** કહ્યું છે કે,

**''जहा लाहो तहा लोहो लाहा लोहो पवड्डए ।**
**दोमासाकणयं कज्जं कोडीए वि न निट्ठियं'' ॥ – अ० ८ भू० श्लो० ७२**

ઉત્તરાધ્યયનસૂત્ર અધ્યયન ૮ ગાથા-૧૩।૧૪માં કહ્યું છે કે,

**''जे लक्खणं च सुविणं च अंगविज्जं च जे पउंजंति ।**
**न हु ते समणा वुच्चंति एवं आयरिएहिं अक्खायं'' ॥**
**''इह जीवियं अनियमेत्ता पब्भट्ठा समाहिजोएहिं ।**
**ते कामभोगरसगिद्धा उववज्जंति आसुरे काए'' ॥१४॥ – अ० ८ गा० १३।१४**

''જે લક્ષણ, સ્વપ્ન અને અંગવિદ્યાનો પ્રયોગ કરે છે તે સાધુઓ કહેવાતા નથી, એ પ્રમાણે આચાર્યોએ કહેલ છે.

આ જન્મમાં જીવનને તપ વગેરેથી નિયંત્રિત નહિ કરવાથી સમાધિયોગવડે (શુભ મન, વચન અને કાયાના યોગથી) અત્યંત ભ્રષ્ટ થયેલા કામભોગો અને રસમાં આસક્ત

---

૨૬. ''संसारिणस्त्रयः सत्त्वाः प्राप्ता मानुष्यकं भवम् ।
तत्रैको मध्यमारम्भपरिग्रहपरायणः ॥१॥

मार्दवादिगुणोपेतः कालं कृत्वाऽऽर्जवाशयः ।
कार्षापणसहस्राभं नृत्वमाप्नोति तत् पुनः ॥२॥

द्वैतीयीकः पुनः सम्यग्दर्शनज्ञानसुस्थितः ।
सरागसंयमेनाप देवत्वं लाभसन्निभम्'' ॥३॥ – अ० ७ गा० १६ वृत्तौ

२७. ''सत्कर्मणः परिपाकात् कस्याप्याकस्मिकादथ ।
तृष्णातिशयनिर्विण्णो विरागादित्यचिन्तयत् ॥

स्वर्ण-माषकयोः कार्ये प्राप्तस्यापि न मे मनः ।
कोट्यादौ लभते स्थैर्यमहो ! लीलायितं तृषः'' ॥ – अ० ८ भू० श्लो० ५९-६०

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

થયેલા તેઓ અસુરનિકાયમાં ઉત્પન્ન થાય છે.''

**૯. નમિપ્રવ્રજ્યા** :– નવમા અધ્યયનની શરૂઆતમાં વૃત્તિકારે ૨૧૬ શ્લોકોમાં કરકંડુ પ્રત્યેકબુદ્ધ, ૫૮ શ્લોકોમાં દ્વિમુખપ્રત્યેકબુદ્ધ, ૧૬૭ શ્લોકોમાં નમિપ્રત્યેકબુદ્ધ અને ૧૬૪ શ્લોકોમાં નગ્ગતિપ્રત્યેકબુદ્ધનું ચરિત્ર વર્ણવીને સૂત્રની શરૂઆત કરેલ છે અને તેમાં નમિરાજર્ષિ અભિનિષ્ક્રમણ માટે નીકળે છે ત્યારે બ્રાહ્મણરૂપે શક્રમહારાજા આવે છે અને નમિરાજર્ષિના આશયની પરીક્ષા માટે ઇંદ્રમહારાજ અને નમિ વચ્ચે અદ્ભુત સંવાદ પ્રયોજાય છે. છેલ્લે સ્તુતિ કરતાં ઇંદ્ર મહારાજા કહે છે કે,

''અહો ! મુનિ તમે ક્રોધને જીત્યો, અહો જીત્યા વળી માન,
અહો માયા તમે મુનિવર મેલી, અહો મુનિ તુમે અસમાન
હો ! ભવિયાં એહવા મુનિવર વંદો !

ઇહ ઉત્તમ પરભવ વળી ઉત્તમ થાશે ઉત્તમ મુનિરાજ
સકલ કર્મનો વંશ ઉચ્છેદી લ્હેશ્યો શિવપદ રાજ
હો ! ભવિયાં એહવા મુનિવર વંદો !''[૨૮]

**૧૦. દ્રુમપત્રીય** :– ચારિત્ર પ્રત્યે નિષ્પ્રકંપતા જરૂરી છે અને તે અનુશાસનથી થાય છે તેથી આ દશમા અધ્યયનમાં શ્રીવીરપરમાત્માએ ગૌતમસ્વામી પ્રત્યે ઉપદેશ આપ્યો છે તે બતાવેલ છે—શરૂઆતમાં શાલ-મહાશાલનું વૃત્તાંત બતાવેલ છે અને શાલ-મહાશાલ વિ.ને ચંપાનગરીના ઉદ્યાનમાં પરમાત્મા બીરાજમાન છે, ત્યાં જતાં માર્ગમાં શુભધ્યાનની સંપત્તિથી કેવલજ્ઞાન થાય છે. ત્યારે ગૌતમસ્વામીને વિષાદ થાય છે કે મને હજુ સુધી કેવલજ્ઞાન નહીં ? ત્યારે પરમાત્મા કહે છે કે જે મનુષ્ય અષ્ટાપદની યાત્રા કરે છે તે તદ્ભવમાં મુક્તિ પામે છે તે સાંભળીને પરમાત્માની અનુજ્ઞા લઈને અષ્ટાપદચૈત્યવંદન માટે ગૌતમસ્વામી જાય છે ત્યાં વૈશ્રવણ પણ ચૈત્યવંદન માટે મિત્રસહિત આવે છે ત્યાં ગૌતમસ્વામી પુંડરીક અધ્યયન સંભળાવે છે.[૨૯]

---

२८. ''अहो ! ते निज्जिओ कोहो अहो ! ते माणो पराजिओ ।
अहो ! ते निरक्किया माया अहो ! ते लोहो वसीकओ ॥
अहो ! ते अज्जवं साहू अहो ! ते साहु मद्दवं ।
अहो ! ते उत्तमा खंती ! अहो ते मुत्ति उत्तमा ॥
इहं सि उत्तमो भंते ! पेच्चा होहिसि उत्तमो ।
लोगुत्तमुत्तमं ठाणं सिद्धिं गच्छसि नीरओ'' ॥ – अ० ९ गा० ५६।५७।५८

२९. ''समित्राय समेताय नन्तुं वैश्रवणाय सः ।
तपःकृशान् मुनीन् बाढं वर्णयामास गौतमः ॥३६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ત્યારપછી સૂત્રકાર **૧થી ૩૭** ગાથામાં આ અધ્યયનનું વર્ણન કરેલ છે તેમાં દરેક ગાથાનું છેલ્લું ચરણ "समयं गोयम ! मा पमायए" ॥ છે. તેમાં પ્રથમ ગાથા આ પ્રમાણે છે-

**"दुमपत्तए पंडुयए जहा निवडइ राइगणाण अच्चए ।**
**एवं मणुयाण जीवियं समयं गोयम ! मा पमायए" ॥ – अ० १० गा० १**

અપ્રમાદનો ઉપદેશ આપતાં **ગાથા-૨૧માં** કહે છે કે,

**"परिजूरइ ते सरीरयं केसा पंडुइया हवंति ते ।**
**से सोयबले य हायई समयं गोयमं ! मा पमायए" ॥ – अ० १० गा० १२**

ત્યારપછી આ જ રીતે चक्खुबले, घाणबले, जिह्वाबले, फासबले અને सव्वबले પદો મૂકીને **૨૨થી ૨૬** પાંચ ગાથા આપેલ છે.

**૧૧. બહુશ્રુતપૂજા** :– અપ્રમાદ માટે અનુશાસન જરૂર છે અને તે વિવેકવાળાને બહુશ્રુતની પૂજાથી થાય છે, તેથી બહુશ્રુતપૂજાસૂચક આ અધ્યયન બતાવેલ છે. આમાં ઉચિત ક્રિયાવિનયરૂપ બહુશ્રુતપૂજાસ્વરૂપ ભિક્ષુના આચાર વર્ણવેલ છે અને બહુશ્રુતનું સ્વરૂપ જાણવા માટે પહેલાં વિપર્યય જ્ઞાન જરૂરી હોવાથી અબહુશ્રુતના આઠ સ્થાનો **ગાથા-૩માં** બતાવીને અબહુશ્રુતપણાના કારણરૂપે ચૌદ સ્થાનો દ્વારા અવિનીતનું સ્વરૂપ **ગાથા-૬થી ૯માં** બતાવેલ છે. ત્યારપછી **ગાથા ૧૦થી ૧૩માં** બહુશ્રુતના કારણરૂપે વિનીતના પંદર સ્થાનો બતાવેલ છે અને વિનીત શિષ્ય કેવા હોય તે બતાવતાં **ગાથા-૧૪માં** કહે છે કે,

**"वसे गुरुकुले निच्चं जोगवं उवहाणवं ।**
**पियंकरे पियंवाई से सिक्खं लद्धुमरिहई" ॥ – अ० ११ गा० १४**

**ગાથા-૧૭ની** વૃત્તિમાં બહુશ્રુતના વિષયમાં ૫૧ શ્લોકોમાં ભદ્રબાહુસ્વામીનું દૃષ્ટાંત આપેલ છે અને તેમાં यतः થી એક સુંદર શ્લોક આપેલ છે.[૩૦] ત્યારપછી **ગાથા ૧૮થી ૩૦માં** કુંજર, વૃષભ, સિંહ, વાસુદેવ, ચક્રવર્તી, ઇંદ્ર, સૂર્ય, ચંદ્ર, કોષ્ઠાગાર, જંબૂવૃક્ષ, સીતા નદી, મેરુપર્વત, સયંભૂરમણસમુદ્રની ઉપમા દ્વારા બહુશ્રુતની સ્તુતિ કરેલ છે અને **ગાથા-૩૧માં** બહુશ્રુતનું માહાત્મ્ય વર્ણવેલ છે.

**૧૨. હરિકેશીય** :– બહુશ્રુતે પણ તપમાં યત્ન કરવો જોઈએ, તેથી તપસમૃદ્ધિના

---

गुरोरकृशमाकारं दृष्ट्वा श्रुत्वा च तां गिरम् ।
संशयाने वैश्रवणे गौतमः पुनरब्रवीत् ॥३७॥

व्यवहारे तपः श्रेष्ठं परिणामस्तु निश्चये ।
ज्ञातेन पुण्डरीकस्य ज्ञेयं तच्चाधुना शृणु ॥३८॥ – अ० १० भूमिकायाम्

३०. यतः–"गौरवाय गुणा एव न तु ज्ञातेयडम्बरः ।
"वानेयं गृह्यते पुष्पमङ्गजस्त्यज्यते मलः" ॥१॥ – अ० ११ गा० १७ वृत्तौ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

વર્ણનના સંબંધ માટે હરિકેશ મુનિનું ચરિત્ર બારમાં અધ્યયનમાં બતાવેલ છે. શરૂઆતમાં વૃત્તિકારે ૫૯ શ્લોકોમાં હરિકેશબલમહર્ષિનું દૃષ્ટાંત બતાવેલ છે અને તેમાં ચાર જ્ઞાનવાળા મહાત્મા ગુણંધરસૂરિની દેશના **શ્લોક ૪થી ૧૦માં** આપેલ છે તે આ પ્રમાણે છે.[૩૧]

હરિકેશમુનિનું શેષકથાનક સૂત્ર વડે જ બતાવ્યું છે. **ગાથા ૨-૩માં** હરિકેશ મુનિ કેવા છે તે બતાવતાં કહ્યું છે કે, પાંચસમિતિ અને ત્રણગુપ્તિવાળા અને જિતેન્દ્રિય છે.[૩૨] અને ભિક્ષા માટે યજ્ઞપાટકમાં જાય છે, ત્યાં જાતિમદવાળા બ્રાહ્મણો ઉપસર્ગાદિ કરે છે ત્યારે તિંદુકવૃક્ષવાસી યક્ષ મુનિના દેહમાં પ્રવેશીને જે વચનો કહે છે, તે **ગાથા ૯થી ૪૬માં** બતાવીને **ગાથા-૪૭માં** તેનું નિગમન કરેલ છે. તેમાં **ગાથા-૪૬માં** ધર્મ, શાન્તિતીર્થ વિ. શું છે તે બતાવતાં મુનિ કહે છે—ધર્મ અહિંસાદિસ્વરૂપ છે, કર્મરજને દૂર કરે તે હ્રદ છે, શાન્તિતીર્થ બ્રહ્મચર્ય છે. તે શાંતિતીર્થ ભાવમલ વગરનું અને આત્માની પ્રસન્ન લેશ્યાળું છે, તેમાં સ્નાન કરીને વિમલ, વિશુદ્ધ, અત્યંત શીતલતા પામીને કર્મરૂપી દોષનો હું ત્યાગ કરું છું.[૩૩]

આ સંપૂર્ણ અધ્યયન તાત્ત્વિક ચર્ચા સભર છે.

---

३१. ''तत्रान्यदा चतुर्ज्ञानिश्रीगुणन्धरसूरयः ।
सतन्त्रस्य नृपस्याग्रे प्रचक्रुर्देशनामिति ॥४॥
शृङ्गारादिरसैराढ्ये राग-द्वेषोरुतुम्बके ।
गाढगर्दभिलाकारचतुर्गतिविराजिते ॥५॥
कषायप्रबलाश्रान्तबलीवर्दसमायुते ।
सारथीभूतमिथ्यात्व-प्रमादायामयोत्रके ॥६॥
आयुःपरम्पराबद्धघटीचक्रसमाकुले ।
मोहसीरपतिप्रष्ठहास्यादिबहुकर्षके ॥७॥
विचित्रजन्मसन्तानगुरुकेदारशोभिते ।
सदोप्तकर्मबीजौघे मृत्युपानान्तिकाश्रिते ॥८॥
भीमे भवारघट्टेऽस्मिन्नजस्रं कालकुल्यया ।
इतश्चेतश्च नोह्यन्ते जलवज्जन्तवो ह्यमी ॥९॥
एवं विज्ञाय भो भव्याः ! सर्वसौख्यैककारणे ।
सर्वक्लेशहरे जैनधर्मे यत्नो विधीयताम्'' ॥१०॥ — अ० १२ भूमिकायाम्

३२. ''इरि-एसण-भासाए-उच्चार-समिईसु य ।
जओ आयाण-निक्खेवे संजओ सुसमाहिओ ॥२॥
मणगुत्तो वयगुत्तो कायगुत्तो जिइंदिओ ।
भिक्खट्ठा बंभइज्जंमि जन्नवाडमुवट्ठिओ'' ॥३॥ — अध्य० १२ गा० २।३

३३. ''धम्मे हरए बंभे संतितित्थे अणाविले अत्तपसन्नलेसे ।
जहिंसि न्हाओ विमलो विसुद्धो सुसीईभूओ पजहामि दोसं'' ॥४६॥ — अध्य० १२ गा० ४६ ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**૧૩. ચિત્ર-સંભૂતીય :–** શ્રુતની જેમ તપમાં પણ યત્ન કરવો જોઈએ અને તે તપ મહાઅપાયના કારણભૂત નિદાનના ત્યાગપૂર્વક કરવાથી શુદ્ધ થાય છે. તેથી નિદાનના ત્યાગ માટે ચિત્ર અને સંભૂતિમુનિના ઉદાહરણ પૂર્વક આ અધ્યયન બતાવેલ છે. વૃત્તિકારે શરૂઆતમાં ૧૭૯ શ્લોકોમાં ચિત્ર-સંભૂતનું ચરિત્ર કહેલ છે. સંભૂતમુનિ નિદાન કરીને વ્રત પાલનથી સૌધર્મદેવલોકમાં દેવ થાય છે, ત્યાંથી ચ્યવીને બ્રહ્મદત્ત ચક્રવર્તી થાય છે, અને ચિત્રમુનિ પુરિમતાલ નગરીમાં શ્રેષ્ઠિકુલમાં ઉત્પન્ન થાય છે અને આચાર્યની પાસે યતિસ્વરૂપ ધર્મને સાંભળીને પ્રવ્રજિત થાય છે. કાંપીલ્યપુર નગરમાં બ્રહ્મદત્ત અને ચિત્રજીવયતિ બંનેનું મીલન થાય છે તે વખતે ચિત્રમુનિ બંનેના છ ભવો બતાવે છે તે સૂત્રકારે **ગાથા-૬-૭માં** કહેલ છે.[૩૪]

આ સંપૂર્ણ અધ્યયનમાં ચિત્ર મુનિ અનેક પ્રકારે બ્રહ્મદત્તચક્રીને પ્રતિબોધ કરવા ઉપદેશ આપે છે, પણ નિદાનના ફળરૂપે બ્રહ્મદત્તચકી ભોગાદિમાં આસક્ત બનવાથી પ્રતિબોધ પામતા નથી. ચિત્ર મુનિએ પ્રતિબોધ માટે કહેલી કેટલીક મૂળસૂત્રોની ગાથાઓ અત્યંત બોધપ્રદ છે.[૩૫]

આ સંપૂર્ણ અધ્યયન ભોગાસક્તજીવોએ વારંવાર વાંચવા યોગ્ય છે. બ્રહ્મદત્તચક્રવર્તી ચિત્રજીવસાધુના હિતોપદેશરૂપ વચનને અવગણીને ભોગોને ભોગવીને સાતમી નરકમાં જાય છે અને કામોથી વિરક્ત થયેલ ચિત્રમુનિ અનુત્તર એવું સત્તરપ્રકારનું સંયમ પાળીને અનુત્તર એવી સિદ્ધિગતિમાં જાય છે.[૩૬]

---

૩૪. "दासा दसन्ने आसि मिया कालिंजरे नगे ।
हंसा मयंगतीराए चंडाला कासिभूमिए ॥६॥
देवा य देवलोगंमि आसि अम्हे महिड्ढिया ।
इमा णो छट्ठिया जाई अण्णमण्णेण जा विणा" ॥७॥ – अध्य० १३ गा० ६।७

३५. "जहेह सीहो व मियं गहाय मच्चू नरं नेइ हु अंतकाले ।
न तस्स माया व पिया व भाया कालंमि तम्मिंसहरा भवंति ॥२२॥
"न तस्स दुक्खं विभयंति नाइओ न मित्तवग्गा न सुया न बंधवा ।
इक्को सयं पच्चणुहोइ दुक्खं कत्तारमेवं अणुजाइ कम्मं" ॥२३॥ – अध्य० १३ गा० २२।२३

३६. "पंचालराया वि य बंभदत्तो साहुस्स तस्सा वयणं अकाउं ।
अणुत्तरे भुंजिय काम-भोए अणुत्तरे सो नरए पविट्ठो ॥३४॥
चित्तो वि कामेहि विरत्तकामो उदग्गचारित्ततवो महेसी ।
अणुत्तरं संजम पालइत्ता अणुत्तरं सिद्धिगइं गओ" ॥३५॥ त्ति बेमि ॥ – अध्य० १३ गा० ३४-३५

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**૧૪. ઈષુકારીય :–** પૂર્વે નિદાનના દોષો બતાવ્યા હવે પ્રસંગથી નિર્નિદાનપણાના ગુણો કહેવા જોઈએ, તેથી ચૌદમાં ઈષુકારીય અધ્યયનમાં ઈષુકાર વક્તવ્યતા બતાવેલ છે. પૂર્વભવમાં બે શ્રેષ્ઠી પુત્રો છે અને ચાર તેમના અન્ય શ્રેષ્ઠિપુત્રો મિત્રો છે, તે છયે શ્રેષ્ઠિપુત્રો ગુરુની પાસે ધર્મ સાભળીને, દીક્ષા લઈને, અનશન કરીને સમાધિપૂર્વક કાળ પામીને સૌધર્મદેવલોકમાં ઉત્પન્ન થાય છે ત્યાંથી કુરુક્ષેત્રમાં ઇષુકારપુરમાં એક ઈષુકાર રાજા, બીજો તેની પ્રિયા પદ્માવતી, ત્રીજો ભૃગુ રાજપુરોહિત ચોથો તેની યશા નામની પત્ની અને તેના બે પુત્રો તરીકે અન્ય બે ઉત્પન્ન થાય છે. સાધુને જોઈને તે બંને પુત્રોને જાતિસ્મરણ જ્ઞાન થાય છે, તેથી ધર્મને સાંભળીને તે બંને પોતે પ્રતિબોધ પામીને પોતાના માતા-પિતાને પ્રતિબોધ કરે છે અને તે વાર્તા સાંભળીને રાણી કમલાવતી પણ પ્રતિબોધ પામે છે અને રાજાને પ્રતિબોધ પમાડે છે અને તે છયે જણા ભવભ્રમણના ભયથી ઉદ્વિગ્ન થઈને સંવેગથી ભાવિત થયેલા સાધુની પાસે શુદ્ધ વ્રતને ગ્રહણ કરે છે અને તે છયે જણા શુભધ્યાનમાં લીન બની દુષ્કર્મની પરંપરાને નાશ કરીને કેવલજ્ઞાન પામીને પરમપદ પ્રાપ્ત કરે છે. આ રીતે ૩૧ શ્લોકમાં કથાનક કહીને ત્યારપછી સૂત્રકાર વ્યાખ્યા કરે છે.

**ગાથા-૧૩માં** કામભોગો અનર્થોની ખાણ છે તે બતાવતાં કહે છે કે, ક્ષણ માત્ર સુખ દેનારા, બહુકાળ સુધી નરક વગેરે ગતિઓમાં દુઃખ આપનારા, તુચ્છ સુખ આપનારા, પરંતુ અત્યંત અનંત દુરંત દુઃખ આપનારા અને સંસારમાંથી મુક્ત બનવા માટે રોકનારા– શત્રુભૂત, અનર્થોની ખાણરૂપ કામભોગો છે.[૩૭]

**ગાથા-૨૪।૨૫માં** કહ્યું છે કે, જે જે રાત્રિઓ અને દિવસો જાય છે, તે તે ફરીથી પાછા આવતા નથી. અધર્મનું આચરણ કરનાર પ્રાણીઓના તે રાત્રિ-દિવસો નિષ્ફળ જાય છે અને ધર્મનું આચરણ કરનાર પ્રાણીઓના તે રાત્રિ-દિવસો સફળ જાય છે.[૩૮]

**૧૫. સભિક્ષુ :–** નિર્નિદાનપણું મુખ્યત્વે ભિક્ષુને જ થાય છે તેથી આ અધ્યયનમાં ભિક્ષુના ગુણો બતાવેલ છે

**ગાથા-૧ની** વૃત્તિમાં વૃત્તિકારે કહ્યું છે કે,

---

૩૭. ''खणमित्तसोक्खा बहुकालदुक्खा पगामदुक्खा अनिकामसोक्खा ।
संसारमुक्खस्स विपक्खभूया खाणी अणत्थाण उ कामभोगा'' ॥१३॥ – अध्य० १४ गा० । १३

૩૮. ''जा जा वच्चइ रयणी न सा पडिनियत्तई ।
अहम्मं कुणमाणस्स अहला जंति राईओ ॥२४॥
जा जा वच्चइ रयणी न सा पडिनियत्तई ।
धम्मं च कुणमाणस्स सहला जंति राईओ ॥२५॥ – अध्य० १४ गा० २४।२५

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

'सर्ववस्तु समतया पश्यतीत्येवंशीलः सर्वदर्शी यः कस्मिंश्चित् सचित्तादिवस्तुनि न मूर्च्छितो —गृद्धः स भिक्षुः'॥

**ગાથા-૧૨ની** વૃત્તિમાં વૃત્તિકારે કહ્યું છે કે,

"यत्किञ्चिदल्पमप्याहार-पानं विविधं खादिम-स्वादिमं च परेभ्यो लब्ध्वा यः तेनाहारादिना त्रिविधेन बाल-ग्लानादीन् नोपकुरुते, न स भिक्षुरिति शेषः यस्तु मनो-वाक्-कायैः सुसंवृतो निरुद्धाहाराद्यभिलाषः सन् बालादीननुकम्पते स भिक्षुः" ॥ – अ० १५ गा० १२ वृत्तौ

આ સંપૂર્ણ અધ્યયનમાં ભિક્ષુગુણો બતાવ્યાં છે. તે વાંચીને આ ભિક્ષુના ગુણો આપણા જીવનમાં આત્મસાત્ કરવા પ્રયત્ન કરવાનો છે.

**૧૬. બ્રહ્મચર્યસમાધિસ્થાન** :– ભિક્ષુના ગુણો બ્રહ્મચર્યવાળાને જ હોય છે અને તે બ્રહ્મગુપ્તિના પાલનથી પ્રાપ્ત થાય છે, તેથી સોળમાં બ્રહ્મચર્યસમાધિસ્થાન અધ્યયનમાં દશ બ્રહ્મચર્યના સમાધિસ્થાનો બતાવ્યાં છે. શરૂઆતમાં ૧૦ સૂત્રોમાં ૧૦ બ્રહ્મચર્યના સ્થાનો બતાવીને ત્યારપછી ગાથાઓમાં તેનું વર્ણન કરેલ છે.

**ગાથા-૧૪માં** નિગમન કરતાં કહ્યું છે કે, "પ્રણિધાનવાળો સાધુ, દુર્જેય કામભોગોનો સર્વદા ત્યાગ કરે ! તથા શંકા વગેરેનાં જનક સ્ત્રીજન વગેરે સહિત દશ સ્થાનો તે છોડી દે."[૩૯] **ત્યારપછી ગાથા-૧૫માં** કહ્યું છે કે, "ધૈર્યમૂર્તિ, ધર્મસારથી, ધર્મના ઉદ્યાનમાં વિચરનારો, ઇન્દ્રિયો અને મનનો વિજેતા અને બ્રહ્મચર્ય સમાધિસંપન્ન બની મુનિ શ્રુતચારિત્રરૂપ ધર્મોદ્યાનમાં વિચરે."[૪૦]

**ગાથા-૧૭ની** વૃત્તિમાં છેલ્લે બ્રહ્મગુપ્તિકથા અત્યંત રોચક છે તેમાં ધર્મઘોષ મુનિ રાજાને શુષ્કવાદ, વિવાદ અને ધર્મવાદનું સ્વરૂપ કહે છે અને રાજાએ અલગ અલગ તીર્થિકોને આ સમસ્યા પૂછી છે–"सकुंडलं वा वयणं नव त्ति" તેમના જવાબોથી રાજાને સંતોષ થતો નથી. છેલ્લે ધર્મઘોષ મુનિ ઉત્તર આપે છે, તે ઉત્તરથી રાજાને સંતોષ થાય છે

---

૩૯. "दुर्जयान् कामभोगान् नित्यशः परिवर्जयेत् ।
शङ्कास्थानानि चानन्तरात्तानि सर्वाणि दशापि वर्जयेत् प्रणिधानवानेकाग्रमनाः"॥
—अध्य० १६ गा० १४ वृत्तिः

४०. धर्म आराम इव दुःखसन्तापतप्तानां जन्तूनां निवृत्तिहेतुतया वाञ्छित-फलप्रदानतश्च धर्मारामस्त-स्मिंश्चरेत् प्रवर्तेत भिक्षुः । धृतिश्चित्तस्वास्थ्यं तद्वान् । धर्मसारथिरन्येषां धर्मप्रवर्तयिता । धर्मे आरमन्ते इति धर्मारामाः सुसाधवस्तेषु रत आसक्तिमान् धर्मारामरतो न त्वेकाकी । तथा दान्त उपशान्तः ब्रह्मचर्ये समाहितः समाधिमान् ॥ – अध्य० १६ गा० १५ वृत्तिः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

તે ઉત્તર આ પ્રમાણે છે.[41] ત્યારપછી **૩૮થી ૪૬** શ્લોકોમાં મુનિએ બ્રહ્મગુપ્તિવાળા મુનિઓનું વર્ણન કર્યું છે તે સાંભળીને રાજા પરમાર્હત્ બને છે.

**નોંધ :–**અધ્યયન ૬ / ગાથા - ૫ની ટીકામાં છેલ્લે કહ્યું છે કે अत्रान्तरे थावरेति गाथा प्रक्षेपरूपा ज्ञेया । द्वयोष्टीकयोरव्याख्याततत्वात् ॥ ત્યારપછી थावरं जंगम..... ગાથા આપેલ છે. આ પ્રમાણે **અધ્યયન** ૬ / ગાથા-૬ પ્રક્ષેપરૂપ જાણવી.

આ રીતે **'ઉત્તરજ્ઝયણાણિ'–ભાગ ૧માં** ૧થી ૧૬ અધ્યયનો લીધેલા હોવાથી અહીં ૧થી ૧૬ અધ્યયનોમાંથી વાનગીરૂપ કેટલાક પદાર્થોને આરોગવાથી મધુર શાંત રસનો આસ્વાદ થવાથી અહીં તે પદાર્થોની આંશિક ઝાંખી કરાવેલ છે, તેને આરોગવાથી સૌ કોઈ લઘુકર્મી ભવ્યજીવોને પણ મધુર-શાંતરસના આસ્વાદની અનુભૂતિ થાય એ જ શુભ ભાવનાથી આ પ્રયાસ કરેલ છે.

**ઉત્તરાધ્યયન એક યોગગ્રંથ :–**

આ ઉત્તરાધ્યયન ગ્રંથ એક યોગગ્રંથ છે. આ અંગે ભગવાન્ પૂજ્ય **હરિભદ્રસૂરીશ્વરજી** મહારાજા **યોગદૃષ્ટિ સમુચ્ચય** ગ્રંથ **શ્લોક-૧ની** ટીકામાં જણાવે છે કે, "कथमित्युच्यते ? वक्ष्ये-अभिधास्ये–'योग' मित्रादिलक्षणं 'समासेन'–संक्षेपेण विस्तरेण तु पूर्वाचार्यैरेवायमुक्तोऽप्युत्तराध्यनयोगनिर्णयादिषु 'तद्दृष्टिभेदतः' इति योगदृष्टिभेदेन" ।

યોગદૃષ્ટિ ગ્રંથમાં મિત્રાદિલક્ષણ યોગ સંક્ષેપથી છે એનો વિસ્તાર ઉત્તરાધ્યયન અને યોગનિર્ણય આદિ ગ્રંથોમાં છે એમ પૂર્વાચાર્યોએ જ કહ્યું છે. આ પ્રમાણે સુરિપુરંદરશ્રીના વચનથી પણ આ ઉત્તરાધ્યયન ગ્રંથમાં વિસ્તારથી યોગમાર્ગનું સાંગોપાંગ વર્ણન છે. એકેક અધ્યયનોને પૂર્વાપર કથન સાથે યોજીને આ ગ્રંથનું સાંગોપાંગ વાચન કરવામાં આવે તો સંપૂર્ણ મોક્ષમાર્ગનો બોધ આ ગ્રંથમાંથી પ્રાપ્ત થઈ શકે તેમ છે, અને જેમ જેમ સદ્બોધ પ્રાપ્ત થતો જાય તેમ તેમ સદ્રુચિ વધુ નિર્મળ-નિર્મળતર બનતી જાય અને સદ્બોધ અને સદ્રુચિ દ્વારા સત્પરિણતિની પ્રાપ્તિ થયા વગર રહે નહિ.

**ઉપકારસ્મૃતિ :–**

પરમપૂજ્ય, વ્યાખ્યાનવાચસ્પતિ શ્રી**રામચંદ્રસૂરીશ્વરજી** મહારાજાના શિષ્યરત્ન અધ્યાત્મયોગી પરમપૂજ્ય પંન્યાસપ્રવર શ્રી**ભદ્રંકરવિજયજી** મહારાજાના શિષ્યરત્ન પરમપૂજ્ય હાલારના હીરલા આચાર્યભગવંત શ્રી**કુંદકુંદસૂરીશ્વરજી** મહારાજાના શિષ્યરત્ન પરમપૂજ્ય પંન્યાસપ્રવર શ્રી**વજ્રસેનવિજયજી** મહારાજાની પ્રેરણાથી આ પૂજ્ય ઉપાધ્યાય

---

૪૧. "खंतस्स दंतस्स जिइंदियस्स अज्झप्पजोगे गयमाणसस्स ।
किं मज्झ एएण विचिंतिएण ? सकुंडलं वा वयणं नव त्ति" ॥ – अ० १६ गा० १७ वृत्तौ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**શ્રીકમલસંયમવિજયમ**હારાજારચિત **'સર્વાર્થસિદ્ધિ'** ટીકાના સંપાદનકાર્યમાં સહયોગ આપવાનું સદ્ભાગ્ય મને સાંપડ્યું તે મારું પરમસદ્ભાગ્ય સમજુ છું, તે બદલ ઉપકારી પૂ. પંન્યાસજી મહારાજની ખૂબ ખૂબ ઋણી છું. જેટલો સમય આ ગ્રંથના પ્રૂફ વાચન આદિ સંપાદન કાર્યમાં મારો પસાર થયો તે દરમ્યાન અતિનિર્મળ અધ્યવસાયોની ધારામાં લીન થવાનું બન્યું છે. નાદુરસ્ત રહેતી તબીયતમાં પણ સ્વ સ્વાધ્યાયના અંગરૂપ શ્રુતોપાસનારૂપે આ ગ્રંથના સંપાદનકાર્યમાં શક્ય શુદ્ધિકરણ કરવા માટે પૂરતી કાળજી લીધી છે. આમ છતાં દૃષ્ટિદોષથી કે અનાભોગાદિથી ક્ષતિઓ રહી હોય તે વિદ્વવજ્જનો સુધારીને વાંચે એવી ખાસ ભલામણ કરું છું.

પરિશિષ્ટો જે તૈયાર કર્યા છે તે કમ્પ્યુટર પદ્ધતિથી કર્યા છે. તેથી તેમાં ક્રમ અંગે આઘું-પાછું જણાય તો તે મુજબ સુધારીને વાંચવા ખાસ સૂચન કરું છું.

પ્રાંતે અંતરની એક જ ભાવના છે કે, યોગગ્રંથસ્વરૂપ આ આગમગ્રંથના ચિંતન, મનન અને નિદિધ્યાસન દ્વારા યોગમાર્ગને આરાધી સાધી આત્માનું મૂળસ્વરૂપ અસંગભાવમાં રહેવાનું છે એ અસંગદશાને પ્રાપ્ત કરી, અપૂર્વકરણ, અનિવૃત્તિકરણ, પ્રાતિભજ્ઞાનની પ્રાપ્તિ, ક્ષપકશ્રેણિ આરોહણ દ્વારા વીતરાગસ્વરૂપને પામી યોગનિરોધ, શૈલેશીકરણ દ્વારા સર્વકર્મ વિનિર્મુક્ત બની આત્માના શુદ્ધ ચૈતન્યસ્વરૂપને-સિદ્ધસ્વરૂપને પ્રાપ્ત કરી અનંતકાળ સુધી નિજ શાશ્વતત સુખના ભોક્તા હું અને સૌ કોઈ લઘુકર્મી ભવ્યજીવો બનીએ એ જ અંતરની શુભકામના....!!

ગ્રંથ સંપાદન—સંશોધનકાર્યમાં અનાભોગથી કે દૃષ્ટિદોષથી જે કોઈ સ્ખલના રહેવા પામી હોય તો તે બદલ ત્રિવિધે ત્રિવિધે મિચ્છા મિ દુક્કડં માંગું છું.

**शिवमस्तु सर्वजगतः**

**– સા. ચંદનબાલાશ્રી**

**એફ-૨ જેઠાભાઈ પાર્ક,**
**નારાયણનગર રોડ,**
**પાલડી, અમદાવાદ-૭**
**ફાગણ સુદ-૧૩, વિ.સં. ૨૦૬૫,**
**સોમવાર, તા. ૯-૨-૨૦૦૯.**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# विषयानुक्रमणिका

## उत्तरज्झयणाणि

## [ १ ]

## १-१६ अध्ययनानि


| विषय | पृष्ठक्रमाङ्क |
|---|---|
| પ્રકાશકીય | ૭-૮ |
| સંપાદકીય | ૯-૧૦ |
| પ્રાક્કથન | ૧૧-૩૦ |
| अध्ययनानि | |
| प्रथमं विनयाध्ययनम् | ३-४५ |
| द्वितीयं परीषहाध्ययनम् | ४६-१३६ |
| तृतीयं चतुरङ्गीयाध्ययनम् | १३७-२०१ |
| चतुर्थमसंस्कृताख्यमध्ययनम् | २०२-२२४ |
| पञ्चममकाममरणाध्ययनम् | २२५-२४३ |
| षष्ठं क्षुल्लकनिर्ग्रन्थीयमध्ययनम् | २४२-२५२ |
| सप्तममौरभ्रीयमध्ययनम् | २५३-२६८ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| अष्टमं कापिलीयमध्ययनम् | २६९-२८५ |
| नवमं नमिप्रव्रज्याख्यमध्ययनम् | २८६-३४६ |
| दशमं द्रुमपत्रीयमध्ययनम् | ३४७-३६३ |
| एकादशं बहुश्रुतपूजाख्यमध्ययनम् | ३६४-३७६ |
| द्वादशं हरिकेशीयमध्ययनम् | ३७७-३९६ |
| त्रयोदशं चित्र-संभूतीयमध्ययनम् | ३९७-४२२ |
| चतुर्दशमिषुकारीयाध्ययनम् | ४२३-४४१ |
| पञ्चदशं सभिक्ष्वध्ययनम् | ४४२-४५० |
| षोडशं ब्रह्मचर्यसमाधिस्थानाध्ययनम् | ४५१-४६४ |

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# उत्तरज्झयणाणि

## भाग-१

## १-१६ अध्ययनानि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अर्हम्

श्रीकमलसंयमोपाध्यायकृतसर्वार्थसिद्धिटीकोपेतम्

# उत्तराध्ययनसूत्रम्

स्वस्ति श्रीमज्जिनभद्रसूरिसद्‌गुरुभ्यो नमः

**श्रीवर्द्धमानजिनराजगुरुक्रमाब्जं, विद्वन्मनःकुमुदबोधनपार्वणाब्जम् ।**
**प्रीत्या प्रणामविषयं प्रयतो विधाय; वागीश्वरीं च निजचेतसि सन्निधाय ॥१॥**

**श्रीगौतमादिगणभृन्निवहं प्रणुत्य, जम्बूगुरुप्रमुखपूर्वधरांश्च सर्वान् ।**
**अन्यानपि श्रुतधराञ्जिनभद्रसूरीन्; सौवान् गुरूंश्च समयाम्बुधिलब्धपारान् ॥२॥**

**श्रीउत्तराध्ययनसूत्रसमासवृत्तिं, स्पष्टैकपाठविवृत्तिप्रगुणां प्रकुर्वे ।**
**नानार्थसार्थमहतीरुपजीव्य टीकाः, श्रौतार्थलीनभविकोपचिकीर्षयाऽहम् ॥३॥**

**त्रिभिः कुलकम्**

इह खलु जगज्जन्तुजातजीवातुसमानः संसारापारदुर्वारपारावारपारप्रापणपोतायमानः परमाखिलपुरुषार्थप्रधानः स्वर्गश्रीसम्पदाभोगपरिभोगसमाधानः सिद्धिवधूसम्बन्धसाधन-सावधानः सकलजीवदयामूलः समुच्छेदितच्छद्मादिभवव्रततिमूलः समूलकाषङ्कषितकुगति-कूलङ्कषाकूलः शाश्वतसुखसानुकूलः सर्वदर्शनप्रेयान् धर्म एव श्रेयान् । स च प्रायः प्रभवति धर्मकथानुयोगात्, स च **ज्ञाताधर्मकथा**दाविवो**त्तराध्ययने**ष्वपि विविक्ततया सम्प्रत्य-धिकृत इत्येतदनुयोगः समासतः कश्चिदारभ्यते ।

इह च **आचाराङ्गो**त्तरकालं पठ्यमानत्वेनोत्तराण्युत्तरशब्दवाच्यान्यध्ययनान्य**ुत्तरा-ध्ययनानि** । **शय्यम्भवं** यावदसौ क्रमस्तदारतस्तु **दशवैकालिको**त्तरकालं पठ्यन्त इति विशेषः । एषां **चाङ्गप्रविष्टदृष्टिवादादि**प्रभवत्वं केषाञ्चित्, यथा **परीषहा**ध्ययनस्य, तथा च निर्युक्तिकारः—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"[१]**कम्मप्पवायपुव्वे सत्तरसे पाहुडंमि जं सुत्तं ।
सणयं सोदाहरणं तं चेव इहं पि नायव्वं**" ॥

जिनभाषितत्वमप्येषां, यथा **द्रुमपत्रका**ध्ययनस्य । उक्तं हि "[२]**तं निस्साए भगवं सीसाणं देइ उवएसम्**" इति श्री**वीरे**ण चैतदुपदिष्टम् । प्रत्येकबुद्धकृतमपि किञ्चिदध्ययनं, यथा **कापिलीयम्** । परस्परप्रश्नोत्तरवचनरूपमपि किञ्चिद्, यथा **केसि—गौतमीयम्** । न तु स्थविरविरचितान्येवैतानि, यदाह चूर्णिकारः—"[३]**सुत्तं थेराण अत्तागमो**"त्ति । **नन्द्य**ध्ययनेऽप्युक्तम्—"[४]**जस्स जेत्तिया सिस्सा, उप्पत्तियाए वेणइयाए कम्मयाए पारिणामियाए चउव्विहाए बुद्धीए उववेया तस्स तेत्तियाइं पइन्नगसहस्साइं**" । प्रकीर्ण्णकानि चामूनि तत् कथं जिनदेशितत्वाद्येषामुपपन्नम् ?, उच्यते, तथास्थितानामेव जिन**कपिलादि**वचसामिहोपनिबद्धत्वेन तद्देशितत्वाद्यविरोधः, अयमर्थो निक्षेप-नयानुयोगादिविस्तरश्च विस्तरार्थिना **बृहट्टीकातः** परिकलनीयः । सर्वेषु **चैषूत्तराध्ययने**षु धर्म एव सविशेषं प्रतिपाद्यः, स च किल विनयमूलः । यतः—"[५]**एवं धम्मस्स विणओ मूलं, परमो य से मुक्खो**"त्ति । सोऽपि सर्वेषामाभरणभूतः । उक्तं हि—

"**न तथा सुमहार्घैरपि वस्त्राभरणैरलङ्कृतो भाति ।
श्रुत-शील-मूलनिकषो विनीतविनयो यथा भाति**" ॥१॥

अत एव सूत्रकारः श्रोतृश्रोत्रसुधारूपं वैरङ्गिकवैराग्यरसकूपं भव्यजनमनःपुण्यपुण्यानुबन्धि श्रीम**दुत्तराध्ययन**सिद्धान्तसम्बन्धि षड्त्रिंशदध्ययनमुख्यं **विनयश्रुता**ख्यमध्ययनं प्रारिरिप्सुः सम्बन्धाभिधेयसूचिकामाद्यां गाथामाह—

**संजोगा विप्पमुक्कस्स अणगारस्स भिक्खुणो ।
विणयं पाउकरिस्सामि आणुपुव्विं सुणेह मे ॥१॥**

**व्याख्या—संयोगान्** मात्रादिविषयाद् बाह्यात्, कषायविषयादाभ्यन्तरात् सम्बन्धाद् विविधैर्ज्ञान—भावनाऽऽदिभिः प्रकारैः प्रकर्षेण परीषहादिसहिष्णुतालक्षणेन मुक्तो भ्रष्टो **विप्रमुक्तस्तस्य अनगारस्य** । तत्रागारं द्विधा, द्रव्य-भावभेदात्, तत्रागैर्दृषत्काष्ठादिबहिर्द्रव्यैर्निर्वृत्तं द्रव्यागारं तद्रहितस्य परार्थनिष्पन्नगृहे वसतोऽपि निर्ममत्वादविद्यमानगृहस्येत्यर्थः । भावागारं पुनरगैर्जीवविपाकितया शरीरपुद्गलादिष्वन्तःप्रवृत्तैरनन्तानुबन्ध्यादिभिर्निर्वृत्तं

---

१. कर्मप्रवादपूर्वे सप्तदशे प्राभृते यत् सूत्रम् । सनयं सोदाहरणं तच्चैवेहापि ज्ञातव्यम् । २. तन्निश्रया भगवान् शिष्येभ्यो ददात्युपदेशम् । ३. सूत्रं स्थविराणामात्मागमः । ४. यस्य यावन्तः शिष्या औत्पत्तिक्या वैनयिक्या कर्मजया पारिणामिक्या चतुर्विधया बुद्धोपपेतास्तस्य तावन्ति प्रकीर्णकसहस्राणि । ५. एवं धर्मस्य विनयो मूलं परमश्च स मोक्षः ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कषायमोहनीयं तथा च नञोऽत्राल्पार्थत्वादनगारस्य स्थिति-प्रदेशानुभागतोऽल्पकषाय-मोहनीयस्येत्यर्थः । **भिक्षोः**—यतिनः पचन-पाचनाद्युपरतस्यात एव भिक्षणशीलस्य यते**र्विनयं** साध्वाचारमभ्युत्थानादिकं वा **प्रादुःकरिष्यामि** प्रकटयिष्यामि । **आनुपूर्व्या** परिपाट्या 'सुपां सुपो भवन्ति' इति वचनादत्र तृतीयार्थे द्वितीया । **शृणुता**कर्णयत श्रवणं प्रत्यवहिता भवत, शिष्याभिमुखीकरणमित्यर्थः, अनेन च पराङ्मुखमपि प्रतिबोधयतो व्याख्यातुर्धर्म एवेति ख्यापितं स्यात् । तथा चोवाच वाचकः—

> **"न भवति धर्मः श्रोतुः सर्वस्यैकान्ततो हितश्रवणात् ।**
> **ब्रुवतोऽनुग्रहबुद्ध्या वक्तुस्त्वेकान्ततो भवति"** ॥१॥

स च विनयः पञ्चधा । तत्र लोकोपचारविनयो लोकपङ्क्तिफलः १, अर्थ-विनयोऽर्थप्राप्त्यर्थमीश्वराद्यनुवर्त्तनम् २, भयविनयो दुर्धृष्यराजामात्यादेः प्राणापहारादिभयेन प्रसादनम् ३, कामविनयः कामहेतोर्विषयसामग्रीसम्पादनार्थं प्रवर्त्तनम् ४, मोक्षविनय इहलोकानपेक्षस्य कर्मक्षयार्थं दर्शनाद्याराधनम् ५ । इह तु मोक्षविनयेनैवाधिकारः तं च **शृणुत मे** मम 'कथयतः' इति शेषः । इति सूत्रार्थः ॥१॥

विनयः किल धर्मः, धर्म-धर्मिणोरभिन्नत्वाद् धर्मिद्वारेण तत्स्वरूपमाह—

**आणाणिद्देसकरे गुरूण उववायकारए ।**
**इंगियाकारसंपण्णे से विणीए त्ति वुच्चई ॥२॥**

**व्याख्या**—आज्ञा भगवदभिहितागमरूपा तस्या निर्देश उत्सर्गापवादाभ्यां प्रति-पादनमिदमित्थमनुष्ठेयमिदं चेत्थमित्येवंरूपस्तत्करः । यद्वा आज्ञा सौम्य ! इदं कुरु, मेदमिति गुरुवचस्तस्या निर्देश इदमित्थमेव करोमीति निश्चयाभिधानं तत्करः **आज्ञानिर्देशकरः** । तथा **गुरूणामुपपातो** दृग्विषयदेशावस्थानं तत्**कारकः**, नत्वादेशभीत्या दूरस्थायी । इङ्गितं प्रवृत्तिनिवृत्तिसूचकभ्रूशिरःकम्पादिकम्, आकारः प्रस्थानादिभावसूचको दिगवलोक-नादिः । यदाह—

> **"[1]अवलोयणं दिसाणं वियंभणं साडगस्स संवरणं ।**
> **आसणसिढिलीकरणं पट्ठियलिंगाइं एयाइं ॥१॥"**

अनयोर्द्वन्द्वे इङ्गिताकारौ तावर्थाद् गुरुगतौ सं सम्यक् प्रकर्षेण जाना**तीङ्गिताकारसंप्रज्ञः** । **स** एवंविधो **विनीत उच्यते** । अत्रार्थे **स्थूलभद्र**दृष्टान्तः—

---

१. अवलोकनं दिशां विजृम्भणं शाटकस्य संवरणम् ।
आसनशिथिलीकरणं प्रस्थितलिङ्गान्येतानि ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अस्त्यत्र विश्वविख्यातं **पाटलीपुत्र**पत्तनम् ।
यत्राभूद् नवमो **नन्द**भूपतिर्भरतार्द्धभुक् ॥१॥

इतश्च तत्र दुष्काले कराले कालरात्रिवत् ।
निर्वाहार्थं साधुसङ्घस्तीरं नीरनिधेर्ययौ ॥२॥

तदा क्षुत्क्षामसाधूनामनभ्यासेन विस्मृतौ ।
सूत्रार्थौ यदहो ! प्रायः क्षुधा धर्मार्थनाशिनी ॥३॥

सन्तोषतः शुभध्यानात् पोतादिव महोदधिम् ।
अथ चैते कथमपि तेरुर्दुष्कालसागरम् ॥४॥

तदन्ते **पाटलीपुत्रे** सङ्घोऽपि सकलोऽमिलत् ।
श्रुतं यद् यस्य पार्श्वेऽभूत् तस्मादेकत्र तत् कृतम् ॥५॥

ततश्चैकादशाङ्गानि श्रीसङ्घोऽमेलयत् तदा ।
**दृष्टिवाद**निमित्तं च तस्थौ किञ्चिद् विचिन्तयन् ॥६॥

**नेपाल**देशग्रामस्थं **भद्रबाहुं** च पूर्विणम् ।
मत्वा सङ्घः समाह्वातुं ततः प्रैषीद् मुनिद्वयम् ॥७॥

गत्वा नत्वा मुनी तौ तमित्यूचाते कृताञ्जली ।
समादिशति वः सङ्घस्तत्रागमनहेतवे ॥८॥

गुरुराह महाप्राणध्यानमारब्धवानहम् ।
साध्यं द्वादशभिर्वर्षैस्ततो नाऽऽगमनं मम ॥९॥

महाप्राणे हि संसिद्धे कार्ये कस्मिन्नुपस्थिते ।
अन्तर्मुहूर्ताद् गुण्यन्ते पूर्वाणि सकलान्यपि ॥१०॥

तद्वचस्तौ मुनी गत्वा सङ्घायाशंसतामथ ।
सङ्घोऽप्यपरमाहूयादिदेशेति यतिद्वयम् ॥११॥

गत्वा वाच्यास्त्वयाऽऽचार्या यः श्रीसङ्घस्य शासनम् ।
न करोति भवेत् तस्य दण्डः क इति शंसत ॥१२॥

सङ्घबाह्यः स कर्त्तव्य इत्युक्ते तैः श्रुतानुगैः ।
तर्हि तद्दण्डयोग्योऽसीत्याचार्यो वाच्य उच्चकैः ॥१३॥

ताभ्यां गत्वा तथैवोक्तमाचार्योऽप्येवमूचिवान् ।
मैवं करोतु भगवान् सङ्घः किन्तु करोत्वदः ॥१४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मयि प्रसादं कुर्वाणः श्रीसङ्घः प्रहिणोत्विह ।
शिष्यान् मेधाविनस्तेभ्योऽहं दास्ये सप्त वाचनाः ॥१५॥

भिक्षाऽनन्तरमेका सा कालवेलासु तत्त्रयम् ।
सायाह्नप्रतिक्रमणे जाते तिस्रोऽपराः पुनः ॥१६॥

सेत्स्यत्येवं सङ्घकार्यं मत्कार्यस्याविबाधया ।
ताभ्यामेत्य तथाऽऽख्याते सङ्घोऽत्यर्थमहृष्यत ॥१७॥

प्राहिणोत् **स्थूलभद्रा**दिसाधुपञ्चशतीं ततः ।
तां सूरिर्वाचयामास प्रज्ञोन्मिषितमानसाम् ॥१८॥

वाचनीयं बहु स्वल्पा वाचनाः किमिहाऽऽस्महे ? ।
इत्युद्व्रज्य गताः सर्वे **स्थूलभद्र**स्त्ववास्थित ॥१९॥

गुरूणामन्तिकस्थायी **स्थूलभद्रो** विनीतराट् ।
अब्दाष्टकेन पूर्वाणामष्टकं लीलयाऽपठत् ॥२०॥

अष्टावब्दानि जातानि न तादृक् पठितं पुनः ।
स इत्थं चिन्तयाऽऽर्त्तोऽपि चक्रे स्वाकारसंवरम् ॥२१॥

किमुद्विग्नस्तदेत्युक्तः सूरिणा सोऽब्रवीदिदम् ।
का चिन्ता स्वामिनः ! किन्तु ममाल्पाः सन्ति वाचनाः ॥२२॥

सूरिरूचे मम ध्यानं पूर्णप्रायमिदं ततः ।
तदन्ते वाचनास्तुभ्यं प्रदास्यामि त्वदिच्छया ॥२३॥

आज्ञानिर्देशमीदृक्षं तथेति प्रतिपद्य सः ।
**भद्रबाहु**गुरोर्भक्तिं तन्वन्नध्यैष्ट सोद्यमः ॥२४॥

पूर्णे ध्याने महाप्राणे **स्थूलभद्रो** महामुनिः ।
अपूर्वदशपूर्वाणि ससूत्रार्थं समापयत् ॥२५॥

चत्वारि सूत्रतः पूर्वाण्यधीत्यान्त्यानि स क्रमात् ।
गुर्वीमाचार्यतां प्राप्तस्तद् विनीतो मुनिर्भवेत् ॥२६॥

इति गुरुसमीपावस्थानाज्ञानिर्देशकरणे **स्थूलभद्र**कथा **॥२॥**

अथ विनयविपर्ययमविनयं धर्मिद्वारेणाह—

**आणाऽणिद्देसकरे गुरूणमणुववायकारए ।**
**पडिणीए असंबुद्धे अविणीए त्ति वुच्चई ॥३॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—आज्ञाया अनिर्देशकरः । गुरूणामनुपपातकारकः । प्रत्यनीकः** प्रतिकूलवर्त्ती । **असम्बुद्धो**ऽज्ञाततत्त्वो यः सोऽ**विनीत इत्युच्यते** । **कूलवालक**श्रमणवत् । तथाहि—

गच्छे कुत्रापि कस्याप्याचार्यस्य श्रुतशालिनः ।
शिष्यानुशास्ति दक्षस्य दुःशिष्यः कोऽप्यजायत ॥१॥

स नैव सहते शिक्षां गुरौ वैरायते भृशम् ।
हितमप्यहितीकृत्य वेत्ति गुर्वनुशासनम् ॥२॥

तीर्थं **शत्रुञ्जयं** नत्वाऽन्यदाऽवतरतस्ततः ।
पश्चाद् गुरोः स मुमुचे वधाय महतीं शिलाम् ॥३॥

पतन्तीं तां गुरुर्मत्वा प्रसार्यांह्री अटालयत् ।
तादृग्भावं च विज्ञाय तं शशापेति रोषतः ॥४॥

विनाशमाप्स्यसि स्त्रीभ्यो दुरात्मन् ! कर्मणाऽमुना ।
तद्वचः सोऽप्यवज्ञाय मिथ्या कर्तुं विभिद्य च ॥५॥

उप**शत्रुञ्जयं** नद्याः कूले तेपे तपोऽन्वहम् ।
पान्थात् कस्मादपि कदाचित् करोत्येष पारणम् ॥६॥

एवमुत्कटशीलस्य तपसोऽस्य प्रभावतः ।
वाहं व्यावर्त्तयामास नदी वर्षासु दूरतः ॥७॥

महातपस्विमुख्योऽयं विख्यातः क्षितिमण्डले ।
स **कूलवालक** इति प्रथितोऽभिधयाऽभितः ॥८॥

इत**श्चाशोकचन्द्रो**ऽस्ति राजा राजगृहेश्वरः ।
**पद्मावत्या**ऽन्यदा राज्ञ्या वाक्प्रपञ्चप्रतारितः ॥९॥

भ्रातृ**हल्ल-विहल्ला**भ्यां पितृदत्तमपि स्वयम् ।
हार-कुण्डलयुग्माद्याच्छेत्तुमैच्छदनच्छधीः ॥१०॥

बलाद् जिघृक्षुं तं मृत्वा प्रतस्थाते तु तौ ततः ।
उप**चेटक**भूपालं **वैशालीं** जग्मतुः पुरीम् ॥११॥

ततः सर्वाभिसारेण प्राचलत् **कौणिको** नृपः ।
प्रयाणभम्भामावाद्य दशभिर्बन्धुभिः सह ॥१२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सेनामानं चेदम्—

कोटित्रयी भटानां त्रिसहस्री रथ-तुरङ्ग-नागानाम् ।
प्रत्येकं सैन्यमभूद् भूपस्य च बन्धुदशकस्य ॥१३॥

त्रयस्त्रिंशत् सहस्राणि गज-स्यन्दन-वाजिनाम् ।
त्रयस्त्रिंशत् पत्तिकोट्यः **कूणिक**स्याखिला चमूः ॥१४॥

सागरव्यूहरूपेण स्कन्धावारं निवेश्य सः ।
तस्थौ तद्देशसीमायां मदोत्कटभटोत्करः ॥१५॥

तत**श्चेटक**भूपोऽपि तं सन्नह्याभ्यषेणयत् ।
दुर्दान्ताष्टादशप्रोद्यद्गणराजपुरस्कृतः ॥१६॥

कोटित्रयी भटानां त्रिसहस्री स्यन्दनाश्व-नागानाम् ।
कटकं च चेटकस्याष्टादशगणभृतां चापि ॥१७॥

सहस्राः सप्तपञ्चाशद् रथ-कुञ्जर-वाजिनाम् ।
पत्तीनां सप्तपञ्चाशत् कोट्यश्चेटकसंयुधि ॥१८॥

स सैन्यं गरुडव्यूहाकारेणास्थापयद् द्रुतम् ।
स्वदेशान्ते बधिरयन् वाद्यनादैस्तु रोदसीम् ॥१९॥

गजिनो गजिभिः साकं रथिनो रथिभिः समम् ।
अश्विनोऽश्विभिरुत्कर्षादेवं युध्यत्सु योद्धृषु ॥२०॥

सन्धीरयन् स्वकान् वीरान् दलयन् परसैनिकान् ।
कालः काल इवागत्य करालश्चेटकं जगौ ॥२१॥ **युग्मम्**

देहि मातामह ! त्वं भोः ! शीघ्रं **हल्ल-विहल्ल**कौ ।
न चेद् मच्छरशय्यायां सुप्तो मृतिमवाप्स्यसि ॥२२॥

**चेटको**ऽवग् रे ! बालापसरास्माद् रणाद् लघु ।
अन्यथाऽहं भविष्यामि दौहित्रवधपातकी ॥२३॥

ततः कालो बलाद् बाणैरच्छिदत् तद्रथध्वजम् ।
कालं कालगृहं निन्ये **चेटको** दैवतेषुणा ॥२४॥

एवं नवभिरहोभिस्तद्बन्धून् स क्रुधा नवाप्यंन्यान् ।
प्रैषीत् कालसमीपे बन्धुस्नेहादिवागुस्ते ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दिव्यबाणानुभावेन दुर्जेयं **चेटकं** ततः ।
देवमाराधयज्जेतुं **चम्पेश**ोऽष्टमभक्तभाक् ॥२६॥

तद्भक्ति-तपसाऽऽकृष्टौ **सौधर्म-चमरेन्द्र**कौ ।
आगत्य भणतः स्मेह किं कार्यं वद **कौणिक** ! ॥२७॥

स ऊचिवान् सुरेन्द्रौ ! भो मार्यतां **चेटको** नृपः ।
तावूचतुर्न तं हन्वो यतः साधर्मिको ह्यसौ ॥२८॥

परं शरीररक्षां ते करिष्यावः सुनिश्चितम् ।
इत्युक्त्वा प्रगताविन्द्रौ **कौणिको**ऽभूद् रणोद्यतः ॥२९॥

**चेटको**ऽपि स्वयं यावद् दौहित्रहननोत्सुकः ।
शरं धनुषि सन्धाय टङ्कारमकरोद् भृशम् ॥३०॥

तावच्छक्रकृते वज्रसन्नाहे पृष्ठतोऽग्रतः ।
**कौणिक**स्य तदास्फाल्यापतद् **चेटक**सायकः ॥३१॥

द्वितीयेऽप्यह्नि मुमुचे **चेटकेन** शरस्तथा ।
मुधाऽभवत् ततोऽचिन्ति चित्ते **चेटक**भूभुजा ॥३२॥

च्युतेषुरभवं यच्च तन्मे भाग्यविपर्ययः ।
एतस्य पुण्यपूरोऽभूद् जागरूक इति प्रधीः ॥३३॥

ततः प्रविश्य **वैशाली**मपिधाय प्रतोलिकाः ।
तस्थौ **चेटक**भूपालः स्वराजव्यूहमध्यगः ॥३४॥

रात्रौ **हल्ल-विहल्लौ** तौ बहिर्गत्वाऽथ **कौणिकम्** ।
गजसेचनकारूढावुपदुद्रुवतुर्बलम् ॥३५॥

**कौणिकः** स्वभाटनाख्यद् भोः ! कोऽप्यस्त्युत्कटो भटः ? ।
योऽत्र **सेचनकं** धर्त्तुं प्रहर्त्तुं वा क्षमो भवेत् ॥३६॥

ततस्ते ज्वलदङ्गारां तृणच्छन्नां च खातिकाम् ।
चक्रु**र्हल्ल-विहल्लौ** त्वारुह्य **सेचनकं** गजम् ॥३७॥

तत्स्वरूपमजानानौ रजन्यामुपखातिकम् ।
प्राप्तौ यावदुपद्रोतुं शत्रूनद्भुतविक्रमौ ॥३८॥

तावत् **सेचनको** हस्ती विभङ्गज्ञानयोगतः ।
सर्वतो ज्वलदङ्गारां परिखां वीक्ष्य दध्यिवान् ॥३९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एतौ तु मा विनश्येतामिति नादात् पुरः पदम् ।
स ततस्तावङ्कुशेनाहत्याहतुरदो द्विपम् ॥४०॥

रे दुरात्मन् ! विधत्से त्वं सम्प्रति प्रतिकूलताम् ।
तदवश्यं हि जानीवो रिपुभिर्विप्रतारितः ॥४१॥

इदं कटुवचः श्रुत्वा स करी करटाद् द्रुतम् ।
करेणोत्तार्य तौ स्वं च खातिकाऽन्तरपातयत् ॥४२॥

तत्राग्निज्वलितो रौद्रध्यानः **सेचनको** द्विपः ।
मृत्वा **रत्नप्रभा**पृथ्व्यां नारकोऽभूत् सुदुःखितः ॥४३॥ **सप्तभिः कुलकम्**

ततो **हल्ल-विहल्लौ** तमिभं वीक्ष्य परासुकम् ।
विलक्ष्यौ दध्यतुरिति धन्योऽयं पशुरप्यहो ! ॥४४॥

आवां हि येन रक्षित्वा स्वात्मा वह्नौ प्रवेशितः ।
आवां पुनरधन्यौ यौ सदा दुष्कृततत्परौ ॥४५॥

अनेकजीवसङ्घातसञ्जातादंहसः कथम् ? ।
श्वभ्रहेतोश्छुटिष्याव इति संविग्नमानसौ ॥४६॥

यावज्जातौ तु तौ तावत् ततः शासनदेवता ।
अकस्मादेत्य तावुत्पाट्यानैषीद् **वीरसन्निधिम्** ॥४७॥

ततस्तत्र व्रतं लात्वा संसाराम्बुधितारकम् ।
सुदुस्तपं तपस्तप्त्वा जग्मतुः सुगतिं च तौ ॥४८॥ **पञ्चभिः कुलकम्**

विषण्णः **कौणिकः** क्ष्माभृद् **वैशालीं** लातुमक्षमः ।
इमां सन्धां व्यधादेनां खरोपेतहलैर्यदि ॥४९॥

न खानयामि तर्ह्याशु वह्निकुण्डे विशाम्यहम् ।
उपायैर्बहुभिर्यावत् पुरीं भङ्क्तुं शशाक न ॥५०॥

तावद् गुरुप्रत्यनीकेऽतिरुष्टा **कूलवालके** ।
वैतालीयमिदं पद्यमाकाशस्थाऽपठत् सुरी ॥५१॥ **त्रिभिर्विशेषकम्**

**"[१]समणे जइ कूलवालुए मागहियं गणियं गमिस्सदि ।
लाया य असोगचंदए वेसालिं नगलिं गहिस्सदि" ॥१॥**

---

१. श्रमणो यदि **कूलवालुको मागधिकां** गणिकां गमिष्यति ।
राजा **चाशोकचन्द्रो वैशालीं** नगरीं ग्रहीष्यति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**कौणिकेनाथ** तच्छ्रुत्वाऽऽहूता **मागधिका**ऽपि सा ।
प्रस्तुतं कार्यमादिष्टा लीलया प्रत्यपद्यत ॥५२॥

कपटश्राविकी भूत्वा तादृक्तन्त्रा क्रमेण सा ।
सार्थेन सह तत्रागात् तमाह प्रणयाद्भुतम् ॥५३॥

स्वामिन् ! **शत्रुञ्जयं** तीर्थं यद् विवन्दिषितं मुदा ।
तत्र त्वं वन्दितोऽकस्मात् साऽनभ्रा वृष्टिरेव मे ॥५४॥

अस्तु **शत्रुञ्जयं** तीर्थं स्थावरं जङ्गमं पुनः ।
त्वमेवासि महातीर्थं दर्शनात् क्षालितांहसम् ॥५५॥

प्रासुकाहारयोगोऽस्ति मुने ! यद्यस्ति पारणम् ।
आदानेनैतदन्नस्य सतन्त्रां मा पवित्रय ॥५६॥

सोऽप्याददे तया दत्तान् मोदकांश्चित्तमोदकान् ।
चूर्णयोगात् तपःक्षीणस्ततोऽभूद् चातिसारकी ॥५७॥

हा ! भक्तये कृतं कार्यं प्रत्युताभूदभक्तये ।
इति सव्याजसस्नेहालापैः सा तमुपाचरत् ॥५८॥

भैषज्य-धावनाभ्यङ्ग-मुख्यया परिचर्यया ।
स तयाऽऽवर्जितोऽत्यन्तं प्रगुणोऽभूत् तदाश्रवः ॥५९॥

चेतसाऽध्युपपन्नं तं तद्गीर्वागुरया धृतम् ।
कुरङ्गमिव **वैशाली** नीतं श्री**कौणिको**ऽवदत् ॥६०॥

तमुपायं कुरुष्वाशु **वैशाली** गृह्यते यतः ।
ततो नैमित्तिकाकल्पो मध्ये**वैशालि** सोऽगमत् ॥६१॥

स्तूपस्य महिमां मत्वा व्याकुलं लोकमभ्यधात् ।
स्तूपापनयनाद् लोकाः ! मुच्यते विग्रहात् पुरी ॥६२॥

यावत् तैः पातितोऽत्यार्त्तैः स्तूपः श्री**सुव्रता**र्हतः ।
पुरीं भङ्क्तुमुपाक्रंस्त तावत् **कौणिक**भूपतिः ॥६३॥

द्वादशाब्दावसानेऽथ **सुव्रत**स्तूपभङ्गतः ।
**वैशाली**मभनग् भूपः **कौणिकः** स्वकसैन्ययुक् ॥६४॥

ततो नगर्या निर्यान्तं **चेटकं कौणिको**ऽवदत् ।
मातामह ! मातामह ! समाख्याहि कमादेशं करोम्यहम् ? ॥६५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**चेटको**ऽप्याख्यदायुष्मन् ! क्षणमेकं विलम्ब्यताम् ।
यावत् स्नानं विधायालं वापीमध्ये समेम्यहम् ॥६६॥

तत**श्चेटक**भूपालो बद्ध्वाऽयःपुत्रिकां गले ।
यावत् पिपतिषुर्वाप्यां ददौ झम्पां समाहितः ॥६७॥

स तावद् **धरणेन्द्रे**ण धृत्वा स्वकरसम्पुटे ।
साधर्मिक इति व्योम्नः पतन् नीतः स्वमन्दिरम् ॥६८॥

तत्र च स कृतानशनः समाश्रिताराधनः शुभध्यानः ।
कल्पे च **सहस्त्रारे** शक्रसमर्द्धिः सुरो जज्ञे ॥६९॥

अथ **चेटक**दौहित्रः **सुज्येष्ठा**भूः स **सत्यकी**र्लोकम् ।
वैशाल्या विद्याभृन्न्यवासय**न्नीलवच्छै**ले ॥७०॥

**कौणिक**भूपो योत्रितरासभसीरैः पुरीं समाखेट्य ।
पूरितसन्धश्चम्पां प्रविवेश महामहःपूर्वम् ॥७१॥

किञ्च—

सुभटा बलयोरेका कोटिः प्रथमेऽष्टसप्ततिर्लक्षाः ।
युधि विंशतिः सहस्रा निहतास्तिर्यक्षु चोत्पन्नाः ॥७२॥

द्वैतीयीके तस्मिन् मृताः सहस्रा भटाश्चतुरशीतिः ।
तिर्यक्षु च निरयेषु च केचन सञ्जज्ञिरे तेषु ॥७३॥

तार्त्तीयीके रणे षण्णवतिसहस्रका हता योधाः ।
तेषु सहस्रदशकं मत्सीकुक्षौ समवतीर्णम् ॥७४॥

एकः सुकुले चैकः स्वः शेषास्तेष्वगुश्च तिर्यक्षु ।
सर्वाग्रेणैवैका कोटिरथाशीतिलक्षाश्च ॥७५॥

सुभटानां व्यपद्यन्त सैन्ययोरुभयोरपि ।
एतस्यामवसर्पिण्यां प्रायो नेदृगभूद् रणः ॥७६॥ **पञ्चभिः कुलकम्**

सद्गुरुहीलन-गणिकासङ्गार्हत्स्तूपभङ्गसम्भूतात् ।
पापाद् दुर्गतिमगमत् स मुनिब्रुवः **कूलवालो**ऽपि ॥७७॥

इति **कूलवाल**वृत्तं श्रुत्वा भोः ! भव्यमानवास्त्यजत ।
यदि वाञ्छत शिवसौख्यं सुगुरूणां प्रत्यनीकत्वम् ॥७८॥३॥

इति गुरुप्रत्यनीकत्वे **कूलवालक**कथा ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथास्यैव दृष्टान्तेन सदोषतामाह—

**जहा सुणी पूइकण्णी निक्कसिज्जइ सव्वसो ।**
**एवं दुस्सीलपडिणीए मुहरी निक्कसिज्जई ॥४॥**

**व्याख्या—यथा शुनी** 'स्त्रीनिर्देशोऽतिकुत्सार्थप्रदर्शकः' पूती कुथितगन्धौ कर्णौ यस्याः सा **पूतीकर्णी** 'सर्वावयवकुत्सोपलक्षणम्' **निष्कास्यते** । 'सव्वसो त्ति' **सर्वतो** गृहादेः 'सूत्रे च्छान्दसत्वात् शस्प्रत्ययः' । **एवं दुःशीलो** दुराचारः । **प्रत्यनीकः** प्राग्वत् । **मुखरो**ऽसम्बद्धभाषी वाचाटो वा । **निष्कास्यते** सर्वतः कुल-गण-सङ्घादेर्बहिः क्रियते ॥४॥

यथाऽसौ दौःशील्ये रमते, तथा दृष्टान्तेनाह—

**कणकुंडगं चइत्ताणं विट्ठं भुंजइ सूयरो ।**
**एवं सीलं चइत्ता णं दुस्सीले रमई मिए ॥५॥**

**व्याख्या**—कणास्तन्दुलास्तेषां तन्मिश्रो वा कुण्डकः कुक्कुसः **कणकुण्डकस्तं त्यक्त्वा विष्टां** पुरीषं भुङ्क्ते **सूकर** इति गर्तासूकरो 'यथा' इति गम्यते । **एवं शीलं** शुभाचारं त्यक्त्वा **दुःशीले** दुराचारे **रमते** धृतिमाधत्ते । 'मिए त्ति' **मृगो**ऽज्ञत्वादविनीतः, अयं भावः—यथा मृगो गीतादिगृद्धिहेतुकमायतौ मृत्युरूपापायमपश्यन्नज्ञः, एवमयमपि दौःशील्यहेतुकमागामिनं भवभ्रमणापायमवगणयन्नज्ञः सन् शूकर इव पुष्टिकरकणकुण्डकोपमं शीलं हित्वा विष्ठोपमे दौःशील्ये रमत इति ॥५॥

कृत्यमाह—

**सुणियाभावं साणस्स सूयरस्स नरस्स य ।**
**विणए ठविज्ज अप्पाणं इच्छंतो हियमप्पणो ॥६॥**

**व्याख्या**—श्रुत्वा 'नञः कुत्सार्थत्वाद्' **अभावम**शोभनभावं सर्वतो निष्कासनरूपं 'साणस्स त्ति' प्राकृतत्वात् **शून्याः, सूकरस्य** तदुपमस्य **नरस्य च** । किं कुर्याद् ? इत्याह—**विनये स्थापयेदात्मानमा**त्मना । किं कुर्व**न्निच्छन्** वाञ्छन् **हितं** पथ्यमैहिकामुष्मिकं **चात्मनः** स्वस्य । हितं च विनयादेव स्यात् । उक्तं हि—

"[१]**विणया नाणं नाणाओ दंसणं दंसणाओ चरणं च ।**
**चरणाहिंतो मुक्खो मुक्खे सोक्खं निराबाहं ॥१॥**" ॥६॥

---

१. विनयाज्ज्ञानं ज्ञानाद् दर्शनं दर्शनाच्चरणं च ।
चरणान्मोक्षो मोक्षे सौख्यं निराबाधम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततः कृत्यं फलं चाह—

**तम्हा विणयमेसिज्जा सीलं पडिलभे जओ ।**
**बुद्धपुत्ते नियागट्ठी न निक्कसिज्जइ कण्हुई ॥७॥**

**व्याख्या—तस्माद् विनयमेषयेद्** 'धातूनामनेकार्थत्वात्' कुर्यात् । किं पुनरस्य विनयस्य फलम् ? इत्याह—**शीलं** प्रागुक्तं **प्रतिलभेत** प्राप्नुयात् । 'जओ त्ति' **यतो** विनयात्, ततः किं स्यात् ? बुद्धानामाचार्यादीनां पुत्र इव पुत्रः शिष्यो **बुद्धपुत्रः** "[1]**पुत्ता य सीसा य समं विभत्ता**" इति वचनात् । नितरां यागः पूजा यस्मिन् स **नियागो** मोक्ष**स्तदर्थी** सन् **न निष्कास्यते** 'कण्हुइ त्ति' **कुतश्चिद्** गणादेः, किन्तु विनीतत्वेन सर्वत्र मुख्यः क्रियते इति भावः ॥७॥

कथं पुनर्विनयः कार्य इत्याह—

**निसंते सिया अमुहरी बुद्धाणं अंतिए सया ।**
**अट्ठजुत्ताणि सिक्खिज्जा निरट्ठाणि उ वज्जए ॥८॥**

**व्याख्या**—नितरां शान्त उपशमवान् अन्तः क्रोधत्यागेन, बहिश्च प्रशान्ताकारतया **निशान्तः स्यात्** । **अमुखरो** नासम्बद्धभाषी । **बुद्धानामा**चार्यादीना**मन्तिके** समीपे **सदा अर्थयुक्तानि** हेयोपादेयार्थवाचकान्यर्थादागमवचांसि **शिक्षेता**भ्यस्येत् । **निरर्थकानि तु** डित्थादीनि, स्त्रीकथादीनि वा **वर्जयेत्** ॥८॥

कथं तानि शिक्षेतेत्याह—

**अणुसासिओ न कुप्पेज्जा खंति सेवेज्ज पंडिए ।**
**खुड्डेहिं सह संसग्गिं हासं कीडं च वज्जए ॥९॥**

**व्याख्या—अनुशिष्टो**ऽर्थयुक्तानि शिक्षमाणः कथञ्चित् स्खलितादिषु कठोरोक्त्या-ऽपि गुरुभिः शिक्षितोऽपि **न कुप्येत्** न कोपं गच्छेत् । किं तर्हि कुर्यात् ?, **क्षान्तिं** परुषभाषणादिसहनरूपां **सेवेत** भजेत **पण्डित**स्तत्त्वानुयायिधीमान्, तथा **क्षुद्रै**र्दुःशीलैः पार्श्वस्थादिभिः **सह संसर्गं हासं क्रीडां** **च**न्ताक्षरिका–प्रहेलिकादानादिजनितां **वर्जयेत्**, लोकागमविरुद्धत्वात् ॥९॥

पुनर्विनयमाह—

**मा य चंडालियं कासी बहुयं मा य आलवे ।**
**कालेण य अहिज्जित्ता तओ झाएज्ज एकओ ॥१०॥**

---

१. पुत्राश्च शिष्याश्च समं विभक्ताः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—'**मा**' इति निषेधे, **चः** समुच्चये । चण्डः क्रोधस्तद्वशादलीकं **चण्डालीकं**, लोभाद्युपलक्षणं **कार्षीः** 'हे शिष्य !' इति शेषः । यतः—

**"[१]मुसावाओ य लोगंमि सव्वसाहूहिं गरहिओ ।**
**अविस्सासो य भूयाणं तम्हा मोसं विवज्जए ॥१॥"**

**बहुकम**परिमितमालजालरूपं '**मा चेति** प्राग्वत्' आङिति राजादिकथाऽभिव्याप्त्या**ऽऽलपेत्**, बह्वालपनाद् ध्यानाध्ययनक्षति-वातक्षोभादि सम्भवात् । किं पुनः कुर्यात् ? **कालेना**द्यपौरुष्यादिना **च** पुन**रधीत्य** 'प्रच्छनाद्युपलक्षणमेतत्' **ततो**ऽध्ययनाद् **ध्याये-च्चिन्तयेद्** 'आज्ञापायादिकम्' इति गम्यते । **एकको** द्रव्यतो विविक्तशय्यादिसंस्थः, भावतो रागादिरहित इति । इत्थं हि चण्डालीकाद्यनुत्थानम्, अधीतार्थस्थिरीकरणं च कृतं भवतीति भावः ॥१०॥

इत्थमकृत्यनिषेधः, कृत्यविधिश्चोक्तः । कदाचित् तद्विपर्यये किं कार्यमित्याह—

**आहच्च चंडालियं कट्टु न निन्हविज्ज कयाइ वि ।**
**कडं कड त्ति भासिज्जा अकडं नो कड त्ति य ॥११॥**

**व्याख्या—आहत्य** कदाचि**च्चण्डालीकं कृत्वा न निह्नुवीत, कदाचित्** परैरुपलक्षितोऽनुपलक्षितो वा न कृतमेवेति नापलपेत् । किं तर्हि कुर्यात् ? **कृतं** चण्डालीकादि **कृतमिति** कृतमेव **भाषेत, न** भय-लज्जादिभिरकृतमपि । तथा तदे**वाकृतं नो कृत-मित्य**कृतमेव भाषेत, न तु मायोपरोधादिना कृतमप्यन्यथा मृषावादादिदोषसम्भवात् । तथा च मनःशल्यं यथावदालोचयेदिति भावः ॥११॥

पुनः पुनः प्रवृत्ति-निवृत्त्यवसरे गुरूपदेशादेव प्रवृत्ति-निवृत्ती कार्ये इत्याशङ्काऽपनोदार्थमाह—

**मा गलियस्सेव कसं वयणमिच्छे पुणो पुणो ।**
**कसं व दट्ठुमाइण्णे पावगं परिवज्जए ॥१२॥**

**व्याख्या—मा** निषेधे **गल्यश्व** इवाविनीताश्व इव **कशमिव** चर्मयष्टिमिव **वचनं** प्रवृत्ति-निवृत्तिविषयमर्थाद् गुरूणा**मिच्छेद**भिलषेत् **पुनः पुनः** । किन्तु 'कसं व दट्ठुमाइण्णे त्ति' **कशमिव** गुरोराकारादि **दृष्ट्वैवाकीर्णा**श्व इव विनीताश्व इव शिष्यः **पापकम**शुभानुष्ठानं **वर्जयेद**ुपलक्षणाच्छुभमनुतिष्ठेत् । यथा ह्याकीर्णोऽश्वः कशेनाऽऽताडित

---

१. मृषावादश्च लोके सर्वसाधुभिर्गर्हितः ।
अविश्वासश्च भूतानां तस्मान्मृषां विवर्जयेत् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवारोहकाभिप्रायं चेष्टते, तथा विनयवानपि वचनाऽप्रेरित एव गुर्वभिप्रायमासेवते, मा भूदारोहकस्येव गुरोरायास इति भावः ॥१२॥

अविनीत–विनीतयोर्दोष–गुणावाह—

**अणासवा थूलवया कुसीला मिउं पि चंडं पकरंति सीसा ।**
**चित्ताणुया लहु दक्खोववेया पसायए ते हु दुरासयं पि ॥१३॥**

**व्याख्या—अनाश्रव**ा गुरुवचस्यस्थिताः **स्थूलवचसो**ऽनिपुणभाषिणः **कुशीलाः**, **मृदुम**कोपन**मपि** गुरुं **चण्ड**कोपनं **प्रकुर्वन्ति** शिष्याः । इत्थं गल्यश्वतुल्यस्य दोष-मुक्त्वेतरस्य गुणमाह—**चित्तानुगाः** कशपातानपेक्ष्य जात्याश्ववद् गुरोर्हृदयानुवर्त्तिनः । **लघुं** शीघ्रं **दाक्ष्येणा**विलम्बितकारित्वे**नोपपेताः प्रसादयेयुः** प्रसादपरं कुर्यु**स्ते** इति शिष्याः । **हुः** पुनर्दुःखेनाश्रीयते योऽतिकोपनत्वादिभिरिति **दुराश्रयस्तमपि** प्रक्रमाद् गुरुम्, किं पुनर-नुत्कटकषायमित्यपेरर्थः ।

अत्रार्थे **चण्डरुद्राचार्यशिष्य**कथा । तथाहि—

अस्त्य**वन्ती** पुरी रम्या मन्ये हृतवसुर्यया ।
**शिप्रा**रूपोऽब्धिरभ्येत्यैतदर्थं यां निषेवते ॥१॥

अन्यदा **कुसुमो**द्याने तस्याश्चारित्रचारवः ।
आयुयुर्मुनयस्तेषामाचार्य**श्चण्डरुद्रकः** ॥२॥

कोपनः सहजेनैष मुनीनां किञ्चिदप्यहो ! ।
न्यूनातिरिक्तमाचारं निरीक्ष्यातीव कुप्यति ॥३॥

सूरिमन्त्र–श्रुताभ्यास–सुधासिक्तोऽपि नाशमत् ।
तस्य चेतसि कोपाग्निर्व्रतमोहमरुच्चयात् ॥४॥

परिहृत्य ततो दृष्टिं गुरोर्गुरुहितैषिणः ।
साधवस्तरुमूलेषु स्थित्वा स्वाध्यायमादधुः ॥५॥

सोऽपि क्रोधोदयं तीव्रं स्वस्य बुध्यन् जनाकुले ।
तन्निवृत्यै वनैकान्ते गत्वाऽस्थाद् ध्यानसुस्थितः ॥६॥

इतश्च कश्चिदिभ्यस्य सुतो नवरस्तदा ।
उद्वाहोचितनेपथ्यः कुङ्कुमाद्यङ्गरागवान् ॥७॥

तरुणः सरलः स्वीयसुहृद्भिरतिबालिशैः ।
मत्तैश्च युवभिर्युक्तस्तत्रागात् सुकृतेरितः ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

हास्यान्मुनीन् ववन्देऽसौ सुलभाद् यौवनोदये ।
आचचक्षे च धर्मार्थी साधुसेवारतोऽस्म्यहम् ॥९॥

तेन मे कथ्यतां धर्मः साधवोऽपि सकैतवीम् ।
तद्वाचमाकलय्याथ मौनमेवादधुस्तमाम् ॥१०॥

तादृग्मित्रसमुद्भूतहास्योत्साहादयं पुनः ।
बभाषे श्रमणाः साम्यभाजः सर्वाङ्गितारणे ॥११॥

अहमप्यस्मि निर्विण्णो गृहवासात् स्वकान्तया ।
दुर्भगत्वेन यत् त्यक्तोऽक्षमोऽस्मि च धनार्जने ॥१२॥

अनुग्रहमतः कृत्वा दत्त दीक्षां भवावनीम् ।
सदाऽवकानां को वृत्तिं को काङ्क्षेत भवादृशाम् ? ॥१३॥

इति श्लिष्टं वचः श्रुत्वा घृष्यतां कलिना कलिः ।
प्रविचिन्त्येत्यवञ्च्यास्ते मुनिप्रष्ठास्तमभ्यधुः ॥१४॥

पश्य पश्य वनैकान्तेऽस्मद्गुरुं व्रतदायकम् ।
दीक्षार्थी व्रज तत्र त्वं वयं ह्यनधिकारिणः ॥१५॥

ततः साधु ब्रुवाणास्ते वादयन्तश्च तालिकाम् ।
हास्याय स्यात् सुखेनायमेक इत्येनमभ्यगुः ॥१६॥

तमप्यानम्य सोऽवादीत् प्रव्राजयसि मां यदि ।
सुखमासे तदा द्रव्यार्जनक्लेशविवर्जितः ॥१७॥

क्लीबं मां नेहते कान्ता क्लीबोऽहं तु न तामपि ।
मया गृहाश्रमत्यागात् तस्मात् साध्योऽयमाश्रमः ॥१८॥

आचार्योऽप्यथ धिक् पापं ध्यानघ्नमिति रोषतः ।
आह तड्ढौकयध्वं भोः ! रक्षा तां तेऽप्यढौकयन् ॥१९॥

एतु योऽस्त्यत्र दीक्षार्थी सुखार्थी च भवद्वये ।
गुरुणेत्युदिते सोऽथोपसृत्याग्रेऽभ्युपाविशत् ॥२०॥

शक्यं नास्य व्रतं दातुं न दत्तं पालयिष्यति ।
सुहृत्स्वेवं च वदत्स्वेनं लघुहस्ततयाऽग्रहीत् ॥२१॥

जानुभ्यां गाढमाक्रम्यापि च लोचमुपाक्रमत् ।
भापयंस्तान् दृशौजस्वी तत्क्षणात् तं समापयत् ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्रतमग्राहयच्चापि भीतास्तत्तेजसाऽथ ते ।
नोपाद्रवंस्तं किन्त्वाहुर्मित्रं कुरु पलायनम् ॥२३॥

भव्यत्वपरिपाकेन सोऽपि दध्यौ श्रितो ह्यसौ ।
पन्था एभिर्विमुक्त्यर्थं मयाऽपि प्रापि भाग्यतः ॥२४॥

आलस्येऽपि हि यद् वाक्यमुक्तं पाल्यं तु तत् सताम् ।
अभ्यर्थ्य यद् गृहीतं तद् व्रतं त्याज्यं कथं भवेत् ? ॥२५॥

शिरः सर्वस्य गात्रस्य श्रेष्ठं शोभाऽस्य सत्कचैः ।
गतायां लुञ्चनात् तस्यां वरमात्मविभूषणम् ॥२६॥

सम्प्रत्यस्ति प्रमोदो मे तादृशः कश्चिदद्भुतः ।
येनेदं व्रतमाचीर्णं मे शुभाय भविष्यति ॥२७॥

भावश्रमणतामेवं प्राप्तमेनं विबुध्य ते ।
सुहृदस्तत्कुटुम्बस्यावेदनायागमन् पुरीम् ॥२८॥

***विनयः शासने मूलं विनीतः संयतो भवेत् ।***
***आराध्या गुरवश्चेति वेद तत्त्वं स तत्क्षणात् ॥२९॥***

अभ्यधात् प्राञ्जलिश्चैष गुरुं स्वामिन् ! निशम्यताम् ।
उत्प्राव्राजयितारो मां बान्धवाः स्निग्धचेतसः ॥३०॥

राजमान्याश्च तेऽनर्थं कारयिष्यन्ति भूपतः ।
प्रेयोवियोगे प्रणयी कार्याकार्यं न चिन्तयेत् ॥३१॥

तद् भाव्यपायकृत् त्याज्यं छन्नं शीघ्रमिदं पदम् ।
ज्ञायन्ते न वरं यान्तो बहवस्तु तपोधनाः ॥३२॥

मया सैकास्ततो यूयमतः प्रस्थातुमर्हथ ।
गुरुराख्यदिदं सत्यं किन्त्वध्वानं विशोधय ॥३३॥

निशायामस्ति गन्तव्यं यन्निशीथोऽस्त्युपस्थितः ।
तथा कृत्वा गते तस्मिंश्चेलतुस्तावुभौ ततः ॥३४॥

गुरुणाऽग्रे व्रजेत्युक्ते शिष्ये याति तदग्रतः ।
**चण्डरुद्रो** निशाध्वान्ते स्थाणौ क्वाऽप्यस्खलद् व्रजन् ॥३५॥

तज्जन्यां वेदनां प्राप बाढं चानुशयोदयम् ।
अध्यासीद् धिगिमं शिष्यं मत्कष्टायोपढौकितम् ॥३६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततो रे दुष्ट ! नो सम्यगध्वाऽयं प्रत्यलेखि यत् ।
भग्नो मत्क्रम इत्युक्त्वा दण्डेनैनमताडयत् ॥३७॥
पुस्फोट च शिरस्तस्य सोऽपि साक्रोशवेदनाम् ।
सेहेऽमृतच्छटाघातं मन्वानोऽचिन्तयत् पुनः ॥३८॥
स्वसाधुवृन्दमध्येऽसौ नित्यं तिष्ठन् यथासुखम् ।
हा ! मया व्यसनेऽपाति शुद्धात्माऽयं गुरुर्मुधा ॥३९॥
धन्यास्ते ये गुरौ भक्ता निर्व्याबाधं प्रकुर्वते ।
तत्तद्द्रव्यादिसामग्रीसम्पादनसुखं गुरोः ॥४०॥
सम्यगस्खलितं मार्गे कथं नेष्याम्यमुं निशि ।
समुत्पादयिता वाऽस्य समाधिं कथमप्यहम् ॥४१॥
प्रयत्नाद् व्रजतोऽस्यैवं शुभभावोऽप्यवर्धत ।
ध्यानं शुक्लमपि प्राप्य ज्ञानं केवलमाप च ॥४२॥
अथ सम्यग् व्रजत्यस्मिन्नित्यध्यासीद् गुरुस्तदा ।
दण्डोऽहो ! मर्मदत्तोऽस्य कुशिष्यत्वं व्यपाकरोत् ॥४३॥
कदाचन निजांसेनाङ्गुल्यग्रेण कदाचन ।
निर्वाहयन् निजगुरुं सोऽनैषीत् सकलां निशाम् ॥४४॥
अथ प्रत्युषसि प्राप्ते दृष्ट्वा रक्तखरण्टितम् ।
तं प्रत्यागतवैराग्यः शान्तो गुरुरचिन्तयत् ॥४५॥
शिष्यकस्याप्यहो ! क्षान्तिरवाच्या काचिदद्भुता ।
गुरोरपि मम क्रोधो गीतार्थस्येति कौतुकम् ॥४६॥
भक्ते निरपराधेऽपि चिरं प्रव्रजितस्य मे ।
योऽसौ क्रोधोदयः सोऽयं जलादग्निरनिन्धनः ॥४७॥
प्राप्ताचार्यपदस्यापि परशिक्षाऽधिकारिणः ।
ममात्युत्कटरोषस्य दग्धदीक्षस्य का गतिः ? ॥४८॥
इत्यादि भावयंस्तीव्रं धर्मध्यानशलाकया ।
मनो भित्त्वोन्मनीभावं शुक्लं चाप च केवलम् ॥४९॥
एवं शिष्यैस्तथा भाव्यं विनीतैः क्षान्तिलालसैः ।
यथा स्वस्य गुरोश्चापि हितमेवं विजृम्भते ॥५०॥

इति **चण्डरुद्रशिष्य**कथा ॥१३॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

गुरुचित्तानुगमनमेवाह—

**नापुट्ठो वागरे किंचि पुट्ठो वा नालियं वए ।**
**कोहं असच्चं कुव्विज्जा धारिज्जा पियमप्पियं ॥१४॥**

**व्याख्या—नापृष्टः** कथमिदमित्याद्यजल्पितो गुरुणा **व्यागृणीयाद्** वदेत्, तथाविधं कारणं विना **किञ्चित्** स्तोकमपि । किञ्चापृष्ट इति न केवलं गुरुणैव, किन्तु केनचिदन्येनापीति भावः । **पृष्टो वा नालीकम**सत्यं वदेत् । कारणान्तरेण च गुरुभिर्निर्भर्त्सितोऽपि न तावत् क्रुध्येत् । कथञ्चिदुत्पन्नं **क्रोधं** तदुत्थकुविकल्पविफलीकरणे**नासत्यं कुर्वीत,** तद्विपाकमालोचयन् । यतः—

**"क्रोधः परितापकरः सर्वस्योद्वेगकारकः क्रोधः ।**
**वैरानुषङ्गजनकः क्रोधः क्रोधः सुगतिहन्ता" ॥१॥**

एवं मानादिविफलीकरणमप्यभ्यूह्यम्, **भ्रातृवधक**वत्—

कस्यचित् कुलपुत्रस्य सूरस्य सरलात्मनः ।
बान्धवो वैरिणा जघ्ने पातयित्वा स्थले क्वचित् ॥१॥

शुचार्त्तया जनन्या स ऊचे रे क्लीब पुत्रक ! ।
त्वयाऽहं पुत्रिणी मन्ये वृथैव क्लैब्यशालिना ॥२॥

अनागतापराधं स्वविक्रमाद् यो विपन्थिनम् ।
भीतो भाव्यपराधेभ्यो निहन्ति स भटोत्तमः ॥३॥

*कृतेऽप्यपकृते शत्रुं नापकुर्वीत यो हठात् ।*
*आकारेणैव पुरुषः स चञ्चापुरुषोपमः ॥४॥*

पौरुषस्य लवोऽपि स्याद् यदि ते तत् सहोदरे ।
हते हन्तारमेतस्याहत्वा स्याः सुस्थितः कथम् ? ॥५॥

*धिग् विधिं सारभूतोऽब्धे रत्नानीव सुतो हृतः ।*
*शेषीकृतः पुनरयं क्षारनीरमिवोल्बणम् ॥६॥*

इति प्रसूवचः श्रुत्वा जागरूकपराक्रमः ।
मातृशोकचिकित्सायै बद्ध्वा तं गृहमानयत् ॥७॥

सवित्रीपुरतः सव्यमुष्ट्योपात्तकचस्ततः ।
कौक्षेयकं समुत्पाट्य स तेनोचे सुकर्कशम् ॥८॥

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

प्राणेभ्योऽपि प्रियं बन्धुं विनिहत्य निरागसम् ।
सुस्थम्मन्योऽभवः पापाधुना तत्फलमाप्नुहि ॥९॥

अयं कौक्षेयकस्तीक्ष्णो रे रे ! चिरबुभुक्षितः ।
परमां पुष्टिमाधत्तां त्वत्प्राणक्षीरभोजनात् ॥१०॥

कुरु शस्त्रं करे किञ्चित् स्मरणीयं स्मर द्रुतम् ।
वद कुत्र हतो भ्राता त्वां तत्राहन्म्यहं यतः ॥११॥

आतङ्कवेपमानाङ्गः शून्यपक्षो जिजीविषुः ।
स बभाण मया भ्राता यत्र कुत्रापि ते हतः ॥१२॥

परं भोः ! शरणप्राप्तो यत्र कुत्रापि हन्यते ।
तत्रैव प्रहर त्वं मां सूरोऽसि निपुणोऽसि चेत् ॥१३॥

तच्छ्रुत्वा जननीवक्त्रं स व्यलोकत शुद्धधीः ।
तयाऽपि सत्त्वमालम्ब्य प्रोचे सकरुणं सुतः ॥१४॥

साधु वत्स ! त्वमोजस्वी वीरसूरस्मि च त्वया ।
यदेवं बन्धुहन्तारं दशां दीनामुपानयः ॥१५॥

विश्रब्धं शरणप्राप्तं प्रणतं व्यसनागतम् ।
अक्षमं रोगिणं दीनं न घ्नन्त्येव सुपौरुषाः ॥१६॥

वैर्यपि स्वगृहप्राप्तो भवेद् मान्यो महात्मनाम् ।
गृहागतस्य शुक्रस्य गुरुरप्युच्चतां ददौ ॥१७॥

सुतोऽप्युवाच भ्रातृघ्ने मातर्मेऽनुशयो महान् ।
कथं तं सफलं कुर्वे करुणातोऽप्रहत्य तम् ॥१८॥

सवित्र्युवाच चातुर्यचारो ! सफलता रुषः ।
सर्वत्र पुत्र ! नाधेया कर्तव्यं स्वकुलोचितम् ॥१९॥

अहते शरणप्राप्ते स्फीततां लभते यशः ।
असत्यं कुरु तत् कोपमेनं मुञ्च तपस्विनम् ॥२०॥

असौ तेन ततो मुक्तः क्षामितागास्तयोः पदम् ।
पतित्वा तावनुज्ञाप्य गतस्तस्थुः समे सुखम् ॥२१॥

इति क्रोधासत्यतायां **कुलपुत्रक**कथा ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा क्रोधाद्यसत्यतामुक्त्वा सम्प्रति तदुदयनिरोधार्थमाह । **धारयेत्** स्वरूपेणावधारयेत्, न तद्वशतो राग-द्वेषं वा कुर्यात् । **प्रियं** प्रीत्युत्पादकं शेषजनापेक्षया स्तुत्यादि, **अप्रियं** तद्विपरीतं निन्दाऽऽदि, एवं च साधुभिः प्रियाप्रिये सोढव्ये इति परमार्थः । तृतीय**भूतवत्** । तथाहि—

महत्यपि क्वचिद् रम्ये नगरे मार्युपद्रुते ।
नृपः पौरजनोपेतोऽत्यर्थं चिन्ताञ्चितोऽभवत् ॥१॥

अन्यदाऽऽगुर्नृपाभ्यर्णं त्रयो मन्त्रविशारदाः ।
सत्कृता नृपमूचुस्तेऽस्माभिः शान्तिः करिष्यते ॥२॥

कथं ब्रूथेति राज्ञोक्ते तेष्वेको द्रुतमब्रवीत् ।
सदा संनिहितं मेऽस्ति भूतमेकमलङ्कृतम् ॥३॥

सर्वविश्वमनोहारिरूपं स्वैरं भ्रमत्यदः ।
पुरे गोपुररथ्यासु न द्रष्टव्यं तु तज्जनैः ॥४॥

तद् दुष्यति यतो दृष्टं द्रष्टारं विनिहन्ति च ।
यः पुनस्तं विलोक्याधोमुखः स्यात् स्यादसौ सुखी ॥५॥

मुच्यते चाशु रोगेभ्यः श्रुत्वेत्युक्तं महीभृता ।
सृतमेतेन भूतेन व्यर्थकोपावकाशिना ॥६॥

द्वितीयोऽथावदद् देव ! भूतमद्भुतम् ।
विकृत्य विकृतं रूपं लम्बोदरधरं परम् ॥७॥

एकपादं पञ्चशिरः साट्टहासं भ्रमत्यदः ।
गायत् नृत्यत् तदालोक्य यो हसत्युत रुष्यति ॥८॥

तस्याशु सप्तधाभूय शिरः स्फुटति दुःखिनः ।
यः पुनर्वन्दते स्तौति पूजयेद् वा तदादृतः ॥९॥

स स्यादारोग्यवांस्तूर्णं राजाऽऽहैतेन मे कृतम् ।
पुरे यद् विविधा लोका भवेयुर्निन्दका अपि ॥१०॥

तृतीयोऽवग् ममास्त्येतत् प्राय एतादृशं हि तत् ।
प्रियाप्रियविधातारं प्रीणयत्येव तत्परम् ॥११॥

दर्शनादेव रोगेभ्यो मोचयत्येव सत्कृपम् ।
अनुज्ञया ततो राज्ञः पुरे भ्रामयति स्म तत् ॥१२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तद्दर्शनामृतादेवोपद्रवः प्रलयं गतः ।
तुतोष भूपतिः पौरास्तुतुषुः सोऽभ्यपूजि च ॥१३॥

साधुरेवं मलक्लिन्नस्तद्वद् विकृतरूपभाक् ।
पूज्यमानो निन्द्यमानः प्रियाप्रियसमो भवेत् ॥१४॥

इति **भूतोदाहरणम्** ॥१४॥

क्रोधाद्यसत्यताकरणं चात्मदमन एव स्यादतस्तदुपदेशं तत्फलं चाह—

**अप्पा चेव दमेयव्वो अप्पा हु खलु दुद्दमो ।**
**अप्पा दंतो सुही होइ अस्सिं लोए परत्थ य ॥१५॥**

**व्याख्या—आत्मा चैव दान्तव्य** इन्द्रिय—नोइन्द्रियदमेनेष्टानिष्टविषयेषु राग-द्वेषवशादुन्मार्गगामी शमयितव्यः । **आत्मा 'हुरेवार्थे'** खलुर्यस्माद् दुर्दमो दुर्जयस्तद्दमने दमिता एव बाह्यदम्या इति । यतः—"[१]**सव्वमप्पे जिए जियं**" । एवं को गुणः ?, **आत्मा दान्तः सुखी भवत्यस्मिंल्लोके परत्र च** । दान्तात्मानो हीहैव सुरैरपि पूज्यन्ते, मोक्षं च साधयन्त्यदान्तात्मानस्तु शब्दादिविषयगृद्धा इहैव विनश्यन्ति । यदुक्तम्—

**"[२]सद्देण मओ रूवेण पयंगो महुयरो य गंधेणं ।**
**आहारेण य मच्छो बज्झइ फरिसेण य गइंदो"** ॥१॥

परत्र च दुर्गतौ दुःखभाजः स्युरित्यात्मा दान्तव्य एव **चौरद्वयवत्** । तथाहि—

संनिवेशे क्वचिच्चौरावभूतां द्वौ सहोदरौ ॥
प्रकृत्या सरलौ किन्तु व्यापृतौ चौर्यकर्मणि ॥१॥

अन्यदा सह सार्थेन गच्छतामनगारिणाम् ।
महांस्तपात्ययः प्राप्तो भृशं वर्षद्घनाघनः ॥२॥

इदानीं नोचिता चर्येति ध्यात्वा साधवोऽगमन् ।
संनिवेशे तयोश्चौरनाथयोरन्तिकं ततः ॥३॥

मुनीनां दर्शनं भाग्यलब्धमित्थं प्रमोदतः ।
अभ्युत्थायाथ ते ताभ्यां प्रणता भणिता इति ॥४॥

---

१. सर्वमात्मनि जिते जितम् ।

२. शब्देन मृगो रूपेण पतङ्गो मधुकरश्च गन्धेन ।
आहारेण च मत्स्यो बध्यते स्पर्शेन च गजेन्द्रः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ब्रूथ प्रयोजनं किञ्चित् कुरुतानुग्रहं च नौ ।
मुनयोऽपीदमाचक्षुर्वर्षास्तिष्ठन्ति साधवः ॥५॥

पन्थानो हरिदाक्रान्ताः प्रचलत्त्रससङ्कुलाः ।
वहद्बहुलनीरौघा विहारो नोचितस्ततः ॥६॥

सौम्यावुपाश्रयश्चेत् स्यात् तदाऽत्र सुखमास्महे ।
ताभ्यामपि प्रहृष्टाभ्यां दत्तोऽसौ ते स्थिता इह ॥७॥

आख्याता मुनयस्ताभ्यां तिष्ठद्भिश्च समाधिना ।
पर्याप्तमन्नमादेयमावयोरेव वेश्मसु ॥८॥

मुनयोऽप्यूचुरुचितं न नो नियतवेश्मसु ।
पुष्पन्धयसमानानां पिण्डादानं निरन्तरम् ॥९॥

यथोचितं तद् गेहेषु चरिष्यामोऽत्र भिक्षवः ।
पुण्यं वसतिदानेन युवाभ्यां प्रचुरं चितम् ॥१०॥

उक्तं च—

**"[1]जो देइ उवस्सयं जइवराण तव-नियम-जोग-जुत्ताणं ।**
**तेणं दिन्ना वत्थन्न-पाण-सयणासणवियप्पा ॥१॥**

**पावइ सुर-नर-रिद्धी सुकुलुप्पत्ती य भोगसामिद्धी ।**
**नित्थरइ भवमगारी सिज्जादाणेण साहूणं" ॥२॥**

तच्छ्रुत्वा तौ महाऽऽनन्दभरनिर्भरचेतसा ।
धन्यम्मन्यावसेवेतां स्वाचारनिरतान् मुनीन् ॥११॥

अथ क्रमादतिक्रान्ता वर्षाः प्रस्थातुमुत्सुकाः ।
मुनयस्तावभाषन्त भावादुपचिकीर्षवः ॥१२॥

"भो भोः ! वर्षाश्चतुर्मासीं स्थिता उपयुवद्वयम् ।
तदङ्गीकुरुतं किञ्चित् पुण्यमस्मन्मनोमुदे ॥१३॥

पुण्यमात्मदमादेव तददान्तात्मनो न हि ।
यथा यथा तदाधिक्यं पुण्यवृद्धिस्तथा तथा ॥१४॥

---

१. यो ददात्युपाश्रयं यतिवराणां तपो-नियम-योग-युक्तानाम् ।
तेन दत्ता वस्त्रान्न-पान-शयनासनविकल्पाः ॥१॥
प्राप्नोति सुरनरर्द्धि सुकुलोत्पत्तिं च भोगसमृद्धिम् ।
निस्तरति भवमगारी शय्यादानेन साधूनाम् ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पारदारिकता-चौर्य-मांसास्वादादिपाप्मनः ।
अदान्तात्मकताहेतुस्तच्च हेतुरशर्मणाम् ॥१५॥

स इन्द्रियदमद्वारा दम्यते तत्त्ववेदिभिः ।
हृषीकाण्यनिरुद्धानि निःशेषापन्निबन्धनम् ॥१६॥

एतानि सर्वतो जेतुं शक्यानि न भवादृशैः ।
तेषां देशजये यत्नं कुरुतं चेत् सुखेप्सुता ॥१७॥

स्वल्पोऽप्याराधितो धर्मः श्रिये प्रतिभवं भवेत् ।
यथैव हि सतां प्रीतिः सन्तानेऽप्यनुगामिनी ॥१८॥

ताभ्यामथ प्रत्यपादि यद् भवेच्छक्यमावयोः ।
तत् पुण्यं कर्म कर्तव्यतयाऽऽदिशत नौ द्रुतम्'' ॥१९॥

*''महाधर्माक्षमतया विचार्योदर्कसौष्ठवम् ।*
*रात्रिभुक्तिविरत्याख्यव्रतमाहात्म्यमादिशत् ॥२०॥*

*मांसाशिनो महादुष्टाः पिशाचा रजनीचराः ।*
*विटालयन्ति यद् भोज्यं तद् भुञ्जीतात्र को निशि ? ॥२१॥*

*कीटिका बुद्धिनाशाय वमनाय च मक्षिका ।*
*यूका जलोदराय स्यात् कुष्टरोगाय कौलिकः ॥२२॥*

*वालः स्वरस्य भङ्गाय गलभेदाय कण्टकः ।*
*कुन्थ्वादिसूक्ष्मजीवानां विनाशश्चापि पाप्मने ॥२३॥*

*मिनुयात् सागराम्भांसि गणयेद् गाङ्गवालुकाः ।*
*रात्रिभोजनदोषाणां जानीयात् कः परं मितिम् ? ॥२४॥*

*तदन्यत्राक्षमत्वेऽपि भाविकल्याणहेतवे ।*
*रात्रिभुक्तिपरिहारे यतेथां सत्त्वशालिनौ !'' ॥२५॥*

ताभ्यामात्ते व्रते तस्मिन् दार्ढ्यमाधाय साधवः ।
प्रचेलुः पावनम्मन्यौ तौ किञ्चिदनुजग्मतुः ॥२६॥

निवृत्याथ निजं गेहमागत्यातिष्ठतां सुखम् ।
ते सर्वेऽप्यन्यदा चौराः क्वचिद् धाटीं ययुस्तमाम् ॥२७॥

धेनु-माहिषमानीतं भूरि संमील्य तैस्ततः ।
तत्रैके पथि तन्मांसं संस्कर्तुमुपचक्रमुः ॥२८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मध्येग्रामं तदपरे मद्यमानेतुमागताः ।
इतश्च दैवयोगेन चिन्तितं मांसप्रकृभिः ॥२९॥

मांसार्धं विषसंपृक्तं क्रियते ग्रामयायिनाम् ।
दीयते धेनु-माहिषं येन नः सकलं भवेत् ॥३०॥

मद्यस्यार्धे विषं क्षेप्यं ग्रामगैरित्यचिन्ति च ।
तथैव तैः कृतं सर्वैरितः सूर्योऽस्तमागमत् ॥३१॥

सर्वे ते मिलिताश्चौराः पपुश्चाश्नन् यथेप्सितम् ।
व्रतभङ्गभयात् किन्तु तावभुङ्क्तां न सोदरौ ॥३२॥

अदान्तकरणात्मानो मृताः सर्वे पलाशिनः ।
कुगतौ दुःखिनो जाताश्चिरमन्यौ जिजीवतुः ॥३३॥

अमुत्र प्रेत्य चैताभ्यां दान्तजिह्वेन्द्रियत्वतः ।
सुखं भेजे सुदान्तव्यः स्वात्मेन्द्रियजयादतः ॥३४॥

रसनेन्द्रियेणात्मदमे **चौरद्वय**कथा ॥१५॥

किं भावयन्नात्मानं दमयेदित्याह—

**वरं मे अप्पा दंतो संजमेण तवेण य ।**
**माहं परेहिं दम्मंतो बंधणेहिं वहेहि य ॥१६॥**

**व्याख्या—वरं** प्रधानं **मे** मया**ऽऽत्मा** जीवस्तदाधारभूतो देहो वा **दान्तः** सावद्य-व्यापाराद् व्यावर्तितः **संयमेन** पञ्चाश्रवविरमणादिना **तपसा च** । **माऽहं परै**रात्मव्यतिरिक्तैः 'दम्मंतो त्ति' आर्षत्वाद् **दमितो बन्धनै**र्वध्रादिकृतैर्मयूरबन्धादिभि**र्वधैश्च** लकुटादिताडनैर्वरमतः स्वयमेवात्मा दान्तव्यः **सेचनकहस्ति**वत् । तथाहि—

गहनायां महाऽटव्यां करियूथमभूत् क्वचित् ।
सल्लकीपल्लवस्यन्दसमास्वादेन मेदुरम् ॥१॥

तत्र यूथपतिर्जातमात्रं दर्पादहन् गजम् ।
मा मामयं निहत्य स्यात् क्रमाद् यूथपतिः स्वयम् ॥२॥

तत्रैकाऽऽपन्नसत्त्वाऽभूत् करिणी सा व्यचिन्तयत् ।
जातमात्रं सुतं यूथपतिर्मे मारयिष्यति ॥३॥

वरं वन्ध्या सदा नारी न तु जातमृतार्भका ।
दुःखिनी वपुषा नाद्याऽपरा प्रसवदुःखिनी ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत् कथञ्चिन्निजं बालं जीवयिष्याम्युपायतः ।
जातं यूथपतिं वीक्ष्यादास्ये साध्यं स्वजन्मनः ॥५॥

अपसृत्यापसृत्येति शनैर्यूथेऽमिलच्च सा ।
तेनाभ्यासेन यूथेशोऽज्ञासीद् यन्मन्दचारिणी ॥६॥

पूर्णप्रायेषु मासेषु दृष्टैकं तापसाश्रमम् ।
तत्रागत्य च तान् नत्वा स्थिताऽत्र प्रसवार्थिनी ॥७॥

तपस्विनां वने तत्र सा प्रासूत गजार्भकम् ।
धवलं भद्रजातीयं चतुर्दन्तमनोहरम् ॥८॥

स क्रमेण कराग्रेणादाय सारणितो जलम् ।
सिषेच तरुमूलानि सञ्ज्ञी तापसबालवत् ॥९॥

तेन व्यतिकरेणैष गीतः **सेचनका**ख्यया ।
वयःस्थोऽजनि पुष्टाङ्गो जङ्गमः सानुमानिव ॥१०॥

स्वैरं चरन् महाऽटव्यां दृष्ट्वा यूथपतिं क्रुधा ।
हत्वा यूथपतिर्जज्ञे वयसो ही ! दुरन्तता ॥११॥

मा मन्मातेव काऽप्यन्या स्थित्वाऽत्र प्रसविष्यति ।
चिन्तयित्वेति सोऽभाङ्क्षीत् खलस्तं तापसाश्रमम् ॥१२॥

ऋषयोऽप्यतिनिर्विण्णा ही ! खलो यत्र वह्निवत् ।
वृद्धिं नीतः पदं तत् तु नयत्येव विनष्टताम् ॥१३॥

एकदाऽनेन बलिना ध्वस्तः सैषोऽस्मदाश्रमः ।
क्रियासमभिहारेण भङ्क्ता चेत् तन्न सुन्दरम् ॥१४॥

विचिन्त्येति पुष्प-फलं पाणावादाय संहताः ।
उपस्थिताः स्थितिप्राज्ञाः **श्रेणिकं** मगधेश्वरम् ॥१५॥

अभणंश्चेदृशोऽरण्ये द्विरदः सर्वलक्षणः ।
गन्धहस्ती **सेचनको** राज्येऽन्यो नास्ति यादृशः ॥१६॥

तेनैकेनापि पर्याप्तं किमन्यैर्बहुभिर्गजैः ।
भास्वानिव तमोध्वंसे स एकोऽपि क्षमो रणे ॥१७॥

निरादित्यं यथाऽऽकाशं निर्नेत्रं वदनं यथा ।
तथैवाभाति ते राज्यं तेनैकेन विना कृतम् ॥१८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**श्रेणिको**ऽपि ततोऽटव्यां गत्वा तद्दर्शिताध्वना ।
तं बद्ध्वाऽऽशु प्रयोगेण निन्ये **राजगृहं** पुरम् ॥१९॥
दृढमालानितोऽप्युच्चैः पदे निगडितोऽपि हि ।
त्याजितोऽपि निजां भूमिं मदं तत्याज नो गजः ॥२०॥
ततस्ते तापसास्तुष्टाः सोत्प्रासं तं बभाषिरे ।
हंहो ! हस्तिन् ! क्व शौण्डीर्यमधुना प्रलयं गतम् ? ॥२१॥
अभृज्जथा वयःप्राप्तो यत्र वृद्धस्तमाश्रमम् ।
दुराचारस्य तस्येदं पुष्पमाविरभूत् तव ॥२२॥
मुनीनामाश्रमे भग्ने यदास्ते पापमर्जितम् ।
भोक्ताऽसि तत्फलं प्रेत्य हस्तिन् ! किमनुशोचसि ? ॥२३॥
ततस्तद्वाक्यमाकर्ण्य क्रोधरक्ताक्ष उत्करः ।
सोऽयं दग्धोपरि स्फोटः कटु यत् सङ्कटे वचः ॥२४॥
संस्मृत्येति दधावेऽसौ मोटितालाननालकः ।
विभक्तनिगडो वीर्यात् पुरं कुर्व् विसंस्थुलम् ॥२५॥
नष्टास्तेऽथ रयाद् गत्वा तमेवाभङ्क्त चाश्रमम् ।
विचचार वने स्वैरं **रेवा**कूलङ्कषातटे ॥२६॥
**श्रेणिको**ऽपि तमादातुं **नन्दिषेणा**दिपुत्रयुक् ।
गतः सर्वाभिसारेण तस्यानुपदिकं वने ॥२७॥
सल्लक्षणत्वात् स करी देवताधिष्ठितस्ततः ।
सोपयुज्यावधिं ज्ञात्वाऽवश्यग्राह्यं नृपेण तम् ॥२८॥
अवोचत् करिणः कर्णे पुत्रात्मानमिह स्वयम् ।
दमयस्व यतो राजा निश्चितं दमयिष्यति ॥२९॥
वरं स्वात्मा स्वयं दान्तो न स्यादाधिस्तथाकृते ।
परैर्दान्तस्तु सोढाऽसौ वध-बन्धादि-सङ्कटम् ॥३०॥
एवमाभाषितो हस्ती तया देवतया तदा ।
सञ्ज्ञी विज्ञाय तद्भावं स्वयमालानमाश्रयत् ॥३१॥
ततस्तत्र सुखं तिष्ठन् सरसाहारभोजनम् ।
सत्कुथान् सदलङ्कारान् भजन् राज्यमवर्धयत् ॥३२॥

इति स्वयमात्मदमने **सेचनक**कथा ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विनयान्तरमाह—

**पडिणीयं च बुद्धाणं वाया अदुव कम्मुणा ।**
**आवी वा जइ वा रहस्से नेव कुज्जा कयाइ वि ॥१७॥**

**व्याख्या—प्रत्यनीकं च** प्रतिकूलं चेष्टितमिति गम्यम् । **बुद्धानां** गुरूणां **वाचा** वाण्या त्वमपि किञ्चिज्जानीषे इत्याद्यात्मिकया विपरीतप्ररूपणायां प्रेरितस्त्वयैवाहं शिक्षित इत्येवंरूपया वा । **अथवा कर्मणा** संस्तारकातिक्रमण—चरणस्पर्शादिनाऽऽ**विर्वा** लोकसमक्षं **यदि वा रहस्ये** विजने **नैव कुर्यात् कदाचिदपि** परुषोक्त्यादावपि प्रत्यनीकत्वमिति । एवकारः "**शत्रोरपि गुणा ग्राह्या दोषा ग्राह्या गुरोरपि**" इति कुमत-निरासार्थः ॥१७॥

विनयमेवाह—

**न पक्खओ न पुरओ नेव किच्चाण पिट्ठओ ।**
**न जुंजे ऊरुणा ऊरुं सयणे नो पडिस्सुणे ॥१८॥**

**न पक्षतो** दक्षिणादिपक्षमाश्रित्य, पङ्क्तिसमावेशतस्तत्साम्यात् । **न पुरतो**ऽग्रतः वन्दकजनस्य गुरुमुखावीक्षणात् । **नैव कृत्यानामा**चार्यादीनां **पृष्ठतः**, मुखादर्शने द्वयोरपि रसवत्ताऽभावादुपविशेदिति शेषः । **न युञ्ज्यात्** सङ्घट्टयेद्, अतिनिकटत्वे**नोरुणा**ऽऽत्मीयेन गुरो**रुरुं**, शेषाङ्गस्पर्शोपलक्षणम्, तथाकरणे ह्यविनयसद्भावात् । तथा गुरुणा कार्यं प्रत्यादिष्टः **शयने** शय्यायां शयित आसीनो वा **न प्रतिशृणुयादेवं** कुर्म इत्येवं नाङ्गीकुर्यात्, किन्तु समीपमागत्य विनयरचिताञ्जलिरिच्छामोऽनुशिष्टिमिति वदेत् ॥१८॥

पुनस्तमेवाह—

**नेव पल्हत्थियं कुज्जा पक्खपिंडं व संजए ।**
**पाए पसारए वा वि न चिट्ठे गुरुणंतिए ॥१९॥**

**व्याख्या—नैव पर्यस्तिकां** जानु—जङ्घोपरि वस्त्रवेष्टनरूपां **कुर्यात्** । **पक्षपिण्डं वा** बाहुद्वयकायपिण्डात्मकं **संयतः** साधुर्नैव कुर्यात् । तथा **पादौ प्रसारयेद् वाऽपि नैव । अपि** शब्दान्नेतस्ततो विक्षिपेदिति । अन्यच्च **न तिष्ठेद् गुरूणामन्तिके** समीपे, किन्तू-चितप्रदेशे । एवोपलक्षणत्वादवष्टम्भाद्यपि वर्जयेद्, अन्यथा ह्यविनयदोषसम्भवात् ॥१९॥

Jain Education International 2010_02　　For Private & Personal Use Only　　www.jainelibrary.org

पुनः प्रतिश्रवणविधिमाह—

**आयरिएहिं वाहिंतो तुसिणीओ न कयाइ वि ।**
**पसायपेही नियागट्ठी उवचिट्ठे गुरुं सया ॥२०॥**

**व्याख्या—आचार्यादिभिर्व्याहृतः** शब्दित**स्तूष्णीको** न कदाचिदपि ग्लानाद्यवस्थायामपि स्यात् । किन्तु

"**धन्यस्योपरि निपतत्यहितसमाचरणघर्मनिर्वापी ।**
**गुरुवदनमलयनिःसृतो वचनरसश्चन्दनस्पर्शः**" ॥

इत्यालोचयन् **प्रसादप्रेक्षी**, प्रसादोऽयं यदन्यसद्भावेऽपि मामादिशन्ति गुरव इति पर्यालोचनशीलो **नियागार्थी** मोक्षार्थी स**न्नुपतिष्ठेन्म**स्तकेन वन्द इति वदन् सविनयमुपसर्पेद् **गुरुं सदा** ॥२०॥

**आलवंते लवंते वा न निसीएज्जा कयाइ वि ।**
**चइऊण आसणं धीरो जओ जत्तं पडिस्सुणे ॥२१॥**

**व्याख्या—आ ईषल्लपति लपति वा** वारं वारं वदति सति गुराविति गम्यम् । **न निषीदे**न्नोपविष्टस्तिष्ठेत् **कदाचिदपि** व्याख्यादिव्याकुलतायामपि । किन्तु **त्यक्त्वाऽऽसनं धीरो** धीमान् **यतो यत्नवान्** 'जत्तं ति' प्राकृतत्वाद् बिन्दोर्लोपे तस्य च द्वित्वे यदादिशन्ति गुरवस्तद् विधेयतया **प्रतिशृणुयात्** स्वीकुर्यात् ॥२१॥

पुनस्तमेवाह—

**आसणगओ न पुच्छिज्जा नेव सिज्जागओ कया ।**
**आगम्मुक्कुडुओ संतो पुच्छिज्जा पंजलीउडो ॥२२॥**

**व्याख्या—आसनगतो न पृच्छेत्** सूत्रादि, **नैव शय्यागतः** संस्तारकस्थस्तथाविधावस्थां विना **कदा**पि बहुश्रुतत्वेऽपि संशये सति नावज्ञया प्रष्टव्यं, सदा गुरुविनयस्यानुल्लङ्घ्यत्वात् यतः—

"[१]**जहाहिअग्गी जलणं नमंसे नाणाहुईमंतपयाभिसित्तं ।**
**एवायरियं उवचिट्ठइज्जा अणंतनाणोवगओ वि संतो**" ॥१॥

किं कुर्यादित्याह—**आगम्य** गुर्वन्तिकमे**त्योत्कुटुको** मुक्तासनः, कारणतः पादपुञ्छनगतोऽपि '**संतो त्ति' सन् शान्तो** वा पृच्छेत् **प्राञ्जलिपुटः** संयोजितकर इति ॥२२॥

१. यथाऽऽहिताग्निर्ज्वलनं नमस्येन्नानाऽऽहुतिमन्त्रपदाभिषिक्तम् ।
एवमाचार्यमुपतिष्ठेताननन्तज्ञानोपगतोऽपि सन् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ गुरुकृत्यमाह—

**एवं विणयजुत्तस्स सुत्तं अत्थं च तदुभयं ।**
**पुच्छमाणस्स सीसस्स वागरिज्ज जहासुयं ॥२३॥**

**व्याख्या—एवमुक्त**प्रकारेण **विनययुक्तस्य सूत्रम**ङ्गादि, **अर्थं** च तदभिधेयं **तदुभयं** सूत्रार्थरूपं **पृच्छतो** ज्ञातुकामस्य **शिष्यस्य व्यागृणीयाद्** वदेद् 'गुरुरिति शेषः' **यथाश्रुतं** गुरुभ्यो न तु स्वधिया ॥२३॥

पुनः शिष्यस्य वाग्विनयमाह—

**मुसं परिहरे भिक्खू न य ओहारिणिं वए ।**
**भासादोसं परिहरे मायं च वज्जए सया ॥२४॥**

**व्याख्या—मृषां** सद्भूतापलापादिकां **परिहरेद् भिक्षुर्न चावधारिणीं** गमिष्याम एव करिष्याम एवेत्यादिनिश्चयात्मिकां वाचं **वदेत्** । यतः—

**"[१]अन्नह परिचिंतिज्जइ कज्जं परिणमइ अन्नहा चेव ।**
**विहिवसयाण जियाणं मुहुत्तमेत्तं पि बहुविग्घं" ॥२॥**

**भाषादोषं** सावद्यानुमोदनादिकं **परिहरेद् मायां च**शब्दात् क्रोधादीन् मृषाहेतून् **वर्जयेत् सदा** ॥२४॥

**न लविज्ज पुट्ठो सावज्जं न निरट्ठं न मम्मयं ।**
**अप्पणट्ठा परट्ठा वा उभयस्संतरेण वा ॥२५॥**

**व्याख्या—न लपेद्** वदेत् **पृष्टः सावद्यं** सपापं, **न निरर्थकं** दश दाडिमादि **न मर्मकं** वचनमिति शेषः संक्लेशहेतुत्वादस्य । आह च—

**"[२]मम्मं जम्मं कम्मं तिन्नि वि एयाइं पयासिज्जा ।**
**मा मम्माइसु विद्धो मारेइ परं मरिज्जा वा" ॥१॥**

**आत्मार्थं परार्थं** चोभयस्यात्मनः परस्य चार्थमन्तरेण प्रयोजनं विना ॥२५॥

---

१. अन्यथा परिचिन्त्यते कार्यं परिणत्यन्यथा चैव ।
विधिवशगानां जीवानां मुहूर्तमात्रमपि बहुविघ्नम् ॥१॥

२. मर्म जन्म कर्म त्रीण्यप्येतानि न प्रकाशयेत् ।
मा मर्मादिषु विद्धो मारयेत् परं म्रियेत वा ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वगतदोषमुक्तोपाधिकृतदोषत्यागमाह—

**समरेसु अगारेसुं संधीसु य महापहे ।**
**एगो एगित्थिए सद्धिं नेव चिट्ठे न संलवे ॥२६॥**

**व्याख्या—समरेषु** खरकुटीषु नीचास्पदोपलक्षणं तथा चाह चूर्णिकृत्—"**समरं नाम जत्थ लोहयारा हेट्ठा कम्मं करिंति**" त्ति **अगारेषु** गृहेषु **सन्धिषु च** गृहद्वयान्तरालेषु **महापथे** राजमार्गादा**वेको**ऽसहाय **एकया स्त्रिया सार्धं** सह **नैव तिष्ठेद् न संलपेद्** आलापं कुर्यात् । एवंविधास्पदेषु ससहायस्यापि ससहाययापि स्त्रिया सहावस्थानादेर्निषिद्धत्वात् । अन्यथा प्रवचनमालिन्यादिदोषसम्भवात् ॥२६॥

स्खलिते गुर्वनुशिष्टौ कृत्यमाह—

**जं मे बुद्धाणुसासंति सीएण फरुसेण वा ।**
**मम लाभो त्ति पेहाए पयओ तं पडिस्सुणे ॥२७॥**

**व्याख्या—यन्मे बुद्धा** आचार्यादयः, **अनुशासति** शिक्षयन्ति **शीतेन** सोपचारेणा-नन्दकेनेत्यर्थः । **परुषेण** कर्कशेन वचसेति गम्यम् । **मम लाभो**ऽप्राप्तार्थप्राप्तिरूपोऽयं जिनोपदेशरूपो मोक्षो वा । यन्मामनाचारकारिणममी शासतीति 'पेहाए त्ति' **प्रेक्षया** बुद्ध्या 'पयओ त्ति' **प्रयतः** प्रयत्नवांस्**तद**नुशासनं विधेयतया **प्रतिशृणुयाद**ङ्गीकुर्यात् ॥२७॥

किमेवमुपदिश्यत इत्याह—

**अणुसासणमोवायं दुक्कडस्स य चोयणं ।**
**हियं तं मन्नए पन्नो वेसं होइ असाहुणो ॥२८॥**

**व्याख्या—अनुशासनं** शिक्षणम् । उपाये मृदु-परुष-भाषणादौ भव**मौपायं** दुष्कृतस्य कुत्सिताचरितस्य **नोदनं** प्रेरणं भद्र ! हा ! किमिदमाचरितमित्यादिकं गुरुकृतं **हित**मिहपरलोकोपकारि **तद**नुशासनादि **मन्यते प्राज्ञः । द्वेष्यं** भवेद**साधो**रपगतभाव-साधुत्वस्यानेनासाधोर्गुरुवचोऽप्यनिष्टं स्यादित्युक्तम् ॥२८॥

अमुमेवार्थं व्यक्तीकुर्वन्नाह—

**हियं विगयभया बुद्धा फरुसं पि अणुसासणं ।**
**वेसं तं होइ मूढाणं खंतिसोहिकरं पयं ॥२९॥**

**व्याख्या—हितं** पथ्यं विगतभया इहलोकादिसप्तभयरहिता **बुद्धा** ज्ञाततत्त्वाः परुषमप्यनिष्टम**प्यनुशासनम**र्थाद् 'गुरुकृतं मन्यन्त' इति शेषः । **द्वेष्यं** द्वेषोत्पादि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तदनुशासनं भवति मूढानाम**ज्ञानाम् । अनुशासनं स्वरूपतो विशेषयति 'खंति त्ति' **क्षान्तेः शुद्धि**र्नैर्मल्यं **तत्करम्**पलक्षणाद् मार्दवार्जवशुद्धिकरमपि । अमूढानां हि विशेषतो गुर्वनुशासनस्य क्षान्त्यादिहेतुत्वात् पदं ज्ञानादिगुणानां स्थानम् ॥२९॥

पुनर्विनयमेवाह—

**आसणे उवचिट्ठिज्जा अणुच्चे अकुए थिरे ।**
**अप्पुट्ठाई निरुट्ठाई निसीएज्जऽप्पकुक्कुए ॥३०॥**

**व्याख्या—आसने** पीठादौ वर्षासु ऋतुबद्धे पादपुञ्छने **उपतिष्ठेदु**पविशेत् । **अनुच्चे** द्रव्यतो नीचे, भावतस्त्वल्पमूल्ये गुर्वासनादिति गम्यम् । **अकुचे**ऽस्पन्दमाने किञ्चिच्चलतस्तस्य शृङ्गाराङ्गत्वात् । **स्थिरे** निश्चले, अन्यथा सत्त्वविराधनासम्भवात् । ईदृशेऽप्यासने **अल्पोत्थायी** प्रयोजनेऽपि । न पुनः पुनरुत्थानशीलो निरुत्थायी कार्यं विना नोत्थानशील एवंविधश्च किमित्याह—**निषीदे**दासीत । 'अप्पकुक्कुए त्ति' **अल्पस्पन्दनः** करादिभिरल्पमेव चलन्, यद्वा**ऽल्पमसत् कौत्कुचं** भ्रू-कर-चरणाद्यसच्चेष्टात्मकमस्येत्यल्प-कौत्कुच इति ॥३०॥

एषणासमितिविषयं विनयमाह—

**कालेण निक्खमे भिक्खू कालेण य पडिक्कमे ।**
**अकालं च विवज्जित्ता काले कालं समायरे ॥३१॥**

**व्याख्या**—'सप्तम्यर्थे तृतीया' **काले** भिक्षार्थं **निष्क्रामेद्** गच्छेद् **भिक्षुः**, अकालनिर्गमे आत्मक्लामनादिदोषसम्भवात् । **काले च प्रतिक्रामेत** भिक्षाटनाद् निवर्तेत, न तु रसगृद्ध्याऽत्यर्थमटेत् । अत आह—**अकालं** चासमयं **विवर्ज्य काले** प्रस्तावे **कालमि**त्युपचारात् तत्कालोचितप्रत्युपेक्षणाद्यनुष्ठानं **समाचरेत्** कुर्यात् । उक्तञ्च—

"[१]कालम्मि कीरमाणं किसिकम्मं बहुफलं जहा होइ ।
इय सव्व च्चिय किरिया नियनियकालंमि फलहेऊ" ॥१॥ ॥३१॥

एषणाविधिमाह—

**परिवाडीए न चिट्ठिज्जा भिक्खू दत्तेसणं चरे ।**
**पडिरूवेण एसित्ता मियं कालेण भक्खए ॥३२॥**

**व्याख्या—परिपाट्यां** भोक्तुमुपविष्टजनपङ्क्त्यां **न तिष्ठेद्** भिक्षार्थम्, अप्रीत्यादि-

---

१. काले क्रियमाणं कृषिकर्म बहुफलं यथा भवति ।
इति सर्वैव क्रिया निजनिजकाले फलहेतुः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दोषसम्भवात् । किञ्च **भिक्षुर्दत्तं** दानं तस्मिन् गृहिणा दीयमाने **एषणां** तद्गतदोषगवेषणां **चरेदासेवेत** । **प्रतिरूपेण** पूर्वमुनिसदृशेन पतद्ग्रहादिधारणात्मकेन, न त्वन्यधार्मिक-कल्पितधातुतुरक्तवस्त्र-त्रिदण्ड-च्छत्राद्यात्मके**नैषयित्वा** गवेषयित्वा । अनेन गवेषणोक्ता । अथ ग्रासैषणामाह—**मितं** परिमितम्, अतिभोजनात् स्वाध्यायविघातादिदोषसम्भवात् । **कालेन** नमोक्कारेण पारित्तेत्यादिश्रुतोक्तप्रस्तावेनाद्रुताविलम्बितरूपेण वा **भक्षयेद्** भुञ्जीतेति ॥३२॥

पूर्वप्रविष्टान्यभिक्षुसम्भवे कृत्यमाह—

**नाइदूरमणासन्ने नन्नेसिं चक्खुफासओ ।**
**एगो चिट्ठिज्ज भत्तट्ठा लंघित्ता तं नइक्कमे ॥३३॥**

**व्याख्या**—सुब्व्यत्यया**न्नातिदूरे** तत्र तन्निर्गमानवगमादेषणाशुद्ध्यभावाच्च । **नासन्ने** नातिनिकटे तत्र पुराऽऽगतभिक्षुकाप्रीतिसम्भवात् । **नान्येषां** भिक्षुकापेक्षया गृहिणां **चक्षुःस्पर्शतः** 'सप्तम्यर्थे तस्' ततस्तद्दृष्टिगोचरे तिष्ठेत् । किन्त्वेकान्ते यथैषोऽन्यभिक्षु-निष्क्रमणं वाञ्छतीति गृहिणो न जानन्ति । एकस्तदुपरि द्वेषरहितो भक्तार्थं भोजनार्थं 'लंघित्त त्ति' **उल्लङ्घ्य तं** भिक्षुं **नातिक्रामेद्** न प्रविशेत् तदप्रीत्यपवादादिसम्भवात् । इह प्राग् भोजनविधिमुक्त्वा पुनर्भिक्षाभिधानं ग्लानाद्यर्थं स्वयं वा क्षुधामसहिष्णोः पुनर्भिक्षा-भ्रमणानुज्ञापनार्थम् । उक्तञ्च—

"[१]**जइ तेण न संथरे ।**
**तओ कारणमुप्पन्ने भत्तपाणं गवेसए**" त्ति ॥३३॥

तद्गतमेव विधिमाह—

**नाइउच्चे व नीए वा नासन्ने नाइदूरओ ।**
**फासुयं परकडं पिंडं पडिगाहिज्ज संजए ॥३४॥**

**व्याख्या**—**नात्युच्चे** मालादौ, **नीचे वा** भूमिगृहादौ तत्रोत्क्षेप–निक्षेपनिरीक्षणा-सम्भवात् । यद्वा **नात्युच्चो** द्रव्यतो नोच्चस्थानस्थो नोर्ध्वीकृतकन्धरो वा, भावतश्चाहोऽहं धिमानिति गर्वाध्मातः । **नीचो** द्रव्यतो नीचस्थानस्थोऽतिनीचैः कृतकन्धरो वा । भावतो नीचो न मयाऽद्य किञ्चिदवाप्तमिति दैन्यवान् । **नासन्ने नातिदूरे** स्थित इति गम्यम् । यथायोगं जुगुप्सा-शङ्कैषणाशुद्ध्यसम्भवादयो ह्येवं दोषास्तथा **प्रासुकं** सहज-संसक्तिज-

---

१. यदि तेन न संस्तरेत् ।
ततः कारण उत्पन्ने भक्तपानं गवेषयेत् इति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जन्तुवर्जितम् । **परकृतं** गृहिणा स्वार्थं कृतं **पिण्डं प्रतिगृह्णीयात् संयत** इति ॥३४॥

पुनर्ग्रासैषणाविभागमाह—

**अप्पपाणेप्पबीयंमि पडिच्छन्नंमि संवुडे ।**
**समयं संजए भुंजे जयं अपरिसाडियं ॥३५॥**

**व्याख्या**—अल्पप्राणे अल्पाः प्राणा अवस्थिता गन्तुका यत्र । **अल्पबीजे** शाल्यादिबीजविकले, उपलक्षणात् सर्वैकेन्द्रियरहिते । **प्रतिच्छन्ने** सम्पातिमसत्त्व-रक्षार्थमुपरिप्रावरणान्विते । **संवृते** पार्श्वतः कटकुट्यादिसङ्कटद्वारे 'उपाश्रयादाविति गम्यम्' अन्यथा दीनादियाचने दानादानयोः पुण्यबन्ध-द्वेषादिदोषसम्भवात् । **समकं** साधुभिः सह, न त्वेकाकी रसलाम्पट्यात् । तथोक्तम्—

**"[1]साहवो तो चियत्तेणं निमंतेज्ज अहक्कमं ।**
**जइ तत्थ केइ इच्छिज्जा तेहिं सद्धिं तु भुंजए" ॥१॥**

**संयतो भुञ्जीत यतमानः** सुरसुरादिदोषाद्यकुर्वन् । **अपरिसाटितं** परिसाटेन भूमिपातेन रहितम् ॥३५॥

वाग्यतनामाह—

**सुकडे ति सुपक्के त्ति सुच्छिन्ने सुहडे मडे ।**
**सुनिट्ठिए सुलट्ठि त्ति सावज्जं वज्जए मुणी ॥३६॥**

**व्याख्या—सुकृत**मन्नादि, **सुपक्वं** घृतपुर्णादि, **सुच्छिन्नं** पत्र-शाकादि, **सुहृतं** शाकादेस्तिक्तत्वादि, **सुमृतं** घृतादि सक्तु—सूपादौ । **सुनिष्ठितं** रसप्रकर्षतया निष्ठां गतं, **सुलष्टं** शोभनं शाल्याद्यखण्डोज्ज्वलादिप्रकारैरेवमन्यदपि सावद्यं वर्जयेद् मुनिः । निरवद्यं तु **सुकृत**मनेन ध्यानाध्ययनादि, **सुपक्वमस्य** वचोविज्ञानादि, **सुच्छिन्नं** स्नेहनिगडादि, **सुहृतो**ऽयमुत्प्रव्राजकनिजकेभ्यः शिष्यः, **सुमृतमस्य** पण्डितमरणेन, **सुनिष्ठितो**ऽयं साध्वाचारे, **सुलष्ट**मतिशयप्रधानमस्य तपोऽनुष्ठानमित्यादि कारणतो वा प्रयत्नपक्वाद्यप्यागमानुसारेण वदेदपीति ॥३६॥

विनीताविनीतयोरनुशासने गुरोर्यत् स्यात् तदाह—

**रमए पंडिए सासं हयं भद्दं व वाहए ।**
**बालं सम्मइ सासंतो गलियस्सं व वाहए ॥३७॥**

---

१. साधून् ततः प्रतीत्या निमन्त्रयेद् यथाक्रमम् ।
यदि तत्र केचिदिच्छेयुस्तैः सार्धं तु भुञ्जीत ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—रमते** धृतिमान् स्यात् पण्डितान् विनीतान् शासत् स्खलिते शिक्षयन् गुरुरिति शेषः । **हयमिवाश्वमिव** कीदृशं ? **भद्रं** कल्याणावहं वाहकोऽश्वन्दमः । बालमज्ञं 'सम्मइ त्ति' **श्राम्यति** खिद्यते **शासद्** गुरुः, स हि प्रवृत्ति-निवृत्त्योः पुनस्तदनुशासने न खिद्यत एव, **गल्यश्वमिव वाहक** इति ॥३७॥

गुर्वनुशासने बालाभिसन्धिमाह—

**खड्डुया मे चवेडा मे अक्कोसा य वहा य मे ।**
**कल्लाणमणुसासंतो पावदिट्ठि त्ति मन्नइ ॥३८॥**

**व्याख्या—खड्डुका**ष्टक्करा **मे** मम, **चपेटा मे, आक्रोशा** निष्ठुरभाषणानि **मे, वधाश्च** दण्डादिघाता **मे,** अनुशासनं नापरं किञ्चिद् हितमस्तीत्यभिप्रायवान् । **कल्याण**-मिहपरलोकहित**मनुशास्यमानो** गुरुणा **पापदृष्टि**रर्थात् कुशिष्य **इति** प्रागुक्तं **मन्यते** ॥३८॥

विनीताविनीताभिसन्धिमाह—

**पुत्तो मे भाय नाइ त्ति साहू कल्लाण मन्नइ ।**
**पावदिट्ठी उ अप्पाणं सासं दासं व मन्नइ ॥३९॥**

**व्याख्या—पुत्रो मे, भ्राता** मे, **ज्ञातिरयं** मे **इति** धिया यमाचार्यो मामनुशास्तीति **साधु**र्विनीतः **कल्याणं** हितं गुरुमनुशासनं वा **मन्यते** । **पापदृष्टिस्तु पुनरात्मानं** 'सासं ति' प्राकृतत्वात् **शास्यमानं** दासमिव मन्यते ॥३९॥

विनयसर्वस्वमाह—

**न कोवए आयरियं अप्पाणं पि न कोवए ।**
**बुद्धोवघाई न सिया न सिया तोत्तगवेसए ॥४०॥**

**व्याख्या—**न **कोपयेदाचार्यमुप**लक्षणादन्यमपि विनयार्हम् । तथा **आत्मानमपि** गुरुभिरतिपरुषभाषणादिना शास्यमानं **न कोपयेत्** । कथञ्चित् कोपे सति **बुद्धोपघाती** गुर्वाद्युपघाती **न स्याद्** न स्यात् **तोत्रगवेषक**स्तोत्रं द्रव्यतः प्राजनकः, भावतस्तु जात्यादिदोषोद्भावनेन व्यथोत्पादकं वचस्तदन्वेषकोऽर्थाद् गुरूणाम् ॥

बुद्धोपघातित्वे **कुशिष्य**कथा । तथाहि—

उपशान्ता जनाम्भोजतिग्मभासो बहुश्रुताः ।
आचार्याः सत्क्रियाः केचिदनिगूहितशक्तयः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अनैयत्यं विहारेण विहर्तुं सोद्यमा अपि ।
जङ्घाबलपरीहाणेः संनिवेशे स्थिताः क्वचित् ॥२॥

सनाथमार्हततीर्थमेतैः श्रुतपयोह्रदैः ।
विचिन्त्येत्यास्तिकास्तत्र तान् परं पर्युपासते ॥३॥

वयोऽवस्थोचितैः स्निग्धमधुराद्यशनादिभिः ।
सदा भैषज्य-वस्त्राद्यैस्ते तानुपचरन्ति च ॥४॥

उक्तञ्च—

**"[१]जे गिलाणं पडियरइ से धन्ने उयाहु जे तुमं दंसणेणं पडिवज्जइ से धन्ने ? । गोयमा ! जे गिलाणं पडियरइ से धन्ने ? से किमाहु भंते !? । गोयमा ! जे गिलाणं पडियरइ से मं दंसणेणं पडिवज्जइ । जे मं दंसणेणं पडिवज्जइ से गिलाणं पडियरइ । आणाराहणं खु दंसणं जिणाणं"** ॥

तेषां मुखाच्छ्रुतश्रुत्या तेषां वन्दन-भक्तिभिः ।
आत्मानं कृतकर्तव्यं मेनिरे ते दृढार्हताः ॥५॥

शिष्यास्तु गुरुकर्म्माणः पाप्मानो मन्दबुद्धयः ।
गुणानुरागनिर्मुक्ताः पठिता अपि बालिशाः ॥६॥

*रत्नप्रायं गुरोर्योगं प्राप्यापि हितहेतुकम् ।*
*अनर्थयन्तस्तद्भक्त्युद्विग्नचित्ता दुराशयाः ॥७॥*

दुष्प्रतीकारतां सूत्रप्रोक्तामवगणय्य च ।
इति चिन्तयितुं लग्ना भग्ना गलिवृषा इव ॥८॥

असौ कियच्चिरं पाल्योऽस्माभिः सूरिरजङ्गमः ।
अक्षमैरन्यतो गन्तुं चारक्षिप्तैरिवान्वहम् ॥९॥

ततः केनाप्युपायेनानशनं प्रतिपद्यते ।
चेद् गुरुस्तद् वयं मुक्ताऽऽत्मानस्स्मः क्षेमभाजनम् ॥१०॥

इति ध्यात्वा ततो नोपाददते भेषजादिकम् ।
दीयमानमपि श्राद्धैस्ते प्रद्विष्टा गुरूचितम् ॥११॥

---

१. यो ग्लानं प्रतिचरति स धन्यः, उताहो ! यस्त्वां दर्शनेन प्रतिपद्यते स धन्यः ? । गौतम ! यो ग्लानं प्रतिचरति स धन्यः । तत् किमाह भगवन् ? । गौतम ! यो ग्लानं प्रतिचरति, स मां दर्शनेन प्रतिपद्यते । यो मां दर्शनेन प्रतिपद्यते, स ग्लानं प्रतिचरति । आज्ञाराधनं खलु दर्शनं जिनानाम् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निर्बन्धेन ग्राह्यमाणा आस्तिकैस्ते वदन्ति च ।
किं कुर्मो यदुपक्रान्ता गुर्वी संलेखना हितैः ॥१२॥

अशनं प्रान्तमान्तं च भुञ्जन्तो गुरवोऽधुना ।
तप्यन्ते च तपस्तीव्रमस्माभिर्वारिता अपि ॥१३॥

एतदाकर्ण्य तद्वाक्यं गुरुषु प्रेममेदुराः ।
श्रमणोपासकाः सर्वेऽप्यधृतिं परमां व्यधुः ॥१४॥

गुरूणां पुरतः शिष्यपांशनास्तेऽप्यथोचिरे ।
ही ! किमत्र करिष्यामः स्थित्वा निर्भाग्यके पुरे ? ॥१५॥

यत्र युष्मादृशां प्राप्तनिखिलागमसम्पदाम् ।
चिरावस्थानतः खिन्नाः श्राद्धा भक्तावुदासते ॥१६॥

अहो ! प्रतिगृहं भ्रान्तं प्रत्यास्तिकमथार्थितम् ।
परं नाप्तं भवद्योग्यं सर्वेषां धीः समा ह्यभूत् ॥१७॥

सरलाः सूरयो दध्युरविहारे हि लाघवम् ।
यदुक्तमागमे नूनं तद् भवेत् कथमन्यथा ? ॥१८॥

संलेखनास्थमाचार्यं ज्ञात्वाऽन्तःशोकसङ्कुलाः ।
उपसूरि समागत्य श्राद्धाः साञ्जसमूचिरे ॥१९॥

गुरवोऽर्हद्दिनेशेषु प्राप्तेषु परमं पदम् ।
प्रदीपैरिव विश्वेयं श्रीमद्भिर्निस्तमायते ॥२०॥

*तत् क्षेत्रं पावनं यत्र श्रीभवन्तः सदाऽऽसते ।*
*किं कल्पपादपा भास्कराः सुरमहीभृतः ? ॥२१॥*

दृब्धा संलेखना केयमकाण्डे श्रुतसागराः ? ।
जीवन्तो हि भवन्तः स्युः स्व-परार्थैकसाधकाः ॥२२॥

नेति चिन्त्यं यदेकत्रैषां निर्वेदाय नः स्थितिः ।
न निर्वेदाय यूयं गोः शृङ्गा इव शिरःस्थिताः ॥२३॥

श्रुत्वेति गुरुणाऽचिन्ति विनयास्तिकवाक्ययोः ।
निर्दम्भं कतरद् वाक्यं न शठा ह्यास्तिका इमे ॥२४॥

चेष्टयाऽनेकशो ज्ञातं शिष्यशाठ्यं पुराऽपि हि ।
तदनेन पराप्रीतिकरणे वपुषाऽप्यलम् ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ज्ञापिते साधुचरितेऽमीषां भावोऽपि हीयते ।
श्राद्धैस्तु नोदिताः शिष्या असूयिष्यन्ति मां भृशम् ॥२६॥

*यतोऽप्रीतिः परेषां स्याद् न तत् कुर्वन्ति धार्मिकाः ।*
*श्रमणो भगवान् वीरस्तत्रोदाहरणं प्रभुः ॥२७॥*

सम्प्रधार्येति भणितमप्रदर्शितविक्रियम् ।
श्राद्धाः ! स्थातव्यमस्माभिः कियच्चिरमजङ्गमैः ? ॥२८॥

*यावद् वस्तु क्रियाकारि तावत् तत्र महाऽऽदरः ।*
*रक्षिते किमिदानीं भोः ! अक्षमेऽस्मिन् कलेवरे ॥२९॥*

*अनेन गत्वरेणाशु चेच्छरीरेण साध्यते ।*
*असारकेण सारार्थस्तत् किं नात्र प्रसाधितम् ? ॥३०॥*

युष्माभिर्विहिता भक्तिः पुण्यान्युपचितानि च ।
धर्मलाभोऽस्तु नो मिथ्या दुष्कृतं सकलैः सह ॥३१॥

प्रबोध्य मधुरालापैरित्येतान् गुरवस्ततः ।
विहितानशनाः प्रापुः स्वर्गालङ्कारहारताम् ॥३२॥

आस्तिका अधृतिं चक्रुर्मुनयो ज्ञातदुष्कृताः ।
निन्दामापुर्भवभ्रान्तिं परां चानुबभूविरे ॥३३॥

एवं बुद्धोपघाती न स्यात् ॥४०॥

कथञ्चित् कुपिते गुरौ कृत्यमाह—

**आयरियं कुवियं नच्चा पत्तिएणं पसायए ।**
**विज्झविज्ज पंजलिउडो वएज्जा न पुणो त्ति य ॥४१॥**

**व्याख्या—आचार्य**मुपलक्षणत्दुपाध्यायादिकमन्तः**कुपित**मनुशासनौदासीन्यादिभिर्बहिः कुपितं दृष्ट्यप्रदानादिना **ज्ञात्वा** 'पत्तिएणं ति' **प्रातीतिकेन** प्रत्ययोत्पादकशपथादिवचनेन, यद्वा प्रीत्या सामवचसा न भेदादिभिः **प्रसादयेत्** प्रसादं ग्राहयेत् । **विध्यापयेत्** कथञ्चिदुदीरितकोपानलमप्युपशमयेत् । **प्राञ्जलिपुटः** संयोजितकरः । वदेच्च यथा भगवन् ! ममेदमनाचरितं क्षन्तव्यं **न पुनरित्थं** करिष्ये ॥४१॥

यथा गुरोः कोप एव न स्यात्, तथाऽऽह—

**धम्मज्जियं च ववहारं बुद्धेहिं आयरियं सया ।**
**तमायरंतो ववहारं गरिहं नाभिगच्छइ ॥४२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—धर्मेण** क्षान्त्यादिनार्जित**मुपार्जितं 'च:** पूरणे' विविधमवहरण-मनेकार्थत्वादाचरणं व्यवहारस्तं प्रत्युपेक्षणादि यतिकर्त्तव्यतारूपं **बुद्धै**रवगततत्त्वै**राचरितं सदा तमाचरन्**। तं कीदृशम् ? व्यवहारं विशेषेण पापकर्मापहारकं **गर्हाम**विनीतो-ऽयमित्येवंविधां निन्दां **नाभिगच्छति** प्राप्नोति 'यतिरिति गम्यम्' ॥४२॥

किञ्च—

**मणोगयं वक्कगयं जाणित्ता आयरियस्स उ ।**
**तं परिगिज्झ वायाए कम्मुणा उववायए ॥४३॥**

**व्याख्या—मनोगतं वाक्यगतं** 'कृत्यमिति शेषः' **ज्ञात्वा** विनीततयाऽऽ**चार्यस्य तु**शब्दात् कायगतमपीङ्गितादिना **तन्म**नोगतादि **परिगृह्या**ङ्गीकृत्य वाचेदमित्थं करोमीति-रूपया **कर्मणा** तत्करणात्मकेन **तदुपपादयेत्** कुर्यात् ॥४३॥

स च यादृक् स्यात्, तदाह—

**वित्ते अचोइए निच्चं खिप्पं हवइ सुचोइए ।**
**जहोवइट्ठं सुकयं किच्चाइं कुव्वई सया ॥४४॥**

**व्याख्या—वित्तो** विनयवत्तया सर्वगुणाश्रयत्वेन प्रसिद्धोऽ**चोदितो** गुरुभिरप्रेरितः 'कृत्येषु प्रवर्तते इति शेषः' यथा विनीतधुर्यः प्रतोदोत्क्षेपाप्रेरित इति । **नित्यं** न तु कदाचित्। स्वयं प्रवर्तमानोऽपि प्रेरितोऽनुशयवानपि स्यादिति कस्याप्याशङ्कां निराकर्तुमाह—**क्षिप्र**मिति शीघ्रं **भवति** सति **सुचोदके** शोभने प्रेरयति 'गुराविति गम्यम्' । प्रेरके तु सति निर्विलम्बं प्रवर्तते, न त्वनुशयवान् भवतीत्यर्थः । **यथोपदिष्टं** गुर्वादिष्टानतिक्रमेण **सुकृतं** सुष्ठु कृतं यथा स्यादेवं **कृत्यानि करोति** सदा ॥४४॥

सम्प्रत्युपसंहर्तुमाह—

**नच्चा नमइ मेहावी लोए कित्ती य जायए ।**
**हवइ किच्चाण सरणं भूयाणं जगई जहा ॥४५॥**

**व्याख्या—ज्ञात्वा**ऽनन्तरोक्तमध्ययनार्थं **नमति** तत्कृत्यं प्रति प्रह्वीभवति **मेधावी** एतदर्थावधारणशीलः । तद्गुणमाह—**लोके कीर्त्तिः** सुलब्धमस्य जन्मेत्यादि श्लाघा, **च**शब्दाद् यशो यतः—'**एकदिग्व्यापिनी कीर्त्तिः सर्वदिग्व्यापकं यशः**' इति विशेषो जायते प्रादुर्भवति। एवंविध एव **भवति** कृत्यानामुचितानां **शरणमा**श्रयो **भूतानां** प्राणिनां **जगती यथे**ति ॥४५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततः किमित्याह—

**पुज्जा जस्स पसीयंति संबुद्धा पुव्वसंथुया ।**
**पसन्ना लाभइस्संति विउलं अट्ठियं सुयं ॥४६॥**

**व्याख्या—पूज्या** आचार्यादयो **यस्य** शिष्यस्य **प्रसीदन्ति** तुष्यन्ति **सम्बुद्धाः** सम्यगवगततत्त्वाः **पूर्वं** श्रुतवाचनाऽऽदिकालादारत एव तत्कालविनयस्य कृतप्रतिक्रिया-रूपत्वेन तथाविधप्रसादजनकत्वात् **संस्तुता** विनयविषयत्वेन परिचिताः । यद्वा **पूर्वं संस्तुताः** सम्यक् स्तुताः सद्भूतगुणोत्कीर्त्तनादिभिः **प्रसन्नाः** सप्रसादा **लम्भयिष्यन्ति** प्रापयिष्यन्ति । **विपुलम्** अर्थो मोक्षः प्रयोजनमस्येत्या**र्थिकं** श्रुतमङ्गानङ्गादिभेदम् । अनेन विनयस्य पूर्वप्रसादोऽनन्तरफलं तस्य च श्रुतमुक्तम्, परम्परफलं तु मुक्तिरिति । यदाह वाचकः—

**"विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम् ।**
**ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः ॥१॥**
**संवरफलं तपोबलमथ तपसो निर्जराफलं दृष्टम् ।**
**तस्मात् क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ॥२॥**
**योगनिरोधाद् भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः ।**
**तस्मात् कल्याणानां सर्वेषां भाजनं विनयः" ॥३॥**

विनयफले श्री**कृष्ण**कथा—

अस्त्युपोदधि विख्याता गुर्वी **द्वारावती** पुरी ।
वार्द्धेः स्रष्ट्रोत्कण्ठयेवादाय रत्नानि निर्मिता ॥१॥

तत्रार्धचक्री भूपालः श्री**कृष्णः** परमार्हतः ।
यत्तेजोदीपकश्चित्रं तमश्चक्रेऽरिचेतसि ॥२॥

अन्यदा **रैवतो**द्याने श्री**नेमिः** समवासरत् ।
स्फीतां विस्तारयँल्लक्ष्मीं गत्वाऽवन्दत **केशवः** ॥३॥

*"अदत्त देशनां योग्यां जगन्नाथोऽपि सर्ववित् ।*
*मोक्षस्यानन्तरो हेतुः शुद्धो भावस्तवो मतः ॥४॥*

*तप्तायोगोलकल्पस्य गृहिणः स कुतो भवेत् ? ।*
*तथापि देशतः कार्योऽर्हद्गुरूपासनादिकः ॥५॥*

*इहैव जिनपूजा स्यात् सर्वदुःखविमुक्तये ।*
*परत्र च नरामर्त्त्यमहोदयसुखप्रदा ॥६॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जिनोऽपि गुरुरन्येऽपि गुरवो मुनयः समे ।
दानेन बहुमानेन तद्भक्तिर्निर्जराकृते ॥७॥

उक्तञ्च—

**"प्रौढप्रीतिसरङ्गसङ्गि हृदयं वाणी गुणग्राहिणी,**
**कायः कैतवमुक्तवन्दनकवान् दुश्चेष्टितालोचनम् ।**
**प्रायश्चित्तपवित्रपालनविधिर्वस्त्रान्न-पानाश्रय-**
**प्रावारप्रमुखप्रदानमिति भोः ! भक्तिर्गुरौ गीयते" ॥१॥**

***धर्मद्रोर्विनयो मूलं बहुमानादसौ भवेत् ।***
***स च वन्दनकेन स्यात् प्रयोज्यं तद् गुरोरतः" ॥८॥***

उक्तञ्च श्रुते—

**"[1]विणओवयार माणस्स भंजणा पूयणा गुरुजणस्स ।**
**तित्थयराण य आणा सुयधम्माराहणा किरिया ॥१॥**

**खवई नीयागोयं उच्चायं गोयं च बंधए कम्मं ।**
**सोहग्गं निव्वत्तइ आणासारं जणपियत्तं" ॥२॥**

वन्दनस्य फलं श्रुत्वा निर्जरामाह **केशवः** ।
ममादिशत साधूनां सर्वेषां वन्दनं ददे ॥९॥

अष्टादश सहस्राणां तदादेशेन भक्तितः ।
साधूनां वन्दनं दत्त्वा सत्रा **वीरेण** माधवः ॥१०॥

विज्ञप्तिं प्राञ्जलिश्चक्रे विग्रहा बहुशो मया ।
विभो ! कृता नैव परं श्रमस्तेष्वीदृशोऽजनि ॥११॥

यादृशः शान्त-दान्तानां मुनीनां वन्दनक्षणे ।
जिनोऽथोवाच वैकुण्ठार्जितं यत् तन्निशम्यताम् ॥१२॥

"चारित्रभूपप्रत्यक्षं भटा दुर्मोहभूपतेः ।
आद्याः कषायाश्चत्वारस्तथाऽन्यद् दर्शनत्रिकम् ॥१३॥

---

१. विनयोपचारो मानस्य भञ्जनं पूजनं गुरुजनस्य ।
तीर्थकराणां चाज्ञा श्रुतधर्माराधना क्रिया ॥१॥

क्षपयति नीचगोत्रमुच्चगोत्रं न बध्नाति कर्म ।
सौभाग्यं निर्वर्तयत्याज्ञासारं जिनप्रियत्वम् ॥२॥

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

इति सप्त क्षयं नीता विनैतैर्मोहभूपतिः ।
क्रूरोऽप्यक्षम उत्कीर्णदाढोरग इवाभवत् ॥१४॥
सदा सप्तभिरप्येतैः पुरा त्वयि यदावृतम् ।
इदानीं तत् तव व्यक्तमभूत् क्षायिकदर्शनम् ॥१५॥
अस्मिस्ते प्रकटे जाते दुर्बले कर्मसञ्चये ।
भावि शाश्वतिकं सौख्यं भवेऽवश्यं तृतीयके ॥१६॥
किञ्च विष्णो ! महारम्भप्रचितं कर्म्म यत् त्वया ।
आसीन्**माघवती**वेद्यं शैलावेद्यं तु तत् कृतम्'' ॥१७॥
आकर्ण्येति विषण्णात्मा जगाद पुरुषोत्तमः ।
भवत्यपि प्रभौ दुःखं भोक्तव्यं ही ! कथं मया ? ॥१८॥
एकदाऽपि कृतो मुक्त्यै प्रणामो भावतोऽर्हतः ।
त्वद्भक्तस्य तृतीयो मे नरको धिक् कुकर्मताम् ॥१९॥
*सूर्येऽप्यभ्युदिते ध्वान्तं स्याच्चेत् तत् क्रियते किमु ? ।*
*त्वयि प्रभावकल्याणं तत् पूत्कुर्वेऽत्र किं पुरः ? ॥२०॥*
भूयोऽप्यादिश दास्यामि वन्दनानि तपस्विनाम् ।
मुच्येय नारकक्लेशैर्यथा स्वामिंस्तथा कुरु ॥२१॥
*''आदिदेश जिनो मुक्तिर्नास्ति प्रचितकर्मणः ।*
*साशंसा च क्रिया न स्यादभीष्टफलसाधिका ॥२२॥*
भृशं वैलक्ष्यमापन्नं व्याजहार जिन जिनः ।
मा विषादं कृथा अद्य तीर्णोऽसि क्लेशसागरम् ॥२३॥
जिनोऽहमिव भूत्वा त्वं निष्कषायस्त्रयोदशः ।
भरतेऽत्र जगद्वन्द्यः शीघ्रं निवाणमाप्स्यसि'' ॥२४॥
तुष्टो हरिरुवाचाथ **वीर**स्य किमभूत् फलम् ? ।
त्वच्चित्ताराधनादन्यन्नैवेत्याह जिनेश्वरः ॥२५॥

उक्तञ्च—

**''किरिया[१] नाणं दाणं चरणं करणं दया दमो सयलं ।**
**सविवेयमणे सहलं किलेसमित्तं फलं इहरा'' ॥१॥**

---

१. क्रिया ज्ञानं दानं चरणं करणं दया दमः सकलम् ।
सविवेकमनसि सफलं क्लेशमात्रं फलमितरथा ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवमाभाषितो नत्वा जिनं निर्वृतिसस्पृहः ।
**द्वारवत्यां** चिरं भेजे विष्णुः साम्राज्यमुज्ज्वलम् ॥२६॥
इति पुरुषोत्तमविषयं श्रुत्वा विनयोपचारफलमतुलम् ।
तत्रैव यत्नमनिशं कुरुतान्यैरलमलं कष्टैः ॥२७॥

इति विनये **विष्णुः** ॥

श्रुतावाप्तावैहिकफलमाह—

**स पुज्जसत्थे सुविणीयसंसए मणोरुई चिट्ठइ कम्मसंपया ।**
**तवोसमायारि-समाहि-संवुडे महज्जुई पंच वयाइं पालिया ॥४७॥**

**व्याख्या—स** शिष्यः सुप्रसन्नगुरोरधिगतश्रुतः **पूज्यशास्त्र** श्लाघ्यशास्त्रः सुष्ठ्वतिशयेन विनीतोऽपनीतः संशयो यस्य स **सुविनीतसंशयः** । मनसश्चित्तस्यार्थाद् गुरो रुचिरभिलाषोऽस्मिन्निति **मनोरुचि**स्तिष्ठत्यास्ते गुरुपार्श्वे विनयाधिगतागमत्वेनातिप्रियत्वात् । मनोरुचित्वमुक्तम् । **कर्म** क्रिया इच्छादिदशविधचक्रवालसामाचारी तस्याः **सम्पदा** तयोपलक्षित इति गम्यम् । **तपसः सामाचारी** समाचरणं, **समाधि**श्चेतःस्वास्थ्यं ताभ्यां **संवृतो** निरुद्धाश्रवः । महती द्युतिस्तपोदीप्तिर्यस्येति **महाद्युति**र्भवतीति गम्यम् । **पञ्च व्रतानि** पालयित्वा निरतिचारं संस्पृश्येति ॥४७॥

आमुष्मिकं फलमाह—

**स देव-गंधव्व-मणुस्स-पूइए चइत्तु देहं मलपंकपुव्वयं ।**
**सिद्धे वा हवइ सासए देवे वा अप्परए महिड्ढिए ॥४८॥ त्ति बेमि ॥**

**व्याख्या—स** तादृग् विनीतविनयो **देव-गन्धर्व-मनुष्य-पूजितस्त्यक्त्वा देहं मल-पङ्कौ** रक्त-शुक्रे तत्**पूर्वकं** तत्प्रथमकारणं **सिद्धो वा** निष्ठितार्थो वा **भवति शाश्वतः** सदाऽवस्थायी न तीर्थनिकारादाविह पुनरागन्ता **बुद्धवत्** । **देवो वा**ऽल्परजाः प्रतनुबद्ध्यमानकर्मा महती ऋद्धिश्चक्रवर्त्यादिका तृणाग्राद् हिरण्यकोटिवर्षणादिरूपा वा यस्येति **महर्द्धिकः** । **इति** परिसमाप्तौ "इतेः स्वरात् तश्च द्विः" ॥८।१।३९॥ इति सूत्रेण इकारस्य लोपस्तेश्च द्वित्वम् । एवं सर्वत्र ज्ञेयम् । ब्रवीमीति गणभृदाद्युपदेशतो न तु स्वधिया ॥४८॥

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां प्रथमं विनयाध्ययनं समाप्तम् ॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# द्वितीयं परीषहाध्ययनम्

इह पूर्वाध्ययने विनयः सप्रपञ्च उक्तः । स च स्वस्थैः परीषहार्त्तैरपि कार्य एवेति परीषहाध्ययनं व्याख्यातुमारभ्यते । तस्येदमादिसूत्रम्—

**सुअं मे आउसं ! तेणं भगवया एवमक्खायं इह खलु बावीसं परीसहा समणेणं भगवया महावीरेणं कासवेणं पवेइया । जे भिक्खू सुच्चा नच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयंतो पुट्ठो नो विनिहनिज्जा ॥१॥**

**व्याख्या—सुधर्म**स्वामी **जम्बू**स्वामिनं प्रति आह । **श्रुतं** मे **मया आयुष्यमन्** ! **तेन** जगत्प्रसिद्धेन **भगवता** समग्रैश्वर्यादियुक्ते**नैवमाख्यातं** । किमित्याह—**इह** प्रवचने **खलु**रलङ्कारे **द्वाविंशतिः परीषहाः** सन्तीति गम्यम् । तत्र भगवतापि कथं ज्ञाता इत्याह—**श्रमणेन भगवता महावीरेण काश्यपगोत्रेण प्रवेदिताः** प्रकर्षेण स्वयं केवलज्ञानेन साक्षाज्ज्ञातास्ते कीदृशाः ? इत्याह—**यान्** परीषहान् **भिक्षुः** साधुः **श्रुत्वा** गुरुमुखात्, **ज्ञात्वा** यथावदबुध्य, जित्वा पुनःपुनरभ्यासेन परिचितान् कृत्वा, **अभिभूय** तत्सामर्थ्यमुपहत्य **भिक्षाचर्यायां परिव्रजन् स्पृष्ट** आश्लिष्टोऽर्थात् परीषहैरेव **नो** नैव **विनिहन्येत** संयमाङ्गोपघातेन विनाशमाप्नुयात् । यतो हि भिक्षाऽटने प्रायः परीषहा उदीर्यन्ते । उक्तञ्च—"[१]**भिक्खायरियाए बावीसं परीसहा उईरिज्जंति**" । शिष्यः प्रश्नयति—

**कयरे ते खलु बावीसं परीसहा समणेणं० ॥२॥**

**कतरे** किंनामान**स्ते खलु द्वाविंशतिः परीषहाः** ? । शेषं प्राग्वत् । उत्तरमाह—

**इमे खलु ते बावीसं परीसहा समणेणं०**

**इमे**ऽनन्तरं वक्ष्यमाणत्वेन प्रत्यक्षाः । **ते** इति ये त्वया पृष्टाः शेषं प्राग्वत् ।

---

१. भिक्षाचर्यायां द्वाविंशतिः परीषहा उदीर्यन्ते ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तं जहा-दिगिंछापरीसहे १. पिवासापरीसहे २. सीयपरीसहे ३. उसिणपरीसहे ४. दंसमसगपरीसहे ५. अचेलपरीसहे ६. अरइपरीसहे ७. इत्थीपरीसहे ८. चरियापरीसहे ९. निसीहियापरीसहे १०. सिज्जापरीसहे ११. अक्कोसपरीसहे १२. वहपरीसहे १३. जायणापरीसहे १४. अलाभपरीसहे १५. रोगपरीसहे १६. तणफासपरीसहे १७. जल्लपरीसहे १८. सक्कार-पुरक्कारपरीसहे १९. पन्नापरीसहे २०. अन्नाणपरीसहे २१. सम्मत्तपरीसहे २२ ॥३॥**

**तद्यथेत्यु**पन्यासे । 'दिगिंच्छा' देशीभाषया **क्षुधा** सैवात्यन्तव्याकुलत्वहेतुरपि पापभीरुतयाऽऽहारपाकानेषणीयादिवाञ्छानिवर्तनेन परीति सर्वप्रकारेण सह्यत इति **परीषहः** । एवं शेषपरीषहाणां नामान्वर्थो **बृहट्टीकातो**ऽवसेयः । केवलं **नैषेधिकी** स्मशानादिका स्वाध्यायभूमिः । **शय्या** उपाश्रयः । 'जयणा त्ति' **याञ्चा** । स्वयं विमर्शपूर्वको वस्तुपरिच्छेदः **प्रज्ञा** । स्वतः परतो वा वस्तुतत्त्वावगमो **ज्ञान**मिति ।

अथैषां स्वरूपतः सम्बन्धार्थमाह—

**परीसहाणं पविभत्ती कासवेणं पवेइआ ।**
**तं भे उदाहरिस्सामि आणुपुव्विं सुणेह मे ॥१॥**

**व्याख्या—परीषहाणाम**नन्तरोक्तानां **प्रविभक्तिः** पृथक्स्वरूपतारूपः प्रविभागः । **काश्यपेन** श्री**वीरेण प्रवेदिता** प्ररूपिता **तां** 'भे' **भवतामुदाहरिष्यामि** वक्ष्याम्यानुपूर्व्या क्रमेण **शृणुत मे** ममोदाहरत इति ॥१॥

इहाशेषपरीषहेषु क्षुत्परीषहस्यातिदुस्सहत्वादितस्तमाह—

**दिगिंछापरिगए देहे तवस्सी भिक्खु थामवं ।**
**न छिंदे न छिंदावए न पए न पयावए ॥२॥**

**व्याख्य—दिगिंछापरिगते** क्षुधाव्याप्ते **देहे तपस्वी** षष्ठाष्टमादितपोऽनुष्ठाता स च गृहस्थादिरपि स्यादत आह—**भिक्षुर्**यतिः **स्थामवान्** संयमबलवान् **न च्छिन्द्यात्** स्वयं, **न च्छेदयेद**न्यैः फलादि, **न पचेत्, न** चान्यैः **पाचयेद्**उपलक्षणान्नान्यं छिन्दन्तं पचन्तं वाऽनुमन्येतैवं क्रीणनेऽपि योज्यम् । क्षुत्पीडितोऽपि न नवकोटिशुद्धिबाधां विधत्त इति भावः ॥२॥

**कालीपव्वंगसंकासे किसे धमणिसंतए ।**
**मायन्ने असण-पाणस्स अदीणमणसो चरे ॥३॥**

**व्याख्या**—काली काकजङ्घा तस्याः पर्वाणि सन्धयः तत्पर्वाणि स्थूराणि मध्यानि च

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तनूनि कृशानि स्युस्ततस्तैः सङ्काशानि सदृशान्यङ्गानि जानु—कूर्परादीनि यस्य स **कालीपर्वसङ्काशाङ्गः** । प्राकृतत्वादङ्गशब्दस्य प्राग्निपातः । तपसा शोषिताङ्गत्वादस्थिचर्मावशेष इत्यर्थः । एवं **कृशो** 'धमणि त्ति' **धमनयः** शिरास्ताभिः **सन्ततो** व्याप्तः । तथा मात्रामाहारमानरूपां जानातीति **मात्राज्ञो**ऽशनपानस्य, नातिलौल्यादधिकोपभोगी, तदप्राप्तौ त्वदीनमना अनाकुलचित्त**श्चरेत्** संयममार्गे यायादेवं क्षुत्परीषहः सोढः स्यात् । **हस्तिभूति**यतिवत्—

तथाहि—

**उज्जयिन्यां** गृहपति**र्हस्तिमित्रो**ऽस्त्युदारधीः ।
प्रियामरणवैराग्यात् सूनुना **हस्तिभूति**ना ॥१॥

प्राव्राजीदन्यदा **भोगकटकं** नगरं प्रति ।
पथि साधुषु गच्छत्सु कण्टकेन स विव्यधे ॥२॥

बाढं वेदनया गन्तुं पदमप्येकमक्षमः ।
साधूनाह न शक्नोमि दत्त मेऽनशनं ततः ॥३॥

वहिष्यामो निजस्कन्धे दुःखं माऽधिमनः कुरु ।
ग्लानस्य प्रतिचरणा पुण्याय महतेऽस्तु नः ॥४॥

इत्युक्तस्तैरसौ प्रोचे खेदं भोः ! कुरुतात्र किम् ? ।
प्राप्तावसान एवाहं करिष्येऽनशनं ध्रुवम् ॥५॥

इत्युदीर्य विधायैतत् क्षमयित्वा मुनीश्वरान् ।
निर्बन्धात् प्रेषयामास पुरं सर्वान् मनीषितम् ॥६॥

स्वयमद्रेः स्थितोदर्यामेकाक्यथ तदङ्गजः ।
बलान्नीतोऽपि मोहेन वलित्वोप तदागमत् ॥७॥

सुष्ठु नानुष्ठितं वत्स ! क्षुधाऽत्र त्वं मरिष्यसि ।
सोऽप्याह त्वत्समीपस्थे यन्मयि स्यादिहास्तु तत् ॥८॥

वृद्धः समाधिना मृत्वा देवीभूयोपयुक्तवान् ।
अवधिज्ञातवृत्तान्तः प्रविवेश निजं वपुः ॥९॥

कृपया क्षुल्लकं प्राह वत्स ! भैक्ष्यकृते व्रज ।
कुत्रेति क्षुल्लकप्रश्ने न्यग्रोधादिषु सोऽवदत् ॥१०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तन्निवासिजनस्तुभ्यं भिक्षां दाताऽथ सोऽव्रजत् ।
तरुमूलोत्थसौवर्णहस्ताद् भैक्ष्यमवाप च ॥११॥

प्रत्यहं स तथा कुर्वंस्तस्थौ यावन्मुनीश्वराः ।
तेऽपि प्रत्याययुर्वर्षे द्वितीये तमलोकयन् ॥१२॥

पृष्टोऽवक् सकलं वृत्तं क्षपकं तानदर्शयत् ।
तावत् त्यक्ततनुर्देवोऽध्यक्षीभूयानमन्मुनीन् ॥१३॥

कृपयाऽदामहं पिण्डं मिथ्या दुष्कृतमस्तु मे ।
इत्युदीर्य गते देवे क्षुल्लस्तैर्व्यहरत् सह ॥१४॥

क्षपकेन क्षुधा सेहे यद्वा क्षुल्लोऽपि सोढवान् ।
विगणय्य क्षुधाबाधां तस्थौ तत्र वने यतः ॥१५॥

इति क्षुत्परीषहे **हस्तिभूति**यतिकथा ॥३॥

क्षुधार्दितस्योष्णे पर्यटतः पिपासापि स्यादिति द्वितीयं तत्परीषहमाह—

**तओ पुट्ठो पिवासाए दोगुंछी लज्जसंजए ।**
**सीओदगं न सेविज्जा वियडस्सेसणं चरे ॥४॥**

**व्याख्या—ततः** क्षुत्परीषहात् **स्पृष्टो**ऽभिद्रुतः पीडितः **पिपासया** । **जुगुप्सको**ऽनाचारस्य । लज्जया सं सम्यग् यतते कृत्यं प्रत्याहृतो भवति **लज्जासंयतः** । शीतोदकं स्वरूपस्थमप्रासुकं जलं न **सेवेत** पानादिना, किन्तु **विकृतस्य** स्वकायादिशस्त्रोपहतत्वेन विकारं प्रापितस्य प्रासुकस्यार्थादुदक**स्यैषणाय** गवेषणाय **चरे**दागमोक्तकुलेषु पर्यटेत् । चतुर्थ्यर्थे द्वितीया ॥४॥

किञ्च—

**छिन्नावाएसु पंथेसु आउरे सुपिवासिए ।**
**परिसुक्कमुहो दीणे तं तितिक्खे परीसहं ॥५॥**

**व्याख्या—छिन्नापातेषु** अपगतजनसञ्चारेषु **पथिषु** । गच्छन्निति गम्यम् । **आतुरो**ऽत्याकुलतनुः **सुपिपासितो**ऽतिशयेन तृषितः **परिशुष्कमुखो** विगतनिष्ठीवनतयाऽनार्द्रवदनो**ऽदीनो** दैन्याभावेन **तं** तृट्परीषहं **तितिक्षेत** सहेतायमर्थो विविक्तदेशस्थोऽप्यतिपिपासातोऽस्वास्थ्येऽपि नोक्तविधिमुल्लङ्घयेत्, ततः पिपासापरीषहोऽध्यासितः स्यात् । **धनशर्म**यतिवत्—

**धनमित्रः** प्रवव्राज पुत्रेण **धनशर्मणा** ।
**उज्जयिन्यां** क्रमादेष व्यहरत् साधुभिः सह ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ग्रीष्मेऽन्यदा तृषाऽऽक्रान्तो **धनशर्मा** पथि क्वचित् ।
नदीं-विलोक्य क्षपकस्तं स्माह पिब जीवनम् ॥२॥

साधवः पुरतो यान्ति ज्ञास्यते कोऽपि नह्यदः ।
निस्तरापदमाधाता पश्चाच्छुद्धिं निजात्मनः ॥३॥

तदनिच्छति तस्मिंस्तु विभिद्य पुरतोऽगमत् ।
शङ्कया मम नो पातेत्यभिप्रेत्य ततः पिता ॥४॥

सोऽप्यासाद्य नदीमध्यं दध्यौ प्राणास्तु गत्वराः ।
तत्कृते व्रतमालिन्यं कः कुर्यात् प्राणिहिंसया ? ॥५॥

एकस्मिन्नौदके बिन्दौ ये जीवाः कथिता जिनैः ।
पारापतप्रमाणास्तु **जम्बू**द्वीपे न मान्ति ते ॥६॥

जले वनस्पतिर्नूनं प्रायः सर्वत्र दृश्यते ।
दृश्यते न हि यत्रैषा तत्र सूक्ष्मा प्रतीयताम् ॥७॥

उक्तञ्चानुयोगद्वारे—

**"तेणं[1] जीवा वालग्गाओ वि सुहुमा सुहमपणगजीवस्स सरीरोगाहणाओहिंतो असंखेज्जगुणा ।"**

दृढव्रतो विचिन्त्येति नापिबत् सलिलं सुधीः ।
छिन्नाशः सुपरीणामो नदीतो निर्गतो मृतः ॥८॥

देवीभूतस्तथैवेत्यधिष्ठाय स्वकलेवरम् ।
गच्छन् पथि विचक्रे च व्रजान् गो-माहिषाकुलान् ॥९॥

तक्रौदनाद्यमादाय चलितेष्वथ साधुषु ।
स्कन्धोपकरणं विस्मारितं देवेन कुत्रचित् ॥१०॥

विदित्वैको मुनिस्तत्र व्याघुट्य तदुपाददे ।
व्रजा न वीक्ष्य साधुभ्यः प्रोचे तेऽप्यवदन्नदः ॥११॥

देवमायेत्यसौ तावत् प्रत्यक्षीभूय निर्जरः ।
विना तं वृद्धमखिलान् ववन्दे प्रयतो मुनीन् ॥१२॥

वन्दसेऽमुं न किमिति पृष्टोऽवगमुनोदितम् ।
अकरिष्यं यदि प्राप्स्यं तदाऽहं दुर्गदुर्गतिम् ॥१३॥

---

१. तस्मिन् जीवा वालाग्रादपि सूक्ष्माः सूक्ष्मपनकजीवस्य शरीरावगाहनाभ्योऽसङ्ख्येयगुणाः ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ये प्रेम्णा ददते शिक्षां सावद्यां मुग्धमानसाः ।
परिणामाहिता वन्द्याः कथं ते तत्त्ववेदिनाम् ? ॥१४॥

इत्युदित्वा दिवं सोऽगात् स्वं निन्दत् क्षपकोऽपि हि ।
शुद्धो भेजे व्रतं क्षुल्ल इव सह्येतरैस्तृषा ॥१५॥

इति द्वितीयपरीषहे **धनशर्म**यतिकथा ॥५॥

क्षुत्पिपासापीडाकृशस्य शीतबाधाऽपि स्यादतस्तत्परीषहमाह—

**चरंतं विरयं लूहं सीतं फुसइ एगया ।**
**नाइवेलं मुणी गच्छे सुच्चा णं जिणसासणं ॥६॥**

**व्याख्या—चरन्तं** ग्रामानुग्रामे मुक्तिपथे वा व्रजन्तं, **विरतम**ग्न्यारम्भादेर्निवृत्तं, 'लूहं ति' **रूक्षं** स्निग्धभोजनाभ्यङ्गादित्यागेन **शीतं** हिमं **स्पृशत्य**भिद्रवत्येकदा शीतकालादौ ततो **नातिवेलं** वेलां स्वाध्यायादिसमयरूपामतिक्रम्य शीतेनाभिहतोऽहमिति **मुनिर्न** गच्छेत् स्थानान्तरमभिसर्पेत, **श्रुत्वा जिनशासनम**न्यो जीवोऽन्यश्च देहस्तीव्रतराश्च नरकादिषु शीतवेदना जीवैरनुभूतपूर्वा इत्याद्यागममिति ॥६॥

अन्यच्च—

**न मे निवारणं अत्थि छवित्ताणं न विज्जए ।**
**अहं तु अग्गिं सेवामि इइ भिक्खू न चिंतए ॥७॥**

**व्याख्या—न** 'मे' **मम** निवारणं शीत-वातादेः सौधाद्य**स्ति** । **छवित्राणं** त्वक्त्राणं वस्त्र-कम्बलादि न विद्यते येषां निवारणं छवित्राणं वा वर्तते ते मा सेवन्ता**महं तु** तद्रहितोऽग्निं **सेवे** इति भिक्षुर्न **चिन्तयेद्** ध्यायेत् । चिन्तानिषेधेनासेवनं दूरापास्तमेवं शीतपरीषहः सोढः स्यात् **साधुचतुष्टय**वत् । तथाहि—

चत्वारोऽपि पुरे **राजगृहे** वरवयस्यकाः ।
**भद्रबाहोर्व**चः श्रुत्वा हर्षादाददिरे व्रतम् ॥१॥

लात्वैकाकिविहारित्वं दृढसत्त्वा बहुश्रुताः ।
शिशिरर्तौ पुना **राजगृहं** प्राप्ता विहारतः ॥२॥

तत्र स्फीतेन शीतेन काष्ठीयत्यखिले जने ।
दिवाकराग्नि-प्रावारैः कथञ्चिदपि जीवति ॥३॥

ते पौरुष्यां तृतीयायामात्तभैक्षा यथाविधि ।
निवृत्त्याहार्य **वैभारम**नुशैलं प्रतस्थिरे ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गुहाद्वारेऽवने वन्याः समीपे पुरगोपुरे ।
कायोत्सर्गेण ते तस्थुः क्रमादस्तङ्गते रवौ ॥५॥

शीताधिक्यं दृढास्तत्र ते सर्वेऽपि विषेहिरे ।
लीनात्मानः परे तत्त्वे निष्प्रकम्पाः सुराद्रिवत् ॥६॥

निशश्चतुर्षु यामेषु क्रमात् सुस्था दिवं ययुः ।
सम्यग्विषहितो दद्यात् किं न सौख्यं परीषहः ? ॥७॥

इति तृतीयपरीषहे **साधुचतुष्टय**कथा ॥७॥

शीतानन्तरमुष्णमित्युष्णपरीषहमाह—

**उसिणपरितावेणं परिदाहेण तज्जिए ।**
**गिम्हे वा परितावेणं सायं नो परिदेवए ॥८॥**

**व्याख्या—उष्ण**स्पर्शवद्भू–शिलादि**परितापेन परिदाहेन,** बहिः स्वेद–मलाभ्यां वह्निना वान्तश्च तृष्णाजनितदाघस्वरूपेण **तर्जितो**ऽतिपीडितस्तथा **ग्रीष्मे वा**शब्दाच्छरदि **परितापेन** रविकरादिकृतेन तर्जित इति योज्यम् । **सातं** सुखं प्रति **न परिदेवेत** हा ! कदा शीतर्तु–शीतांशुकरादयः सुखहेतवः सम्पत्स्यन्ते ? इति न प्रलपेत् ॥८॥

किञ्च—

**उण्हाभितत्तो मेहावी सिणाणं नो वि पत्थए ।**
**गायं नो परिसिंचिज्जा ण वीएज्ज य अप्पयं ॥९॥**

**व्याख्या—उष्णेनाभितप्तः** पीडितो **मेधावी** मर्यादावान् **स्नानं** जलाभिषेकं **नो** नैव **प्रार्थयेद**भिलषेद**पि** । तथा **गात्रं** देहं **नो परिषिञ्चेत्** सूक्ष्मोदकबिन्दुभिरार्द्रीकुर्यात् । **न वीजयेत्** तालवृन्तादिना**ऽल्पकं** किं पुनर्बह्वेवमुष्णपरीषहो**ऽरहन्नक**मुनेरिव ।

तथाहि—

**तगरा**यां महापुर्यां दत्तोऽभूद् वणिजां वरः ।
तस्य **भद्रा**ऽभिधा भार्या तयोः पुत्रो**ऽरहन्नकः** ॥१॥

**अर्हन्मित्र**गुरोः पार्श्वे श्रुत्वा सद्धर्मदेशनाम् ।
स संवेगरसापूर्णः प्राव्राजीत् सपरिच्छदः ॥२॥ युग्मम्

पुत्रप्रेम्णाऽथ तं क्षुल्लं भैक्ष्यायाभ्रामयन्न हि ।
वृद्धः पुपोष मिष्टान्न–पानैर्वासरत्रयं दिने ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदप्रीतिकरं शेषसाधूनां तरुणः क्षमः ।
किमेष पोष्यत इति दाक्षिण्यात् किन्तु नावदन् ॥४॥
मृतेऽथ क्षपके क्षुल्लः कुर्वन्नधृतिमुल्बणाम् ।
कियद्दिनानि संस्थाप्य भिक्षार्थमवतारितः ॥५॥
सुकोमलवपुर्ग्रीष्मे आ बाल्यादपि लालितः ।
आतपेनातिसन्तप्तस्तृषा भृशमदूयत ॥६॥
विश्रमन्तं क्वचिद् भित्तिदेशे प्रोषितभर्तृका ।
काचिन्निरीक्ष्य तं दास्याऽऽहूय च प्रत्यलाभयत् ॥७॥
पर्याप्तं मोदकान् दत्त्वा ददृशे स्निग्धया दृशा ।
ऊचे चार्यालमेतेन तपसा कष्टवेधसा ॥८॥
स्वैरं मां भुङ्क्ष्व भावानुरक्तां तस्य ह्यदः फलम् ।
भवितव्यतया सोऽपि भग्नो मेनेऽथ तद्वचः ॥९॥
स तत्र बुभुजे भोगान् बहुशोऽथ गवेषितः ।
साधुभिर्न परं लेभे प्रविष्टो विजने यतः ॥१०॥
माताऽथ तद्वियोगेन ग्रहिला विह्वलान्तरा ।
बभ्राम नगरे डिम्भवृता हास्य-कृपास्पदम् ॥११॥
यं यं पश्यति तं सर्वं मुग्धा ज्ञात्वा**ऽरहन्नकम्** ।
मोदमाना रुदन्ती च दृष्टा तेनान्यदा क्वचित् ॥१२॥
गवाक्षस्थोऽथ तां दृष्ट्वा दध्यौ मां धिग् दुराशयम् ।
अकार्यकारिणा येन पातिता व्यसने प्रसूः ॥१३॥
व्रतलोपान्निजश्चात्मा हा ! मया मलिनीकृतः ।
अथोत्तीर्य प्रसूपादेऽपतद् गत्वाऽश्रुलोचनः ॥१४॥
सगद्गदमभाणीच्च सोऽहमम्बा**ऽरहन्नकः** ।
त्वदुद्वेगवनाङ्कुरो घुणस्त्वत्कुक्षिदारुणि ॥१५॥
तं वीक्ष्यैषाऽपि सुस्थत्वं गताऽपृच्छदथाङ्गजम् ।
क्वासीः सोऽपि यथावृत्तमाख्यत् साऽथैवमूचुषी ॥१६॥
भज वत्स ! व्रतं भूयोऽन्यथा क्लेशं सहिष्यसे ।
बहुधा त्वं व्रतभ्रष्टस्तच्छ्रुत्वा सोऽभ्यधादिति ॥१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

न शक्तो व्रतमाधातुं प्रपत्स्येऽनशनं ततः ।
किमु स्खलितशीलस्य जीवितेन ममानिशम् ? ॥१८॥

यदुक्तम्—

"**वरं प्रवेष्टुं ज्वलितं हुताशनं न चापि भग्नं चिरसञ्चितं व्रतम् ।**
**वरं हि मृत्युः सुविशुद्धकर्मणो न चापि शीलस्खलितस्य जीवितम् ॥१९॥**

भवत्वेवमपीत्युक्ते तया तप्तशिलातले ।
कृत्वाऽनशनमेषोऽपि ग्रीष्मे सुस्थोऽगमद् दिवम् ॥२०॥

नवनीतमिवोष्णेऽसौ यद् विलीनः शिलातले ।
पूर्वं न सेहे तेनौष्ण्यः पश्चात् सेहे परीषहः ॥२१॥

इति चतुर्थपरीषहे **अरहन्नक**मुनिकथा ॥९॥

उष्णं हि ग्राष्मे तदनन्तरं वर्षा, तत्र दंशादयः स्युरिति तत्परीषहमाह—

**पुट्ठो अ दंस-मसएहिं समरेव महामुणी ।**
**नागो संगामसीसे वा सूरो अभिहणे परं ॥१०॥**

**व्याख्या—स्पृष्टश्चा**भिद्रुतो **दंश-मशकै**रुपलक्षणत्वाद् यूकादिभिः । 'समरेव त्ति' रेफस्य प्राकृतशैल्याऽलाक्षणिकत्वात् **सम एव** स्पृष्टास्पृष्टावस्थयोः तुल्य एव **महामुनिः** । **नाग इव** हस्तीव वाशब्दस्येवार्थस्यात्र सम्बन्धात् **सङ्ग्रामशिरसि** रणमस्तके **शूरः** पराक्रमवान्, यद्वा अन्तर्भावित इवार्थत्वाद् वाशब्दस्य च गम्यमानत्वात् **शूर** इव सुभट **इवाभिहन्याद्** जयेत् **परं** शत्रुमयं भावो-यथा करी शूरो वा शरैस्तुद्यमानोऽपि तदगणनया रणे शत्रुं जयेदेवं साधुरपि दंशादिभिरभिद्रूयमाणः क्रोधादिकं जयेत् ॥१०॥

किञ्च—

**न संतसे न वारिज्जा मणं पि न पओसए ।**
**उवेहे न हणे पाणे भुंजंते मंस-सोणियं ॥११॥**

**व्याख्या—न संत्रसेन्नो**द्विजेत 'दंशादिभ्यः' इति गम्यम् । **न निवारयेन्न** निषेधयेद् दंशादीनेव तुदतो मा भूदन्तराय इति । **मनोऽप्यास्तां** वचो **न प्रदूषयेत्** प्रदुष्टं कुर्यात्, किन्तू**पेक्षेतौ**दासीन्येन पश्येदत एव **न हन्यात् प्राणान्** प्राणिनो **भुञ्जाना**नाहारयतो **मांसशोणितम्** । इत्येवं दंशादिपरीषहः, स च **सुमनोभद्र**मुनिवत् सोढव्यः । यथा—

**जितारे**रस्ति **चम्पायां सुमनोभद्रकः** सुतः ।
**धर्मघोष**गुरोः पार्श्वे युवराजो व्रतं ललौ ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स एकाकितया ज्ञानी दृढसत्त्वतया चरन् ।
क्वचिच्छरद्यधोभूमौ निशि व्युत्सर्गमादधे ॥२॥

तत्र रात्रौ वने दंशास्तं तीव्रा अदशंस्तराम् ।
पीडितोऽपि प्रममार्ज नैतानिति विचिन्तयन् ॥३॥

किमात्मन् ! दुःखमेतत् ते वराकैः मशकैः कृतम् ? ।
यदनन्तगुणं श्वभ्रगतावसहथा इदम् ॥४॥

तथाहि—

**शृगाल-वृकरूपैश्च विचित्राकारधारकैः ।**
**आक्षेपत्रोटितस्नायु भक्ष्यन्ते रुधिरोक्षिताः ॥५॥**

**श्वरूपैः कोलरूपैश्च नारकालयविह्वलाः ।**
**खण्डशः प्रविलुप्यन्ते क्रन्दतः शबलादिभिः ॥६॥**

**काक-गृध्रादिरूपैश्च लोहतुण्डैर्बलान्वितैः ।**
**विनिकृष्टाक्षि-जिह्वा-ऽन्त्रा विचेष्टन्ते महीतले ॥७॥**

**प्राणोपक्रमणैर्घोरैर्दुःखैरेवंविधैरपि ।**
**आयुष्यक्षपितेनैव म्रियन्ते दुःखभाजिनः ॥८॥**

तथा—

**"[१]अन्नं इमं सरीरं अन्नो जीवो त्ति एव कयबुद्धी ।**
**दुक्खकरं जीव ! तुमं छिंद ममत्तं सरीरंमि" ॥९॥**

सहमान इति ध्यायन् वेदनां पीतशोणितः ।
दंशैः समाधिना मृत्वा सुरोऽभूदप्सरःप्रियः ॥१०॥

इति पञ्चमपरीषहे **सुमनोभद्रकथा** ॥११॥

दंशादिपीडितश्चेलाद्यन्वेषणपरः स्यादित्यचेलपरीषहमाह—

**परिजुन्नेहिं वत्थेहिं भोक्खामि त्ति अचेलए ।**
**अदुवा सचेलए होक्खं इइ भिक्खु न चिंतए ॥१२॥**

**व्याख्या—परिजीर्णैर्वस्त्रैः** कल्पादिभि**र्भविष्याम्यचेलकश्चे**लविकलोऽल्पदिनभावित्वादेषा**मित्येत**द् भिक्षुर्न चिन्तयेदिति सम्बन्धः । **अथवा सचेलकः** सवस्त्रो 'होक्खं ति'

---

१. अन्यदिदं शरीरमन्यो जीव इत्येवं कृतबुद्धिः ।
दुःखकरं जीव ! त्वं छिन्धि ममत्वं शरीरे ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**भविष्यामि** । परिजीर्णवस्त्रं मां दृष्ट्वा कश्चिद् भव्यानि दास्य**तीति भिक्षुर्न चिन्तयेत्** । न जीर्णचेलोऽन्यचेलालाभ-लाभसम्भावनया दैन्यं प्रमोदं वा गच्छेदिति भावः ॥१२॥

तथा—

**एगया अचेलए होइ सचेले आवि एगया ।**
**एयं धम्महियं नच्चा नाणी नो परिदेवए ॥१३॥**

**व्याख्या—एकदा** जिनकल्पावस्थायां सर्वथा चेलाभावेन जीर्णादिवस्त्रतया वा **अचेलको भवति** । **सचेलश्चै**कदा स्थविरकल्पावस्थायाम् । तत **एतदि**त्यवस्थौचित्ये-नाचेलत्वं सचेलत्वं च **धर्महितं** साधुधर्मोपकारकं **ज्ञात्वा** अवबुध्य तत्राचेलकत्वस्य धर्महितत्वमल्पप्रत्युपेक्षणादिभिः यथोक्तम्—"[1] **पंचेहिं ठाणेहिं पुरिम-पच्छिमाणं अरहंताणं भगवंताणं अचेलए पसत्थे भवइ । तं जहा अप्पा पडिलेहा १ वेसासिए रूवे २ तवे अणुमए ३ लाघवे पसत्थे ४ विउले इंदियनिग्गहे ५ य**" त्ति ॥ सचेलत्वस्य तु धर्महितत्व-मग्न्याद्यारम्भनिवारकत्वेन संयमफलत्वात् । ततश्च **ज्ञानी** यथोक्तविवेकवान् **नो परिदेवयेद**-चेलस्य सतः शीतादिपीडितस्य किं मे शरणं भविष्यतीति न दैन्यमालम्बेत इति । एवमचेलपरीषहः सह्यः **सोमदेव**विप्रर्षिवत् । तथाहि—

अभूद् **दशपुरे** विप्रो रक्षितः **सोमदेव**सूः ।
**सोमदेवा**कुक्षिशुक्तिमौक्तिकं सुभगः सुधीः ॥१॥

या विद्याऽभूत् पितुः पार्श्वे तां सर्वामप्यधीयत ।
गतः **पाटलिपुत्रे**ऽसौ तामध्येतुं विशेषतः ॥२॥

श्रुति-स्मृती पुराणानि लक्षणान्वीषिकीरपि ।
पठित्वा वेश्म लघ्वागाद् विद्याः सर्वाः परा अपि ॥३॥

तत्कुलं भूपतेर्मान्यमिति भूपपुरस्कृतः ।
बाह्योपस्थानशालायां तस्थावर्थप्रतीच्छकः ॥४॥

स्वजनान्यजनाप्ताभिस्तदा प्राभृतिभिर्गृहम् ।
अपूरि तस्य विद्या हि स्वधीताः कामधेनवः ॥५॥

नतस्तातो मयाऽद्यपि न प्रसूरभिवादिता ।
प्रस्थिते मयि या घस्रान् गणयन्ती स्थिताऽन्वहम् ॥६॥

---

१. पञ्चभिः स्थानैः पूर्व-पश्चिमयोरर्हतोर्भगवतोरचेलकत्वं प्रशस्तं भवति । तद् यथा—अल्पा प्रतिलेखना १, वैश्वासिकं रूपम् २, तपोऽनुमतम् ३, लाघवं प्रशस्तम् ४, विपुल इन्द्रियनिग्रहः ५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ध्यात्वेत्यन्तर्गृहं गत्वा तां ननामाथ साऽप्यवक् ।
स्वागतं ते ततो मौनमाधायानन्तरं स्थिता ॥७॥

कथं मातर्न ते तुष्टिरिति पृष्टाऽभ्यधादियम् ।
भवहेतुभिरेतैः किं शास्त्रैर्हिंसाप्ररूपकैः ? ॥८॥

किमधीतो दृष्टिवादो येन तुष्टिर्ममोदियात् ।
सोऽथ दध्यौ प्रसूस्तोष्या किं तुष्टैरपरैर्जनैः ॥९॥

दृष्टिवाद इति स्पष्टं मह्यं नामापि रोचते ।
यत्र दर्शनचर्चाऽस्ति तदध्येतव्यमेव मे ॥१०॥

मातर्भवेत् क्व तत्पाठः साऽऽह वत्स ! इक्षुपाटके ।
गुरुस्**तोसलिपुत्रा**ख्योऽध्यापकस्तेऽस्ति मातुलः ॥११॥

अधृतिं मा कृथाः कल्येऽध्येताऽस्मि तमिति प्रसूम् ।
सन्तोष्यातीत्य रजनीं प्रातरुत्थाय सोऽचलत् ॥१२॥

इक्षून् सार्द्धान् नवादायागच्छन्तं सुहृदं पितुः ।
मिलितं प्राह मे मात्रेऽमून् दत्त्वा त्वमदो वदेः ॥१३॥

'मिलितो रक्षितस्याहं प्राक्' तेनापि तथाकृते ।
सार्द्धानि नव पूर्वाणि सोऽध्येतेति विवेद सा ॥१४॥

रक्षितो **दृष्टिवाद**स्य नवैवाध्ययनान्यहम् ।
दशमस्यार्द्धमध्येष्ये स्वधियेति व्यचारयत् ॥१५॥

क्रमाड्ढड्ढरसुश्राद्धानुकारिचरितोऽनमत् ।
यथाविधि गुरूनिक्षुगृहस्थान् सपरिच्छदान् ॥१६॥

ववन्दे नाऽऽस्तिकस्तेन नव इत्यबुधद् गुरुः ।
अपृच्छच्च कुतो धर्मोऽतः श्राद्धादिति सोऽभ्यधात् ॥१७॥

श्राद्धीसुतोऽयं यः कल्ये करिस्कन्धाधिरोहितः ।
अधीतविद्यः सर्वर्द्ध्या राज्ञाऽऽनीयत वेश्मनि ॥१८॥

इति साधुभिराख्याते सोऽवगध्येतुमुत्सुकः ।
**दृष्टिवाद**मिहाऽऽगां तत् तद्दानेन प्रसीदतु ॥१९॥

न विना व्रतमेतत् स्यात् स्वीचकारेति तद् द्रुतम् ।
आह चात्र स्थितं भूपो मामुत्प्रव्राजयिष्यति ॥२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मयि रागी यतोऽत्यन्तं तस्मादन्यत्र गम्यते ।
तथाऽकार्षीद् गुरुः पूर्वा शिष्यनिस्फेटिकाऽभवत् ॥२१॥

यत् तत्राभूत् तदधीतमधिकाधिजिगीषया ।
श्री**वज्र**स्वामिनः पार्श्वं गच्छन्**नुज्जयिनीं** गतः ॥२२॥

**भद्रगुप्त**गुरोस्तत्र शुद्धसंलेखनावतः ।
ज्ञानी निर्यामकीभूतः पर्यन्तेऽभाणि तेन सः ॥२३॥

असि प्रवचनाधारो **वज्रेण** गुरुणा ततः ।
रात्रौ नोपाश्रये स्थेयं पृथग् वेश्मस्थितः पठेः ॥२४॥

वत्स ! श्रुतजलाम्भोधे ! मृत्युस्तेन सहान्यथा ।
तत् स्वीकृत्य दिवं प्राप्ते तस्मिन् **वज्रा**न्तिकं ययौ ॥२५॥

आगन्तुकेन निष्पीतो मम क्षीरपतद्ग्रहः ।
अवशिष्टं स्थितं किञ्चित् स्वप्नमित्यैक्षत प्रभुः ॥२६॥

अद्य प्रतीच्छकः कश्चिदागन्ता सोऽपि मच्छ्रुतम् ।
किञ्चिदूनं ग्रहीतेति स स्वप्नं तं व्यचारयत् ॥२७॥

**रक्षिते**ऽथागते तत्रर्षयस्तत् तथ्यतां विदुः ।
श्री**वज्र**स्वामिनोऽप्यूचुः कुतो वत्स ! समागमः ? ॥२८॥

गुरो**स्तोसलिपुत्र**स्यान्तिकादस्**म्यार्यरक्षितः** ।
इत्युक्ते तेन गुरवः कुत्रोपकरणानि ते ? ॥२९॥

इत्यूचुः सोऽप्यवग् भिन्नोपाश्रयेऽस्मि स्थितः प्रभो ! ।
अनिच्छन्नपि तद् **भद्रगुप्ता**चार्यस्य शासनात् ॥३०॥

तथैवायतिसौन्दर्यं ज्ञात्वैतेऽपि तमादिशन् ।
अधीष्वैवमपि प्रावर्तताध्येतुमसौ ततः ॥३१॥

अचिरान्नव पूर्वाणि समाप्याग्र्यमुपाक्रमत् ।
सूक्ष्मतद्यविकान्येष चतुर्विंशतिमध्यगात् ॥३२॥

श्रुततर्षातिरेकेण पितृनर्तिपरानपि ।
क्रियासमभिहारेणाकारितो नाप्यवन्दयत् ॥३३॥

आगादाकारणायाथास्यानुजः **फल्गुरक्षितः** ।
प्रव्राजयागत्य निजं कुटुम्बमिति सोऽभ्यधात् ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्प्रत्ययाय प्राव्राजीदधीयाय च स द्रुतम् ।
यवकैर्मोहितोऽत्यर्थं ज्येष्ठोऽपृच्छद् गुरूनथ ॥३५॥

कियच्छेषमथोचुस्ते किं ब्रूमो बिन्दुराददे ।
सागरादथ सोऽध्यायत् क्व तीर्यः श्रुतसागरः ? ॥३६॥

ततोऽपृच्छद् गुरून् भ्रात्राकारणाद् वोऽनुशासनात् ।
प्रभो ! **दशपुरं** यामि स्वजनव्रतहेतवे ॥३७॥

वारितोऽप्यन्वहं प्रश्नेऽनुज्ञातो गुरुणा ततः ।
छेदो दशमपूर्वस्य भावी मदिति वेदिना ॥३८॥

**वज्र**प्रभुमनुज्ञाप्य तत्रासौ सानुजो गतः ।
कुटुम्बं प्रतिबोध्याशु प्रव्रज्यामप्यलापयत् ॥३९॥

स्नेहात् समीपवर्त्येवास्ते तातो व्रत्यभूद् न तु ।
अनावृततया पुत्री-स्नुषादौ स्थातुमक्षमः ॥४०॥

वीप्सया गुरुणोक्तेऽथ व्रतार्थं सोऽप्यदोऽवदत् ।
कुण्डिका-शाटक-च्छत्रोपवीतोपानहं यदि ॥४१॥

अनुजानास्यनुज्ञातं तैः स व्रतमथाददे ।
बाला वन्ददम्भेन क्रमादत्याजयंश्च तत् ॥४२॥

शाटकं तु न तत्याज यत्नेऽप्यथ प्रमृते मुनौ ।
कस्मिन्नपि गुरुः प्रोचे तं ममोचयिषुः प्रधीः ॥४३॥

साधवो वहनं ह्यस्य को विधाता महाफलम् ? ।
सङ्केतात् साधवस्तस्मै साहंपूर्विकमापतन् ॥४४॥

अत्यन्तनिर्जराकारि यदीदं तन्ममादिश ।
इत्युक्ते तेन गुरवः सोपसर्गमदोऽवदत् ॥४५॥

उपसर्गैर्यदि क्षुब्धो बालरूपादिनिर्मितैः ।
तदा मम भवेद् विघ्नस्तन्नेदं त्याज्यमन्तरा ॥४६॥

इत्यर्थे दार्ढ्यमाधाय मृतं वोढुमुपाक्रमत् ।
अग्रतः साधवः पश्चात् साध्व्यस्तत्र व्रजन्ति हि ॥४७॥

संज्ञिताः शिशवस्तावत् तच्छाटकमपाहरन् ।
उपनीतश्चोलपट्टः कट्यां बद्धश्च तत्क्षणम् ॥४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्रमाद् मृतकमुत्सृज्य प्रत्यायात् सूरयेऽभणत् ।
उपसर्गोऽभवत् सत्यं सेहे विघ्नभयात् तव ॥४९॥

गृहाण शाटकमिति प्रोक्ते किमथ तेन मे ? ।
यदर्थं शाटककाङ्क्षास्तत् सर्वं दृष्टमेव यत् ॥५०॥

तच्चोलपट्ट एवास्त्वित्येवं सर्वक्रियौजसा ।
न तु पूर्वं परं पश्चात् सेहे तेन परीषहः ॥५१॥

इति षष्ठपरीषहे **सोमदेव**विप्रर्षिकथा ॥१३॥

अचेलस्य शीतादिभिररतिरपि स्यादिति तत्परीषहमाह—

**गामाणुगामं रीयंतं अणगारं अकिंचणं ।**
**अरई अणुप्पविसे तं तितिक्खे परीसहं ॥१४॥**

**व्याख्या**—ग्रामो जिगमिषितोऽनुग्रामश्च तन्मार्गानुकूलो **ग्रामानुग्राम**स्तं नगराद्युपलक्षणं 'रीयंतं' **विहरन्तमनगारं** मुनि**मकिञ्चनं** निष्परिग्रह**मरतिः** संयमाधृतिर**नुप्रविशेद्** मनसि लब्धास्पदा भवेत् **तम**रतिरूपं **तितिक्षेत** सहेत **परीषहं** स इति शेषः ॥१४॥

तत्सहनोपायमाह—

**अरइं पिट्ठओ किच्चा विरओ आयरक्खिए ।**
**धम्मारामे निरारंभे उवसंते मुणी चरे ॥१५॥**

**व्याख्या**—**अरतिं** पूर्वोक्तां **पृष्ठतः कृत्वा** धर्मविघ्नहेतुरिति तिरस्कृत्य **विरतो** हिंसादिभ्य **आत्मा रक्षितो** दुर्गतिहेतोरपध्यानादेर्येन स तथा । धर्मे श्रुतधर्मादौ आङ् अभिव्याप्त्या रमते इति **धर्मारामो** । **निरारम्भ** इत्यसत्क्रियाभ्यो निवृत्तः । **उपशान्तः** क्रोधाद्युपशमवान् **मुनिश्चरेत्** ।

**"[१]न मे चिरं दुक्खमिणं भविस्सई असासया भोगपिवास जंतुणो ।**
**न चे सरीरेण इमेण वेसई अवेसई जीवियपज्जवेण मे" ॥१॥**

इति परिभावयन् संयमाध्वनि यायाद् न पुनरुत्पन्नाधृतिरप्यवधावनानुप्रेक्षी स्यादिति भावः । एवं चारतिपरीषहः सोढव्यो**ऽपराजितयति**वत् । तथाहि—

**पुरेऽचलपुरे** राजा **जितशत्रु**रभूद् बली ।
**तस्यापराजितः** पुत्रो युवराजोऽभवत् सुधीः ॥१॥

१. न मे चिरं दुःखमिदं भविष्यति, अशाश्वता भोगपिपासा जन्तोः ।
न चेच्छरीरेणानेनापेष्यति, अपेष्यति जीवितपर्यवेण मे ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**राधाचार्या**न्तिके सोऽपि तारुण्ये व्रतमग्रहीत् ।
तेनान्यदा सहाचार्या विजह्रु**स्तगरा**पुरीम् ॥२॥
तच्छिष्या **आर्यराधा**ख्याः सन्त्य**वन्त्यां** बहुश्रुताः ।
तच्छिष्यौ **तगरां** प्राप्तावविघ्नं पृष्टवान् गुरुः ॥३॥
राज्ञः पुरोहितस्यापि सुतौ तत्रोपसर्गदौ ।
इत्याचष्टां ततो दध्यौ महात्मा **जितशत्रु**जः ॥४॥
मा संसारं भ्रमेत् पापाद् भ्रातृजो मे नृपाङ्गजः ।
इत्यापृच्छ्य गुरूंस्तूर्णं सैको**ऽवन्तीं** ययावसौ ॥५॥
विहितोचितकर्तव्यो भिक्षायै प्रस्थितः क्षणे ।
तिष्ठ प्राघूर्णकत्वेनेत्युक्तोऽप्यस्थाद् न किन्त्ववक् ॥६॥
यदर्थमागां तत्कार्यमकृत्वा मे कुतो रतिः ? ।
तद् दर्शयत राट्सौधे प्रत्यनीकद्वयास्पदम् ॥७॥
प्रेषितः क्षुल्लकस्तेन दर्शिते तत्र सोऽविशत् ।
जनस्तं वीक्ष्य साशङ्कमूचे भोः ! लघु निःसर ॥८॥
मा ब्रूहीतरथाऽऽगत्य कुमारौ पीडयिष्यतः ।
दृढः सोऽपि महाशब्दं धर्मलाभितवांस्ततः ॥९॥
श्रुत्वा तावागतौ साधुः प्राप्तः क्रीडार्थमेष नौ ।
इत्याहतुरिदं पूज्या ! वित्थ नृत्यमुवाच सः ॥१०॥
वाद्यं वादयतां नृत्यं विना वाद्यं हि कीदृशम् ? ।
हास्यात् किञ्चित् प्रवृत्तौ तौ वाद्यवादनकर्मणि ॥११॥
अजानन्तावथ प्रोक्तौ रे ! वां किञ्चिद् न बुध्यथः ।
रुष्टौ तावुद्यतौ हन्तुमसौ च दृढमग्रहीत् ॥१२॥
बुद्धिविज्ञानसर्वस्वपात्रं मर्मण्यचम्पयत् ।
कुट्टयित्वा भृशं पूर्वं तदाक्रन्दमिलज्जनम् ॥१३॥
ममार्हतावपततां भुव्येतौ सर्वतोऽक्षमौ ।
निरुद्धवचनौ किन्तु निरीक्षणकरौ मिथः ॥१४॥
गतो**ऽपराजितः** साधुः श्रुतव्यतिकरो नृपः ।
पुरोधाश्च समागत्य सान्त्वयामासतुर्गुरून् ॥१५॥

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

गुरवः प्रोचिरे विद्मो न वै प्राघूर्णकः परम् ।
साधुरेकः समायातः प्रायस्तत्कृत्यमस्त्यदः ॥१६॥

सोऽपि स्वाध्याययन् कूणे नतो राज्ञोपलक्षितः ।
ह्रीणो न्यग्वदनो राजोपालब्धश्चेति साधुना ॥१७॥

किं राज्येनामुना यत्र न शास्यन्ते सुता अपि ? ।
पादलग्नो नरेन्द्रस्तु क्षमस्व श्रमणेत्यवक् ॥१८॥

व्रतं यद्याददीयातां ध्रुवं मोक्षस्तदैतयोः ।
नान्यथेत्येष भूपालं साधिक्षेपमुदाहरत् ॥१९॥

पृष्टौ राज-पुरोधाभ्यामेतौ स्वीचक्रतुश्च तौ ।
*जन्तुर्मृत्युभयोद्भ्रान्तः किं न स्वीकुरुतेतमाम् ? ॥२०॥*

कृतलोचौ ततो मुक्तावभूतां स्वीकृतव्रतौ ।
तत्र निःशङ्कितो राजपुत्रोऽभूद् व्रतपालने ॥२१॥

पुरोहितसुतस्योर्वीमपि पालयतः क्रियाम् ।
अभूज्जात्यवलेपश्च मत्सरश्च महामुनौ ॥२२॥

तौ द्वावप्युपपेदानौ देवौ चारित्रतो दिवि ।
शक्तिर्जैनव्रतस्याहो ! द्यां यत् तादृशमापयत् ॥२३॥

इतश्च—

**कौशाम्ब्यां** तापसः श्रेष्ठी मिथ्यात्वबहुलाशयः ।
मृत्वा विट्सूकरो जज्ञे स्वगृहे जातिमस्मरत् ॥२४॥

तदैवाविरतैः पुत्रैर्मारितोऽहिर्गृहेऽभवत् ।
सोऽप्यमारि सुतैर्जातिस्मरो डङ्कभयाद् द्रुतम् ॥२५॥

सुतस्याथ सुतो जातः स्मृत्वा जातिमचिन्तयत् ।
स्नुषामम्बां सुतं तातं व्याहरामि कथं स्फुटम् ? ॥२६॥

ध्यात्वेत्यादत्त मूकत्वमप्युपायशते कृते ।
पितृभिर्न बभाषेऽसावितस्तत्र वने गुरुः ॥२७॥

विजहार चतुर्ज्ञानी बोधं विज्ञाय तस्य सः ।
प्राहिणोत् संयतद्वन्द्वं तच्च मूकमदोऽवदत् ॥२८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**"तावस[१] ! किमिणा मूयच्चएण पडिवज्ज जाणिउं धम्मं ।**
**मरिऊण सूयरोरग जाओ पुत्तस्स पुत्तो त्ति"** ॥२९॥

गुरोरनुज्ञया पद्ये पठितेऽस्मिन् स विस्मितः ।
कथं ज्ञातमद इति नत्वाऽपृच्छद् रहो मुनीन् ॥३०॥

विदुः श्रीगुरवस्ताभ्यामित्युक्ते स वनेऽगमत् ।
प्रणम्य गुरुमेतस्मात् तत्त्वं श्रुत्वास्तिकोऽभवत् ॥३१॥

तस्या**शोकदत्त** इति नामासीत् पितृभिः कृतम् ।
लोकैः कृतं मूक इति पश्चादजनि विश्रुतम् ॥३२॥

इतश्च ब्राह्मणसुरो नत्वाऽर्हन्तं विदेहगम् ।
पप्रच्छ सुलभा बोधिः प्रभो ! प्रेत्योत मेऽन्यथा ? ॥३३॥

दुर्लभेति जिनो व्याख्यद् भविता कुत्र जन्मे मे ? ।
इति पृष्टे जिनेनोक्तं मूकभ्राता भविष्यसि ॥३४॥

लाता स तु व्रतं बुद्धोऽथोपमूकमगात् सुरः ।
दत्त्वा रत्नादि तं प्राहोत्पत्स्येऽहं त्वत्प्रसूदरे ॥३५॥

अकाले दोहदस्तस्या भाव्याम्रेषु ततस्त्वया ।
वर्णा लेख्याः पुरस्तस्याश्चेद् दातासि ममाङ्गजम् ॥३६॥

दोहदं पूरयाम्याशु तया तस्मिन् प्रतिश्रुते ।
मया सदाफलोऽस्त्याम्रो रोपितो यमुनातटे ॥३७॥

दद्यास्तानि ततो नीत्वा जातमात्रमथाङ्गजम् ।
मामादाय तथा कुर्या यथा स्यां प्रतिबोधवान् ॥३८॥

इति स्वीकार्य देवोऽगादुत्पेदेऽथ च्युतः क्रमात् ।
तथैव दोहदोऽपूरि जातमात्रमथागृहीत् ॥३९॥

सोऽनामयद् गुरून् बाल्याद् न मनागपि सोऽनमत् ।
धर्मस्थाने रतिर्नास्य रुदन्नेष ततोऽनशत् ॥४०॥

वीप्सयैवंविधं कुर्वन् मूकः श्रान्तो विरागवान् ।
व्रतमादाय देवेषूदपद्यत महाद्युतिः ॥४१॥

---

१. तापस ! किमनेन मूकत्वेन प्रतिपद्यस्व ज्ञात्वा धर्मम् ।
मृत्वा शूकर उरगो जातः पुत्रस्य पुत्र इति ॥२९॥

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

प्रयुक्तावधितो ज्ञात्वा स्वप्रतिज्ञामथामरः ।
तथा जलोदरं तस्य चक्रेऽसौ विव्यथे यतः ॥४२॥

शशाक नोत्थातुमपि प्रत्याख्यातो भिषग्वरैः ।
शस्त्रवैद्याकृतं कृत्वाऽवतीर्णोऽथ भुवं सुरः ॥४३॥

वैद्योऽहं सर्वरोगाणां तूर्णमेव निवर्तकः ।
उद्घोषणामिमां कुर्वन् बभ्राम निखिले पुरे ॥४४॥

लघु सज्जय मां रोगात् तेनेत्युक्ते सुरोऽभ्यधात् ।
तवासाध्यो महाव्याधिर्मदुपायं परं शृणु ॥४५॥

ममावलगकश्चेत् स्या मदादेशैकतत्परः ।
नाशयामि ततो व्याधिं सोऽपि तत् प्रत्यपद्यत ॥४६॥

सज्जीकृतस्तेन सार्द्धं तस्य शस्त्रस्थगीधरः ।
गच्छन् विकृततद्भारादतीवासीत् प्रपीडितः ॥४७॥

सूर्यतापः क्षुधा रोगः कार्श्यं मार्गोऽतिभारिता ।
पारवश्यमसौ तस्य दुःखश्रेणिः सुदुःसहा ॥४८॥

अथ द्रुमतले साधून् वीक्ष्योचे रोगिणं सुरः ।
रे ! पीडितोऽसि दीक्षां त्वं भज मुक्तो मया व्रज ॥४९॥

वरं व्रतमिति ध्यात्वा व्रत्यभून्निर्जरे गते ।
उद्व्रतश्चाचिरादासीत् तज्ज्ञात्वा चावधेः सुरः ॥५०॥

तथैव रोगयोगेन क्रमाद् व्रतमलापयत् ।
पुनर्भग्नव्रतो भूयो रोगात् तं व्रतमापयत् ॥५१॥

अथ तृतीयवेलायां नामुचत् केटकं सुरः ।
संयमारतिमापन्नः सोऽपि दध्याविदं हृदि ॥५२॥

*गार्हस्थ्ये रोगसम्पत्तिर्न शक्तिर्व्रतपालने ।*
*एतद्दुःखभराक्रान्तो म्रियेय प्राणितेन किम् ? ॥५३॥*

सहिष्येऽहं वरं रोगान् व्रतकष्टं सुदुःसहम् ।
बलादुपस्थितं सह्यमसह्यं शक्यमोचनम् ॥५४॥

देवेनावधिना ज्ञातेऽध्यवसाये तथाविधे ।
मूर्ध्नाऽऽदाय तृणव्यूहं ज्वलद् ग्रामं विशन् सुरः ॥५५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*क्षुल्लेनोचे ज्वलद् ग्रामं विशन् भस्मीभविष्यसि ।*
*आत्मानं किं न जानासीत्यभिधाय सुरोऽभ्यधात् ॥५६॥*

*क्रोधादिभिः प्रज्वलन्तं गृहवासं जिघृक्षसि ।*
*परित्यज्य व्रताऽनूपं तत् किं मूढ ! न लज्जसे ? ॥५७॥*

*उत्पथेनाटवीं यान्तं सुरं किं गच्छसीत्यवक् ।*
*त्यक्त्वा मोक्षपथं क्लेशं किं प्रवेष्टेत्यवक् सुरः ॥५८॥*

*यक्षं यक्षगृहे पूजाऽनन्तरं वीप्सया ह्यधः ।*
*पतन्तं वीक्ष्य सोत्प्रासं क्षुल्ल आख्यत् सुरं प्रति ॥५९॥*

*अहो ! अधन्यता ह्यस्य पूजितो यदधः पतेत् ।*
*सुरोऽवक् त्वमधन्योऽसि यश्चारित्रे निवेशितः ॥६०॥*

*उत्प्रव्रज्य गृहस्थत्वे स्थातुमिच्छसि दुःखदे ।*
*सम्भ्रान्तः क्षुल्लकोऽथाह कोऽसि त्वं मम लग्नकः ? ॥६१॥*

तेनापि दर्शितं मूकरूपं पूर्वभवोऽकथि ।
कः प्रत्यय इति प्रोक्ते स्फुटरूपः सुरोऽवदत् ॥६२॥

पूर्वं त्वयोक्तमासीद् मे मूकस्य द्युसदो भवे ।
न प्रबुध्येय चेद् यत्नैर्मां **वैताढ्यं** ततो नयेः ॥६३॥

**सिद्धायतन**कूटेऽस्ति नामाङ्कं कुण्डलद्वयम् ।
तद्दर्शनाद् भवस्मृत्या मे प्रबोधो भविष्यति ॥६४॥

तत्रेत्युदीर्य निन्येऽसौ सुरेणेक्षितवांश्च तत् ।
जातिस्मरो व्रतस्थैर्यं भेजेऽमुत्र च सद्गतिम् ॥६५॥

तस्य पूर्वं रतिर्नासीद् व्रते तदनु साऽभवत् ।
निष्कलङ्कतया धीरो व्रतं पालितवान् यतः ॥६६॥

इत्यरतिपरीषहे सप्तमे **अपराजित**यतिकथा ॥१५॥

संयमेऽरतस्य स्त्रीष्वप्यभिलाषः स्यादिति तत्परीषहमाह—

**संगो एस मणूसाणं जाओ लोगंमि इत्थिओ ।**
**जस्स एआ परिन्नाया सुकडं तस्स सामण्णं ॥१६॥**

**व्याख्या—सङ्ग एष** वक्ष्यमाणो मक्षिकाणामिव श्लेष्मा **मनुष्याणां याः** काश्चन

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मानुष्याद्या **लोके स्त्रियो** हाव–भावादिभिरत्यासक्तिहेतवो ह्येता मनुष्याणामित्युक्तं स्त्रियोऽन्यथा गीतादिष्वपि सज्जन्त्येवैते । मनुष्योपादानं च तेषामेव मैथुनसंज्ञाऽतिरेकस्य **प्रज्ञापना**दौ प्ररूपितत्वात् । अतः किमित्याह—**यस्य** यतेरेताः स्त्रियः **परिज्ञाता** ज्ञपरिज्ञया इह परत्र च महाऽनर्थहेतुतया प्रत्याख्यानपरिज्ञया च प्रत्याख्याताः । **सुकृतं** सुष्ठ्वनुष्ठितं 'तस्स'त्ति सुप्व्यत्ययात् **तेन श्रामण्यं** व्रतमतः स्त्रीप्रत्याख्यानमेव श्रेयस्तदर्थं सर्वसावद्य-प्रवृत्तेः ॥१६॥

विधेयमाह—

**एवमायाय मेहावी पंकभूयाओ इत्थिओ ।**
**नो ताहिं विणिहन्निज्जा चरेज्जत्तगवेसए ॥१७॥**

**व्याख्या—एवमन्तरोक्तमर्थमादाय** बुद्ध्या गृहीत्वा **मेधावी** धीमान् **पङ्कः** कर्दम-**स्तद्भूता** एवं मुक्तिपथप्रवृत्तानां विबन्धकत्वेन **स्त्रियो न ताभिर्विनिहन्यात्** संयमजीवि-तोपघातेन नात्मानं पातयेत् किन्तु **चरेद्** धर्मानुष्ठानं सेवे**तात्मगवेषकः** । कथमात्मा भवाद् निस्तारणीय इत्यात्माऽन्वेषक इत्ययं च स्त्रीपरीषहः सह्यः श्री**रामचन्द्र**र्षिवत्—

प्रणम्य जिनमर्हन्तमहं **पद्मचरित्र**तः ।
व्रताधिकारं **रामस्य** कीर्त्तयिष्यामि साद्भुतम् ॥१॥

**लङ्केश्वर**वधे वृत्ते **जानक्यां** दिव्यशुद्धितः ।
दीक्षामादाय जातायाम**च्युतेन्द्र**तया ततः ॥२॥

**हनूमदा**दिमित्रेषु शिवं प्राप्तेषु दीक्षया ।
**लक्ष्मण**प्रेमसंमूढो **रामो** निन्ये दिनान् निजान् ॥३॥

निनिन्द **वायुपुत्रा**दीन् त्यक्तप्रेम-सुखानिति ।
सद्भोगत्यागतो दीक्षा कष्टं स्पष्टं हि मूर्खता ॥४॥

तेषां न हि स्वयं बुद्धिर्न तेषां कोऽपि धीप्रदः ।
विद्यमानसुखत्यागाद् येऽसत्सौख्यकृतस्पृहाः ॥५॥

प्रिया-मित्र-वियोगादेर्**लक्ष्मण**स्नेहतस्तदा ।
**रामस्ये**त्यन्यथा बुद्धिर्जाता ही ! कर्मचेष्टितम् ॥६॥

"अथेन्द्रः प्रथमे कल्पे सभायां द्युसदां पुरः ।
धर्मस्य वर्णनं चक्रे सुरलक्षनिषेवितः ॥७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चक्रित्वमथ देवत्वमिन्द्रत्वं सिद्धिसम्पदः ।
यत्प्रसादादवाप्यन्तेऽर्हन्तमेव तमानुमः ॥८॥

कन्दर्पोर्मिभराक्रान्तं कषायग्राहसङ्कुलम् ।
भवाम्भोधिं जिनादन्यः कस्तारयितुमीश्वरः ? ॥९॥

मोहाभ्रपटलैश्छन्नमज्ञानध्वान्तसञ्चितम् ।
जिनो भास्कर एवायं विश्वं विश्वं प्रकाशयेत् ॥१०॥

यदीच्छत परं सौख्यं स्वर्गानन्तगुणं सुराः ! ।
तदाऽऽराधयतार्हन्तमार्हन्त्यपददायकम् ॥११॥

जीवो ह्यसावनाद्यन्तो भ्रमन् स्वादृष्टवायुना ।
कथञ्चित् प्राप्य मानुष्यं नार्हद्धर्मे स्थिरो भवेत् ॥१२॥

मिथ्यादृष्टिं क्रियां कृत्वा यद्यप्यात्मा सुरो भवेत् ।
च्युतस्तथाऽप्यसौ स्वर्गाद् न मोक्षपथमाप्नुयात् ॥१३॥

*विश्वपूज्याय जैनाय यो धर्माय जुगुप्सते ।*
*स दुःखसागरे घोरे तं तं कालमरार्यते ॥१४॥*

*ही ! सर्वं सुलभं लोके बोधिरेकैव दुर्लभा ।*
*अर्हत्प्रसादाद् मे भूयात् प्रेत्य बोधिः परेण किम् ?" ॥१५॥*

तत्रैको विबुधः प्रोचे दुर्लभा चेद् भवादृशाम् ।
सुलभास्मादृशां बोधिर्नूनं प्रेत्य कथं भवेत् ? ॥१६॥

महर्द्धिकं सुरं रामीभूतं ब्रह्मदिवश्च्युतम् ।
इदानीमेव किं मुग्धं भोगमूढं न पश्यत ? ॥१७॥

इन्द्रोऽभ्यधात् समस्तेषु बन्धनेषु पुरातनैः ।
स्नेहबन्धनमाख्यातं परमं बन्धनं भवे ॥१८॥

*नरो निगडबद्धोऽपि यायात् पदमभिप्सितम् ।*
*प्रेमबन्धनबद्धस्तु पदं गन्तुं न हि क्षमः ॥१९॥*

**राम-लक्ष्मण**योः स्नेहः कश्चिदेवंविधः सुराः ! ।
वियोगेऽन्यतरस्यान्यो निश्चितं मृत्युमाप्नुयात् ॥२०॥

**रामो** न **लक्ष्मणं** मोक्तुं भवेत् क्षणमपि क्षमः ।
केवलं तिष्ठति व्याप्तो मोहनीयेन कर्मणा ॥२१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ द्वौ **रत्नचूलाख्य-मृगचूला**भिधौ सुरौ ।
गतौ स्नेहपरीक्षार्थं **राम-लक्ष्मण**योर्भुवम् ॥२२॥

**रामं** विष्णुर्मृतं श्रुत्वा शुचा कीदृग् विचेष्टते ।
प्रविष्टावित्य**योध्यायाम**लक्षौ राजवेश्मनि ॥२३॥

माययोच्छालितः शब्दो **रामो**ऽकस्माद् मृतिं गतः ।
नारीशोकप्रलापाश्च जिज्ञरेऽनुदिशं ततः ॥२४॥

**लक्ष्मणो**ऽपि तदाकर्ण्याकाण्डे ही ! किमभूदिदम् ? ।
इति दीनं ब्रुवन्नेव सद्यः प्राणैर्व्यमुच्यत ॥२५॥

काञ्चनप्रतिमाऽऽकारश्चेष्टालवविवर्जितः ।
अलक्ष्यत दिवौकोभ्यां तदा श्री**राघवा**नुजः ॥२६॥

किमेतदिति सम्भ्रान्तौ मृतं ज्ञात्वाऽथ **लक्ष्मण**म् ।
तौ निनिन्दतुरात्मानं महापुरुषघातकम् ॥२७॥

हास्येनापि हि तत् कुर्याद् निन्दितं कर्म दुर्जनः ।
आत्मानमपरांश्चैव पीडयेद् येन लीलया ॥२८॥

***असमीक्षितकर्तृणां पश्चात्तापहतौजसाम् ।***
***स्वयमेव कृतं कर्म परीतापप्रदं भवेत् ॥२९॥***

विषादपावकोत्तप्तौ प्राणितं दातुमक्षमौ ।
इति चिन्तापरौ देवौ पापात्मानौ दिवं गतौ ॥३०॥

**लक्ष्मणं** निश्चितं ज्ञात्वा मृतमन्तःपुरीजनः ।
तथाऽरोदीद् यथा क्षिप्रं रोदसीमप्यरोदयत् ॥३१॥

मुग्धाः काञ्चन पद्माक्ष्यः स्नेहाभ्यासात् पुरातनात् ।
आलिलिङ्गुर्निजं कान्तां सान्त्वयन्त्यो निरर्थकम् ॥३२॥

स्वसेवकमुखाच्छ्रुत्वा **रामो**ऽप्येतत् ससम्भ्रमः ।
उप**लक्ष्मण**मायातोऽनुजं तादृशमैक्षत ॥३३॥

**लक्ष्मणं** विगतालापं निष्प्रभं प्रातरिन्दुवत् ।
दध्यौ **दाशरथि**र्वीक्ष्य किं रुष्टो मयि मेऽनुजः ? ॥३४॥

गत्वा मस्तकमाघ्रायालिङ्ग्यानुजमसौ ततः ।
न ददासि किमालापमित्यभाणीत् सगद्गदम् ॥३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गतजीवमपि ज्ञात्वा चिह्नैर्जीवन्तमेव सः ।
विवेद प्रणयो ज्ञानवैपरीत्ये हि कारणम् ॥३६॥

न ब्रूते हसते नैव नवोच्छ्वसिति बान्धवः ।
अदीनोऽप्यभजद् दैन्यं ततो **रामो**ऽतिमोहितः ॥३७॥

आकार्य महतो वैद्यान् **सौमित्रिम**चिकित्सयत् ।
प्रतीकारेऽखिले व्यर्थीभूते मूर्च्छामवाप च ॥३८॥

कथञ्चिल्लब्धचैतन्ये **रामे** शोचति निर्भरम् ।
अनुशोचति विश्वेऽपि शोकाद्वैतं तदाऽभवत् ॥३९॥

युवतिभिस्तदा हार-कङ्कणाद्यमभज्यत ।
यथा राजाङ्गणास्थानं सर्वमाच्छाद्यतामुना ॥४०॥

अत्रान्तरे **राम**सुतौ तदैव **लवणाङ्कुशौ** ।
**लक्ष्मणं** मृतमाकर्ण्य वैराग्यादिति दध्यतुः ॥४१॥

ससुरासुरलोकेन जेतुं शक्यो न **लक्ष्मणः** ।
कृतान्तेन हतः सोऽपि क्षणेनैव दुरात्मना ॥४२॥

कदलीमध्यवत् सारत्यक्तेन तनुनाऽमुना ।
नात्तं तपःफलं येन पश्चात् तपति सोऽन्वहम् ॥४३॥

इत्यभिप्रेत्य पितरं नत्वा त्यक्त्वाऽऽशु सम्पदः ।
वने **सुधास्वर**गुरोः पार्श्वे साधू बभूवतुः ॥४४॥

ज्ञान-दर्शन-चारित्रत्रयलीनौ महाशयौ ।
कुलानुरूपं कुर्वन्तावभूतां प्रथितौ जने ॥४५॥

श्री**राम**स्य प्रियौ पुत्रौ ताभ्यामप्यनुजः प्रियः ।
तद्वियुक्तः स यद् भेजे दुःखं वेद स एव तत् ॥४६॥

त्यक्तराज्यसुखाभोगः कोमलं सुरभि स्वतः ।
नात्यजल्लाक्ष्मणं देहं **रामः** स्नेहविचेतनः ॥४७॥

त्वया सहोदरेणाहं कदाऽप्यकृतसङ्कथः ।
त्वमेव ब्रूहि यद्यस्थां मुहूर्त्तमपि बान्धव ! ॥४८॥

वेला ते महत जाता निरुद्धवचसो मयि ।
त्वदेकप्राणमेतत् किं प्रियावृन्दमुपेक्षसे ? ॥४९॥

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

तपोवने तपस्यार्थं भ्रातृजौ तव गच्छतः ।
उत्तिष्ठोत्तिष्ठ तौ वत्स ! सान्त्वयित्वा समानय ॥५०॥

न तथा भास्करो ग्रीष्मे तथा दहति नानलः ।
एकोदरवियोगो मां यथा तुदति सर्वतः ॥५१॥

वत्स ! सूर्योऽस्तमायातो यदि ब्रूषे त्वमेकशः ।
तदा समाधिना निद्रां भजे रात्रावनाकुलः ॥५२॥

वत्स ! त्यज विषादं द्राक् त्वय्येवं सति खेचराः ।
विरुद्धाः **कोशलां** लातुं प्राप्ता एव समन्ततः ॥५३॥

निद्रां मुञ्च निशाऽतीतोदियाय रविरुद्धतम् ।
दत्ताः कपाटा मच्चित्ते परत्रोद्घटिताश्च ते ॥५४॥

नूनं कृतो मया मित्रवियोगः केनचित् पुरा ।
वाग्वियोगः कथं बन्धोरन्यथा लभ्यते मया ? ॥५५॥

इति प्रलपतस्तस्य श्री**रामस्य** नभश्चराः ।
**बिभीषणा**दयः सर्वे सुहृदोऽन्तिकमागताः ॥५६॥ **नवभिः कुलकम्**

साश्रुनेत्रा बलस्यैते पतित्वा पादयोस्तदा ।
प्रस्तावोचितमाचख्युरस्य शोकापनोदकृत् ॥५७॥

विशेषतो बभाषेऽत्र निपुणस्तु **बिभीषणः** ।
**राम** ! **रावणं** कृत्वा किमिदानीं मुधा शुचः ? ॥५८॥

जलबुद्बुदतुल्यानि शरीराणि भवे भवे ।
उत्पद्यन्ते विलीयन्ते हर्षेणालं शुचाऽप्यलम् ॥५९॥

सलोकपालदेवेन्द्रा भुञ्जन्तो दिवि सम्पदः ।
पुण्यक्षयाच्च्युतास्तेऽपि लभन्ते पुनरापदः ॥६०॥

*मृतं शोचति संमूढो महामोहवशंवदः ।*
*नात्मानं तु सदा मृत्युपञ्चाननमुखस्थितम् ॥६१॥*

*यत्प्रभृत्येव सञ्जातस्तत्प्रभृत्येव मृत्युना ।*
*जीवो गृहीत एवास्ते जनस्तदपि सुस्थिरः ॥६२॥*

*तिलमात्रमपि स्थानं न तज्जगति वर्तते ।*
*उत्पत्तिं मरणं चैव न यस्मिन् जन्तुरासदत् ॥६३॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*धर्मादन्यत्र विश्वेऽपि मृत्यवे कोऽपि न प्रभुः ।*
*निरर्थकस्तु धीराणां शोकः कातर्यलक्षणम् ॥६४॥*

*कथंकथमपि प्राप्ते मानुषत्वेऽतिदुर्लभे ।*
*गलदायुर्न वेत्त्येवं प्रेम्णा निगडितो जनः ॥६५॥*

*जनन्यङ्कस्थितोऽप्येष रक्षितोऽपि शितायुधैः ।*
*कृतान्तशत्रुणाऽवश्यं हठादादीयते जनः ॥६६॥*

*भवं भवमनु प्राप्ताः स्वजना ये शरीरिणा ।*
*अधिकास्तेऽब्धिबिन्दुभ्यस्तत् को मोहोऽत्र राघव ! ॥६७॥*

*विपक्षः स्वजनो भूयात् स्वजनोऽपि परो भवेत् ।*
*स्वजने तद् गते कालं न कुर्युः सधियः शुचम् ॥६८॥*

**राम** ! ते **राम**नामापि शुचं हन्ति स्मृतं हृदि ।
त्वं चेत् प्रभो ! शुचाऽऽक्रान्तस्तत् तवापि किमुच्यते ? ॥६९॥

अथ नत्वाऽऽशु विज्ञप्तः **सुग्रीवाद्यैः** स **राघवः** ।
**लक्ष्मणा**ङ्गमथ त्यक्त्वा मोहं संस्कारयानले ॥७०॥

प्रत्युद्यातमहामोहस्तद्गिराऽथ **रघूद्वहः** ।
अधिचिक्षेप तानित्थं यात यात ममाग्रतः ॥७१॥

उत्तिष्ठानुज ! यास्यामस्तं प्रदेशं निराकुलम् ।
यत्रैषां दुर्जनानां गीः श्रूयते न श्रवोविषम् ॥७२॥

इत्याख्याय सभां मुक्त्वा स्कन्धे कृत्वाऽनुजं वपुः ।
गत्वाऽन्यत्र सूपकारैः सज्जयित्वौदनादिकम् ॥७३॥

**लक्ष्मणा**स्ये प्रचिक्षेप वत्स ! लाहीत्यदोऽवदत् ।
मृतः स तु न जग्राह जैनं धर्ममभव्यवत् ॥७४॥

अथ **चारुवयो-विद्युन्मालि-रत्नेक्षणा**दयः ।
अरयो **राम**भद्रस्य वृत्तान्तमिति शुश्रुवुः ॥७५॥

येन **सुग्रीव**सान्निध्यादुल्लङ्घ्य **लवणो**दधिम् ।
**सीता**ऽपहारे चक्रेण चिच्छिदे **रावणं** शिरः ॥७६॥

इदानीं प्रहतः सोऽयं कालचक्रेण **लक्ष्मणः** ।
वशीकृतस्तु मोहेन वियोगे तस्य **राघवः** ॥७७॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

अतिचक्राम षण्मासी वहतो लाक्ष्मणं वपुः ।
त्यक्तसर्वान्यकृत्यस्य **रामस्य** गतचेतसः ॥७८॥

लब्धावकाशाः सर्वे ते **कोशलां** रुरुधुर्द्विषः ।
बाहुल्यं दधतेऽनर्थाश्छिद्रेषु महतामपि ॥७९॥

संस्थाप्य **लक्ष्मणं** स्वाङ्के कठिनं धनुराददे ।
**रामो** लोहितया दृष्ट्या ददर्श प्रतिपन्थिनः ॥८०॥

इतश्चासनकम्पेनावधिना च **रघूद्वहम्** ।
**जटायुश्च** कृतान्तश्च ज्ञात्वा शोकाकुलं सुरौ ॥८१॥

स्मृत्वा च पूर्वसम्बन्धं द्रुतमागत्य **कोशलाम्** ।
नाशयामासतुः शत्रुसेनां तूलमिवानिलः ॥८२॥

भग्नमानमरट्टास्ते संविग्नाश्च गुरोर्गिरा ।
**रतिवेग**मुनेः पार्श्वे प्रपन्ना व्रतमुत्तमम् ॥८३॥

निवर्त्य शत्रुसंरोधमुप**रामम**थेयतुः ।
सिषेच तत्र पाथोभि**र्जटायुः** शुष्कपादपम् ॥८४॥

ममन्थ सलिलं यन्त्रेऽपीलयत् सिकताकणान् ।
तथास्वरूपमालोक्य तौ पप्रच्छ हलायुधः ॥८५॥

***यस्मिन् यत्ने न कार्यस्य सिद्धिः काऽपि निरीक्ष्यते ।***
***तत्रापि ये प्रवर्तन्ते तेषां मौढ्यं किमुच्यते ? ॥८६॥***

कृतान्तः प्रोचिवान् **रामं** यद्येवं लाक्ष्मणं वपुः ।
स्कन्धे वहन्नविश्रान्तं मृतं किं साध्यमाप्स्यसि ? ॥८७॥

तच्छ्रुत्वा गाढमालिङ्ग्य **लक्ष्मणा**ङ्गममङ्गलम् ।
किं रे ! मद्भ्रातुराख्यासि तेनेति व्यवदच्च सः ॥८८॥

**जटायुरथ** सम्प्राप्तः स्कन्धे कृत्वा कलेवरम् ।
**रामभद्र**प्रबोधाय **रामो**ऽपीति तमालपत् ॥८९॥

कलेवरं निजे स्कन्धे वहमानो न लज्जसे ।
सुरोऽवदद् न ते लज्जा राज्ञो मृतकवाहिनः ॥९०॥

वालाग्रप्रतिमं दोषं परस्यैव त्वमीक्षसे ।
मन्दराभं महाराज ! न द्रष्टा दोषमात्मनः ॥९१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अहं कलेवरस्कन्धः प्रेक्ष्य त्वामपि तादृशम् ।
गतोऽस्मि परमां प्रीतिं स्वानुरूपोपलम्भतः ॥९२॥

सर्वेषां बाल-वृद्धानां सर्वेषां शोकशालिनाम् ।
सर्वेषां निर्विवेकाणामिदानीं त्वं धुरि स्थितः ॥९३॥

वचो दैवमदः श्रुत्वा मोहनीये शमं गते ।
स्मृत्वा गुरुवचः पथ्यं **रामो**ऽभूल्लब्धचेतनः ॥९४॥

क्षुत्-तृषोर्भोजने नीरे लब्धे रुजि महौषधे ।
यादृशी जायते चेष्टा **राम**स्यासीत् तदेदृशी ॥९५॥

भवान्तरमिव प्राप्तो **रामो** विमलमानसः ।
भवस्थितिमिति ध्यातुं प्रवृत्तः परमार्थवित् ॥९६॥

***"अप्राप्तपूर्वमासाद्य मानुषं जन्म दुर्लभम् ।***
***अहारयमहो व्यर्थमकृत्वा धर्ममार्हतम् ॥९७॥***

***आसाद्यन्ते कलत्राणि प्राप्यन्तेऽनेकबान्धवाः ।***
***केवलं दुर्लभैकैव बोधिः संसारतारिका" ॥९८॥***

प्रबोधाभिमुखं ज्ञात्वा श्री**राम**मिति तौ सुरौ ।
स्फोरयन्तौ निजामृद्धिं पुरः प्रादुर्बभूवतुः ॥९९॥

पृच्छतश्च समाधिस्ते श्री**रामे**त्यथ सोऽभ्यधात् ।
जिनधर्मवियुक्तस्य मे समाधिः कुतस्तराम् ? ॥१००॥

युवां काविति मे ब्रूथः प्रस्तावसमुपस्थितौ ।
का मया युवयोः प्रीतिर्**जटायुस्त**योरवक् ॥१०१॥

**जटायु**रिति यः पक्षी **सीतया** चिरलालितः ।
**सीता**हर**दशास्ये**न जानास्येव तदा हतः ॥१०२॥

अन्त्यां दशां गतस्यास्य परमेष्ठिनमस्क्रियाम् ।
यददा **राम** ! तेनाहं **माहेन्द्रे** निर्जरोऽभवम् ॥१०३॥

प्राप्तो नाहमियत्कालं कृतघ्नः सुखलम्पटः ।
कार्यावसाने त्वायातस्तन्ममागः क्षमस्व भोः ! ॥१०४॥

कृपां कृत्वा धराधीश ! किञ्चित् कार्यं समादिश ।
अथापरः सुरोऽभाणीत् त्वत्सेनानीरहं प्रभो ! ॥१०५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कृतान्तमुख इत्याख्यः सोऽहमङ्गीकृतव्रतः ।
सुरो **माहेन्द्र** उत्पेदे त्वां संस्मृत्य समागमम् ॥१०६॥

देह्याज्ञां भुवने सारं यत् किञ्चिद् वस्तु वर्तते ।
उपानयामि तत् सर्वं स्वाधीनं सकलं मम ॥१०७॥

**श्रीरामो**ऽथाददे वाचं भग्नं रिपुबलं सुरौ ! ।
उपायैर्बोधितश्चाहं पर्याप्तमियता ननु ॥१०८॥

गतौ श्री**राम**मापृच्छ्य तौ देवावथ ताविषम् ।
अग्निसंस्कारमाधत्त **पद्मो लक्ष्मण**वर्ष्मणः ॥१०९॥

संवेगी बन्धुमाकार्य **शत्रुघ्न**मथ **राघवः** ।
स्वीयराज्यधुरादानं ययाचेऽन्वयवत्सलः ॥११०॥

वत्स ! पालय साम्राज्यं सतन्त्रो न्यायसेवधिः ।
अहं तपोवनं यामीदानीं तुर्याश्रमोचितम् ॥१११॥

अथ विज्ञापयामास **शत्रुघ्नो** रचिताञ्जलिः ।
राज्येन दुःखदेनालं त्वमेव गतिरेधि मे ॥११२॥

*न बन्धुवर्गो नैवार्थो न भोगा न वसुन्धरा ।*
*अलं त्राणाय किन्त्वेकस्त्राणकृद् धर्म एव यत् ॥११३॥*

**शत्रुघ्न**निश्चयं ज्ञात्वा कुमारं **लवणा**ङ्गजम् ।
प्रातिष्ठिपन्निजे राज्ये स्वकरेण **रघूद्वहः** ॥११४॥

**बिभीषणश्च सुग्रीवो**ऽन्येऽपि भूपाः स्वकात्मजान् ।
निजे निजे पदे न्यस्य **रामभद्र**मुपस्थिताः ॥११५॥

**अर्हद्दत्ता**भिधं श्राद्धं साधर्मिकमुपागतम् ।
पर्यन्वयुङ्क्त सङ्घस्य कुशलं **लक्ष्मणा**ग्रजः ॥११६॥

सोऽप्याह दुःखनिर्मग्ने त्वयि सर्वोऽपि दुःखितः ।
जनः सङ्घो विशेषेण वात्सल्यमणिसेवधिः ॥११७॥

किञ्च स्वामिन्निहोद्यानेऽस्त्यागतश्चारणो मुनिः ।
**सुव्रत**स्तदुपान्तेऽस्ति सङ्घो दुःखापनोदकृत् ॥११८॥

तच्छ्रुत्वाऽनभ्रवृष्ट्याभं रोमाञ्चिततनुर्बलः ।
गत्वा सहस्रसाध्वन्तः **सुव्रतं** मुनिमानमत् ॥११९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

खचरश्रेणिनिर्मातमहसि श्रमणेश्वरम् ।
स त्रिः प्रदक्षिणीकृत्य ययाचे व्रतमार्हतम् ॥१२०॥

गुरुणाऽथाभ्यनुज्ञातो **रामो** वैराग्यपूरितः ।
मोहपाशं लघु च्छित्त्वा सञ्चूर्ण्य स्नेहबन्धनम् ॥१२१॥

मुक्त्वाऽलङ्कारसन्दोहं चतुर्थतपसि स्थितः ।
कोमलैः पाणिभिः केशकलापमुदपाटयत् ॥१२२॥

उप**सुव्रत**निर्ग्रन्थं निर्ग्रन्थोऽभूद् **रघूद्वहः** ।
राज्यद्वयपरीभोगस्तादृशां ह्यौचितीपदम् ॥१२३॥

महाव्रतधरः पञ्च समितीः प्रतिपालयन् ।
गुप्तिं दधत् ततो जज्ञे **रामो** दीक्षाधनो महान् ॥१२४॥

पुष्पवृष्टिः कृता देवैर्वादितो देवदुन्दुभिः ।
सुरभिः पवनो वातः श्री**राम**चरणक्षणे ॥१२५॥

**शत्रुघ्नो**ऽपि सुतं ज्येष्ठं संस्थाप्याथ निजे पदे ।
पञ्चेन्द्रियरिपून् जित्वा **रामे**ण व्रतमाददे ॥१२६॥

**बिभीषणा**दयस्तेऽपि खचरा व्रतिनोऽभवन् ।
षोडशैव सहस्राणि राजानोऽपि महर्द्धयः ॥१२७॥

सप्तत्रिंशसहस्राणि तदा राजन्ययोषिताम् ।
महत्तरायाः **श्रीमत्या** व्रतमाददिरेऽन्तिके ॥१२८॥

षष्टिवर्षाणि गच्छेऽस्थाद् विनीतो गुरुभक्तिभाक् ।
अथैकाकिविहारित्वं प्रपन्नो गुर्वनुज्ञया ॥१२९॥

विविधाभिग्रहग्राही दधत् पूर्वगतश्रुतम् ।
भावितात्मा तपोलीनो विजहाराममोऽमदः ॥१३०॥

क्षमाधरदरीस्थस्याप्रमत्तस्य महात्मनः ।
समुत्पेदेऽवधिज्ञानं शान्तावरणकर्मणः ॥१३१॥

ददर्शावधिना तेन **लक्ष्मणं** नरकस्थितम् ।
बहुशो वेदनाऽऽक्रान्तं कृपयेति व्यभावयत् ॥१३२॥

शतानि सप्त कौमार्ये वर्षाणां योऽत्यवाहयत् ।
देशाधिपत्यमष्टानां त्रिशतीं चान्वशात् ततः ॥१३३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चक्रानुगचमूचक्रभारभुग्नोरगेश्वरः ।
यश्चत्वारिंशदब्दानि चक्रे दिग्विजयं भुवि ॥१३४॥

अतो दश सहस्राणि तथा नव शतानि च ।
पञ्चत्रिंशच्च वर्षाणि यः साम्राज्यमपालयत् ॥१३५॥

पञ्चविंशतिनिर्मुक्तद्वादशाब्दसहस्रकम् ।
प्रपूर्यायुः सुखं भुक्त्वा **लक्ष्मणो** नरकं गतः ॥१३६॥

ममासीत् तत्र यः स्नेहबन्धः पूर्वं महत्तरः ।
ही ! निरर्थक एवायमिदानीं ज्ञायते मया ॥१३७॥

समर्थोऽपि जनो बन्धावत्यन्तप्रतिबन्धतः ।
अश्रद्धानस्तत्त्वार्थं भ्रमत्येवापदाम्बुधौ ॥१३८॥

एवं दुःखविमोक्षस्योपायमनुचिन्तयन् ।
पारणे षष्ठतपसो निरगात् कन्दरोदरात् ॥१३९॥

गतो गोचरचर्यायै नगरीं **स्यन्दनस्थलीम्** ।
मत्तेभगमनः कान्तिनिर्जितांशुर्मुनीश्वरः ॥१४०॥

आगच्छन्तममुं वीक्ष्य निर्गतः स्वस्वमन्दिरात् ।
मुमुक्षुं वेष्टयामास दिदृक्षुर्नागरो जनः ॥१४१॥

साधु साध्विति सालापो बभाषे सकलो जनः ।
भूषितं सकलं विश्वमनेनाहो ! महात्मना ॥१४२॥

युगप्रमितभूभागमात्रस्थापितलोचनः ।
रूपेण कर्मणा चायं कस्यानन्दमदाद् न हि ? ॥१४३॥

**रामा**गमनवार्तायां प्रसृतायां पुरेऽखिले ।
दिदृक्षुनागरै रथ्याः पूर्णाः खमिव पुद्गलैः ॥१४४॥

आदत्ते यत्कराद् भिक्षां धन्योऽसौ भुव्यतो जनाः ।
मोदकादि समादाय द्वारदेशमुपस्थिताः ॥१४५॥

तदाऽऽसीन्नर-नारीणां तुमुलः कोऽपि हर्षतः ।
बन्धनादीनि निर्मोच्य येन चेलुर्गजादयः ॥१४६॥

प्रतिनन्दी नृपः श्रुत्वाऽथैतं व्यतिकरं जनात् ।
साधुदानकृतश्रद्ध इत्यभाषत मन्त्रिणः ॥१४७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गत्वा निमन्त्र्य **श्रीराम**मत्रानयत भोः ! द्रुतम् ।
तस्मै भिक्षां प्रदायाशु प्रचितं पुण्यमर्ज्यते ॥१४८॥

राजाज्ञया ययुस्तेऽपि भिक्षादानार्थमागतान् ।
उत्सार्य परितो लोकान् मुनिराजं न्यमन्त्रयन् ॥१४९॥

सोऽपि दध्यौ जना एते वर्धमानमुदोऽखिलाः ।
तिष्ठन्त्यतीव सोत्साहा मद्दानोज्ज्वलचेतसः ॥१५०॥

इदानीं यद्यहं यामि नृपसौधे निमन्त्रितः ।
तदा विघटितोत्साहा गच्छन्त्येते विषादिताम् ॥१५१॥

नृपभावमतिक्रम्यादेयं दानं न चान्यतः ।
इति निश्चित्य निःसङ्गो निर्गत्य प्रययौ वनम् ॥१५२॥

तत्राददे द्वितीयेऽह्नि **रामो** घोरमभिग्रहम् ।
भिक्षाऽर्थं न पुरे याता यदाऽत्र स्यात् तदाऽस्तु सा ॥१५३॥

क्षणं विषादमाधाय प्रतिनन्दी च नागराः ।
समादधुरिति स्वान्तं निःसङ्गा हि मुनीश्वराः ॥१५४॥

इतो हयपरीक्षायै प्रतिनन्दी धराधिपः ।
अवाहयत् तमारुह्य परीतः सर्वसेनया ॥१५५॥

वक्रशिक्षितदुष्टाश्वहृतो राजा विवेश तत् ।
पश्यत्येव परीवारे काननं **राम**भूषितम् ॥१५६॥

व्रजन् वेगेन तुरगः क्वचित् सरसि कर्दमे ।
तथा मग्नो न निर्गन्तुं शशाक स नृपो यथा ॥१५७॥

स्कन्धावारः क्रमादागादनुलग्नो नरेशितुः ।
निरगात् तत्प्रयोगेण नृपोऽप्यावासितस्तटे ॥१५८॥

नृपतिः सरसि स्नात्वा बुभुक्षुर्भोजनक्षणे ।
यावदास्ते समासीनः कुर्वन् दिगवलोकनम् ॥१५९॥

तावद् विवेश **राम**र्षिः पारणार्थी वरूथिनीम् ।
अभ्युदस्थाद् धराधीशो ज्ञातव्यतिकरो जनात् ॥१६०॥

क्षीरादिप्रवराहारं भावाद् दातुमुपाक्रमत् ।
दातुः श्रद्धादिसामग्र्याद् मुनिः प्रत्यग्रहीच्च तम् ॥१६१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ववर्षुर्निर्जराः पुष्प-रत्न-गन्धोद-काञ्चनम् ।
अस्तुवन् नृप-राजर्षी ननृतुश्च द्युयोषितः ॥१६२॥

सुरैः कृतां निरीक्ष्यार्चां प्रतिबुद्धः पुरीश्वरः ।
अणुव्रतपवित्रात्मा श्रमणोपासकोऽभवत् ॥१६३॥

तप्यमानोऽतितीव्राणि तपांसि वनवासिभिः ।
महितो देव-यक्षाद्यैः सोऽभवल्लब्धसेवधिः ॥१६४॥

ध्यानाभ्यासैकनिष्णातो मुनिराजः क्रमादगात् ।
ख्यातां कोटिशिलां यामुद्दधार प्राग् जनार्दनः ॥१६५॥

तामारुह्य विभावर्यां योगलीनस्तपोधनः ।
धीरः प्रतिमया तस्थौ कर्मध्वंसैकबद्धधीः ॥१६६॥

इतश्च द्वादशे कल्पे शक्रो व्यापारितावधिः ।
तादृशं मुनिमद्राक्षीत् प्रेमोद्धुषितकण्टकः ॥१६७॥

तपसः किं न माहात्म्यं जैनस्येति व्यमर्शयत् ।
ममानुचीर्णं **सीता**त्वे यतोऽभूत् स्वर्गदं तपः ॥१६८॥

विस्मितस्तं मुनिं वेद **बलभद्रं** जहर्ष च ।
अयं हि मम **सीता**त्वे कान्तोऽभूद् मानुजे भवे ॥१६९॥

***अहो ! आश्चर्यमाश्चर्यं विचित्रा कर्मणां गतिः ।***
***परित्यज्याङ्गनावेदं पुंवेदं लभते जनः ॥१७०॥***

अन्तेऽप्यत्यक्तविषयो **लक्ष्मणो**ऽगादधोगतिम् ।
**रामचन्द्र**स्तु संविग्नो मोक्षायैष तपस्यति ॥१७१॥

क्षपकश्रेणिमारूढो न यावज्ज्ञानमश्नुते ।
तावद् गत्वा क्षोभयामि देवः स्याद् मे यथा सुहृत् ॥१७२॥

क्रीडिष्यामि हि तद्युक्तो मेरु-नन्दीश्वरादिषु ।
सुखेषु हि महासौख्यं हृदयङ्गमसङ्गमः ॥१७३॥

स चाहं चानयिष्यावो **लक्ष्मणं** नरकोदरात् ।
सम्बन्धिनि गते क्लेशं सुखिनोऽपि सुखं कुतः ? ॥१७४॥

**अच्युतेन्द्र** इति ध्यात्वाऽवतीर्णो लघु काश्यपीम् ।
यत्रास्ति **रामचन्द्र**र्षिस्तत्र प्रावर्तयन्मधुम् ॥१७५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

काममङ्कूरयन् कामं रोहयन् विरहिव्यथाम् ।
प्रास्फुरद् दाक्षिणो वायुर्मानिभिर्मानमुज्झयन् ॥१७६॥

मञ्जरीपिञ्जरीभूतमाकन्दे कोकिलारवः ।
तथा प्रादुरभूद् ध्यानाद् योगिनोऽपि यथाऽचलन् ॥१७७॥

प्रोषितप्रेयसीपिण्डनिःपीतरुधिरा इव ।
अतिरक्ता अदृश्यन्त किंशुके काममार्गणाः ॥१७८॥

पुष्पेषुमित्रं पुष्पेषोर्मधुर्विजयशालिनः ।
नानाकुसुमनिष्पत्त्या विततान सहायताम् ॥१७९॥

प्राच्यामथोदगाच्चन्द्रो मानिनीमानभित्तये ।
गृह्णानः कैरवात् कोशादलिश्रेणिकृपाणिकाम् ॥१८०॥

आधाय **जानकी**रूपं दिव्यालङ्कारबन्धुरम् ।
**रामा**भ्यासं सुरः प्राप्तः प्रेमतस्तं कटाक्षयन् ॥१८१॥

सुराङ्गनाश्च साराङ्ग्यस्तं क्षणात् पर्यवेष्टयन् ।
**रामभद्रं** वरिष्याम इति गीर्विकटाननाः ॥१८२॥

अथ **सीता** स्मितस्मेरमुखी श्री**राम**मूचुषी ।
आर्यपुत्र ! वियोगार्त्ता त्वामालीनाऽस्मि सम्प्रति ॥१८३॥

नाथे ! त्वया निषिद्धाऽपि दीक्षामहमुपाददे ।
खेचरीभिस्तपस्यन्ती हठादपहृताऽस्मि च ॥१८४॥

ताभिरुक्ताऽथ मुक्त्वेशं **रामं** कस्मै तपस्यसि ? ।
स्त्रीणां हि **राम**कान्तानां पर्याप्ताः सुखराशयः ॥१८५॥

त्वां पुरस्कृत्य तं कान्तं प्रतिपद्यामहे वयम् ।
तं दर्शयेत्यतो नाथ ! तद्युक्ता त्वामुपागमम् ॥१८६॥

मां पुरस्कृत्य नाथैताः सनाथय कृपाम्बुधे ! ।
इत्युक्त्वा निर्भरं दोर्भ्यां तं सस्नेहमपीडयत् ॥१८७॥

वनं वसन्तो रजनी प्रियाऽभ्यासो विधूदयः ।
एतावत्यपि रामस्य न मनाग् बिभिदे मनः ॥१८८॥

परीषहचमूदुर्गे राम ! संयमसंयुधि ।
बहवोऽपि भटा भङ्गमापुः किं नाम ताम्यसि ? ॥१८९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्युदीर्य युवत्यस्ता गेयं शृङ्गारबन्धुरम् ।
उपचक्रमिरे गातुं सर्वतो विश्वमोहनम् ॥१९०॥

लास्यं सलीलमेताभिश्चक्रे यत्रोरगेश्वरः ।
सनुपुरपदाघाताद् मेने मूर्ध्नामवन्ध्यताम् ॥१९१॥

सकटाक्षं प्रियालापं व्यक्तपीनकुचद्वयम् ।
रामो नृत्यप्रवृत्ताभिर्न ताभिरपि चुक्षुभे ॥१९२॥

प्राणेश ! पश्य नो दृष्ट्या सङ्गेनास्मान् कृतार्थय ।
इत्येतासां प्रियालापा रामे निष्फलतामगुः ॥१९३॥

रामस्तु मनसा दध्यावात्मन् ! नारीषु मा मुहः ।
एता हि कुशलच्छेदे कृपाण्य इव निष्कृपाः ॥१९४॥

आसां यो मधुरालापो विषात् सोऽपि विशिष्यते ।
यदङ्गीकारतोऽमुष्य पतनं नरके ध्रुवम् ॥१९५॥

चर्मावनद्धबीभत्समन्दिरेऽशौचसीमनि ।
योषिद्देहेऽप्यभिष्वङ्गो महामौढ्यनिबन्धनम् ॥१९६॥

इत्यनुध्यायतस्तस्य निष्प्रकम्पस्य मेरुवत् ।
क्षपकश्रेणिरूढस्य निःसङ्गस्य महात्मनः ॥१९७॥

शुक्लध्यानाग्निनिर्दग्धाशेषघात्यस्वकर्मणः ।
द्वादश्यां माघशुद्धायामभूत् केवलमुज्ज्वलम् ॥१९८॥ **युग्मम्**

तत्कालं वासवास्तस्य चक्रुः केवलसंविदः ।
महिमानमानं द्रागानन्दभरभासुराः ॥१९९॥

**सीतेन्द्रो**ऽप्यथ सङ्क्षिप्य मायां स्वं रूपमास्थितः ।
निजागः क्षमयामास प्रणम्य मुनिपुङ्गवम् ॥२००॥

*'अहो ! मोहो ममाहं यत् त्वां क्षोभयितुमुत्सुकः ।*
*वातोल्यत्यन्तवेगाऽपि स्वःशैलं किमु चालयेत् ? ॥२०१॥*

प्रियारूपेण नाथ ! त्वमुपसृष्टस्तथा मया ।
यथा लोहमयोऽप्यन्यो मदनत्वमवाप्नुयात्'' ॥२०२॥

इत्यभिष्टुत्य **सीतेन्द्रो**ऽपरे स्वर्गवासिनः ।
मौनं व्याख्यानमाकर्ण्य तुष्टाः प्रापुर्निजं पदम् ॥२०३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

राजर्षिरपि भूपीठं पुनानः स्वविहारतः ।
नगर्याः **स्यन्दनस्थल्या** निकटे समवासरत् ॥२०४॥

जगामेतश्च **सीतेन्द्रो**ऽवधेर्विज्ञाय **लक्ष्मणम्** ।
स्थितं **पङ्कप्रभा**मह्यां तमाक्रष्टुं द्युशर्मणे ॥२०५॥

प्रशमय्य कृतक्रोधौ मिथो **रावण-लक्ष्मणौ** ।
कर्मणो दुर्विपाकाभिव्यञ्जकैर्वचनैरथ ॥२०६॥

तीव्रपीडामयात् श्वभ्रादाचकर्ष कृतोद्यमः ।
क्रियासमभिहारेण तौ गलित्वैव जग्मतुः ॥२०७॥

सहमानौ तदधिकं तदा दुःखमथोचतुः ।
मा कुरुष्व वृथा यत्नं देवः कर्मणि न क्षमः ॥२०८॥

तत् किञ्चित् कथयावाभ्यां न यथा पुनरागमः ।
नरके स्यादिति प्रोक्ते प्रादात् सम्यक्त्वमेतयोः ॥२०९॥

उवाच न कृतो धर्मो युवाभ्यां विषयादरात् ।
इदं तत्फलमाढौकि किमथो परिदेवनैः ? ॥२१०॥

बान्धवाभ्यामिव स्थेयमतः परममत्सरम् ।
दार्ढ्यं च दर्शने कार्यमित्याख्याय ततोऽचलत् ॥२११॥

आययौ चोपराजर्षि शुश्रावेति च देशनाम् ।
***रागी भ्रमति संसारे वीतरागो विमुच्यते ॥२१२॥***

***आलम्बनं विना वार्द्धिर्यथा न खलु तीर्यते ।***
***निःशीलैर्विषयासक्तैस्तथा संसारसागरः ॥२१३॥***

***तपोनियमबन्धेन सुदृष्टिज्ञानदारुणा ।***
***भवाब्धेस्तरणं नृणां धर्मपोतेन निश्चितम् ॥२१४॥***

अत्यक्तविषयाभोगौ पश्य **रावण-लक्ष्मणौ** ।
श्वभ्रेष्वदभ्रपीडास्ता विषहातेतमामहो ! ॥२१५॥

**सीतेन्द्रः** प्रोचिवान् नत्वा सर्वं दृष्टमदो मया ।
प्रसद्योदर्कमाख्याहि मुने ! मम तयोस्तथा ॥२१६॥

मुनिराख्यद् विदेहेषु पुर्यस्ति **विजयावती** ।
**सुनन्द**स्तत्र भूपोऽस्य **रोहिणी** दयिताऽद्भुता ॥२१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तस्याः कुक्षौ सुतत्वेन च्युतावेतौ भविष्यतः ।
**अर्हद्दासर्षिदासाख्यौ** क्रमाद् **रावण-लक्ष्मणौ** ॥२१८॥

**सुन्दराख्यगुरोः** पार्श्वे ज्ञातपूर्वभवस्थिती ।
धास्यतः शीलसौन्दर्यं सर्वसद्धर्मजीवनम् ॥२१९॥

श्रमणोपासकीभूय यास्यतस्तौ च देवताम् ।
पुनस्तत्रैव मनुजौ मुनिदानपरायणौ ॥२२०॥

**हरिवर्षे** नरीभूय दैवीभूय पुनः परे ।
तत्रैव नृपतेः पुत्रौ भवितारौ सुनन्दिनः ॥२२१॥

करिष्यतस्तपस्तीव्रं **जयकान्त-जयप्रभौ** ।
देवत्व**मानते** कल्पे लप्स्येते विभवाद्भुतम् ॥२२२॥

अथ त्वमपि **सीतेन्द्र** ! च्युतो वर्षेऽत्र **भारते** ।
चक्रित्वं प्राप्स्यसे तौ च त्वत्सुतत्वमुपेष्यतः ॥२२३॥

तत्र **चेन्द्ररथः** पूर्वः सुतो **भोगरथो**ऽपरः ।
तत्राद्यो व्रतसंयोगाद् देवो द्विस्त्रिर्भविष्यति ॥२२४॥

क्रमात् तीर्थङ्करो भावी त्वं चक्र्यपि तपोबलात् ।
**वैजयन्ते**ऽहमिन्द्रत्वं लब्ध्वा निःसीमशर्मणि ॥२२५॥

ततो गणधरीभूयार्हतस्तस्यैव सेत्स्यसि ।
भ्रान्त्वा **भोगरथो**ऽप्युच्चैः कांश्चिच्छुभभवान्तरान् ॥२२६॥

**पुष्करार्द्धविदेहेषु** भोक्ता षट्खण्डमेदिनीम् ।
भवे तत्रैव चार्हन्त्यं प्राप्य यास्यति निर्वृतिम् ॥२२७ ॥

भोगाभिष्वङ्गतो लब्धास्ताभ्यां श्वभ्रैकवेदनाः ।
उत्तरोत्तरसौख्यानि प्राप्तौ सद्धर्मतः पुनः ॥२२८॥

***तद् भोः ! सर्वादरं सेव्यो धर्म एव जिनोदितः ।***
***यः सुख-क्लेशवृक्षेषु पयोदद्विरदायते ॥२२९॥***

श्रुत्वेति निर्जरास्तुष्टाः **सीतेन्द्रो**ऽप्यतितुष्टवान् ।
कृत्वा **नन्दीश्वरे** यात्रां स्वस्थानेऽगाद् यथासुखम् ॥२३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सहस्राणि समाः सप्तदशेति प्रमितायुषः ।
पञ्चविंशतिवर्षाणि **रामस्य** ज्ञानिताऽभवत् ॥२३१॥

निःशेषदोषमुक्तात्मा शारदार्कसमद्युतिः ।
शैलेषीमाप्य **राम**र्षिर्ददाहादृष्टसञ्चयम् ॥२३२॥

अष्टमृल्लेपनिर्मुक्तलघुनिश्छिद्रतुम्बकम् ।
जलाग्र इव लोकाग्रे गत्वाऽभून्निश्चलस्थितिः ॥२३३॥

श्रुत्वा यौवतभोगलम्पटतया **सौमित्रि-लङ्केश**यो-
र्घोरां श्वभ्रगतिं तयोरथ पुनस्तत्त्यागतः सद्गतिम् ।
ध्याने निश्चलतां विबुध्य दयितारूपोपसर्गैरपि
श्री**राम**स्य शिवार्थिनो भवत भोः ! स्त्रीरागरङ्गोज्झिताः ॥२३४॥

इत्यष्टमस्त्रीपरीषहे श्री**रामचन्द्र**कथा ॥१७॥

स्त्रीपरीषहश्च प्रायो नित्यमेकतत्र वसतः स्यादतो नैकस्थानस्थेन भाव्यम्, किन्त्वनियतचर्यायां यतितत्वमिति तत्परीषहमाह—

**एग एव चरे लाढे अभिभूय परीसहे ।**
**गामे वा नगरे वावि निगमे वा रायहाणिए ॥१८॥**

**व्याख्या—एक एव** रागादिरहित **एको** वाऽसहायः प्रतिमाप्रतिपन्नादिः **चरेद**-प्रतिबद्धविहारेण विहरेत् । लाढयति यापयत्यात्मानमेषणीयाहारेणेति **लाढो** देश्यत्वात् प्रशस्यः । **अभिभूय** निर्जित्य **परीषहान्** [**ग्रामे वा नगरे वा अपि**: पूरणे] **निगमे** वा वणिग्निवासे **राजधान्यां** वा मडम्बाद्युपलक्षणमेतत् ॥१८॥

किञ्च—

**असमाणो चरे भिक्खू नेव कुज्जा परिग्गहं ।**
**असंसत्तो गिहत्थेहिं अणिकेओ परिव्वए ॥१९॥**

**व्याख्या—असमानो** गृहिभिराश्रयामूर्च्छितत्वेनान्यतीर्थिकैश्चानियतविहारादिना-ऽसदृश**श्चरेद् भिक्षुर्य**ति**र्नैव कुर्यात् परिग्रहं** ग्रामादौ ममत्वधीरूपम् । यदाह—"[१]**गामे कुले वा नगरे व देसे । ममत्तभावं न कहिंचि कुज्ज**" त्ति । **असंसत्तो गृहस्थै**रसम्बद्धो**ऽनिकेत**-**स्त्यक्त**गृहः **परिव्रजेद्** विहरेत् । एवमयं परीषहोऽध्यासितव्य इति नवमश्चर्यापरीषहः ॥१९॥

---

१. ग्रामे कुले वा नगरे वा देशे । ममत्वभावं न कुत्रचित् कुर्याद् इति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नैषेधिकीपरीषहोऽपि चर्यावच्छरीराप्रतिबद्धैरेव विषह्यत इति सदृशतया चर्यासमं नैषेधिकीपरीषहमाह—

**सुसाणे सुन्नगारे वा रुक्खमूले व एगओ ।**
**अकुक्कुओ निसीइज्जा न य वित्तासए परं ॥२०॥**

**व्याख्या—स्मशाना**दावेककः प्रागुक्तार्थः । **अकुत्कुचो**ऽशिष्टचेष्टारहितः । कुन्थ्वादिविराधनाभयात् कारणं विना कराद्यचालयन् वा **निषीदेत्** तिष्ठेत् । **न च वित्रासयेत् परमन्यं**, को भावः ?

"[१]**पडिमं पडिवज्जिया मसाणे नो भाए भयभेरवाइं दिस्स ।**
**विविहगुणतवोरए निच्चं न सरीरं वाभिकंखए स भिक्खू"** ॥

इत्याद्यागमं स्मरन् भयानकेऽपि प्रदेशे न स्वयं बिभीयाद् न चान्यं भापयेन्मुख-स्वर-विकारादिभिः ॥२०॥

किञ्च—

**तत्थ से अच्छमाणस्स उवसग्गाभिधारए ।**
**संकाभीओ न गच्छिज्जा उट्ठित्ता अन्नमासणं ॥२१॥**

**व्याख्या—तत्र** स्मशानादौ 'से' **तस्य तिष्ठत उपसर्गा** दिव्याद्याः सोपस्कारत्वात् सूत्रस्य सम्भवेयुस्तान् मुनि**रभिधारयेत्** किमेते निश्चलचेतसो मे करिष्यन्तीति चिन्तयेत् । **शङ्काभीत**स्तत्कृतापकारशङ्कातस्त्रस्तो **न गच्छेदुत्थाय** स्वस्थानादन्यदासनमेवं नैषेधिकी-परीषहः । इति दशमो नैषेधिकीपरीषहः ॥२१॥

नैषेधिकीतः स्वाध्यायं विधाय शय्यां प्रत्यागच्छतीति तत्परीषहमाह—

**उच्चावयाहिं सेज्जाहिं तवस्सी भिक्खू थामवं ।**
**नाइवेलं विहन्निज्जा पावदिट्ठी विहन्नइ ॥२२॥**

**व्याख्या**—उच्चाः शीतादिवारकत्वादिगुणैरवचास्तद्विपरीतत्वेन नीचास्ततो द्वन्द्वे **उच्चावचाभिः शय्याभिर्वसतिभिस्तपस्वी भिक्षुः स्थामवान्** शीतादिसहनं प्रति सामर्थ्यवान् **नातिवेलं** स्वाध्यायादिवेलाऽतिक्रमेण **विहन्यात्**, हनेर्गत्यर्थत्वात् न शीताद्यभिभूतः स्थानान्तरं गच्छेत् । यतः **पापदृष्टिर्दुर्बुद्धिर्विहन्त्यपि** ॥२२॥

किं तर्हि कुर्यादित्याह—

---

१. प्रतिमां प्रतिपद्य श्मशाने न बिभेति भयभैरवाणि दृष्ट्वा ।
विविधगुणतपोरतो नित्यं न शरीरं वाऽभिकाङ्क्षते स भिक्षुः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**पइरिक्कं उवस्सयं लद्धुं कल्लाणं अदुव पावगं ।**
**किमेगरायं करिस्सइ एवं तत्थहियासए ॥२३॥**

**व्याख्या**—'पइरिक्कं ति' **स्त्र्यादिरहितत्वेनाव्याबाधमुपाश्रयं लब्ध्वा 'कल्लाणं'** शोभनमथवा **पापकम**शोभनं **किं** न किञ्चित् सुखं दुःखं चेति गम्य**मेकरात्रं करिष्यति** । कल्याणः पापको वोपाश्रय इति कोऽर्थः ? 'केचित् सुकृतिनो मणि-काञ्चनमयेष्वन्ये तृणमय-धूल्याद्याकीर्णेषु गृहेषु नित्यं वसन्ति, मम त्वद्यैवेदृशी वसतिः श्वोऽन्या भविष्यति, किमत्र हर्ष-विषादाभ्याम् ?' । एवं तत्र शुभेऽशुभे वोपाश्रयेऽध्यासीत, सुखं दुःखं वाऽधिसहेत् । जिनकल्पिकापेक्षमेकरात्रमितरापेक्षया कतिपया रात्रयः । इत्येकादशः परीषहः । एवं चर्यादिपरीषहास्त्रयः सोढव्याः **पुरन्दर–कीर्तिधर–सुकोशल**मुनिवत् । तथाहि—

सङ्केत इव **साकेतं** पुरमस्त्यखिलश्रियम् ।
यत्रात एव दृश्यन्तेऽनन्यतुल्या धनेश्वराः ॥१॥

तत्रास्ति **विजयो** राजा स्नेहोपचितमित्रवत् ।
प्रारब्धसर्वकार्येषु जयो यमभजत्तमाम् ॥२॥

आसीन्**महिमचूला**ऽस्य महिम्नां धाम वल्लभा ।
यस्या हंसः सदा धर्मसरस्यां रमतेतराम् ॥३॥

असूत सा क्रमात् पुत्रौ **वज्रबाहु-पुरन्दरौ** ।
अश्विनाविव काश्यप्यां रूप-सौन्दर्यशालिनौ ॥४॥

इतो **नागपुरे** क्ष्मापः सबलो **हरिवाहनः** ।
प्रियाऽस्य **रत्नचूला**ऽऽसीद् दुहिताऽस्या **मनोहरा** ॥५॥

पित्रा सा यौवने दत्तौजस्विने **वज्रबाहवे** ।
तामुपायंस्त स प्रौढविभवाभोगभासुरम् ॥६॥

अथ प्रतिनिवृत्तोऽसौ तामादाय स्ववेश्मने ।
स्वसुः प्रेम्णा सहागच्छत् तद्भ्रा**तोदयसुन्दरः** ॥७॥

तदा चास्ति वसन्तर्तुर्वने यत्र मधुव्रताः ।
काञ्चनारकलीत्रस्ता वासन्तीं भेजिरे मुदा ॥८॥

मुनिरेको गिरेः शीर्षे भ्रमरारावबन्धुरे ।
तप्यमानस्तपस्तीव्रमुपमार्गमवर्तत ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यथा यथा तदभ्यासं **वज्रबाहुः** प्रसर्पति ।
अस्य चित्तान्तरे प्रीतिरुल्ललास तथा तथा ॥१०॥

रम्ये गिरिवने तत्र वसन्तकमलामसौ ।
पश्यन् प्रियायुतः प्रीतो जगामोपतपोधनम् ॥११॥

"अचिन्तयदहो ! स्वर्णशैलवन्निश्चलः स्थितः ।
तप्यतेऽसौ तपः क्रूरकर्मक्लेशतरुद्विपम् ॥१२॥

निःसङ्गतापरीरम्भसुभगम्भावुकाशयः ।
लाभालाभसमस्वान्तो गृह्णात्येष जनुःफलम् ॥१३॥

प्रतिबन्धविमुक्तात्मा वायुवन्मुनिचर्यया ।
ध्यायन् विविक्ते तत्त्वानि लभ्यो भाग्यैरसौ मुनिः ॥१४॥

अहो ! कष्टमहं पापः पापादृष्टैर्दुरात्मभिः ।
कठिनैर्वेष्टितोऽस्म्यत्र भुजङ्गैरिव चन्दनः" ॥१५॥

मुनिं स्तुवन् स्वकं निन्दन्निति हर्ष-विषादवान् ।
श्यालकेन स्मयादूचे दत्तदृष्टिर्मुनौ स्थिरम् ॥१६॥

यदेवमीक्षसे साधुं तत् किं दीक्षां समीहसे ? ।
मित्रैवमेव सोऽप्याह स्मित्वाऽथो श्यालकोऽभ्यधात् ॥१७॥

यद्येवं तत् त्वया साकं गृहीष्येऽहमपि व्रतम् ।
इदानीमेव हुं दीक्षा त्वयाऽऽत्तैव किमुच्यते ? ॥१८॥

वज्रबाहुरथो गात्रपारिणेत्रविभूषणः ।
अवरुह्य गजात् तूर्णं प्रणनाम मुनीश्वरम् ॥१९॥

*"उपादिशद् मुनिः स्पष्टं कारुण्यादिगुणाम्बुधिः ।*
*अहो ! कर्मारिसम्बद्धाः सहन्ते क्लेशमानिनः ॥२०॥*

*जन्तुर्दुरनुचीर्णानां कर्मणां प्रशमे सति ।*
*प्राप्नोति मानुषं जन्म कल्पवृक्षाङ्कुरप्रभम् ॥२१॥*

*ये दुःखहेतवस्तत्त्वाद् वल्लभाः पुत्र-बन्धवः ।*
*तत्प्रेमनटितो धर्मे सुखदे न प्रवर्तते ॥२२॥*

*साकार-विगताकारभेदो धर्मो द्विधाऽर्हताम् ।*
*तत्राद्यो गृहिणां धर्मोऽणुव्रतादित्रयीमयः ॥२३॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*धर्ममेनं समाराध्यावश्यं स्यात् काल्पिकः सुरः ।*
*नरत्वाद्याप्य सङ्ख्यातभवैरेव स सिध्यति ॥२४॥*

*निराकारं यतेर्धर्मं यद्यादत्ते कथञ्चन ।*
*कर्ममल्लं तदा हत्वा प्राप्नोति नियमाच्छिवम्" ॥२५॥*

मुनेरदो वचः श्रुत्वा जातश्रद्धो नवो वरः ।
व्रते दृढमतीभूयाह्लादाद् व्यज्ञपयद् मुनिम् ॥२६॥

तपःपरशुना कर्म लुनामि तृणतुम्बवत् ।
देहि दीक्षामलं नाथ ! भोगैः पर्यन्तदारुणैः ॥२७॥

तच्छ्रुत्वा विगतानन्दसर्वस्वाऽभून्मनोहरा ।
**उदयो**ऽवक् परीहासकृतं मा सत्यतां नयेः ॥२८॥

**वज्रबाहु**रथोवाच हास्येनापि सुहृत् ! कृतम् ।
पथ्यं सदौषधं पीतं भवत्येव भिदे रुजाम् ॥२९॥

मा विलम्बस्व धर्मे तत् भणित्वेति व्रतादृतम् ।
**वज्रबाहुं** महोत्साहं व्रतमग्राहयद् मुनिः ॥३०॥

विस्मिता दिवि गीर्वाणाः पुष्पवार्दलमादधुः ।
षड्विंश**दुदयाद्या**स्ते कुमारा व्रतिनोऽभवन् ॥३१॥

भर्तुर्वियोगदुःखेन सोदरे प्रेमतस्तथा ।
**मनोहरा**ऽप्यभूत् साध्वी तदा तात्कालिकी वधूः ॥३२॥

श्रुत्वाऽङ्गजन्मनो दीक्षां विषण्णो **विजयो** नृपः ।
ही ! वधू-वरवीक्षेच्छा कूपच्छायेव मेऽभवत् ॥३३॥

यौवनेऽप्यङ्गजन्मा मे विरक्तोऽभूत् तपोधनः ।
अहो ! निःसत्त्वता काचिदनिर्वाच्या पुनर्मम ॥३४॥

*जरया जर्जरो दर्पमुक्तो धवलकुन्तलः ।*
*गतद्विजोऽपि वैराग्यमधुनाऽपि न यद् भजे ॥३५॥*

चिन्तयित्वेति तत्कालं राज्ये न्यस्य **पुरन्दरम्** ।
पार्श्वे **निर्वाणमोह**स्य सोऽपि संयममाददे ॥३६॥

**पुरन्दर**स्य साम्राज्यं प्रतिपालयतोऽजनि ।
पृथिव्याः कुक्षिसम्भूतः सुतः **कीर्त्तिधरा**भिधः ॥३७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**पुरन्दरो**ऽपि त्यक्तर्द्धिर्दत्त्वा राज्यं स्वजन्मने ।
**क्षेमङ्कर**मुनेः पार्श्वे निश्चक्राम महायशाः ॥३८॥

सर्वेऽप्यमी अप्रतिबद्धचर्याः स्मशानवन्यागिरिकन्दरादौ ।
विहृत्य दग्धाखिलकर्मभाराः प्रापुः परानन्दपदं क्रमेण ॥३९॥

अथ **कीर्त्तिधरो** वार्द्धिमेखलां पालयन् महीम् ।
रविबिम्बं तमोग्रस्तमन्यदैक्षत संसदि ॥४०॥

ध्यातुं प्रववृते चासौ तेजस्वी न हि यत्समः ।
न भानुः सोऽप्यपाकर्तुं क्षमस्तेजः स्ववैरिणः ॥४१॥

एवं कर्मभराक्रान्तः प्राप्तं मरणमात्मनः ।
न च वारयितुं शक्तश्चक्री देवाधिपोऽपि वा ॥४२॥

अनागते वरं तस्मिंस्तद् व्रते व्यवसीयते ।
इत्यभिप्रेत्य मन्त्रिभ्यः स्वं सङ्कल्पमवेदयत् ॥४३॥

प्रोचुः सदैन्यमेतेऽपि युक्तं नादोऽधुना प्रभो ! ।
त्वया विनेयं नाथेन विनश्यत्येव काश्यपी ॥४४॥

तथा च नियतं नाशो धर्मस्यापि भवेद् जने ।
धर्मनाशाद् न किं नष्टं शाधि राज्यं ततः प्रभो ! ॥४५॥

अवंशपतितं राज्यं मत्सराय महीभुजाम् ।
तवाङ्गजस्तु न स्वामिन् ! निपुणोऽसि विचार्यताम् ॥४६॥

विज्ञोऽथ नृपतिः सन्धां चक्रेऽध्यक्षं सभासदाम् ।
सुतजन्म समाकर्ण्यादाताऽहं नियमाद् व्रतम् ॥४७॥

अथ राज्यभुजस्तस्य क्रमादजनि नन्दनः ।
**सहदेव्या** महादेव्याः कुक्षिरत्नं **सुकोशलः** ॥४८॥

प्रगोप्य मन्त्रिभिः किञ्चित्कालं राज्ञे न वेदितः ।
न मन्त्रिगोपितं कार्यं गोचरे द्युसदामपि ॥४९॥

कुतोऽपि सुहृदो ज्ञात्वा जातं जातं नरेश्वरः ।
दत्त्वाऽङ्गभूषणान्यस्मै शतग्रामं च पत्तनम् ॥५०॥

पक्षजातं निजं पुत्रं नृपो न्यस्य निजे पदे ।
**धर्मघोष**गुरोः सीम्नि धन्यो भेजे तपस्विताम् ॥५१॥ **युग्मम्**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तपस्तपे तीव्रतमं तु तप्यते च्छन्नाश्रये तिष्ठति यस्तपात्यये ।
हेमन्तकालेऽपि निरम्बरो वने ध्यानं स संसाधयितुं प्रवृत्तवान् ॥५२॥

**सुकोशलो**ऽपि कौशल्यपदं कल्पद्रुकन्दवत् ।
वर्द्धमानः क्रमात् प्राज्यराज्यधूर्धवलोऽभवत् ॥५३॥

**सहदेवी** प्रसूस्तस्य व्रती मैष भवत्विति ।
नित्यं धर्मश्रुतेर्योगाद् दूरतस्तमवर्तयत् ॥५४॥

अन्यदा सा गवाक्षस्थाऽऽयान्तं **कीर्तिधरं** मुनिम् ।
मध्येपुरं समालोक्य मलक्लिन्नमधोमुखम् ॥५५॥

रुरोष धिगमुं बाल्ये यो मुक्त्वा निजमङ्गजम् ।
व्रतीभूय पुनः पुत्रमभ्येत्यादित्सुरत्र यत् ॥५६॥

कृतान्तवदनाकारानाकार्य निजपूरुषान् ।
आदिदेशार्द्धचन्द्रं भोः ! दत्त्वा निष्कास्यतामयम् ॥५७॥

अन्येऽपि लिङ्गिनो यत्र धर्माख्यानकृतादराः ।
निर्द्धाट्यन्तामिमे सर्वे मत्पुत्रानर्थदायिनः ॥५८॥

तत् प्रतिश्रुत्य तैर्गत्वा स चान्येऽपि व्रतस्थिताः ।
उपाद्रूयन्त ते सर्वे निर्यातेति वदावदैः ॥५९॥

धात्री **सुकोशल**स्याथ तं वृत्तं ज्ञातपूर्विणी ।
गुणव्यूहं स्मरन्त्यस्य विषादं विवशाऽकरोत् ॥६०॥

रुरोद मुक्तकण्ठं च तां तदाऽऽह सुकोशलः ।
किं क्वचित् परिभूताऽसि हेतुना केन रोदिषि ? ॥६१॥

राज्ये मेऽम्ब ! न वै कश्चित् केनापि परिपीड्यते ।
त्वत्पराभवकर्तारमहं नेता यमास्पदम् ॥६२॥

**वसन्ततिलका**भिख्या साऽथ प्रोवाच कारणम् ।
विगणय्य त्वदम्बाया भयं शृणु वदाम्यहम् ॥६३॥

यो बाल्ये न्यस्य राज्ये त्वां पिता ते व्रतमाददे ।
सोऽद्यात्र प्रविशन्नुच्चैस्त्वज्जनन्या स्वपूरुषैः ॥६४॥

चौरवत् प्रतिहत्याशु हठाद् निष्कासितः पुरात् ।
तेन रोदिमि धात्रीश ! दुर्बलानां ह्यदो बलम् ॥६५॥ **युग्मम्**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्वद्वंशे पुत्र ! राजानः समजायन्त ये पुरा ।
ते त्यक्तवसुधाभोगाः समुपाददिरे व्रतम् ॥६६॥

मा ग्रहीत् तन्मुनेर्दीक्षां धर्मं श्रुत्वा विरागवान् ।
तनुजन्मेति ते माता चकार चरितं त्वदः ॥६७॥

**सुकोशलो**ऽथ तच्छ्रुत्वा पितृवन्दनलालसः ।
गत्वा वने मुनिं नत्वा बभाणादः कृताञ्जलिः ॥६८॥

दीप्ते निजगृहे पुत्रभाण्डानि जनकः स्वयम् ।
निर्गच्छति समादाय हितं तेषां विचिन्तयन् ॥६९॥

तात ! मोहाग्निना दीप्ते मां मुक्त्वा भवमन्दिरे ।
यन्निष्क्रान्तोऽसि तन्नूनं युक्तं प्रियपितुर्न ते ॥७०॥

तस्मादथापि तस्माद् मे तात ! निष्क्रामतः स्वयम् ।
निर्विलम्बं कृपां कृत्वा देहि हस्तावलम्बनम् ॥७१॥

मुनिः **कीर्त्तिधरो**ऽवादीदिक्ष्वाकूणां महीभुजाम् ।
अध्वैवायं व्रतादानं यद् बलिष्ठे वयस्यपि ॥७२॥

तयोर्वार्त्तयतोरेवं महिषी **चित्रमालिका** ।
गुरुभारा समभ्येत्य तं पादपतिताऽवदत् ॥७३॥

निराधारां महीं मां च परित्यज्यैकहेलया ।
आदित्ससे तपो यत् त्वं नैक्ष्वाकूणां हि सौचिती ॥७४॥

आख्यत् **सुकोशलो**ऽथैवं भद्रे ! ते भविता सुतः ।
मयाऽभिषिक्तोऽसौ राज्ये ततः किं चिन्तया तव ? ॥७५॥

प्रतिपालनमेतर्हि ममापि सुतजन्मनः ।
कातर्यद्योतकं दीक्षाव्यवसायवतः प्रिये ! ॥७६॥

महामात्ये समारोप्य राज्यभारं **सुकोशलः** ।
संमान्य सकलं लोकं तातपार्श्वेऽभवद् व्रती ॥७७॥

आचक्रन्दाखिलो लोको मूर्च्छां प्रापाथ तत्प्रसूः ।
कथञ्चिल्लब्धचैतन्या विललापेति निर्भरम् ॥७८॥

किमर्थं स धृतः कुक्षौ किमर्थं जनितोऽथवा ? ।
किमर्थं वा पुषिं नीतो ही ! दुरात्मा मया सुतः ? ॥७९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नायं सुतः परं शत्रुः शैलाश्मकठिनाशयः ।
न यः सोढव्यथाया मेऽनुमतिं प्रत्यपालयत् ॥८०॥

सुविनीतेन पुत्रेण यथाऽहं विधिना कृता ।
निष्पुत्रां स तथाऽकार्षीत् किं न मामवशात्मजाम् ? ॥८१॥

इत्यङ्गजवियोगार्ता किञ्चित्कोपवशंवदा ।
निराधाराऽभवद् मृत्वा सा व्याघ्री गिरिकन्दरे ॥८२॥

अथ तावपि निर्ग्रन्थौ चर्ययाऽप्रतिबद्धया ।
स्मशान-नगर-ग्राम-काननेषु विजह्रतुः ॥८३॥

उत्कटैः कण्टकैः कीर्णां तीक्ष्णाश्मशकलाकुलाम् ।
शय्यां प्राप्य विशेषेण तस्थतुस्तत्र निर्ममौ ॥८४॥

**सुकोशलो**ऽधिकं तेपेऽनयोस्तीव्रतमं तपः ।
रत्नावल्यादि-षष्ठादि-षण्मासीक्षपणादि च ॥८५॥

तपःप्रभञ्जनेनासौ कर्माभ्रपटलं क्षणात् ।
मुनिर्विरलतां निन्ये स्वार्थसाधनतत्परः ॥८६॥

इतः प्रववृते प्रावृट् यत्राम्भोदैर्दिगङ्गनाः ।
पर्यधाप्यन्त नीलाभ्रसिचयानिव सा द्रुतम् ॥८७॥

रविणा सप्रकाशेन किं ? यो निजदिगङ्गनाः ।
प्रावारकप्रदानेन नोपगृह्णाति तापनः ॥८८॥

इतीव यत्र पाथोदैरभ्रैराच्छाद्य भास्करम् ।
तथाऽवर्षि यथा मह्याः शान्तस्तापस्तथा दिशाम् ॥८९॥ **युग्मम्**

मेघाम्बु-पूर्वदिग्वात-क्षेत्रबीजादिहेतुभिः ।
नीलाश्मकुट्टितेवासीद् वसुमत्यङ्कुरैर्नवैः ॥९०॥

तदा चैतौ मुनिप्रष्ठौ ज्ञात्वा जन्तुविराधनाम् ।
व्याघ्रीपदाचलोपान्ते कायोत्सर्गेण तस्थतुः ॥९१॥

अतिवाहयतश्चातुर्मासं योगमुपोषितौ ।
प्रदुष्टश्वापदाकीर्णे वने तौ प्रासुकाश्मनि ॥९२॥

एकपादकृतोत्सर्गो वीरासनमुपागतः ।
चतुर्मास्याः क्रमात् पारं प्राप धन्यः **सुकोशलः** ॥९३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ तस्यां व्यतीतायां सम्पूरणनियमाविमौ ।
प्रतस्थाते प्रतिपुरं समितौ पारणाकृते ॥९४॥

विकीर्णवदना व्याघ्री क्षुधा गिरितटीस्थिता ।
तौ ददर्श लिलेखोर्वी नखैर्नादं चकार च ॥९५॥

ससार दैवयोगेन तावत् **कीर्त्तिधरो**ऽग्रतः ।
वधोद्यतां तु तां व्याघ्रीं वीक्षामासे **सुकोशलः** ॥९६॥

व्युत्सृष्टतनुरुद्युक्तो ज्ञानी स्वात्मार्थसाधने ।
शुक्लमध्यास्त स ध्यानं सा व्याघ्री तावदापतत् ॥९७॥

तीक्ष्णदाढा करालास्या त्वरोत्प्लुत्य नभःस्थलात् ।
वज्राग्निरिव दुष्प्रेक्ष्या भूम्यां मुनिमपातयत् ॥९८॥

मांसानि तस्य साऽश्नन्ती मोटयन्त्यस्थिपञ्जरम् ।
त्रोटयन्ती नसाजालमुपदुद्राव तं भृशम् ॥९९॥

अहो ! संसारवैरस्यं यज्जनन्यपि खादति ।
मांसमिष्टस्य पुत्रस्य निःसङ्गस्य निरागसः ॥१००॥

खराश्मशकलाकीर्णभूतले विनिपातितः ।
सोऽप्रकम्पतया सेहे सम्यक् शय्यापरीषहम् ॥१०१॥

तस्यापि तदवस्थस्य सद्ध्यानध्वस्तकर्मणः ।
जीवितान्ते समुत्पेदे केवलं सिद्धिरप्यभूत् ॥१०२॥

तस्या अपि तमश्नन्त्या जातिस्मृतिरजायत ।
जात्यकाञ्चनसम्बद्धपुत्रदन्तावलोकनात् ॥१०३॥

पश्चात्तापं परं कृत्वाऽनशनं दिवसत्रयीम् ।
धृत्वा साऽजनि सौधर्मे कल्पे देवाप्सरस्तया ॥१०४॥

देवास्तत्र शिवप्राप्तिमहिमानं प्रचक्रिरे ।
इतः **कीर्त्तिधर**स्यापि तत्रैवासन्नवर्तिनः ॥१०५॥

तथोपसर्गमालोक्य शुक्लध्यानाधिरोहिणः ।
ज्ञानं समुदयं प्राप केवलं तत्त्ववेदिनः ॥१०६॥

एकेनागमनेनैव यात्राद्वयमजायत ।
केवलज्ञानमहिमाकारिणां द्युसदां तदा ॥१०७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कलत्रं **चित्रमाला**ऽपि समये सुषुवे सुतम् ।
हिरण्यगर्भनामानं नृपः सोऽप्यार्हतोऽजनि ॥१०८॥

चर्या-नैषेधिकी-शय्याऽऽख्यास्त्रयोऽपि परीषहाः ।
यथैतैर्यतिभिः सोढास्तथा सह्या महात्मभिः ॥१०९॥

इति चर्यादिपरीषहत्रये **पुरन्दर-कीर्त्तिधर-सुकोशल**मुनिकथा ॥२३॥

शय्यास्थितं मुनिं तथाविधः कश्चिदागत्याक्रोशेदिति तत्परीषहमाह—

**अक्कोसिज्ज परो भिक्खुं न तेसिं पइ संजले ।**
**सरिसो होइ बालाणं तम्हा भिक्खू न संजले ॥२४॥**

**व्याख्या—आक्रोशेत्** तिरस्कुर्यात् **परो**ऽन्यो धर्मबाह्यो **भिक्षुं** यथा 'धिग् मुण्ड ! किमिह दृष्टोऽसि'इति । **न** 'तेसिं' ति सुब्व्यत्ययान्न **तस्मै प्रति संज्वलेद्** निर्यातनार्थमाक्रोशदानेनाग्निवद् न दीप्येत । भावयेच्च—'आक्रोशेन मतिमता तत्त्वार्थालोचने मतिः कार्या, यदि सत्यं कः कोपः स्यादनृतं किं नु कोपेन ?' इति । यतः **सदृशो भवति बालानाम्**-अज्ञानां तथा संज्वलन्निति । तथाविध**श्रमण**वत् । यथा—

साधुरेकः क्वचिद् ग्रामे अतीवोग्रं स तपस्यति ।
उपास्यते देवतया भक्त्या तद्गुणरक्तया ॥१॥

तयोच्यतार्य ! मे कार्यमादेश्यमथ चान्यदा ।
भिक्षाऽर्थं भ्रमतस्तस्यामिलदेको द्विजब्रुवः ॥२॥

स तेन साधुना सार्धं दुर्वचःपूर्वकं बली ।
मुष्टामुष्टि दण्डादण्डि योद्धुमारब्धवान् भृशम् ॥३॥

भूमौ स पातयामास क्षुत्क्षामाङ्गं तकं मुनिम् ।
केचित् कृपालवो लोकास्तस्मात् पापादमोचयन् ॥४॥

निशयगाद् देवता नन्तुं तूष्णीकोऽस्थाद् मुनिस्तदा ।
सा प्राह भगवन् ! को मेऽपराधो दुर्मना यतः ॥५॥

मुनिराख्यत् त्वया दुष्टे ! स दुरात्मा न वारितः ।
ममापकारकारी च किं ब्रुवेऽहं त्वया सह ? ॥६॥

साऽवादीद् न तदा लेभे विशेषो युध्यमानयोः ।
द्वयोः कोऽप्येष चारित्री धिग्जातिर्वायमुच्चकैः ॥७॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

कोपावेशाविशिष्टत्वात् समानौ द्वावपि स्फुटम् ।
पश्यन्ती तस्य विप्रस्य न किञ्चित् कृतवत्यहम् ॥८॥

क्षान्त्या तपस्विता भद्र ! मृदुवाण्येति सा सुधीः ।
साधूचुषीति विद्वांसं तमुपाशीशमद् मुनिम् ॥९॥

उक्तमर्थं निगमयति—'तम्हे त्ति' **तस्माद् भिक्षुर्न संज्वलेदिति** ॥२४॥

उपदेशमाह—

**सोच्चा णं फरुसा भासा दारुणा गामकंटया ।**
**तुसिणीओ उवेहिज्जा न ताओ मणसी करे ॥२५॥**

**व्याख्या**—**श्रुत्वा** '**णमिति** वाक्यालङ्कारे' **परुषा** कर्कश**भाषा दारुणा** रौद्रा ग्राम इन्द्रियग्रामस्तस्य कण्टका इव दुःखोत्पादकत्वेन **ग्रामकण्टकाः** प्रतिकूलशब्दादयः । यतः—

"[1]**मुहुत्तदुक्खाओ हवंति कंटया अयोमया ते वि तओ सुउद्धरा ।**
**वाया दुरुत्ताणि दुरुद्धराणि वेराणुबंधीणि महाभयाणि**" ॥१॥

किं कुर्यादित्याह—**तूष्णीको** न कोपात् प्रतिपरुषभाषी;

"[2]**जो सहइ हु गामकंटए अक्कोस-पहार-तज्जणाउ य ॥**"
**भयभैरवसद्दसप्पहासे समसुहदुक्खसहे य जे स भिक्खू**" ॥१॥

इत्यागमं परिभावयन्**नुपेक्षेता**वधीरयेत् परुषा भाषा **न ताश्च मनसि कुर्यात्** तद्भाषिणि द्वेषाकरणेनेति द्वादशमः परीषहः ॥२५॥

आक्रोशकारी तावता अतुष्यन् वधमपि विदध्यादिति तत्परीषहमाह—

**हओ न संजले भिक्खू मणं पि न पओसए ।**
**तितिक्खं परमं नच्चा भिक्खू धम्मं विचिंतए ॥२६॥**

**व्याख्या**—**हतो** दण्डादिभिस्ताडितो **न संज्वलेद्** मनसा, किं पुनः कायतः प्रत्याहननादिना, वचनतः प्रत्याक्रोशदानादिना ? **भिक्षुः** । अत एव **मनोऽपि न प्रदूषयेत्** कोपाद् न प्रदुष्टं कुर्वीत, किन्तु **तितिक्षां** क्षमां **परमां** धर्मसाधनं प्रति प्रकर्षवर्ती **ज्ञात्वा**

---

१. मुहूर्तदुःखा भवन्ति कण्टका अयोमयास्तेऽपि ततः सूद्धराः ।
वाचा दुरुक्तानि दुरुद्धराणि वैरानुबन्धीनि महाभयानि ॥१॥

२. यः सहते खलु ग्रामकण्टकान् आक्रोश-प्रहार-तर्जनाश्च ।
भयभैरवशब्दसप्रहासान् समसुखदुःखसहश्च यः स भिक्षुः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**भिक्षुर्धर्मं** यतिधर्मरूपं **विचिन्तयेत्** । यतः क्षमामूल एव मुनिधर्मो यदुक्तम्—

**"धर्मस्य दया मूलं न चाक्षमावान् दयां समाधत्ते ।**
**तस्माद् यः क्षान्तिपरः स साधयत्युत्तमं धर्मम्" ॥१॥**

इति घातकं प्रति कोपोऽपि नोचित इति भावः ॥२६॥

अमुमेवार्थं प्रकारेणाह—

**समणं संजयं दंतं हणिज्जा कोइ कत्थइ ।**
**नत्थि जीवस्स नासो त्ति एवं पेहेज्ज संजए ॥२७॥**

**व्याख्या—श्रमणं** तपस्विनं **संयतं** पृथ्व्याद्यारम्भनिवृत्तं **दान्तमि**न्द्रियदमेन **हन्यात् कोऽप्यनार्यः कुत्रापि** ग्रामादौ । तत्र किं कुर्यात् ? **'नास्ति जीवस्य** ज्ञानस्वरूपस्य **नाशः**, किन्तु देहस्यैव' **इत्येवं प्रेक्षेत** चिन्तयेत् **संयत** इत्याक्रोशं वधं च सहते **दृढप्रहारि**वत् । यथा—

पुरे कुत्रापि धिग्जातिरासीत् कोऽपि सुदुर्द्धरः ।
पापधीर्द्यूत-चौर्यादौ स कुकर्मण्यवर्तत ॥१॥

ततो निर्वासितो राज्ञा पुरात् पल्लीं विवेश सः ।
व्याधहस्तमिव प्राप्तः श्येनस्तत्रोत्कटोऽभवत् ॥२॥

अनुरूप इति स्तेनपतिरेनमपुत्रयत् ।
तस्मिन् मृतेऽथ तत्पट्टे स्थापितोऽसौ महाबलः ॥३॥

सुदृढं प्रहरत्येष बाल-वृद्धाविवेचनम् ।
अतो **दृढप्रहारीति** चौरैस्तन्नाम निर्ममे ॥४॥

अन्येद्युस्तस्करोपेतो ग्राममागात् **कुशस्थलम्** ।
रौद्रो लुण्टयितुं नानारूपधारियमोपमः ॥५॥

पितृवेश्मेव दारिद्र्यविपदां तत्र च द्विजः ।
**देवशर्मा**ऽन्यदा सोऽथ क्षीरेयीं याचितोऽर्भकैः ॥६॥

कथञ्चिदपि याचित्वाऽमीलयत् तदुपस्करम् ।
पत्न्याऽपीपचदास्वस्थो नद्यां स्नातुं ययौ ततः ॥७॥

तावत् तदोकसि क्रूरा निपेतुस्तस्कराः समे ।
दैवं दुर्बलघाताय लोकोक्तिः कथमन्यथा ? ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तेष्वेकः पायसं वीक्ष्य तदादाय पलायितः ।
क्रन्दन्तश्चार्भकाः सर्वे गत्वा पितरमूचिरे ॥९॥

विप्रस्तत्पूत्कृतिं श्रुत्वा क्रोधव्यापारुणाननः ।
अधावत् परिघं हस्ते लात्वा चौरानधिक्षिपन् ॥१०॥

क्रोधभूतग्रहावेशात् त्रिगुणीभूतदोर्बलः ।
पशूनिव द्रुतं दस्यून् प्रावर्तत विहिंसितुम् ॥११॥

अथ वित्रस्यतश्चौरान् स्थिरयंस्तस्करेश्वरः ।
दधावेऽन्तरभूत् तावद् गौस्तद्गतिविघातिनी ॥१२॥

क्रुधा तीक्ष्णकृपाणैकघातेनैतां द्विधाऽकरोत् ।
ततोऽभ्यापततस्तस्य विप्रस्यापातयच्छिरः ॥१३॥

तदकार्यं समालोक्यान्तर्वत्नी विप्रवल्लभा ।
पुरोऽभूत् तस्य निस्त्रिंश ! किमेतदिति वादिनी ॥१४॥

तस्या ददार कूष्माण्डदारमेवोदरं क्षणात् ।
द्विधा भूतः स्फुरन् गर्भः पपात च भुवस्तले ॥१५॥

चलत्पल्लवसङ्काशं स तं वीक्ष्य वलत्कृपः ।
हा तात ! तात ! हा मातः ! रुदतश्चेति बालकान् ॥१६॥

दध्यौ **दृढप्रहारी**ति दम्पती हा ! घ्नता मया ।
शिशवोऽमी हता एव जलशोषाज्झषा इव ॥१७॥ **युग्मम्**

हता गौर्निहतो विप्रऽन्तर्वत्नी ब्राह्मणी हता ।
हताश्च शिशवोऽप्येते हाऽंहःसर्वस्ववानहम् ॥१८॥

रौद्रांहसाऽमुना मेऽथ प्राप्स्यमाणस्य दुर्गतिम् ।
को भावी पापमग्नस्य शरणं शरणार्थिनः ? ॥१९॥

चिन्तयन्निति वैराग्यवेगभाग् वलितो रयात् ।
मुनीन् व्यलोकतोद्याने पापव्याधिभिषग्वरान् ॥२०॥

तांश्च विज्ञपयामास दुर्गदुर्गतिभीरुकः ।
पापोऽहं दर्शनेऽपि स्यां परेषां पापहेतवे ॥२१॥

येषामन्यतमद् भूयाददभ्रश्वदुःखदम् ।
तेषामहं विधाताऽस्मि ब्रह्महत्यादिपाप्मनाम् ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यूयं मुनीश्वरास्त्रातुं मामपीदृशमर्हथ ।
गिरिगर्तानपेक्षं हि वारिदानां प्रवर्षणम् ॥२३॥

विधायाप्यनुतप्यन्ते ते योग्या इति साधवः ।
नैर्ग्रन्थं धर्ममादिक्षन् दुष्कर्मगहनानलम् ॥२४॥

ग्रीष्मे च्छत्रमिवैषोऽपि तापभीस्तमुपाददे ।
प्रवृत्तिं च निवृत्तिं च धीराः कर्तुमलं यतः ॥२५॥

स्मारितोऽहमदः पापं दिवसे यत्र केनचित् ।
नूनं तत्र न भोक्ष्यामीत्याददेऽसावभिग्रहम् ॥२६॥

कार्या मे सर्वथा क्षान्तिर्निश्चिकायेति चेतसा ।
पूर्वावस्कन्दिते ग्रामे तस्थौ तत्रैव शुद्धधीः ॥२७॥

स एवासौ महादम्भी धौरेयः कलुषात्मनाम् ।
इति लोको महात्मानं प्रत्यहं तमतर्जयत् ॥२८॥

धेनु-भ्रूणादिघात्येषोऽदर्शनीयमुखः सताम् ।
वचोभिरिति लोष्टैश्च श्वेवाहन्यत सोऽनिशम् ॥२९॥

एवं स्वकृतपापस्य स्मार्यमाणो महामनाः ।
**दृढप्रहारी** नाभुङ्क्त दृढसन्धः क्वचिद् दिने ॥३०॥

मर्माविधैः स दुर्वाक्यैर्लेष्टुभिः पांशुवृष्टिभिः ।
हन्यमानो जनैः शान्तस्वान्त एवं व्यभावयत् ॥३१॥

*"पुरा विनिर्ममे यादृगात्मन् ! कर्म शुभाशुभम् ।
तस्यावश्यं हि भोक्तव्यं फलं क्षेत्रोप्तबीजवत् ॥३२॥*

निरनुक्रोशमाक्रोशान् ददतोऽमी जना मयि ।
उपकारकृतः कर्मनिर्जरा कथमन्यथा ? ॥३३॥

प्रहारा लेष्टु-यष्टीनां यथैतेषां प्रमोददाः ।
तथा ममापि हि प्रीत्यै कर्मध्वंसविधायिनः ॥३४॥

मम निर्भर्त्सनं कृत्वा सन्त्वमी सुखिनो जनाः ।
हेम्नोऽग्नेरिव चैतस्मात् शुद्धिरस्तु ममाधुना ॥३५॥

*आक्रोशो वागधिक्षेपो बन्धनं हननं मृतिः ।
श्रेयोऽर्थिनाऽखिलं सह्यं श्रेयो हि बहुविघ्नकम्" ॥३६॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इति भावयतस्तस्य षण्मासा व्यतिचक्रमुः ।
निराहारस्य तत्रैव सहिष्णोस्तस्थुषः पुरे ॥३७॥

बभ्रामानुगृहं नित्यं सेहे पामरदुर्वचः ।
क्षमयाऽक्षपयत् सर्वं क्रमाद् दुष्कर्म तादृशम् ॥३८॥

केवलं प्राप्य निष्कर्मा स महानन्दभागभूत् ।
परैरप्येवमाक्रोश-वधौ सह्यौ परीषहौ ॥३९॥

इत्याक्रोश-वधपरीषहद्वये **दृढप्रहारि**कथा ॥२७॥

एवं परीषहसहनक्षमस्यापि मुनेर्ग्रासादि याचितमेव भवतीति याञ्चापरीषहमाह—

**दुक्करं खलु भो निच्चं अणगारस्स भिक्खुणो ।**
**सव्वं से जाइयं होइ नत्थि किंचि अजाइयं ॥२८॥**

**व्याख्या—दुष्करं** दुरनुष्ठानं **खलु** निश्चयेन '**भो** इत्यामन्त्रणे' **नित्यमनगारस्य भिक्षोर्य**त्सर्वमाहारोपकरणादि '**से**' **तस्य** याचितं भवति । **नास्ति किञ्चिद्** दन्तशोधनाद्य-**प्ययाचितमि**ति ॥२८॥

ततश्च—

**गोयरग्गपविट्ठस्स पाणी नो सुप्पसारए ।**
**सेओ आगारवासो त्ति इइ भिक्खू न चिंतए ॥२९॥**

**व्याख्या**—गोचरः परिचितापरिचिताविशेषेण साधोर्भिक्षाभ्रमणं तस्याग्रमेषणा-शुद्धग्राहितया प्रधानं **गोचराग्रं तत्प्रविष्टस्य पाणिर्ह**स्तो **नो** नैव **सुप्रसारकः** सुखप्रसार्यः । पिण्डाद्यर्थं कथं हि निरुपकारिणा प्रत्यहं परः प्रणयितुं शक्यः ? । **इतिश**ब्दस्यात्र योजनादतो हेतोः **श्रेयान्** प्रशस्यो**ऽगारवासो** गार्हस्थ्यं, तत्र हि न कश्चिद् याच्यः, स्वभुजार्जितं वाऽथिभ्यः संविभज्य भुज्यत **इत्येत**द् **भिक्षुर्न चिन्तयेद्,** यतो बहुसावद्यो गृहिवासो निरवद्यवृत्त्यर्थं च तत्त्यागोऽतः कथं स श्रेयान् ? । स्वार्थं कृतपाकादिगृहिभ्य एव पिण्डादि ग्राह्यमिति भावः । एवं च याञ्चापरीषहः सोढव्यः श्री**बलदेव**र्षिवत् । यथा—

**वसुदेवस्य रोहिण्यां** जातः पुत्रो **हलायुधः** ।
रूपेण ससुरं विश्वं यो जिग्ये चित्रकारिणा ॥१॥

**द्वारिका**दाह-**दाशार्ह**वियोगादिनिमित्ततः ।
भेजे परमवैराग्यं पुरोगः सत्त्वशालिनाम् ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

केवलालोकविज्ञातक्षणे**नारिष्टनेमि**ना ।
प्रेषितश्रमणस्यान्ते श्रामण्यं प्रत्यपद्यत ॥३॥

गार्हस्थ्यसुकुमालोऽपि तथा काठिन्यमागमत् ।
तृणाय मन्यते स्मायं यथा सर्वपरीषहान् ॥४॥

स्त्रीः शस्त्रीरिव साभोगान् भोगान् भोगानिवौरगान् ।
चिन्तयंस्तदभिष्वङ्गं मनसाऽपि न सोऽकरोत् ॥५॥

**द्वारिके**वाखिलं वस्तु भवाम्भोधौ चलाचलम् ।
ज्ञात्वाऽऽत्मस्थिरताकाङ्क्षी स तेपे दुस्तपं तपः ॥६॥

**तुङ्गि**नामनि शैलेऽसौ तरूत्करमनोहरे ।
अधिरुह्य तपः कुर्वंस्ततानाहिततानवम् ॥७॥

सप्तसप्तमिकां चक्रेऽप्रतिमः प्रतिमामसौ ।
यस्मामेकादिसप्तान्ताः क्रमादन्नाम्बुदातयाः ॥८॥

दिनान्येकोनपञ्चाशदस्यां षण्णवतिश्रितम् ।
भिक्षाशतं यथासूत्रं दान्त एषोऽत्यवाहयत् ॥९॥

अष्टाष्टम्यादिकामेवं चकार प्रतिमात्रयीम् ।
तत्सङ्ख्याया विधिः सर्वः सप्तसप्तमिकोपमः ॥१०॥

पक्ष–मासोपवासादिर्विकृष्टस्तपसञ्चयः ।
तेनाचर्यत यं श्रुत्वा विश्वं भवति विस्मितम् ॥११॥

तृणहारि–वनच्छेदि–वार्द्धकिभ्यः कदाचन ।
कुरुते पारणां तत्रैषणीयाहारलाभतः ॥१२॥

दिव्यरूपो महातेजाः साम्राज्योचितलक्षणः ।
तपांसि तप्यमानोऽसौ प्रथयामास सर्वतः ॥१३॥

क्षुब्धा श्रुत्वा तमुर्वीशा अधिस्वान्तमचिन्तयन् ।
अस्मद्राज्यस्पृहः कोऽपि तपश्चरति निश्चितम् ॥१४॥

तपसा हि सुचीर्णेन पदादिन्द्रोऽपि पात्यते ।
अनागतं तदाधेयः कोऽप्युपायस्तपश्छिदे ॥१५॥

यस्यैवं तापसी शक्तिः स उपेक्ष्यः कथं भवेत् ? ।
संनह्येत्यखिलास्तेऽपि शस्त्रैरुपतदागमन् ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वीक्ष्य तानथ तद्भावं ज्ञात्वाऽपि मुनिपुङ्गवः ।
न चुक्षुभे निजध्यानात् स्थानादिव सुराचलः ॥१७॥

इतश्च **बल**राजर्षिपर्युपास्तिमनस्विना ।
**सिद्धार्थ**द्युसदाऽऽगत्य सिंहरूपाणि चक्रिरे ॥१८॥

करालव्यात्तवदनाः पिङ्गाक्षा नखरोद्धराः ।
उत्पुच्छाः समदृश्यन्त परितस्ते मुनेर्नृपैः ॥१९॥

हरीन् परःशतान् वीक्ष्य तैरचिन्ति भयद्रुतैः ।
एते तु कवलीकर्तुं क्षणात् कालमपि क्षमाः ॥२०॥

दृष्ट्वा भीष्मं तदाकारं श्रुत्वा तन्नादमुद्धरम् ।
द्विरदास्तुरगाश्चक्रुर्मूत्रयन्तः पलायनम् ॥२१॥

पलायमानयानास्ते विज्ञातमुनिशक्तयः ।
विनिवृत्ता दिशं भेजुः प्रवातेरिततूलवत् ॥२२॥

अयं नरः सिंह एव सिंहसंसद्व्यवस्थितः ।
इति चक्रे तदाद्यस्य नरसिंह इति प्रथा ॥२३॥

**बलर्षे**र्योगमाहात्म्यान्मृग-व्याघ्र-द्विपादयः ।
गतवैराः परं शान्ता धर्मिणस्तमुपासते ॥२४॥

मुनेर्धर्मकथाऽऽक्षिप्ताः केऽपि भद्रकतां गताः ।
सम्यक्त्वमपरे देशविरतिं च प्रपेदिरे ॥२५॥

तिर्यक्कलेवरेणान्ये ज्ञात्वा दुःसाध्यधर्मिताम् ।
प्रपद्यानशनं सद्यस्तिर्यञ्चो द्युसदोऽभवन् ॥२६॥

मांसाशिनोऽपि तिर्यञ्चस्तदाऽऽसन् प्रासुकाशिनः ।
अहो ! स्वान्यार्थकर्तृत्वं सुचीर्णतपसो मुनेः ॥२७॥

युवैकस्तत्र सारङ्गस्तत्पौर्वभविकः सुहृत् ।
जातिं स्मृत्वाऽभवद् भक्त्या तत्सेवारसिकोऽनिशम् ॥२८॥

यत्र यत्र स भिक्षायै समितः पथि गच्छति ।
तत्र तत्राग्रतो याति पार्श्वतः पृष्ठतोऽथवा ॥२९॥

परिघायितदोर्दण्डं कपाटायितवक्षसम् ।
नीलोत्पलेक्षणं वृत्तकान्तिमद्वदनेन्दुकम् ॥३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दृष्ट्वा तं युवती काचित् कामं कामग्रहार्दिता ।
क्वाहं का किं ? विधाताऽस्मीत्येवं नैव विवेद सा ॥३१॥ **युग्मम्**

उपकूपतटं बाला बालं मुक्त्वा कटीगतम् ।
तदेकविषयन्यस्तनेत्राऽऽसीच्चित्रितेव सा ॥३२॥

जलार्थिनी घटभ्रान्त्या रज्जुं बालगले न्यधात् ।
स्मेरस्मरसुरासक्तस्तत् किं यद् न विचेष्टते ? ॥३३॥

कूपे यावद् न चिक्षेप बद्ध्वा तं विवशाऽर्भकम् ।
कुम्भपद्योऽपि पूच्चक्रुदृष्टवांस्तत् तपस्व्यपि ॥३४॥

दध्यौ च मम देहोऽपि बभूवानर्थहेतवे ।
नन्वस्यास्तदलं मेऽथ प्रवेशेन पुरादिषु ॥३५॥

यतोऽन्यस्य भवेत् कर्मबन्धः कृत्यं न तद् मुनेः ।
वन एव ततो ग्राह्या भिक्षेत्यभ्यग्रहीदयम् ॥३६॥

विनिवृत्य तदैवागात् **तुङ्गि**शैलतपोवनम् ।
आत्मानं भावयंस्तस्थौ तपस्वी तत्र साहसी ॥३७॥

अन्यदा नृपसौधार्हस्तम्भदारुकृते वने ।
आययुः शिल्पिनस्तत्र तरूंश्छेत्तुमुपाक्रमन् ॥३८॥

सरलं छिन्नदेशीयं ते मुक्त्वैकं महातरुम् ।
सामग्रीमधितच्छायं भोजनस्य प्रचक्रिरे ॥३९॥

इतो **बलर्षि**रभ्यागात् तत्र मासमुपोषितः ।
सरङ्गः स कुरङ्गोऽपि भावभक्त्या तमन्वगात् ॥४०॥

अभ्यागतं मुनिं वीक्ष्य प्रोद्भूतपुलकाङ्कुरः ।
रथकाराधिभूः प्रादुर्भूतभावो व्यचिन्तयत् ॥४१॥

मम पुण्योदयः कश्चिदकस्मात् समुपस्थितः ।
मरुषु स्वस्तरुप्रख्यो यदसाविह दृष्टवान् ॥४२॥

अहो ! रूपमहो ! तेजः कश्चिदन्यादृशः शमः ।
धन्योऽस्मि मां समभ्येति यदसावशनक्षणे ॥४३॥

प्रतीच्छन्ति न ये भैक्ष्यप्रदानेन तपोधनम् ।
आगच्छन्तं निधिं त्यक्त्वा भुञ्जते दौस्थ्यमेव ते ॥४४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदस्य भैक्ष्यदानेन पापध्वंसक्षमौजसः ।
कुर्वे विगतदौर्गत्यमात्मानमहमञ्जसा ॥४५॥
ध्यात्वेत्यञ्जलिसम्बन्धभालावनतमस्तकः ।
नत्वाऽन्न-पानमादायोपतस्थे मुनिपुङ्गवम् ॥४६॥
विज्ञाय सर्वथा शुद्धि तत् प्रत्यादत्त साधुराट् ।
तदादानेन देवायू रथिनाथोऽनुबद्धवान् ॥४७॥
कुरङ्गोऽपि मुनौ गुर्वीः स्नेहोर्मीरुद्गिरन्निव ।
पश्यन्नेकाग्रया दृष्ट्याऽचिन्तयत् साधु-शिल्पिनौ ॥४८॥
"**बलर्षि**र्ननु धन्याऽसावूर्जत्तेजा महातपाः ।
ततोऽप्यसौ रथी धन्यो भैक्ष्यं गृह्णात्यसौ यतः ॥४९॥
*कृतार्थं मानुजं जन्म कृतार्थाऽस्य विवेकिता ।*
*नूनं रथी कृतार्थोऽसौ दानवानत्र यन्मुनौ ॥५०॥*
*मन्दभाग्योऽस्म्यहं पूर्वार्जितमायादिकर्मणा ।*
*तैरश्चीं योनिमाप्तोऽस्मि यत्र नाप्तोऽस्मि दानिताम् ॥५१॥*
*कदाचिद् द्युद्रुमाङ्कूरः किं भूयाद् दुर्गतौकसि ? ।*
*पात्रदानफलं लभ्यमभाग्येन कथं मया ? ॥५२॥*
*पुण्यं वन्दनमात्रं मे सदानं तद् रथीशितुः ।*
*न वन्दनं न वा दानं येषां ते ननु कीदृशः ?" ॥५३॥*
अत्रान्तरे महावातप्रहतः स महीरुहः ।
निपपात तदाघातात् ते त्रयोऽपि मृतिं गताः ॥५४॥
तपसा पात्रदानेन साधुदानप्रमोदतः ।
अभूवन् पञ्चमे कल्पे ते त्रयोऽपि दिवौकसः ॥५५॥
शतं समास्तपस्तेपे सेहे याञ्चापरीषहम् ।
तेन दिव्यप्रभारूपोऽभूद् **बलर्षिः** सुरोत्तमः ॥५६॥
गृह्णन्तु व्रतमुज्ज्वलेन मनसा कुर्वन्तु तीव्रं तपः,
शक्तिश्चेत् तपसो न तद्भवति तदा दानं ददत्वद्भुतम् ।
तत्राप्यक्षमताऽस्ति चेद् विदधतां दानानुमोदं तदा,
वीक्षन्तां **बलसाधु**-शिल्पि-हरिणास्तद्योगतो द्यां गताः ॥५७॥

इति चतुर्दशे याञ्चापरीषहे **बलभद्र**कथा ॥२९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

याञ्चाप्रवृत्तश्च कदाचिल्लाभान्तरायादिना न लभेतेत्यलाभपरीषहमाह—

**परेसु घासमेसिज्जा भोयणे परिणिट्ठिए ।**
**लद्धे पिंडे अलद्धे वा नाणुतप्पिज्ज संजए ॥३०॥**

**व्याख्या—परेषु** गृहस्थेषु **ग्रासं** कवल**मेषयेद्** गवेषयेद्, **भोजने परिनिष्ठिते** सिद्धे सति, प्रथमगमने मा भूत् तदर्थं पाकादिप्रवृत्तिः । ततो **लब्धे** प्राप्ते स्वल्पेऽनिष्टे वा **पिण्डे अलब्धे वा नानुतप्येत** न पश्चात्तापं कुर्यात् **संयतो** यथाऽहो ! अहमधन्यो यन्न किञ्चिदनिष्टं वा लभे इत्युपलक्षणाल्लब्धे पर्याप्ते शुभे वा लब्धिमानहमिति न हृष्येत् ॥३०॥

किमालम्ब्येत्याह—

**अज्जेवाहं न लब्भामि अवि लाभो सुए सिया ।**
**जो एवं पडिसंविक्खे अलाभो तं न तज्जए ॥३१॥**

**व्याख्या—अद्यैवाहं न लभे । अपिः** सम्भाव्यते एत**ल्लाभः श्व** आगामिदिने **स्यादु**पलक्षणादन्येद्युर्वा । **य एवं प्रतिसमीक्षेता**दीनमनाः सन्नालोचयेद**लाभो**ऽलाभपरीषह**स्तं न तर्जयेन्ना**भिभवेदित्ययं वाऽलाभपरीषहः सह्यो **ढण्ढण**यतिवत् । तथाहि—

प्रतिबिम्बो**ऽमरावत्या** अस्ति द्वारवती पुरी ।
चरित्रैर्धवलः **कृष्णो**ऽर्द्धचक्री तत्र भूपतिः ॥१॥

**ढण्ढणे**त्याख्यया ख्यातः सुभगस्तस्य नन्दनः ।
बन्धुत्वादिव कामस्य रूपसीम्नः परं पदम् ॥२॥

कलाकलापपूर्णेन्दुर्लावण्यामृतवारिधिः ।
निधिः शौर्यादिभावानां न परः कोऽपि तत्समः ॥३॥

वल्लभोऽतीव तातस्य वयःप्राप्तो वराङ्गनाः ।
उद्वाह्य विषयाभोगमभुङ्क्ताभिरभङ्गुरम् ॥४॥

इतश्च नीलाश्मरुचिर्विलीनाशेषदूषणः ।
समवासरदुत्तुङ्गे **नेमी रैवतका**चले ॥५॥

पिण्डीभूततदङ्गार्चिरुद्वीचियमुनाजले ।
निमग्न इव शैलोऽसौ तदा दक्षैरलक्ष्यत ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अच्युता**दिभिरत्यन्ताह्लादौच्छ्वसितकण्टकैः ।
शुश्रूषुभिः क्षणादेव **श्रीनेमिः** पर्यचार्यत ॥७॥

व्याख्यानावसरे नेतुर्वक्त्रमिद्धद्विजांशुकम् ।
शीतांशुरोचिषा मिश्रं नीलोत्पलमिवाचकात् ॥८॥

"आदिदेश प्रभुः प्रौढाम्भोदगम्भीरया गिरा ।
निगृह्णीध्वं निगृह्णीध्वमान्तरारिचयं जनाः ! ॥९॥

मया निष्कण्टकं राज्यं कृतमित्यात्मचेतसि ।
चक्रिणाऽपि न वै चिन्त्यं तस्य शत्रुजयः कुतः ? ॥१०॥

यथा यथा महाऽऽरम्भः शत्रुपुष्टिस्तथा तथा ।
तत्पोषाच्चास्य दौर्बल्यं ततः कष्टपरम्परा ॥११॥

राज्यतारुण्यमदिराविलुप्तोज्ज्वलचेतनाः ।
किन्त्वदो नावबुध्यन्ते तत्त्वं तैमिरिका इव ॥१२॥

*सुखधीस्तात्त्विके दुःखे नात्मन्यात्मीयधीर्नृणाम् ।*
*अशुचौ भृशमासक्तिरहो ! मोहारिचेष्टितम् ॥१३॥*

भटाः सहस्रयोद्धारस्तिष्ठन्त्यत्र सहस्रशः ।
सभायां मोहजेताऽपि कोऽप्यस्तीति निवेद्यताम् ॥१४॥

यस्य क्लेशमुमुक्षाऽस्ति मोहशत्रुं जयत्वसौ ।
विरतेरपरो नास्ति तस्योपायो निषूदने ॥१५॥

*मानुषं जन्म सामर्थ्यं विज्ञानं विशदं गुरुम् ।*
*प्राप्य सीदति यस्तत्र स नन्वनु विषीदति ॥१६॥*

जेष्यतेऽसाविदानीं किं ? जयोपायेन तस्य नः ।
इयं चिन्ता तु मोहस्य निश्चितं परिपुष्टये ॥१७॥

स एष परमोपाय उपायेष्वखिलेष्वपि ।
तज्जये विश्वधात्री यज्जैनी दीक्षा प्रपद्यते ॥१८॥

*ग्रसते न जरा यावद् यावद् व्याधिर्न वर्द्धते ।*
*नेन्द्रियोपद्रुतिर्यावत् शुभं तावत् समाचरेत्" ॥१९॥*

आकर्ण्येति वचो जैनं मोहारिगरलं वमन् ।
उच्चचार गिरं **ढण्ढ**श्चैतन्यव्यक्तिबन्धुरः ॥२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यावन्न हि सुधापानं तावदेव विषापदः ।
प्रभो ! श्रुते भवद्वाक्ये कुतो भावारिविप्लवः ? ॥२१॥

कृपां धेहि व्रतं देहि विलम्बेन कृतं विभो ! ।
द्रुतं मोहमतं जेता त्वत्प्रसादमहाबलः ॥२२॥

आपृच्छ्य **कृष्ण**मन्यांश्च निर्बन्धेनार्हतः करे ।
दीक्षां कक्षीचकारासौ भवक्लेशक्लमापहम् ॥२३॥

सन्तो यदाद्रियन्ते हि गार्हस्थ्यं व्रतमेव च ।
तत्रैव कुर्वते दार्ढ्यमित्यसौ सुव्रतोऽभवत् ॥२४॥

स्वान्यनिर्भेदचेतस्कस्तीव्रे तपसि सोद्यमः ।
सम्यक् श्रुतमधीयानो विजहारार्हता समम् ॥२५॥

नन्दनो वासुदेवस्य विनेयो**ऽरिष्टनेमिनः** ।
ज्ञान-क्रियोद्यतश्चेति विश्वेज्यत्वमियाय सः ॥२६॥

उदीर्णमन्यदा किञ्चिदस्य कर्म तथाविधम् ।
न येन लभते भिक्षामिभ्यदातृकुलेष्वपि ॥२७॥

कटरे ! कर्मवैचित्र्यं **ढण्ढेन** सह गच्छतः ।
मुनेरन्यस्य यद् भिक्षाप्रतिघातोऽभवद् ध्रुवम् ॥२८॥

श्री**नेमि**र्भगवांस्तेनालाभव्यतिकरेऽन्यदा ।
पृष्टेऽभाषिष्ट सुस्पष्टं तत्पूर्वादृष्टसञ्चयम् ॥२९॥

**मगधा**विषये **धान्यपूरण**ग्रामसंस्थितः ।
कृषि**पारासरो** नाम विप्रसूः समजायत ॥३०॥

कृषिकर्मकलादक्ष इत्यसौ भूमिजानिना ।
तुरङ्गमयवक्षेत्रकारणे विन्ययुञ्ज्यत ॥३१॥

राजक्षेत्रसमीपस्थं तेन क्षेत्रं निजं कृतम् ।
राजक्षेत्रेषु वाह्यन्ते हलानि खलु षट्शतम् ॥३२॥

अन्यदा मध्यमायाते भानौ वृत्तेऽशनक्षणे ।
उक्षेषु न्यक्कृतग्रीवं चङ्क्रमत्सु शनैः क्षुधा ॥३३॥

कृषीवलपुरन्ध्रीभिः पक्त्वाऽऽनीते च भोजने ।
तदर्थित्वेन सीरेभ्य उक्षांस्तेषु मुमुक्षुषु ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकां हलीषां प्रत्येकं बलादपि कृषीवलैः ।
सोऽदापयन्निजक्षेत्रे पीडितैः प्रबलक्षुधा ॥३५॥

तत्प्रत्ययमसौ कर्म बद्धवानान्तरायिकम् ।
निर्द्धर्मश्च क्रमाद् मृत्वा श्वभ्रेऽसौ नारकोऽभवत् ॥३६॥

ततोऽप्युद्वृत्य तिर्यक्षु भ्रान्त्वाऽन्यासु गतिष्वपि ।
नरीभूय शुभं किञ्चिच्चिकाय विनयादिकम् ॥३७॥

तत्प्रत्ययादुपेन्द्रस्य नन्दनोऽजनि **ढण्ढणः** ।
स त्वं न लभसे भिक्षामुदीर्णतददृष्टतः ॥३८॥

स्वकर्मवैर्यसौ दुष्टस्तपस्तीक्ष्णतरासिना ।
दत्तेऽनुपहतो दुःखप्रबन्धमनुजन्मनि ॥३९॥

श्रुत्वेत्यर्हद्वचोमन्त्रं प्रादुर्भूतातिशक्तिकः ।
भोक्ष्येऽन्यलब्धिलब्धं नो भैक्ष्यं सोऽभ्यगृहीदिति ॥४०॥

महाभट इवालाभवैरिणा नाभ्यभूयत ।
भवेऽभ्यवहृतं भूय इत्युपैक्ष्यत तं मुनिः ॥४१॥

अलाभेऽपि परिभ्राम्यन् न व्यषीदन्मनागपि ।
शूरैरेव हि जीयेत न विषादपरैररिः ॥४२॥

दृढाभिग्रहमारूढो विचरन्नर्हता समम् ।
कदाऽपि पुनरभ्यायाद् **द्वारावत्यां** महामनाः ॥४३॥

इभ्यो जनः पितू राज्यं प्रायशः स्वजनाः समे ।
तथाऽप्येष भ्रमन् भैक्ष्यं मुनिस्तत्रापि नाप सः ॥४४॥

चे चक्रुरतिवात्सल्यं तनुजेष्विव साधुषु ।
आस्तिकास्तेऽपि तं वीक्ष्य वीक्षन्ते स्म पराङ्मुखम् ॥४५॥

वीर्यवान् कर्मघातार्थं चचारैवैष गोचरे ।
भ्रान्त्याऽपि न तु कोऽप्यस्मै कदाचित् किञ्चिदप्यदात् ॥४६॥

क्षुत्क्षामश्चेतसा तुष्टः प्रयतो विनयी नयी ।
वासराननतिचक्राम सत्त्ववान् केशरीव सः ॥४७॥

नत्वाऽन्यदा जिनं विष्णुः पप्रच्छ स्वच्छधीरदः ।
को दुष्करक्रियाधाता श्रमणोऽथ जिनोऽवदत् ॥४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अष्टादशसहस्रेषु साधु साधुषु सम्प्रति ।
यादृशो दुष्कराधाता **ढण्ढणो** नेदृशः परः ॥४९॥

सर्वातिशायिता नाथ ! किमादिष्टाऽस्य कथ्यताम् ।
इत्यर्द्धचक्रिणा पृष्टे धर्मचक्र्यप्यदोऽवदत् ॥५०॥

परलब्धं न भुङ्क्तेऽसौ स्वयं न लभतेतराम् ।
पुरीं भ्रमंस्तपः कुर्वन् न सीदति विषीदति ॥५१॥

पाखण्ड्येष किमायाति पैशाच्यपिशुनाकृतिः ।
दायकाख्यातमित्येष पीयूषमिव मन्यते ॥५२॥

मलीमस ! गलच्छौचं प्रविशन्नसि किं मुधा ? ।
इति चेटीवचांस्येव कर्मौषधतयाऽग्रहीत् ॥५३॥

त्वत्सुतो मम शिष्योऽपि भिक्षामप्राप्नुवन्नपि ।
न रोषं नारतिं धत्ते सोऽयमुत्कृष्यते ततः ॥५४॥

क्वासौ नत्वा तमात्मानं निष्पङ्कं विदधे प्रभो ! ।
उवाचेति हरिप्रश्नेऽर्हन् द्रष्टाऽसि पुरीं विशन् ॥५५॥

उत्तालो हरिरुत्तस्थौ प्रविशंश्च निजां पुरीम् ।
ददर्श च मुनिं भिक्षामटन्तं तं महाशयम् ॥५६॥

दूरादेव विलोक्यैनमुच्छ्वसद्रोमकण्टकः ।
अवरुह्य करिस्कन्धाद् द्राग् गत्वा प्रणनाम तम् ॥५७॥

तुष्टाव च जगन्नाथः सप्रकाशं स्वयं जिनः ।
त्वां स्तौति त्वन्नुतौ कस्य क्षमताऽन्यस्य देहिनः ? ॥५८॥

एनं हरिनतं सर्वे प्रणेमुः पृथिवीश्वराः ।
कश्चिदिभ्यो गवाक्षस्थस्तदालोक्य व्यचिन्तयत् ॥५९॥

महात्मा कोऽपि नन्वेष सर्वातिशयमन्दिरम् ।
दानार्हो यदुपेन्द्रेण पूज्यपूज्येन पूज्यते ॥६०॥

गतेऽथ पुरतः **कृष्णे** गृहं तस्यैव दैवतः ।
विवेश पेशलस्वान्तस्तं चेभ्यः प्रत्यलाभयत् ॥६१॥

उपयुज्य समादाय सिंहकेशरमोदकान् ।
नतवामभुजो भाराज्जगामोपजिनं क्रमात् ॥६२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नत्वा किमन्तरायं मे कर्म क्षीणं पुरातनम् ? ।
इति पप्रच्छ **ढण्ढर्षि**स्त्रिलोकीशस्तमभ्यधात् ॥६३॥

परप्रत्ययजो लाभः क्षीणं नो कर्म तत् तव ।
कैशर्वी भक्तिमालोक्य यतो भैक्ष्यमदत्त सः ॥६४॥

**कृष्ण**लब्धिरियं तेन **ढण्ढो**ऽथान्तर्व्यचिन्तयत् ।
अहो ! प्राक्कर्मदौरात्म्यं दुर्भेद्यं तपसाऽपि हि ॥६५॥

केचित् तपस्विनः केचित् पारितान्नास्तपोधनाः ।
आत्मलब्धिव्रतश्चाहं ततस्त्याज्या इमे मम ॥६६॥

श्रुतोक्तविधिनाऽऽहारत्यागः स्थाने महात्मनाम् ।
न त्वभिग्रहभङ्गेन कुक्षिगर्ताप्रपूरणम् ॥६७॥

ध्यात्वेति स्थण्डिलं गत्वा रक्षया तानचूरयत् ।
समाधिपरिवृद्ध्या च क्षपकश्रेणिमारुहत् ॥६८॥

चत्वारि घात्यकर्माणि स निःशेषाण्यचूर्णयत् ।
प्रापच्च केवलज्ञानं श्री**ढण्ढण**महामुनिः ॥६९॥

इत्यलाभे **ढण्ढण**मुनिकथा ॥३१॥

अलाभात् प्रान्ताशिनो रोगा अपि समुत्पद्येरन्निति तत्परीषहमाह—

**नच्चा उप्पइअं दुक्खं वेयणाए दुहट्टिए ।**
**अदीणो ठावए पन्नं पुट्ठो तत्थहिआसए ॥३२॥**

**व्याख्या—ज्ञात्वोत्पतितमु**द्भूतं **दुःखं** ज्वारदिरोगं **वेदनया**ऽङ्गस्फोटादिरूपया **दुःखेनार्तितः** पीडितो**ऽदीनो**ऽविक्लवः **स्थापयेच्च**लन्तीं स्थिरीकुर्यात् **प्रज्ञां** स्वकर्म-फलमेवेदमिति तत्त्वधियं 'अपेर्गम्यत्वात्' **स्पृष्टो**ऽपि व्याप्तोऽपि राजयक्ष्मादिभिः । **तत्रे**ति रोगव्यापे **सत्यध्यासीता**धिसहेत प्रक्रमाद् रोगजं दुःखमिति ॥३२॥

किञ्च—

**तेगिच्छं नाभिनंदिज्जा संचिक्खत्तगवेसए ।**
**एयं खु तस्स सामन्नं जं न कुज्जा न कारवे ॥३३॥**

**व्याख्या—चिकित्सां** रोगप्रतीकाररूपां **नाभिनन्देन्ना**नुमन्येतातो दूरापास्ते करण-कारणे **सञ्चिक्षेत** समाधिना तिष्ठेन्न कूजितादि कुर्यात् चारित्र**ात्मगवेषकः** । **एतद्** वक्ष्य-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

माणं **खुर्यस्मात् तस्य श्रामण्यं यन्न कुर्याद् न कारयेद्**उपलक्षणाद् नानुमन्येतार्थाच्चिकित्सां जिनकल्पिकापेक्षमेतत् । स्थविराणां तु 'जं न कुज्जा' इत्यादिनोत्सर्गतस्त्याज्या सावद्यत्वात् प्रायश्चिकित्सायाः अपवादतः पुष्टालम्बनानामेषां सावद्याऽप्येषाऽनुमतैव । यतः—

**"[1]काहं अच्छित्तिं अदुवा अहीहं तवोवहाणेसु य उज्जमिस्सं ।**
**गणं च नीई वि सारविस्सं सालंबसेवी समुवेइ मोक्खं ॥१॥**

एवं च रोगपरीषहः सह्य **आरोग्यद्विजवत्** । यथा—

अवन्त्यां **देवगुप्ताख्यो** विप्रो **नन्दा**ऽस्य गेहिनी ।
साऽन्यदा सुषुवे पुत्रं शैशवादपि रोगिणम् ॥१॥

तद्रोगतः सचिन्ताभ्यां पितृभ्यां नास्य निर्ममे ।
अभिधानं प्रथा त्वासीद् रोगीत्यस्य स्वयं जने ॥२॥

बहवोऽपि प्रतीकाराः पितृभिश्चक्रिरेतराम् ।
गदध्वंसाय पुत्रस्य नोपशान्तस्तथाऽपि सः ॥३॥

*यदभावि न तद् भावि भावि चेद् न तदन्यथा ।*
*तेऽदो रसायनं पीत्वा स्वसमाधानमादधुः ॥४॥*

मुमुक्षुरेकदा कोऽपि भिक्षाऽर्थी तद्गृहेऽविशत् ।
निर्दम्भः परमानन्दकन्दाम्भोदसहोदरः ॥५॥

सोऽभाषि **देवगुप्ते**न प्रपात्य पदयोः सुतम् ।
प्रसद्योपदिश स्वामिन् ! रुक्शमोपायमस्य नः ॥६॥

भिक्षोर्भिक्षोपयातस्य वक्तुं भद्र ! न साम्प्रतम् ।
इत्युक्त्वा प्रासुकं भक्तमादायैष न्यवर्तत ॥७॥

सोऽप्यानुपदिकस्तस्य गत्वोद्यानमवन्दत ।
कृताहारं मुनिं पुत्रयुक्तः पूर्ववदभ्यधात् ॥८॥

*"मुनिरुत्तरयामास कर्मैव रुजि कारणम् ।*
*विधेयः कारणध्वंसस्तदुच्छेदाय धीधनैः ॥९॥*

---

१. करिष्येऽच्छित्तिमथवाऽधीष्ये तपोपधानेषु चोद्यंस्ये ।
गणं च नीत्याऽपि सारयिष्ये सालम्बसेवी समुपैति मोक्षम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*अवश्यं पल्लवग्राही भवत्येव हि पादपः ।*
*छिन्नोऽपि बीजसद्भावे हेतुमाप्य घनादिकम् ॥१०॥*

*ओषधैर्वारितोऽप्युच्चैर्व्याधिर्दुष्कर्मबीजवान् ।*
*प्राप्य किञ्चिदपथ्यादि प्राणिनां पुनरेधते ॥११॥*

*ततश्च विदुषा जैनो धर्मः शर्मनिबन्धनम् ।*
*विधातव्यः प्रयत्नेन द्विषता कर्मवैशसम्" ॥१२॥*

इति श्रुत्वोरुसंवेगादादाय गृहिधर्मिताम् ।
न्यवर्ततां मुनिं नत्वा तौ सुसाधुक्रियोन्मुखौ ॥१३॥

दृढव्रतधरौ तत्त्ववेदिनौ सुकृताद्भुतौ ।
बभूवतुरमू तत्र पुत्रस्त्विदमचिन्तयत् ॥१४॥

रोद्धुं शक्यः पयोराशिर्निर्मर्यादमुपाव्रजन् ।
न तु कर्मपरीणामः फलाभिमुखतां गतः ॥१५॥

*औषधैर्विविधैः पुष्टमिदं खलशरीरकम् ।*
*अवसाने पतत्येव निःसारं जीर्णपर्णवत् ॥१६॥*

तदस्य वर्ष्मणोऽवश्यपातिनः पाप्मनः कृते ।
कस्ताम्यत्यौषधैररतिहेतुभिः फलसंशयैः ? ॥१७॥

परत्रेह च शर्मार्थं त्यक्त्वा धर्ममयौषधम् ।
न काष्ठौषधमाधास्येऽभ्यग्रहीदिति स स्फुटम् ॥१८॥

विबाधायामपि रुजां न व्यषीदन्मनागपि ।
सम्पद्यापदि वा यस्माद् विकारो न सतां भवेत् ॥१९॥

उक्तञ्च—

**उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।**
**सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥२०॥**

जीवितव्यमहो ! श्लाघ्यं **देवगुप्त**तनूभुवः ।
सावद्यां यश्चिकित्सां हि मनसाऽपि न काङ्क्षति ॥२१॥

इत्यन्यदाऽकरोच्छक्रः प्रशंसामयस्य संसदि ।
तां सेहिरे सुराः सन्तस्ते हि सत्पक्षपातिनः ॥२२॥

Jain Education International 2010_02　　For Private & Personal Use Only　　www.jainelibrary.org

द्वौ सुरौ तां न सेहाते **जयदत्त-जया**भिधौ ।
स्वल्पे हि गुणसोढारः सुरेषु मनुजेष्वपि ॥२३॥

साक्षादिन्द्रं प्रतिज्ञाय भुवमाहत्य पाणिना ।
तदभिग्रहविध्वंसबद्धकक्षौ दधावतुः ॥२४॥

तत्र धन्वन्तरीभूय विप्रपुत्रमवोचताम् ।
धीमन् ! प्रगुणयावस्त्वां कुरुषे यदि भेषजम् ॥२५॥

हे वैद्यौ ! वदतां तावत् कीदृशं हि तदौषधम् ? ।
रुजः का वा प्रशाम्यन्तीत्यवदद् **देवगुप्त**भूः ॥२६॥

भद्रादिमे निशायामे कार्यं मध्ववलेहनम् ।
तथा च चरमे जीर्णमदिरापानपूर्वकम् ॥२७॥

भोक्तव्यं कूरमाकण्ठं नवनीत-पलान्वितम् ।
भविताऽऽरोग्यमेवं ते तावदः प्रोचतुस्तमाम् ॥२८॥

**देवगुप्त**सुतोऽवोचद् वैद्यावात्तव्रतोऽस्म्यहम् ।
तन्मे न खलु कर्तव्यं यत्र प्राणिवधो भवेत् ॥२९॥

***नवनीते बहिस्तक्रात् पिशिते मधु-मद्ययोः ।***
***उत्पद्यन्ते विपद्यन्ते तद्वर्णाः सूक्ष्मजन्तवः ॥३०॥***

तदेतदौषधाधानाद् विराध्यानेकदेहिनः ।
यदारोग्यमहं मन्ये तन्महारोगतोऽधिकम् ॥३१॥

तौ सुरौ पुनरूचाते मूढ ! चेतयसे न किम् ? ।
स्वाङ्गं रक्ष्यं भवेत् पश्चात् प्रायश्चित्तं समाचरेः ॥३२॥

आर्तध्यानेन मरणं स्याद् यथा मा कृथास्तथा ।
बालैतदनुपात्येव नागमः किं विभाव्यते ? ॥३३॥

[1]**सव्वत्थ संजमं संजमाओ अप्पाणमेव रक्खिज्जा ।**
**मुच्चइ अइवायाओ पुणो विसोही न याविरई ॥३४॥**

विप्रसूरभ्यधाद् वैद्यौ ! प्रागेवाकरणं वरम् ।
शुद्धौ पश्चाद् विधेयायां पङ्कस्पर्शेन किं मुधा ? ॥३५॥

---

१. सर्वत्र संयमं संयमादात्मानमेव रक्षेत् ।
मुच्यतेऽतिपातात् पुनर्विशोधिर्न चाविरतिः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भवितव्यं यदि प्रान्ते कुध्यानं तद् भविष्यति ।
भाविताईन्मतस्येदं न मे सम्भाव्यते परम् ॥३६॥

पितृभ्यामभ्यधाय्येवं त्वं प्राप्तो भूरियाचितैः ।
अस्माकमुपरोधेन चिकित्सां वत्स ! कारय ॥३७॥

पुरीश्वरोऽपि सप्रेमोवाच मुञ्च कदाग्रहम् ।
त्वामारोग्यगुणप्राज्यं पौरोहित्यं वरीयति ॥३८॥

पौराद्यैरागृहीतोऽपि भृशमेवं द्विजात्मजः ।
न मन्यते प्रतीकारं दिधक्षन्नान्तरा रुजः ॥३९॥

ततस्तद्दाढर्यमुदितौ सुरावाविर्बभूवतुः ।
अहो ! धैर्यमहो ! धैर्यं तव स्वर्णाचलातिगम् ॥४०॥

**नन्दा**नन्दन ! धन्यस्त्वमनिन्द्यं तव जीवितम् ।
यस्य ते कुरुते श्लाघाममराधीश्वरोऽपि हि ॥४१॥

इति प्रशंसामासूत्र्य नीरुजं तं द्विजाङ्गजम् ।
विधाय विबुधौ बुद्धौ विबुधावासमीयतुः ॥४२॥

पित्रादयस्तथा दाढ्र्यधर्ममाहात्म्यदर्शनात् ।
प्रतिबुद्धा अकाङ्क्षन्त दीक्षाधर्ममुपासितुम् ॥४३॥

तदादि विप्रभूरेष **आरोग्यद्विज** इत्यभूत् ।
नाम्ना भूम्ना हि विख्यातिर्लोके लोककृताऽभवत् ॥४४॥

निर्व्यूढाभिग्रहः सम्यक् क्रमादात्तमहाव्रतः ।
निःसङ्गरङ्गो निष्कर्मा परमानन्दभागभूत् ॥४५॥

इति षोडशे रोगपरीषहे **आरोग्यद्विज**कथा ॥३३॥

रोगपीडितस्य शयनादिषु कर्कशतृणादिस्पर्शः स्यादिति तत्परीषहमाह—

**अचेलगस्स लूहस्स संजयस्स तवस्सिणो ।**
**तणेसु सुयमाणस्स हुज्जा गायविराहणा ॥३४॥**

**व्याख्या—अचेलकस्य रूक्षस्य संयतस्य तपस्विनस्तृणेषु** दर्भादिषु **शयान-स्यो**पलक्षणादासितस्य **भवेद् गात्रविराधना** अङ्गव्याबाधा । मा भूत् सचेलस्य तृण-स्पर्शासम्भवेन, अरूक्षस्य तत्सम्भवेऽपि स्निग्धत्वेन, असंयतस्य शुषिरहरिततृणग्रहणेन तथा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गात्रविराधनाया असम्भव इत्यचेलकत्वादीनि विशेषणानि तपस्विन इति ॥३४॥

ततश्च—

**आयवस्स निवाएणं अउला हवइ वेयणा ।**
**एयं नच्चा न सेवंति तंतुजं तणतज्जिया ॥३५॥**

**व्याख्या—आतपस्य** घर्मणो **निपातेनातुला** महती **भवति वेदना** पीडा **एवं ज्ञात्वा न सेवन्ते तन्तुजं** वस्त्रं कम्बलं वा **तृणैस्तर्जिता** निर्भर्त्सिताः । को भावः ?, यद्यपि तृणैर्विलिखिताङ्गस्यातपोत्पन्नस्वेदतः क्षतक्षारक्षेपरूपा पीडा स्यात्, तथाऽपि कर्मक्षयार्थिभिर्वस्त्राद्यगृह्णद्भिः सम्यक् सहनीया, नरके हि परवशे रौद्रतरा वेदना मयाऽनुभूतपूर्वा, तत् कियतीयम् ? । स्ववशस्य सम्यक् सहने भूयांश्च लाभः । यत उक्तम्—

**"[1]असासए सरीरंमि विन्नाए जिणसासणे ।**
**कम्मे वेयज्जमाणंमि लाभो तत्थहियासणं"** ॥१॥

जिनकल्पापेक्षं चैतत्, स्थविरास्तु सापेक्षसंयमत्वाद् वस्त्रादि सेवन्तेऽपीति तृणपरीषहः सोढव्यो **भद्रसाधु**वत् । तथाहि—

**श्रावस्त्यां** क्षितिपालस्य **जितशत्रो**स्तनूद्भवः ।
भद्रः प्रकृत्या **भद्राख्यो**ऽभवद् धर्माभिमुख्यवान् ॥१॥

सोऽन्यदा **सुन्दराचार्या**न्निर्वेदजनकं वचः ।
श्रुत्वा सञ्जातसंवेगः पितॄन् प्राञ्जलिरभ्यधात् ॥२॥

*"समुदायकृतं कर्म समुदायेन भुज्यते ।*
*त्वरध्वं मद्वदमुत्र हितसिद्ध्यै व्रतग्रहे ॥३॥*

*मया नूनमुपादेया प्रव्रज्या सविधे गुरोः ।*
*अयमायुर्लवः स्वार्थसाधकः क्वाप्यते पुनः ? ॥४॥*

*अहं तपोवने यामि भवन्तस्तु गृहाश्रमे ।*
*स्वभावसिद्धता हानिरेवं प्रेम्णः कुटुम्बके ॥५॥*

*अन्योन्यमवियोगेन निर्वृत्तिः समवाप्यते ।*
*मैतद् वचोऽवमन्यध्वमेकान्तहितमात्मनः ॥६॥*

---

१. अशाश्वते शरीरे विज्ञाते जिनशासने ।
कर्मणि वेद्यमाने लाभस्तत्राध्यासनम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*भवत्पार्श्वप्रवर्ती स्यां क्षमः कर्मारिमारणे ।*
*स्वपक्षान्तर्गतो वीरो द्विगुणं बलमश्नुते'' ॥७॥*

*''पितरावाहतुर्वत्स ! किमित्युत्सुकतां गतः ? ।*
*बालोऽसि बत वार्द्धक्ये सममेव यतिष्यते ॥८॥*

*सोऽप्याह न हि मे मैत्री कृतान्तेन प्रवर्तते ।*
*कूपान्निर्गच्छतो विघ्नः शत्रोरपि न युज्यते ॥९॥*

*सा प्रसूः स पिता पुत्रपथ्यायोद्यच्छतोऽत्र यौ ।*
*बलादेवमनुज्ञाप्य पितॄन् स व्रतमाददे'' ॥१०॥*

उपस्थविरमभ्यस्तश्रुतसारः क्रियोद्यतः ।
अनुस्यूततपःशक्ति सत्त्वनिर्बन्धबन्धुरः ॥११॥

प्रपन्नवानथैकाक्यं विहरन् क्रमशोऽन्यदा ।
वैरिराज्ये चर इति बबन्धेऽसौ विपक्षगैः ॥१२॥

पृष्टः केन नियुक्तोऽसि कः कस्यास्यागतः कुतः ? ।
भगवान् सोऽपि नादत्त मौनी प्रत्युत्तरं मुनिः ॥१३॥

ततो रुष्टैरनार्यैस्तैर्नियन्त्र्याजिनबन्धनैः ।
कुशैस्तीक्ष्णैः परीवेष्ट्य क्षारकूटे निचिक्षिपे ॥१४॥

तोद्यमानः कुशैस्तीव्रैर्निर्गच्छद्रुधिराविलः ।
सेहे स वेदनां सम्यग् न विषादवशेऽपतत् ॥१५॥

*''दध्याविति सुधीः स्वान्तेऽदभ्राः श्वभ्रोदरे पुरा ।*
*वज्र-शूलादिजाः पीडा अनुभूता इतोऽधिकाः ॥१६॥*

*प्रदीप्ताङ्गारपूर्णेषु वज्रकुण्डेष्वसन्धिषु ।*
*कूजन्ननेकशः श्वभ्रे दग्धोऽहं नरकाग्नि ॥१७॥*

*अग्निभीतो रयाद् धावन् गतो वैतरिणीं नदीम् ।*
*पयःपिपासया विस्रक्षाराम्भस्यपतं ततः ॥१८॥*

*क्षारदग्धशरीरश्च मृतो वेगोत्थितः पुनः ।*
*छायाऽर्थी हीनदीनोऽहमसिपत्रवनान्यगाम् ॥१९॥*

*शक्त्यष्टि-प्रास-कुन्तैश्च खड्ग-तोमर-पट्टिशैः ।*
*छिन्नोऽहं कृपणस्तत्र पतद्भिर्वातकम्पितैः ॥२०॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*कर्मैकपारवश्येन सहित्वाऽप्यात्मवेदनाम् ।*
*नाऽऽत्मन् ! कोऽप्यर्जितो लाभस्तदिदानीं गृहाण तम् ॥२१॥*
*ये शैलनिश्चला: कर्मजयोद्युक्तास्तपोधना: ।*
*अनुद्विग्नास्तितिक्षन्ते परीषहमुपस्थितम् ॥२२॥*
*ते धन्या इत्यसौ भद्र: स्ववश: कुशवेदनाम् ।*
*सहमानो मुनि: प्राप्य केवलं शिवमासदत्'' ॥२३॥*

एवमन्यैरपि सोढव्य: ॥

इति सप्तदशे परीषहे **भद्रसाधुकथा** ॥३५॥

तृणानि मलिनान्यपि भवन्ति, तत्सम्पर्कत: स्वेदतश्च जल्लसम्भव इति मलपरीषहमाह—

**किलिन्नगाए मेहावी पंकेण व रएण वा ।**
**घिंसु वा परितावेणं सायं नो परिदेवए ॥३६॥**

**व्याख्या—क्लिन्नगात्रो** निचिताङ्गो **मेधावी** ।

**''[१]वाहिओ वा अरोगी वा सिणाणं जो उ पत्थए ।**
**वोक्कंतो होइ आयारो जढो हवइ संजमो'' ॥१॥**

इत्यागमं स्मरन्नस्नानमर्यादावर्ती । केन क्लिन्नत्वमित्याह-**पङ्केन** स्वेदार्द्रमलरूपेण 'रएण त्ति' **रजसा वा** 'घिंसु त्ति' **ग्रीष्मे वा**शब्दाच्छरदि वा **परितापेन** । को भाव: ? परितापात् स्वेद:, स्वेदाच्च पङ्क-रजसी, तत: क्लिन्नगात्रता स्यादेवंविधश्च किं कुर्यात् ? सातं सौख्यमाश्रित्य नो परिदेवेत कथं मे मलापगमेन सुखं भावीति न प्रलपेत् ॥३६॥

पुन: किं कुर्यादित्याह—

**वेइज्ज निज्जरापेही आरियं धम्ममणुत्तरं ।**
**जाव सरीरभेओ त्ति जल्लं काएण धारए ॥३७॥**

**व्याख्या—वेदयेत्** सहेत प्रस्तावाज्जल्लजं दु:खं **निर्जराऽपेक्षी** कर्मक्षयाभिलाषी **आर्यं धर्मं** श्रुतचारित्ररूप**मनुत्तरं** प्रधानं प्रपन्नो 'भावयति:' इति गम्यम् । **यावच्छरीरस्य भेदो** विनाशो यावज्जीवमित्यर्थस्ताव**ज्जल्लं** कठिनताऽऽपन्नं मलं **कायेन धारयेत्** । को

---

१. व्याधितो वाऽरोगी वा स्नानं यस्तु प्रार्थयेत् ।
व्युत्क्रान्तो भवत्याचार: शिथिलो भवति संयम: ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भावः ? दौस्थ्यविच्छायश्यामाङ्गानां शीतोष्णवातातपादिभिः परिशोषितरजोऽवगुण्ठितमलदिग्धाङ्गनामकामनिर्जरातो न कश्चिद् गुणो मम तु सम्यक् सहमानस्य महान् गुण इति मत्वा न तदपनोदाय स्नानादि कुर्याद् । यतः—

**"न शक्यं निर्मलीकर्तुं गात्रं स्नानशतैरपि ।**
**अश्रान्तमेवं स्त्रोतोभि–रुद्गिरन्नवभिर्मलम्"** ॥१॥

इति मलपरीषहसहने व्यतिरेकेण **सुनन्द**मुनिरुदाहरणम् । तथाहि—

अभूद् वणिक् **सुभद्राख्यश्चम्पायां** गान्धिकाग्रणीः ।
त्यक्तपात्राद्यभिप्रायमुदारोदूढदानधीः ॥१॥

यदौषधादिकं साधुप्रायोग्यं तदवज्ञया ।
अमी अस्मदुपायत्ताः साधुभ्य इति पर्यदात् ॥२॥

तस्यान्यदाऽऽपणे ग्रीष्मे मलस्वेदाविलाङ्गकाः ।
भैषज्यार्थं समाजग्मुः साधवो मलिनाम्बराः ॥३॥

आपणस्थितचन्द्रादेरभिभाव्य परीमलम् ।
उदगाद् वपुषो गन्धस्तेषां तन्नासिकाविषम् ॥४॥

कदाऽपि प्राप्तदुर्गन्धः **सुभद्रो**ऽन्तरचिन्तयत् ।
अभद्रमेतदेतेषां को दोषो मलधावने ? ॥५॥

कर्मबन्धो यतोऽन्येषां तन्न कुर्युस्तपोधनाः ।
एतन्मलापगन्धेनाहमिवान्येऽपि बन्धकाः ॥६॥

बद्ध्वा तत्प्रत्ययं कर्मानालोच्य मुनिदानतः ।
**कौशाम्ब्यामि**भ्यगेहेऽभूत् **सुनन्दो** नन्दनः सुधीः ॥७॥

अवज्ञयाऽपि पात्रेभ्यो दत्तं दानं न निष्फलम् ।
युवाऽसौ बुभुजे भोगान् श्रद्धां च सुकृते व्यधात् ॥८॥

गुरोर्धर्मपदं श्रुत्वा बुद्धो भेजेऽनगारिताम् ।
तत्कर्मोदयतो गाढदुर्गन्धाङ्गः क्रमादभूत् ॥९॥

येन येन पथा याति तत्र तत्र जनोऽखिलः ।
पलायामास दुर्गन्धाज्जैनापभ्राजनाऽभवत् ॥१०॥

अथासौ साधुभिः प्रोचे भिक्षाद्यर्थमुपाश्रयात् ।
मा यासीस्त्वं बहिः साधो ! वारयोड्डाहमात्मनः ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तपसा कर्मणि क्षीणप्राये निर्विण्णमानसः ।
कायोत्सर्गं दधे रात्रौ ध्यात्वा शासनदेवताम् ॥१२॥

तया चक्रे स सौगन्ध्यपात्रदेहस्तथा क्षणात् ।
यथाऽभिभावयाञ्चक्रे कस्तूर्यादिपरीमलम् ॥१३॥

ततो यतो यतो यात्यायुर्लोकास्ततस्ततः ।
भोगः साधोरहो ! कीदृक् सर्वद्रव्येश्वरातिगः ? ॥१४॥

भूयः सत्येवमुद्ग्राहे पुनराराध्य देवताम् ।
स स्वाभाविकगन्धोऽभूच्छुद्धं व्रतमपालयत् ॥१५॥

यथा तेन मलोत्पन्नो न दुर्गन्धपरीषहः ।
सेहे तथा न कर्तव्यं परैरपि तपोधनैः ॥१६॥

इत्यष्टादशपरीषहे **सुनन्द**मुनिकथा ॥३७॥

जल्लोपलिप्तश्चापरान् शुचीन् सत्क्रियमाणान् दृष्ट्वा सत्कार-पुरस्काराभ्यां स्पृहयेद-तस्तत्परीषहमाह—

**अभिवायणमब्भुट्ठाणं सामी कुज्जा निमंतणं ।**
**जे ताइं पडिसेवंति न तेसिं पीहए मुणी ॥३८॥**

**व्याख्या—अभिवादनं** शिरोनमनादि, **अभ्युत्थानं** ससम्भ्रममासनदानं **स्वामी** राजादिः **कुर्याद् निमन्त्रणं** भिक्षाद्यर्थं **ये** स्वपरयूथ्या**स्तान्य**भिवादनादीन्यागमनिषिद्धानि **प्रतिसेवन्ते** भजन्ते **न तेभ्यः स्पृहयेद् मुनिः** । यथाऽमी सुलब्धजन्मानो ये एवमभि-वादनादिभिः सत्क्रियन्ते इति ॥३८॥

किञ्च—

**अणुक्कसाई अप्पिच्छे अन्नाएसी अलोलुए ।**
**रसेसु नाणुगिज्झिज्जा नाणुतप्पिज्ज पन्नवं ॥३९॥**

**व्याख्या—अणुकषाय्य**ल्पकषायी सत्काराद्यकुर्वते अन्यस्मै न कुप्यति, तत्-सम्पत्तौ च न माद्यति । यतः—

**"[१]पलिमंथ महं वियाणिया जा वि य वंदण-पूयणा इहं ।**
**सुहुमे सल्ले दुरुद्धरे इय संखाय मुणी न मज्जई" ॥१॥**

१. विघ्नं महद् विजानीयाद् याऽपि च वन्दना-पूजनेह ।
सूक्ष्मं शल्यं दुरुद्धरमिति सङ्ख्याय मुनिर्न माद्यति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अल्पेच्छो**ऽगृध्नुर्धर्मोपकरणमात्रेच्छः । अज्ञातो जात्यादिभिरेषत्युञ्छति पिण्डादीन्य**ज्ञातैषी** । **अलोलुपः** सरसाहारेषु न लाम्पट्यवान् । **रसेषु** मधुरादिषु **न गृध्येन्ना**भिकाङ्क्षेत, तथा **नानुतप्येत** नृपादिभिः सत्क्रियमाणानन्यतीर्थिकानवेक्ष्य किमहमेषां मध्ये प्रव्रजित इति पश्चात्तापं न कुर्यात्, **प्रज्ञावान्** हेयोपादेयविवेचनमतिमानिति साधुना च सत्कारे परितोषं न्यक्कारे च द्वेषमकुर्वता सत्कारपुरस्कारपरीषहोऽध्यासितव्योऽन्वयव्यतिरेकाभ्यां **धर्मयशो-धर्मघोष**मुनिवत् । तथाहि—

**कौशाम्ब्यां जितसेना**ख्यो भूपो भार्याऽस्य **धारिणी** ।
आचार्या **धर्मवस्वा**ख्या वार्द्धक्ये तत्र संस्थिता: ॥१॥

**धर्मघोषो धर्मयशास्त**द्विनेयौ बहुश्रुतौ ।
जेष्ठां संलेखनां कृत्वा जज्ञातेऽनशनोन्मुखौ ॥२॥

इतश्च **निर्भया**नाम्नी सङ्घानुज्ञां तपोधना ।
गृहीत्वाऽनशनं भेजे चिरं पूजामवाप च ॥३॥

गताया अपि देवत्वं तस्याः सङ्घः कलेवरम् ।
पूजयामास पुष्पाद्यैर्महीयोमहिमां व्याधात् ॥४॥

**धर्मघोषो**ऽथ तद् दृष्ट्वा दध्यौ धन्येयमार्यिका ।
जीवन्त्याश्च मृतायाश्चेदृशी यस्याः प्रभावना ॥५॥

पुरेऽत्रानशनं कुर्वे पूजामाप्स्येऽहमद्भुताम् ।
मृत्यावपि यशःकायः स्थिरीकार्यो महात्मभिः ॥६॥

इति तत्र स तच्चक्रे मुनि**धर्मयशा**स्त्विदम् ।
व्यचिन्तयज्जनज्ञातधर्मेण मम किं मुधा ? ॥७॥

गत्वैकान्ते तदाध्यास्ये ध्यात्वेत्यापृच्छ्य सद्गुरुम् ।
**वत्सगा**सिन्धुतीरस्थगिरिदर्यामुपागमत् ॥८॥

पादपोपगमं लात्वाऽनशनं तत्र निःस्पृहः ।
एकाकी सुस्थितध्यानोऽर्हल्लीनोऽस्थाद् महामनाः ॥९॥

इतोऽ**वन्त्यां** महापुर्यां **प्रद्योता**न्वयदीपकः ।
**अवन्तिवर्द्धनो** राजाऽस्यानुजो **राष्ट्रवर्द्धनः** ॥१०॥

**धारिणी**दयिताजातः सुतोऽ**स्यावन्तिसेनकः** ।
वनेऽनुजप्रियां दृष्ट्वाऽन्यदा राजाऽन्वरज्यत ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तामर्थयाञ्चकारासौ दूतीवक्रेण कामुकः ।
अहो ! स्मरसुरामत्तस्तत् किं यद् न विचेष्टते ? ॥१२॥

**धारिण्यु**वाच ही ! धर्मानपेक्ष्यो यदि भूपतिः ।
तत् किं भ्रात्रनपेक्ष्योऽभूद् यन्मामथ बुभुक्षति ॥१३॥

इतो दूत्योक्तमाकर्ण्य राजाऽपि गतचेतनः ।
जघान बान्धवं सद्यस्तमुपायेन केनचित् ॥१४॥

गर्भाङ्कुरवती पत्नी शीलरक्षैकतत्परा ।
**कौशाम्ब्या**मविलम्बेनागमत् सार्थेन केनचित् ॥१५॥

आर्याप्रतिश्रये तत्र धर्म्यामाकर्ण्य देशनाम् ।
अनावेद्य निजं गर्भं त्वरितं व्रतमग्रहीत् ॥१६॥

अथैधमानतद्गर्भा प्रवर्तिन्या गृहान्तरे ।
रहोऽस्थापि क्रमात् तत्र सुषुवे सुतमद्भुतम् ॥१७॥

अयं सुतो हि संयत्या इति माऽपवदेज्जनः ।
नृपाङ्गणेऽमुचन्नाममुद्राङ्कमिति सा निशि ॥१८॥

प्रत्याय्यत मृतो जातस्तथेत्युक्त्वा प्रवर्तिनी ।
**जितसेनो** नृपोऽपश्यत् तं च दीप्तमणिप्रभम् ॥१९॥

निजपत्न्यै विपुत्रायै पुत्रत्वेन तमार्पयत् ।
गूढगर्भाऽभवद् राज्ञी प्रकाश्येति जनेऽखिले ॥२०॥

पुत्रजन्मोत्सवं कृत्वा नाम्ना चक्रे **मणिप्रभम्** ।
मृते राज्ञि वयःप्राप्तो राजाऽजनि स दुर्द्धरः ॥२१॥

अथ**वान्तीश्वरो** भ्रष्टो **धारिण्य**नुज़योरहम् ।
पापपात्रं प्रवृत्तश्चेत्यासीद् निर्विण्णमानसः ॥२२॥

भ्रातृ**जावन्तिसेनं** तं नृपीकृत्य निजे पदे ।
भवभीरुर्व्रतं लात्वा योगसाम्राज्यमन्वशात् ॥२३॥

प्रौढप्रभो**ऽवन्तिसेनो**ऽन्यदाऽभाणी**न्मणिप्रभ**म् ।
दूतास्येन क्रमायातं दण्डं देहि सुनिश्चितम् ॥२४॥

प्रत्यूचे सोऽपि दास्यामि तव मूर्ध्नि निजं क्रमम् ।
दण्डं लास्यामि निर्व्याजं तवाहं भव माऽऽकुलः ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आक्षेप्येति **प्रत्यवन्ति** सैन्यार्थमुपचक्रमे ।
आगाद**वन्तिसेनो**ऽपि तावद् वीरचमूचयः ॥२६॥

क्षिप्रं संवेष्ट्य **कौशाम्बीं** स्थितः स्थाममदोद्धरः ।
**मणिप्रभो**ऽपि तत्सैन्यं तृणं मेनेऽखिलं तदा ॥२७॥

दुर्गसामर्थ्यनिर्भीकश्चक्रे सङ्ग्रामकोविदम् ।
चतुरङ्गचमूचक्रं दुर्गस्थायी **मणिप्रभः** ॥२८॥

तदा च नगरीरोधव्याकुलो निखिलो जनः ।
खातोत्खातादिकं कुर्वन् कृत्यान्यपि न चास्मरत् ॥२९॥

नीहाराहारसङ्कोचात् तदा मुनिजनोऽपि हि ।
वैमनस्यं परं प्राप पश्यन् व्रतविराधनाम् ॥३०॥

न तदाऽनशनस्थस्य **धर्मघोष**मुनेरपि ।
तपसः कोऽपि पप्रच्छ सुखवार्तादिकं जनः ॥३१॥

पूजाकाम्यस्ततो निन्दन् जनतां तदकारिणीम् ।
मृतः स लोष्टुवल्लोकैर्बहिर्वप्रान्निचिक्षिपे ॥३२॥

बान्धवौ युध्यमानौ तौ मत्वा सा **धारिणी** मिथः ।
ज्यायस्यार्यामनुज्ञाप्यायासीदुप**मणिप्रभम्** ॥३३॥

सर्वस्वरूपमावेद्य रणो युक्तो न बन्धुना ।
इत्युक्तोऽप्यभिमानेन यावन्नैष न्यवर्तत ॥३४॥

ततो**ऽवन्ती**पतेः पार्श्वमागत्यैतन्न्यवेदयत् ।
सोऽपि सङ्ग्रामसंरम्भं मुक्त्वा तत्सम्मुखं ययौ ॥३५॥

कुलदेव्यः प्रसेदुर्मेऽधुना बान्धवलाभतः ।
इत्युच्चरन्तमागत्य तमालिङ्गन्**मणिप्रभम्** ॥३६॥

मुक्त्वा मानमुभौ स्नेहनिर्यदश्रुभृतेक्षणौ ।
गाढालिङ्गनतोऽप्युच्चैः परं सन्तोषमापतु ॥३७॥

आगत्य नगरीमध्यं महोत्सवपुरस्सरम् ।
कियतोऽपि दिनान् स्थित्वा प्रत्यवन्ति प्रचेलतुः ॥३८॥

तदाग्रहाद् व्रतिन्योऽपि सह ताभ्यां प्रतस्थिरे ।
**वत्सगा**सरितस्तीरे तस्थुर्विश्रामहेतवे ॥३९॥

गिरौ तत्र जनान् वीक्ष्य मुदाऽऽरोहावरोहकान् ।
पृष्ट्वा च ज्ञातवृत्तान्तास्ताः प्रोचुः पृथिवीपती ॥४०॥

अत्र **धर्मयशाः** साधुः पादपोपगमे स्थितः ।
तदुपास्तिं करिष्यामः सा हि सर्वफलप्रदा ॥४१॥

तौ श्रुत्वेति महीपालौ स्थित्वा तत्र शुभेच्छया ।
आनर्चतुर्मुनिं भक्त्या श्रीखण्डादिविलेपनैः ॥४२॥

*किं सत्कार-पुरस्कारैरधुनाऽऽत्मन् ! निरर्थकैः ? ।*
***परमेष्ठिस्मृतेर्विघ्नो माऽस्त्वसावित्यभावयत् ॥४३॥***

अनिच्छन्नपि सम्प्राप महिमां स महीयसीम् ।
मृतश्चाभूत् सुरः स्वर्गेऽस्याहो ! निर्व्याजपुण्यता ॥४४॥

तौ तत्संस्कारमाधा**यावन्ती**राज्यमुपेयतुः ।
अयं परीषहो **धर्मयशा** इव विषह्यताम् ॥४५॥

इत्येकोनविंशे परीषहे **धर्मयशो-धर्मघोष**कथा ॥३९॥

सत्कारश्च प्रायः प्रज्ञाऽतिशयवतो भवतीति तं सत्क्रियमाणमुपलभ्य प्रज्ञाविकलो वैक्लव्यं भजेदिति प्रज्ञापरीषहमाह—

**से नूणं मए पुव्वं कम्मानाणफला कडा ।**
**जेणाहं नाभिजाणामि पुट्ठो केणइ कण्हुई ॥४०॥**

**व्याख्या**—'से'शब्दोऽथार्थे **नूनं** निश्चितं **मया पूर्वं कर्माण्यज्ञानफलानि** ज्ञानावरणीयादीनि **कृतानि** निन्दाऽऽदिभिरर्जितानि । यदुक्तम्—

**"ज्ञानस्य ज्ञानिनां वाऽपि निन्दा-प्रद्वेष-मत्सरैः ।**
**उपघातैश्च विघ्नैश्च ज्ञानघ्नं कर्म बध्यते"** ॥१॥

**येन** हेतुनाऽहं **नाभिजानामि । पृष्टः केनचिज्**जानता स्वयमजानता वा । 'कण्हुई त्ति' **कस्मिंश्चित्** सूत्रादौ जीवादौ वा ॥४०॥

**अह पच्छा उइज्जंति कम्मानाणफला कडा ।**
**एवमासासि अप्पाणं णच्चा कम्मविवागयं ॥४१॥**

**व्याख्या—अथे**ति वक्तव्यान्तरे **पश्चाद**बाधोत्तरकाल**मुदीर्यन्ते** विपच्यन्ते **कर्माण्यज्ञानफलानि कृतान्य**तस्तद्विघाताय यत्नः कार्यो न तु विषाद एवममुना

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रकारेणाश्वासय स्वस्थीकु**र्वात्मानं** मा वैक्लव्यं कृथा इत्यर्थः । **ज्ञात्वा कर्मविपाकं** कर्मणां कुत्सितविपाकम् ॥

इत्थं प्रज्ञाऽपकर्षमुक्त्वा तत्प्रकर्षे च नोत्सेको विधेय इति तत्प्रकर्षो व्याख्यायते—से नूणमित्यादि । **'से'** इत्युपन्यासे । **नूनं** मया **पूर्वं कर्माणि** ज्ञानप्रशंसादीनि 'ज्ञानमिह विमर्शपूर्वको बोधः' तत्**फलानि कृतानि** । **येनाहं ना**ऽपि पुमान**प्यभिजानामि पृष्टः केनापि कस्मिंश्चि**दपीति । अह पच्छा इत्यादि । **अथे**त्युत्कर्षानन्तरं 'अपच्छ त्ति' **अपथ्यान्या**यतिकटुकानि **कर्माणि अज्ञानफलानि** 'उइज्झंति त्ति' तिङ्व्यत्यया-**दुदेष्यन्ती**ति प्रज्ञाप्रकर्षे नोत्सेको विधेयो यतः—

**"पूर्वपुरुषसिंहानां विज्ञानातिशयसागरानन्त्यम् ।**
**श्रुत्वा साम्प्रतपुरुषाः कथं स्वबुद्ध्या मदं यान्ति" ? ॥१॥**

**एवमाश्वासय** प्रज्ञाऽवलेपेनावलुप्त**मात्मानं** स्वस्थीकुरु । शेषं प्रागवत् । अत्र **कालका-**चार्यकथाप्रतिबद्ध**सागरचन्द्रो**दाहरणं ज्ञेयमिति विंशः ॥४१॥

प्रज्ञाया ज्ञानरूपत्वात् तद्विपक्षभूतमज्ञानपरीषहमाह—

**निरट्ठगंमि विरओ मेहुणाओ सुसंवुडो ।**
**जो सक्खं नाभिजाणामि धम्मं कल्लाणपावगं ॥४२॥**

**व्याख्या—निरर्थकं** निष्प्रयोजनमस्मि **विरतो मैथुनात् सुसंवृत** इन्द्रिय—नोइन्द्रिय-संवरणेन **यः साक्षात्** स्फुटं **नाभिजानामि** नावबुध्ये **धर्मं** वस्तुस्वभावं **कल्याणं पापकं** वा, यदि विरतौ कश्चिदर्थः सिध्येन्नैवं ममाज्ञानं भवेदित्याशयः ॥४२॥

**तवोवहाणमादाय पडिमं पडिवज्जओ ।**
**एवं पि विहरओ मे छउमं न नियट्टई ॥४३॥**

**व्याख्या—तपो** भद्र-महाभद्रादि **उपधानमा**गमोपचाररूपमाचाम्ला**द्यादाय** चरित्वा **प्रतिमां** मासिक्यादिरूपां **प्रतिपद्यमानस्या**ङ्गीकुर्वाण**स्यैवमप्या**स्तां सामान्यचर्यया विशेषचर्यया **विहरतो**ऽप्रतिबद्धत्वेन विचरतो 'मे' **मम छद्म** ज्ञानावरणादिकर्म **न निवर्तते** नापैतीति भिक्षुर्न चिन्तयेदित्युत्तरगाथया सम्बन्धः । इत्थमज्ञाने वैक्लव्यं, ज्ञाने च नोत्सेकः कार्यं । यतः—

**"ज्ञानं मददर्पहरं माद्यति यस्तेन तस्य को वैद्यः ? ।**
**अमृतं यस्य विषायति तस्य चिकित्सा कथं क्रियते" ? ॥१॥**

इह प्रज्ञाया अभावे, अज्ञानस्य सद्भावे **आभीरक**साधोरुदाहरणम् । तथाहि—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सहोदरौ मिथः प्रीतौ **गङ्गा**कूले वणिक्सुतौ ।
वैराग्याद् व्रतमादत्तां गच्छे क्वाप्यन्तिके गुरोः ॥१॥

कर्मणोपक्रमेणासीत् तयोरेको बहुश्रुतः ।
प्रापदाचार्यतां चापि बन्धुरल्पश्रुतोऽपरः ॥२॥

शिष्याः प्रतीच्छका वाऽस्याधीयन्ते भूरिशोऽन्तिके ।
तद्वाचनादिदानेन विश्रामं लभते न सः ॥३॥

यथाऽहनि तथोषायां निद्रामप्येष नाश्नुते ।
धर्मोपदेशानुप्रेक्षा-शिक्षादौ व्यापृतोऽनिशम् ॥४॥

अल्पश्रुतस्तु भुञ्जानः शयानश्च यथेप्सितम् ।
सुष्ठ्वहान्यतिचक्रामानाक्रान्तोऽध्यापनादिभिः ॥५॥

तमखेदं तथाऽऽलोक्य पतत्सद्ध्यानमानसः ।
धृतित्यक्तो विषण्णात्मा श्रुतवान् सोऽप्यचिन्तयत् ॥६॥

"सुखदं ज्ञानमाम्नातं सन्तानमिव भोगिनाम् ।
दुःखदं तत् पुनर्मेऽभूद् दुःस्थस्येव सुताजनुः ॥७॥

***सुन्दरेणापि किं तेन येनात्मा परिखिद्यते ? ।***
***कर्णपालीत्रुटिर्यस्मात् तेन हेम्नाऽप्यलं यतः ॥८॥***

***श्रूयते कमलोत्पत्तिरब्धेरिव शिवं श्रुतात् ।***
***द्वयोरन्यत् परं क्षारनीरात् क्लेशाच्च नेक्ष्यते ॥९॥***

शिवे ध्यानप्रधानानां फल्गुनेह श्रुतेन किम् ? ।
शिवं हि ज्येष्ठचक्र्याद्या विश्रुता विश्रुता ययुः ॥१०॥

श्रुतखेदवियुक्तस्य सम्यग्दृष्टेः क्रियावतः ।
सिद्धि**र्माषतुषस्ये**व श्रुतमात्रान्न तु क्वचित् ॥११॥

अवर्मेण रणे वीरः स्वमिषुभ्यो रिपूत्कटे ।
आत्मानं शोषयिष्यामि श्रुतार्थिभ्यः कथं हहा ! ॥१२॥

पिपीलिकामुखस्थस्य गुडस्येव कथञ्चन ।
सम्भाव्यते ममैतेभ्यः क्षीणस्य न शुभा स्थितिः ॥१३॥

***रक्तो गुणान् विरक्तस्तु दोषानेव हि वीक्षते ।***
***इति श्रुतविरक्तात्मा नैतद् भावयति स्म सः ॥१४॥***

Jain Education International 2010_02                For Private & Personal Use Only                www.jainelibrary.org

*भावोपकारः पुण्येषु श्रेष्ठैः श्रेष्ठतयोच्यते ।*
*श्रुतज्ञानं विना चैष न सिद्धिमधिरोहति ॥१५॥*

तत् पञ्चसु श्रुतं मुक्त्वाऽन्यज्ञानानां हि मूकता ।
केवल्यपि श्रुतेनैव परार्थं साधयेद् यतः ॥१६॥

*विवेको विनयः कीर्तिः सर्वं विद्यानिबन्धनम् ।*
*तां विना तदभावेन नरोऽपि पशुरुच्यते ॥१७॥*

विद्वानेव हि सूक्तौघं युक्तं मुक्तोपमैर्गुणैः ।
सदानन्दो वदन् संसद्भामिन्यास्तिलकायते ॥१८॥

पश्यन्ति रसिका नेत्रानन्दस्यन्दनिबन्धनम् ।
बहुश्रुतमुखं सर्वे चकोराः शशिनं यथा ॥१९॥

श्रुतज्ञानाधिकः किञ्चित् क्रियाहीनोऽपि शस्यते ।
स्वान्यार्थाभ्यामलं नैव ज्ञानहीनः क्रियाऽधिकः ॥२०॥

उक्तञ्च—

**"[१]छट्ठट्ठम-दसम-दुवालसेहिं अबहुस्सुयस्स जा सोही ।**
**एत्तो य णेगगुणा सोही जिमियस्स नाणिस्स"** ॥२१॥

मनस्त्यक्त्वा व्रताध्वानं कदाचिद् व्रजदुत्पथम् ।
किं नियन्त्रयितुं शक्यं दृढं श्रुतगुणं विना ? ॥२२॥

*तेषां सुवासराः श्लाघ्यास्तेषां जन्म फलेग्रहि ।*
*अधीयन्ते श्रुतं भक्त्याऽध्यापयन्ति च ये परान् ॥२३॥*

पतिं विना मृगाक्षीव विना ज्ञानं क्रियाऽपि हि ।
स्वसाध्यं साधयेन्नैव धात्री चाम्भोधरं विना ॥२४॥

*ये द्विषन्त्यविगानाय श्रुतज्ञानाय भास्वते ।*
*ते तामसप्रकृतयो न प्रकाशपदोचिताः" ॥२५॥*

इति ध्यायन् बबन्धासौ ज्ञानद्वेषास्पदीकृतः ।
शर्ममर्माविधं कर्म ज्ञानावरणमुल्बणम् ॥२६॥

---

१. षष्ठाष्टम-दशम-द्वादशैरबहुश्रुतस्य या शोधिः ।
एतस्माच्चानेकगुणा शोधिर्जिमितस्य ज्ञानिनः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अनालोच्याप्रतिक्रम्य तत् पापस्थानमुत्कटम् ।
पूर्णायुः क्रमशो नाके नाक्यभूद् व्रतयोगतः ॥२७॥

तच्च्युतोऽभवदाभीरदारको धीरधीर्युवा ।
गोदोहादिक्रियादक्षः क्षमाङ्गः क्षीरपानतः ॥२८॥

पर्यणैषीच्च युवतिं कुलीनां प्रणयप्रियाम् ।
सुतामसूत सा काले सरसी पद्मिनीमिव ॥२९॥

इयत्ता रूपलक्ष्मीनां **भद्रा**ऽऽख्या साऽऽप यौवनम् ।
लावण्यामोदलुब्धानां कामं काम्या युवालिनाम् ॥३०॥

अन्यदा सर्पिषां कुम्भैर्भृत्वाऽनो विक्रयाशया ।
समं वल्लवसार्थेन स प्रतस्थे पुरं प्रति ॥३१॥

**भद्रा** सारथ्यमाधत्त तत्साहाय्यकरी तदा ।
यूनामसाध्यचित्तानां साधनायेव सोद्यमा ॥३२॥

तदानीं वल्लवाः सर्वे तद्रूपाक्षिप्तचेतसः ।
उपेक्ष्योक्षक्रियाक्षेपं तामेवैक्ष्यन्त मोहिनीम् ॥३३॥

एकाऽप्यविक्षत सा तेषां सर्वेषां हृदयं क्षणात् ।
सुरेवोन्मदयामास विकृता चैकहेलया ॥३४॥

रागान्मार्गममार्गं वाऽविमृश्य परितः समे ।
तस्याः स्वानांसि ते निन्युस्तद्रूपैकपिपासया ॥३५॥

तेषां पीतेऽपि तद्रूपे तत्पिपासा न्यवर्ति न ।
नातो निवर्तयामासुः स्वानांसि स्पर्द्धयेक्षिणः ॥३६॥

तेषां मनांसि चक्षूंषि तामभाङ्क्षुः समन्ततः ।
अनांस्यथोत्पथेऽभाङ्क्षुर्विषमे दृषदाकुले ॥३७॥

अत्रुटन्नायसा बन्धा अस्फुटन् सर्पिषा घटाः ।
अलुठन् भुवि सर्पींषि व्यलक्ष्यन्त ततश्च ते ॥३८॥

तस्या **अशकटे**त्याख्यामकुर्वन्त च तत्पितुः ।
**अशकटा**पितेत्याहुः को रुणद्धि नृणां मुखम् ? ॥३९॥

तादृग्व्यतिकरालोकविगलद्रागबन्धनम् ।
विमर्शमकरोदेवं मन**स्यशकटा**पिता ॥४०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकैषा किमनेकेषां कुलीना दयिता भवेत् ? ।
तथाऽपि प्रेम कुर्वाणास्त्रपन्ते किममी न हि ! ॥४१॥

इहैव स्वार्थनाशोऽभूदेतेषां कामकाम्यया ।
साऽपि नेति द्वयभ्रष्टा आसन् हा ! पापचेष्टितम् ॥४२॥

*रक्त-शुक्रादिनिष्पन्ने पावित्र्यलववर्जिते ।*
*स्त्रीवपुष्यपि किं रागकारणं मुग्धचेतसः ? ॥४३॥*

*कूटकार्षापणमिवाविचारितमनोहरम् ।*
*इदं वपुर्न रागार्हं विचारविषयीकृतम् ॥४४॥*

*रोगाभोगजराकीर्णे जीर्णे तार्ण इवास्थिरे ।*
*स्वशरीरेऽपि न न्याय्या स्पृहाऽन्याङ्गेषु किं पुनः ? ॥४५॥*

*धिग् मोहवशगं जीवं यो रतिं कुरुतेतराम् ।*
*अपावनेषु भावेषु विट्कीटक इवानिशम् ॥४६॥*

अज्ञातपरमार्थत्वाद् भवन्त्वेते यथा तथा ।
स्थाने नातः परं स्थातुं मम तत्त्वं विजानतः ॥४७॥

उद्वाह्यैकेन गोपेन तां सर्वस्वमपि स्वकम् ।
तस्मै दत्त्वा ततो गत्वा क्वापि गच्छेऽभवद् व्रती ॥४८॥

शिक्षाद्वयसमायुक्तस्त्रिगुप्तः समितिश्रितः ।
गुरूपान्ते श्रुताभ्यासी स संवेगी व्यधात् तपः ॥४९॥

उत्तराध्ययनान्येष योगारूढ उपाक्रमत् ।
पठितुं तानि तु त्रीणि पापठीति स्म हेलया ॥५०॥

तुर्ये तस्मिन्नुपक्रान्ते कर्म ज्ञानप्रदोषजम् ।
उदियाय ततस्तस्याचाम्लयोः कृतयोरपि ॥५१॥

एकोऽप्यालापको नागात् पठितोऽपि निरन्तरम् ।
ज्ञात्वैवं गुरवोऽप्याख्यन् किं तेऽनुज्ञाप्यतामिदम् ? ॥५२॥

सोऽभ्यधादस्य को योगस्तेऽप्याहुर्यावदेति न ।
इदमध्ययनं तावदाचाम्लान्येव सन्तु भोः ! ॥५३॥

किं त्वदो दुष्करं तेऽदोऽनुज्ञामादत्स्व भद्रक ! ।
कार्यं हि तत् तपो यस्मान्न मनो मङ्गुलं स्मरेत् ॥५४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अनुज्ञयाऽलमित्युक्त्वा मुनिर्यावत् तदागमम् ।
आचाम्लानि प्रत्यजानात् किं दुःसाध्यं महौजसाम् ? ॥५५॥

वीक्षमाणः परान् प्रज्ञाज्ञानातिशयशालिनः ।
स्वस्मिंस्तु तदभावेऽपि वैक्लव्यं स तु नाकरोतु ॥५६॥

द्वादशाब्दीं ततोऽकार्षीदाचाम्लानि स धैर्यवान् ।
प्रज्ञाद्याशंसया मुक्तः कर्मक्ष्पणमात्रधीः ॥५७॥

प्रज्ञाऽस्तु यदि वा माऽस्तु न त्याज्यः पठनोद्यमः ।
स्वाध्यायस्तु भवेदेव ध्रुवं कर्मक्षयस्ततः ॥५८॥

वाचनादिप्रयत्ने ध्यानात् तत्कर्मणः क्षयात् ।
तदध्ययनमध्यैष्ट ततः शेषमपि श्रुतम् ॥५९॥

महाश्रुतधारीभूय प्रज्ञाऽनुत्सेकवान् सुधीः ।
ज्ञानावलेपनिर्मुक्तो विजहार वसुन्धराम् ॥६०॥

क्रमात् केवलमवाप्य प्रतिबोध्याङ्गिनो बहून् ।
ध्यानाब्दनष्टकर्मोष्मा महोदयमगाद् मुनिः ॥६१॥

इति विंशत्येकविंशत्योः प्रज्ञाऽज्ञानपरीषहयोः समुदितयो**राभीरक**कथा ॥४३॥

तथा अज्ञानाद् दर्शनेऽपि कश्चित् संशयीतेति तत्परीषहमाह—

**नत्थि नूणं परलोए इड्ढी वावि तवस्सिणो ।**
**अदुवा वंचिओ मि त्ति इइ भिक्खू न चिंतए ॥४४॥**

**व्याख्या—नास्ति नूनं परलोक ऋद्धिर्वाऽप्या**मर्षौषधादिका **तपस्विनः** पादरजसा प्रशमनं सर्वरुजां साधवः क्षणात् कुर्युः । त्रिभुवनविस्मयजननाद् दद्युः कामांस्तृणाग्राद् वेत्यादिका च तस्या अप्यभावात् । **अथवा वञ्चितोऽस्मि** शिरस्तुण्डमुण्डनादिना 'भोगादिनाम्' इति गम्यम् । यतः—"**तपांसि यातनाश्चित्राः संयमो भोगवञ्चना**" । इत्या**द्येतद् भिक्षुर्न चिन्तयेद्** यतोऽहं सुखी दुःखी चेत्यादि स्वसंवेदनासिद्धत्वादयमात्मा स्वप्रत्यक्ष एव केवलिनां सर्वेऽप्यात्मानः प्रत्यक्षा एवेति । ऋद्धयोऽप्यत्र कालानुभावतो न सन्ति, तथाऽपि न तासामभावः, महाविदेहेषु सद्भावाद् भोगवञ्चनाकल्पनमप्ययुक्तम्, तेषां विपाककटुकत्वात् । यतः—

**"आपातमात्रमधुरा विपाककटवो विषोपमा विषयाः ।**
**अविवेकिजनाचरिता विवेकिजनवर्जिताः पापाः" ॥१॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तपोऽपि न यातना, यथाशक्तिविधानेन कर्मक्षयहेतुत्वात् तस्य ॥४४॥

तथा—

**अभू जिणा अत्थि जिणा अदुवा वि भविस्सई ।**
**मुसं ते एवमाहंसु इति भिक्खू न चिंतए ॥४५॥**

**व्याख्या—अभूवन् जिना** रागादिजेतारः । **अस्ति** प्राकृतत्वात् सन्ति **जिना** विदेहापेक्षया । **अथवा भविष्यन्ति** जिनाः । **मृषा**ऽलीकं **ते** जिनास्तत्त्ववादिन **एव-माहुर्ब्रुवते इति भिक्षुर्न चिन्तयेत्** । सर्वज्ञस्यानुमानादिप्रमाणसिद्धत्वात् । जैनप्रवचन-दार्ढ्येनासौ परीषहः सोढव्यः **सुलसा**वत् । तथाहि—

**मगधासु** पुरे **राजगृहे** शौर्यगुणास्पदम् ।
अभूत् **प्रसेनजिद्** भूपः सारथि**र्नाग**नामकः ॥१॥

**सुलसा**ऽऽसीत् प्रिया तस्यानलसा धर्मकर्मसु ।
पतिव्रतात्व-सौजन्यौदार्यादिगुणसेवधिः ॥२॥

वीरगीरमृतास्वादपुष्टिजुष्टं हि यन्मनः ।
मिथ्यादृग्वाग्विषयस्पर्शं न शिश्राय कदाचन ॥३॥

न लक्ष्म्या न पतिप्रेम्णा न सखीभिर्न बान्धवैः ।
जिनाज्ञाराधनेनैव सा मेने शर्म निर्भरम् ॥४॥

भुक्ता अनन्तशः कामाः सम्बन्धा अप्यनन्तशः ।
पितृ-पुत्रादयः प्राप्ताः सोपेक्षमास तानिति ॥५॥

परं **नागः** सुताभावाच्छून्याः पश्यन् दिशो दश ।
ताम्यति स्मतमामन्तर्गल्लहस्तो निरन्तरम् ॥६॥

तृणैकपूलकाधारदीप्तवह्निप्रकाशवत् ।
स लक्ष्मी-नृपमानादि सुताभावादमन्यत ॥७॥

**सुलसा**ऽथ प्रियं प्रोचे सुधारसकिरा गिरा ।
चिन्तया तेऽनया नाथ ! किं नु कातरकार्यया ? ॥८॥

अङ्गभूर्मयि चेन्नासीन्माऽस्तु नाम कनीः पराः ।
उद्वाह्योत्पादयैतांस्त्वं सर्वं ह्युद्यमशालिनाम् ॥९॥

**नागो** जगाद स प्रेमा यातु यातु रसातलम् ।
यत्सीमा स्वार्थसंसिद्धिर्धर्मद्रव्यं गतेरिव ॥१०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नापरां दयितां प्राणेश्वरि ! कुर्वेऽत्र जन्मनि ।
भुक्त्वा कल्पलताच्छायां कपिकच्छूं श्रयेत कः ? ॥११॥

त्वत्कुक्षिपद्मिनीहंसमीहे निश्चितमात्मजम् ।
सुरोपयाचितैस्तस्मात् कान्ते ! जनय नन्दनम् ॥१२॥

त्रयान्यतमयोगेन परं दयितदैवतम् ।
नारिरिप्सामि मुक्त्वैकमर्हन्तं स्वेष्टसिद्धये ॥१३॥

अर्हद्धर्मानुभावेन धर्मपुत्रादयः सुताः ।
**कुन्त्या** अपि निशाम्यन्ते विश्वविश्वैकविश्रुताः ॥१४॥

तथैवाहं त्रिधा शुद्ध्याऽऽधास्ये यत्नं निरन्तरम् ।
दधती ब्रह्म देवार्चा-तपःप्रभृति तन्वती ॥१५॥

ततः सेत्स्यति मेऽभीष्टं माऽत्रार्थे संशयं कृथाः ।
यस्य सिद्धिप्रदानेऽस्ति क्षमत्वं तस्य किं ह्यदः ? ॥१६॥

इत्याख्याय विशिष्यैषाऽर्हद्धर्मे रताऽजनि ।
सस्मार नान्यदेवानां मनसाऽपि मनागपि ॥१७॥

धर्मस्थैर्यमितः शक्रः **सुलसायाः** सभासदाम् ।
प्रशशंस पुरस्तुष्टः साधर्मिकसमाधिकृत् ॥१८॥

सर्वेऽप्यमंमनुः शाक्रं वचः प्रायः सुदृष्टयः ।
परीक्षाऽर्थं पुनर्देव एको भुवमवातरत् ॥१९॥

प्राविशत् **सुलसा**गेहं साधुमुद्राऽभ्यलङ्कृतः ।
सत्कृत्यान्तरलीनाऽपि सोदस्थाद् वीक्ष्य तं द्रुतम् ॥२०॥

भक्त्या प्रणम्य चापृच्छत् स्वगेहागमकारणम् ।
सोऽवदल्लक्षपाकाख्यतैलार्थं वैद्यशासनात् ॥२१॥

साऽपि हृष्टाऽऽशु तैलस्य चिन्तयन्ती कृतार्थताम् ।
आनैषीत् तद्घटं यावत् तावत् तमभनक् सुरः ॥२२॥

साध्वर्थमुपनीतस्य न तस्यापि फलं मया ।
तैलस्यास्यादधे सेति ध्यायन्ती विषसाद न ॥२३॥

द्विगुणप्रोल्लसद्भावा द्वितीयं तमुपानयत् ।
तमप्यभाङ्क्षीत् स ततस्तार्त्तीयीकं तथाऽकरोत् ॥२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

घटभेदेऽपि नाभेदि विषादैर्वज्रवन्मनः ।
तस्याः केवलमल्पत्वं जजल्प स्ववृषस्य सा ॥२५॥

"पुण्यस्याभ्युदयो मन्दः पापस्यामन्द एव मे ।
ग्लानकार्ये न मे जातं स्वमिति स्वं निनिन्द सा" ॥२६॥

दृष्ट्वा सुविस्मितो देवस्तस्या भावमभङ्गुरम् ।
प्रकटीभूय तां प्रोचे धर्मशीले ! वरं वृणु ॥२७॥

कल्याणि ! तव शक्रोऽद्य श्राद्धत्वाय सुराग्रतः ।
अश्लाघिष्ट ततस्तस्य परीक्षाऽर्थमिहागमम् ॥२८॥

तद्वर्णनादप्यधिकं धर्मस्थैर्यं निरीक्ष्य ते ।
अभून्मे विस्मयः स्वान्ते विश्वादृष्टाद्भुतेक्षणात् ॥२९॥

त्वय्यस्ति मे स्थिरा प्रीतिरस्तु चैषा फलेग्रहिः ।
अतो मत्तः कमप्यर्थं प्रार्थयस्व महाशये ! ॥३०॥

**सुलसा** सा द्रुतं प्राह तृष्णा काचिन्न मे हृदि ।
तुष्टो दयिततोषाय मह्यं देहि तनूरुहान् ॥३१॥

सोऽपि द्वात्रिंशतं तस्यै गुटिकाः प्रददौ मुदा ।
अब्रवीच्च क्रमादेता भक्षिताः स्युः सुतप्रदाः ॥३२॥

कार्ये जाते पुनः स्मर्य इति प्रोच्य ययौ सुरः ।
**सुलसा**ऽपि ततस्तुष्टा विममर्शेति चेतसि ॥३३॥

इयतां बालकानां को जातानां मर्दिता मलम् ? ।
तदेकशोऽदनादस्तु द्वात्रिंशल्लक्षणः सुतः ॥३४॥

विमृश्येत्याद ताः सर्वाः **सुलसा** तत्प्रभावतः ।
द्वात्रिंशत्प्रमिता गर्भाः स्थितिं तदुदरेऽभजन् ॥३५॥

महाभारं हि गर्भाणामसहिष्णुः कृशाङ्गिका ।
सस्मार सा सुरं कायोत्सर्गमाधाय तस्थुषी ॥३६॥

स्मृतमात्रः सुरः सोऽप्यागत्य तामब्रवीदिदम् ।
मामस्मार्षीः कुतो हेतोः साऽप्याख्यन्निजचेष्टितम् ॥३७॥

त्रिदशोऽप्याह भो भद्रे ! न चारु विहितं त्वया ।
अमोघशक्तयः पुत्रा भाविनो यद्यपीह ते ॥३८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परं द्वात्रिंशदप्येते समानायुष्कतावशात् ।
समकालं विपत्स्यन्ते दुर्लङ्घ्या भवितव्यता ॥३९॥

विषादं मा कृथा गर्भव्यथामपहरामि ते ।
तथैव कृत्वा स सुरस्त्रिदशाश्रयमाश्रयत् ॥४०॥

स्वस्थदेहा बभारैषा गर्भानुर्वीवदङ्कुरान् ।
**अहो ! पुण्यस्य माहात्म्यं यद् देवा अपि किङ्कराः ॥४१॥**

प्रासूत **सुलसा** काले पूर्णे द्वात्रिंशतं सुतान् ।
द्वात्रिंशल्लक्षणोपेतान् मूर्त्तान् वीररसानिव ॥४२॥

नागो नागरिकं लोकमाकार्य निजवेश्मनि ।
तेषां जन्मोत्सवं कृत्वा नामान्यपि विनिर्ममे ॥४३॥

सञ्ज्ञातयौवनोल्लेखाः **श्रेणिक**क्षितिशासितुः ।
जीवितव्यमिवाभूवन्ननिशं पार्श्ववर्त्तिनः ॥४४॥

**चेटक**क्ष्माभृतः पुत्रीं **सुज्येष्ठा**मभिलाषुकः ।
**वैशाली**मन्यदा राजा यियासु**र्नाग**नन्दनान् ॥४५॥

महारथान् रथारूढान् रथी प्रथितपौरुषान् ।
सहायीकृत्य तद्दत्तसङ्केतप्रस्थितः पुरात् ॥४६॥ **युग्मम्**

सुरङ्ग्याऽविशत् सौधं दूतज्ञाततदागमा ।
प्राग्दृष्टाचित्रफलकरूपसंवादमोदिनी ॥४७॥

यियासुरथ **सुज्येष्ठा चेल्लणां** भगिनीं मुदा ।
प्रतिश्रुतैकसंवासां तं वृत्तान्तमवेदयत् ॥४८॥ **युग्मम्**

साऽऽचचक्षे पुरा त्वं मामारोपय महारथे ।
त्वद्वियोगं सहे नाहमित्यारोप्यत सा तया ॥४९॥

गता स्वयं समानेतुं रत्नापूर्णकरण्डिकाम् ।
यावत् तावत् सौलसेयाः **श्रेणिके**शं बभाषिरे ॥५०॥

अत्र वैरिगृहे राजन् ! न स्थातुं युज्यते चिरम् ।
तत्प्रेरितः समादाय **चेल्लणां** व्याघुटन्नृपः ॥५१॥

आगादादाय **सुज्येष्ठा** यावद् रत्नकरण्डिकाम् ।
नैक्षिष्ट **श्रेणिकं** तावद् घटान्तःस्थितदीपवत् ॥५२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जाम्या वियोगदुःखार्ताऽपूर्णकामा विषादिनी ।
**सुज्येष्ठा** पूच्चकारोच्चैर्ह्रियते **चेल्लणे**ति हा ! ॥५३॥
अनर्हकुलजातोऽयं कुलीनां मम नन्दिनीम् ।
हृत्वा यातीति रोषेण समनह्यत **चेटकः** ॥५४॥
तावन्मयि सति स्वामिन्नाक्षेपस्तेऽत्र कस्तमाम् ? ।
भूपं वैरङ्गिको वीरो निषेध्येत्यभ्यषेणयत् ॥५५॥
निर्गच्छतः सुरङ्गायाः **सुलसा**यास्ततः सुतान् ।
वैरङ्गिकोऽवधीदेकबाणेनैकनिपातनात् ॥५६॥
सुरङ्गासङ्कटत्वेन यावद् द्वात्रिंशतं रथान् ।
आकर्षयद् रथी तावद् दूरेऽगा**च्छ्रेणिको** नृपः ॥५७॥
ततो वैरङ्गिको योधः पूर्णापूर्णमनोरथः ।
**चेटका**य नरेशाय तं वृत्तान्तं न्यवेदयत् ॥५८॥
**श्रेणिको**ऽपि द्रुतं राजगृहं सम्प्राप्य **चेल्लणाम्** ।
गान्धर्वेण विवाहेनोपयेमे प्रेमपूरितः ॥५९॥
अथ शुश्रुवतु**र्नाग-सुलसे** मगधेशितुः ।
मुखादमङ्गलं तादृक् सर्वेषां तनुजन्मनाम् ॥६०॥
रुरुदतुर्मुक्तकण्ठं रोदसीपूरकैः स्वरैः ।
भूपृष्ठे च व्यलुठतामेतौ मूर्च्छाविसंस्थुलौ ॥६१॥
हा ! नौ कृतान्त ! निस्त्रिंश ! ग्रसतोऽद्य समं सुतान् ।
तवैकस्यापि नो जज्ञे जठरस्य विदीर्णता ॥६२॥
क्रमेण प्राणिनां मृत्युं मृत्यो ! त्वं कुरुषे स किम् ? ।
समं संहरतस्तांस्ते विस्मृतोऽस्मदभाग्यतः ॥६३॥
दम्पत्योः शोकपाथोधिमग्नयोरेतयोरथ ।
**श्रेणिकोऽभय**युक् तत्र समेत्येत्यब्रवीद् वचः ॥६४॥
मा शोचतममी भावाः सर्वे भुवि विनश्वराः ।
सर्वसाधारणे मृत्यौ तत् कः शोकं समुद्वहेत् ? ॥६५॥
इती वैराग्यसाराभिर्वाग्भिरेतौ विवेकिनौ ।
सम्बो**ध्याभय**युक् राजा निजं धाम जगाम सः ॥६६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्पूर्वजनुषो मत्वा विपाकं दुष्टकर्मणाम् ।
विशोकौ दम्पती तौ तु यतेते धर्मकर्मसु ॥६७॥

अन्यदा समवासार्षीच्**चम्पायां** चरमो जिनः ।
सुरासुरनराधीशसेवितांह्रिसरोरुहः ॥६८॥

तत्र दण्डधरश्छत्री श्री**वीर**श्रावकाग्रणीः ।
परिव्रा**डम्बडाभि**ख्योऽनंसीदेत्य जगत्प्रभुम् ॥६९॥

निषिद्य च यथायोग्ये स्थाने श्रद्धाविशुद्धधीः ।
स देशनां सुधादेश्यां शुश्राव श्रोत्रशर्मदाम् ॥७०॥

भक्त्या नत्वा जिनाधीशं यावद् **राजगृहं** प्रति ।
प्रतस्थे **सोऽम्बड**स्तावत् स्वामिन् स्वयमौच्यत ॥७१॥

तत्र प्राप्तो नागरथिप्रेयसीं **सुलसा**ऽभिधाम् ।
पृच्छेरस्माकमादेशाद् वार्तां धर्मसुखावहाम् ॥७२॥

तथेति प्रतिपद्यासौ व्योम्ना गत्वाऽथ तत्पुरम् ।
**सुलसा**सद्मनो द्वारे क्षणं स्थित्वेत्यचिन्तयत् ॥७३॥

अहो ! त्रिजगतीभर्तुः पक्षपातो महाद्भुतः ।
**सुलसा**यामतोऽमुष्याः करिष्येऽद्य परीक्षणम् ॥७४॥

वैक्रियाख्यमहालब्ध्या कृत्वा रूपान्तरं जवात् ।
वेश्म प्रविश्यायाचिष्ट भिक्षां स **सुलसां** सुधीः ॥७५॥

भिक्षामपास्य सत्पात्रं नान्यस्मै प्रदाम्यहम् ।
इत्यादृतां प्रतिज्ञां स्वां **सुलसा** व्यस्मरन्न हि ॥७६॥

तस्मै सा याचमानाय भिक्षामक्षूणवैभवा ।
न ददौ स्वप्रतिज्ञातं सन्तो लुम्पन्ति न क्वचित् ॥७७॥

ततो निःसृत्य तद्गेहात् पुरगोपुरसन्निधौ ।
पूर्वस्यां विचकारासौ चतुर्वक्त्रविभूषितम् ॥७८॥

चतुर्भुजं ब्रह्मसूत्र-जटाजूटकमण्डितम् ।
अक्षमालाऽङ्कितं ब्रह्मरूपं सद्धंसवाहनम् ॥७९॥ **युग्मम्**

**सावित्री**सहितः पद्मासनाऽसीनो **हरिप्रभः** ।
धर्मं दिदेश लोकेभ्यः साक्षाद् ब्रह्मेव **सोऽम्बडः** ॥८०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तन्नमस्याकृते लोकः पौरः सर्वः समाययौ ।
विहाय **सुलसा**मेकां सम्यक्त्वे निश्चलाशयाम् ॥८१॥

दक्षिणस्यां द्वितीयेऽह्नि सो**ऽम्बडो** गरुडासनः ।
शङ्ख-चक्र-गदा-शार्ङ्गकरोऽस्थाद् **विष्णु**रूपभाक् ॥८२॥

अप्यच्युतप्रघोषेण जगद्विभ्रमकारिणा ।
**सुलसा** नागमत् तत्र मिथ्यादृक्सङ्गभीलुका ॥८३॥

अ**थाम्बड**स्तृतीयेऽह्नि पश्चिमायां शशाङ्कवान् ।
कृत्तिवासास्त्रिनयनः **शूलपाणिः** कपालभृत् ॥८४॥

रुण्डमाली च खट्वाङ्गी भस्मोद्धूलितविग्रहः ।
**पार्वती**मण्डितार्धाङ्गो भस्मीकुर्वन् मनोभवम् ॥८५॥

ईश्वरीभूय पौराणामाख्यद् धर्ममसौ ततः ।
दृशाऽपि नेक्षितः शुद्धश्राद्ध्या **सुलस**या परम् ॥८६॥

चतुर्थे दिवसेऽथासावुत्तरस्यां महाद्भुतम् ।
कृत्वा समवसरणं सतोरणचतुर्मुखम् ॥८७॥

जिनीभूय स्थितस्तत्र जनैर्गत्वा नमस्कृतः ।
धर्मोपदेशदानेनान्वगृह्णात् स तु नागरान् ॥८८॥

तत्राप्यनागतामेनां **सुलसाम**वबुध्य सः ।
प्रैषीदेकं नरं तस्याः क्षोभार्थं सोऽपि तामवक् ॥८९॥

**सुलसे** ! समवासार्षीदर्हंस्त्वदतिवल्लभः ।
विज्ञे ! तत् तन्निनंसायै किमर्थमलसायसे ? ॥९०॥

तमुवाच महाभाग ! नायं स्वामी जिनेश्वरः ।
विहाय श्री**महावीरं** परोऽर्हन् नास्ति भूतले ॥९१॥

सोऽपि प्रत्यब्रवीद् भद्रे ! पञ्चविंशोऽधुना जिनः ।
उत्पेदेऽतः स्वयं गत्वा मुग्धे ! तं किं न वन्दसे ? ॥९२॥

सा प्राह तं न जायेत पञ्चविंशः क्वचिज्जिनः ।
कोऽप्येष कपटाटोपैर्मुग्धान् वञ्चयते नरान् ॥९३॥

***मायामृगः स आचख्यौ यद्येवं शासनोन्नतिः ।***
***जायते तर्हि को भद्रे ! दोषपोषः प्रसर्पति ? ॥९४॥***

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तं साऽवोचत् प्रमुग्धोऽसि काऽलीकेन प्रभावना ? ।
किन्त्वपभ्राजना लोकोपहासादेव जायते ॥९५॥

स गत्वाऽ**थाम्बड**स्याग्रे तद्वृत्तान्तं न्यवेदयत् ।
श्रुत्वा स दर्शनस्थैर्यं **सुलसा**या विसिष्मये ॥९६॥

युक्तं सभायां श्री**वीर**स्तां स्वयं समभावयत् ।
सम्यक्त्वाद् यामहं मायाव्यपि नाचीचलन्तमाम् ॥९७॥

स संहृत्य प्रपञ्चं त**मम्बडो** मूलरूपभृत् ।
अर्हद्धर्मगृहमिव प्राविक्षत् **सुलसा**गृहम् ॥९८॥

सहसोत्थाय साऽपृच्छत् स्वागतं धर्मबान्धव ! ।
**वीर**स्य त्रिजगद्भर्तुरुत्तमोपासकस्य ते ॥९९॥

मातेवातुल्यवात्सल्याच्छौचं कृत्वा च तत्पदोः ।
वन्दयामास वन्दारुं तं चैत्यानि स्ववेश्मनः ॥१००॥

**अम्बडो**ऽप्यादृतस्तस्याः शाश्वताशाश्वतार्हताम् ।
बिम्बान्यवन्दयद् भक्त्या वन्दितानि स्वयं मुदा ॥१०१॥

तामूचे च त्वमेवैका पुण्यवत्यसि भारते ।
यस्या **वीरो** वृषोदन्तं मदास्येनाद्य पृच्छति ॥१०२॥

तदाकर्ण्य सकर्णा सा प्रणम्य परमेश्वरम् ।
अस्तौत् प्रशस्तया वाचा रोमाञ्चाञ्चितसञ्चरा ॥१०३॥

तदाशयं परिज्ञातुं विज्ञस्तामूचिवानयम् ।
मयाऽत्रायातमात्रेण वार्ताऽश्रावीति लोकतः ॥१०४॥

यदत्र **विष्णु-ब्रह्मा**द्या अवतेरुः सुराः पुरे ।
शुश्रूषवो जना जग्मुस्तत्पार्श्वं भवती न हि ॥१०५॥

कूणयन्त्यथ सा नासां दुर्गन्धादिव तद्गिरः ।
आख्यद् विदन्नपि कथं भवान् भ्राम्यति बान्धव ! ॥१०६॥

स्त्रीसेवानिरताः शत्रुवधबन्धनलालसाः ।
तेऽमी **ब्रह्मा**दयः कीदृग् धर्मं वक्ष्यन्त्यधर्मिणः ? ॥१०७॥

भ्रातः ! श्रीमन्**महावीराद्** धर्ममाप्य कथं मनः ।
द्रष्टुं तानिष्टविधिष्ठानुत्सहेत ममाधुना ॥१०८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संश्लाघ्य सोऽ**म्बडो**ऽत्यर्थं **सुलसा**यै गतो गृहम् ।
साऽपि स्वहृदये नित्यं बभार शुचि दर्शनम् ॥१०९॥

श्रुत्वेति **सुलसा**वृत्तं दृग्दार्ढ्यकरमद्भुतम् ।
स्थिरीभवत सम्यक्त्वे यथा स्यात् परमं पदम् ॥११०॥

इति द्वाविंशे सम्यक्त्वपरीषहे **सुलसा**श्राविकाकथा ॥

इत्युक्ता द्वाविंशतिपरीषहाः । नन्वेते कस्मिन् कर्मण्यवतरन्तीत्युच्यते—ज्ञानावरणे कर्मणि प्रज्ञाऽज्ञाने । अन्तरायेऽलाभः । चारित्रमोहनीये अरत्यचेल-स्त्री-नैषेधिकी-याञ्चा-सत्काराक्रोशरूपाः सप्त । दर्शनमोहनीये दर्शनम् । वेदनीये कर्मणि क्षुत्-तुट्-शीतोष्ण-दंश-चर्या-शय्या-मल-वध-रोग-तृणस्पर्शपरीषहा एकादशेति ॥४५॥

अथाध्ययनं निगमयन्नाह—

**एए परीसहा सव्वे कासवेणं पवेइया ।**
**जे भिक्खू ण विहन्निज्जा पुट्ठो केणइ कण्हुई ॥४६॥ त्ति बेमि ॥**

**व्याख्या—एते परीषहाः काश्यपेन वीरेण प्रवेदिताः । यान्** 'ज्ञात्वेति शेषः' **भिक्षुर्न विहन्येत** पराजीयेत **स्पृष्टो** बाधितः । **केनाप्येक**तरेणापि परीषहेण कस्मिंश्चिद् देशे काले वेति। **इति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥४६॥ (ग्रं० २२७५)

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां द्वितीयं परीषहाध्ययनं समाप्तम् ॥२॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# तृतीयं चतुरङ्गीयाध्ययनम्

अथ परीषहसहनं मानुषत्वादिचतुरङ्गदुर्लभत्वालम्बने स्यादिति चतुरङ्गीयाध्ययनं व्याख्यायते । तस्येदमादिसूत्रम्—

**चत्तारि परमंगाणि दुल्लहाणीह जंतुणो ।**
**माणुसत्तं सुई सद्धा संजमंमि य वीरियं ॥१॥**

**व्याख्या—चत्वारि परमाङ्गानि** प्रधानहेतवः प्रक्रमाद् धर्मस्य । परमत्वं चाङ्गानां मुक्तिप्राप्तावासन्नोपकारित्वात् । **दुर्लभानि दुष्प्रापाणीह** संसारे **जन्तोः** प्राणिनस्तान्येवाह— **मानुषत्वम्** । यतः—

"[1]जम्म-जरा-मरणजले नाणाविहवाहिजलयराइन्ने ।
भवसायरे अपारे दुलहं खलु माणुसं जम्मं" ॥१॥

**श्रुतिः** श्रवणं धर्मस्यैवालस्यादिभिस्त्रयोदशभिः कारणैर्दुर्लभा । **श्रद्धा** श्रद्धानं धर्मस्य दुर्लभा । यदुक्तम्—

"[2]कुबोह-मिच्छाभिनिवेसजोगओ कुसत्थ-पासंडिविमोहिया जणा ।
न सद्दहंते जिणनाहदेसियं चयंति बोहिं पुण के वि पावियं" ॥१॥

**संयमे** सप्तदशरूपे **वीर्यं** सामर्थ्यं दुर्लभम् । मानुषत्वादि-दुर्लभत्वे चोल्लगादयो दश दृष्टान्तास्ते चामी—

"[3]चोल्लग [2]पासग [3]धन्ने [4]जूए [5]रयणे य [6]सुमिण [7]चक्के य ।
[8]चम्म [9]जुए [10]परमाणू दस दिट्ठंता मणुयलंभे" ॥१॥

---

१. जन्म-जरा-मरणजले नानाविधव्याधिजलचराकीर्णे ।
भवसागरेऽपारे दुर्लभं खलु मानुषं जन्म ॥१॥

२. कुबोध-मिथ्याऽभिनिवेशयोगतः कुशास्त्र-पाखण्डिविमोहिता जनाः ।
न श्रद्दधते जिननाथदेशितं त्यजन्ति बोधिं पुनः केऽपि प्राप्तम् ॥१॥

३. चोल्लकं पाशको धान्यं द्यूतं रत्नं च स्वप्नश्चक्रं च ।
चर्म युगं परमाणुर्दश दृष्टान्ता मनुजलम्भे ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्र चोल्लको देशीभाषया परिपाटीभोजनम्, तत्र **विप्रदृष्टान्तः**—

**भरतार्धे**ऽत्र **पाञ्चालदेशे काम्पील्य**पत्तनम् ।
जगज्जनकृतानन्दं प्रतिच्छन्दं दिवौकसः ॥१॥

**ब्रह्मदत्तो** नृपस्तत्र द्वादशश्चक्रवर्त्तिनाम् ।
यत्प्रतापाद् विलीयन्ते नवनीतमिवारयः ॥२॥

एकः कार्पटिकस्तस्याटव्यां साहाय्यकार्यभूत् ।
प्राग् **दीर्घ-चुलनी**भीत्यैकाकिनो भ्रमतो भुवम् ॥३॥

वर्षैर्द्वादशभिः सैन्यं सम्मील्य बलवत्तरः ।
**ब्रह्मदत्तो**ऽभवत् सम्राड् लेभे तद्दर्शनं न सः ॥४॥ **युग्मम्**

राजपाट्यां नरेन्द्रस्यान्यदा कार्पटिकद्विजः ।
उपानहां ध्वजं कृत्वा पुरोऽभूद् ध्वजिभिः सह ॥५॥

कोऽयं नव्यध्वज इति पृष्टः पादातिकोऽनयत् ।
दृग्गोचरं तं संवीक्ष्य स भूपेनोपलक्षितः ॥६॥

गजादुत्तीर्य सस्नेहमालिङ्ग्याभाष्य सद्गिरा ।
भूजानिना स ऊचे किं ददामि स्वेच्छया वद ? ॥७॥

स प्राह प्रेयसीं पृष्ट्वा पार्थिव ! प्रार्थयिष्यते ।
सोऽथ गत्वा प्रियामाख्यत् तुष्टो राजा किमर्थये ? ॥८॥

सा दध्यौ यद्यसौ देशं साचिव्यं वा प्रपत्स्यते ।
बहिस्तान्मञ्चकस्तन्मे पतितो नात्र संशयः ॥९॥

साऽऽह त्वं कान्त ! याचस्व भोजनं भारतेऽखिले ।
दीनारयुगलं चापि चक्र्यादेः प्रतिमन्दिरम् ॥१०॥

तत्रार्थिते नृपेणोचे देशाद्यं किं न याचसे ? ।
हिण्डसे किं न हस्त्यश्वच्छत्रच्छायाभिरिन्द्रवत् ? ॥११॥

सोऽभ्यधात् किं ममैतैस्तु दध्यौ राजैष तुच्छधीः ।
उदङ्कः पतितोऽप्यब्धावादत्ते स्वोचितं जलम् ॥१२॥

स्वीकृत्य तद्वचो राज्ञा पूर्वं स्वौकसि भोजितः ।
दीनारद्वयदानेन दक्षिणायां स मोदितः ॥१३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स विप्रः परिपाट्यैवं भुञ्जानोऽत्र गृहे गृहे ।
राज्ञी-राजन्य-पौराणां नगर-ग्रामकोटिषु ॥१४॥

यायात् किमन्तं तं सैष यायाद् वा दैवयोगतः ।
मानुष्यकात् पुनर्भ्रष्टो लभते न मनुष्यताम् ॥१५॥

इति **भोजने** प्रथमो दृष्टान्तः ॥१॥

इहास्ति **पाडली**द्रङ्गं पाडलीपुष्पंनिभम् ।
यद् ददात्युत्तमामुच्चैर्जडानामपि वासनाम् ॥१॥

तत्रोच्छेदितनन्दोऽभूच्**चन्द्रगुप्तो** नृपाग्रणीः ।
नैर्मल्याद् यद्यशश्चन्द्रोऽजैषीच्चन्द्रं कलङ्किनम् ॥२॥

**चन्द्रगुप्त**महाराजराज्यप्रासादसूत्रभृत् ।
**चाणिक्य**स्तत्र मन्त्रीशो बिम्बान्तरितराज्यकृत् ॥३॥

तस्य प्राज्येऽपि साम्राज्ये कोशप्राचुर्यमस्ति न ।
देवतावरलब्धास्तु जित्वराः सन्ति पाशकाः ॥४॥

शिष्यते स्माथ तेनैकश्छेकः कोशार्थिना पुमान् ।
भृत्वा पात्रं सुदीनारै रन्तुं पौरैः सहाविशत् ॥५॥

यो मां जयति तेनेदं ग्राह्यं दीनारभाजनम् ।
यूयं दीनारमेकं तु ददीध्वं मे जये सति ॥६॥

एवं ते तेन लोभेन दीव्यन्ति व्यवहारिणः ।
जीयते न से केनापि स जयत्यखिलानपि ॥७॥

सोऽपि जातु विजीयेत देवतायाः प्रभावतः ।
मानुषत्वात् परं भ्रष्टो लभेतासुकृती न तत् ॥८॥

इति **पाशके** द्वितीयः ॥२॥

देवो विद्याधरो वाऽपि कश्चित् कौतूहलप्रियः ।
**भरत**क्षेत्रधान्यानि निखिलान्यप्यमीलयत् ॥१॥

प्रक्षिप्य सर्षपप्रस्थं तत्र सर्वाण्यघोलयत् ।
तत्रैका स्थविरा जीर्णा सूर्पमादाय पाणिना ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सा तान् विवृत्य किं प्रस्थं पूरयेत् पूरयेदपि ।
देवतायाः प्रभावेन लभेत न तु मर्त्यताम् ॥३॥

इति **धान्ये** तृतीयः ॥३॥

पुरं **भृगुकटं** नाम भूदेवीमुकुटोपमम् ।
सुवर्णसुमनोरम्यं विचित्रशिखरालयम् ॥१॥

विक्रान्तस्तस्य दुर्दान्तनन्दनो राज्यसुस्पृहः ।
भूभुजो राज्यगृद्धस्य विस्मृतो मृत्युरात्मनः ॥३॥

संहृत्यामुं ततो राज्यमादास्येऽहं युवाऽधुना ।
वार्द्धक्ये किं फलं तेनाक्षमस्येति स दध्यिवान् ॥४॥ **युग्मम्**

तत् ज्ञात्वा मन्त्रिणा राज्ञो ज्ञापिते स्माह तं नृपः ।
यो जीवत्पितृसाम्राज्यमिच्छेत् तस्यास्त्ययं विधिः ॥५॥

अस्मत्सभामण्डपेऽस्मिन्नस्ति स्तम्भशतं सुत ! ।
अष्टोत्तरशतं तेषु सन्ति सर्वेषु कूणकाः ॥६॥

अष्टोत्तरशतं वारान् प्रत्येकं कूणकाश्च ते ।
जेया राज्यार्थिना द्यूते दायैः सर्वे निरन्तरम् ॥७॥

तेष्वेवं जीयमानेषु हारिश्चेदन्तरा भवेत् ।
ते पुनर्मूलतो जेयाः पूर्वे दाया निरर्थकाः ॥८॥

इति प्रणीते तातेन साहसी राजसूस्ततः ।
एतान् प्रववृते जेतुं निष्णातो द्यूतकर्मणि ॥९॥

तस्यापि तज्जयः किं स्यात् स्याद् वा देवानुभावतः ।
मानुष्यकात् परिभ्रष्टो लभते न मनुष्यताम् ॥१०॥

इति **द्यूते** चतुर्थः ॥४॥

वेलाकूलं श्रियां मूलं नाम्ना **रत्नपुरं** पुरम् ।
रत्नगर्भाऽभवद् भूमिर्यत्र रत्नैर्निधिकृतैः ॥१॥

**रत्नसारो** वणिग् वृद्धस्तत्रासीद् वणिजां वरः ।
सूर्यकान्तेन्दुकान्ताद्यै रत्नै रत्नाकरोपमः ॥२॥

तत्र कोटीश्वराः कोटिध्वजानन्ये गृहे गृहे ।
उत्तम्भयन्ति ते नित्यं स नोत्तम्भयते जरी ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्थविरे प्रोषितेऽन्येद्युः सर्वरत्नानि तत्सुतैः ।
नानादिग्देशवणिजां दत्तान्यादाय तद्धनम् ॥४॥

समुच्छ्रिता गृहेऽत्युच्चा ध्वजास्तैः कोटिसङ्ख्यया ।
ते रत्नवणिजो जग्मुः कृतस्वार्था दिशोदिशम् ॥५॥

आगतः स्थविरो मत्वा तत् तेभ्यो रत्नविक्रयम् ।
निर्भर्त्स्य तनयानूचे रत्नान्यानयत द्रुतम् ॥६॥

मूर्खा रत्नान्यमूल्यानि कथमेवं विचिक्रियुः ? ।
दुर्लभं मीलनं तेषां यथा नरजनुस्तथा ॥७॥

इति **रत्ने**षु पञ्चमः ॥५॥

स्वस्ति प्रशस्तं **गौडा**ख्यदेशोत्तंसश्रिया श्रितम् ।
पुण्याङ्गिपटलापूर्णमास्ते **श्रीपाटलीपुर**म् ॥१॥

तत्र शङ्खयशाः **शङ्खधवलो**ऽस्ति धराधवः ।
न्यायधर्मधुराधुर्यो विशुद्धधवलोपमः ॥२॥

तस्यान्तःपुरमुख्याऽभूज्जयलक्ष्मीरिति प्रिया ।
मूर्त्तिमज्जयलक्ष्मीर्याऽवतीर्णा भाग्ययोगतः ॥३॥

तयोरस्त्यात्मजो **मूलदेवो** देवतारूपभाक् ।
द्वात्रिंशल्लक्षणोपेतो विनयावनताङ्गभृत् ॥४॥

क्रमात् स प्राप तारुण्यं पुण्यलावण्यसेवधिम् ।
कलाकलापकुशलो विज्ञानामृतवारिधिः ॥५॥

प्रस्तावज्ञः कृतज्ञश्च दाक्षिण्यगुणखानिभूः ।
वदान्योऽगण्यनैपुण्यो गुणरागी प्रियंवदः ॥६॥

सर्वानेककलाज्ञेषु तत्तद्भावं भजेत सः ।
नानाश्रोतॄन् समासाद्य वक्तुर्वाक्यमिवैककम् ॥७॥

किं बहूक्त्या ह्यसौ सर्वगुणानामाकरः परम् ।
द्यूतव्यसनलाम्पट्यं दुष्यतीन्दोः कलङ्कवत् ॥८॥

ततो नृपतिराकार्य पुत्रं प्रेमवशंवदः ।
अनुशास्ति सुनीतिज्ञः सामवाक्यैरनेकधा ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वत्स ! प्राग् **नलराजेन्द्रो भरता**र्धाधिपप्रभुः ।
**युधिष्ठिर**मुखा भूपाः सुभटा दोर्मदोत्कटाः ॥१०॥

सान्तःपुरपरीवारा द्यूतव्यसनलालसाः ।
राज्यभ्रंशाद्यनर्थैस्ते श्रूयन्ते बाधिता भृशम् ॥११॥ **युग्मम्**

एवं स शिक्ष्यमाणोऽपि न मुञ्चति दुरोदरम् ।
राजेष्टमपि रुष्टस्तं स्वपुरान्निरसारयत् ॥१२॥

ततः सोऽसिसखः सद्यः साहसी निरगात् पुरात् ।
भ्रामं भ्रामं महीं प्राप क्रमाद् **वाराणसीं** पुरीम् ॥१३॥

तत्रान्यदा **मूलदेवो** विचरंस्त्रिकचत्वरे ।
प्रेक्षमाणः पुराश्चर्याण्यनेकानि प्रमोदभाक् ॥१४॥

क्वचिद् देवकुलेऽपश्यद् विद्यासिद्धं नरोत्तमम् ।
कृताञ्जलिर्ववन्देऽसौ रञ्जितानेकनागरम् ॥१५॥

सिद्धस्तं सत्त्वरत्नैकनिधिमाकृतिबन्धुरम् ।
प्रेक्ष्य तुष्टो ददौ तस्मै गुटिकां वाञ्छितप्रदाम् ॥१६॥

ततः प्रस्थाय मार्गे तु स ग्राम-नगरादिषु ।
नानाकलाविनोदेन जनानाह्लादयत् क्रमात् ॥१७॥

मुखस्थितगुटीयोगाद् वामनीभूय साञ्जसम् ।
**विशालां** नगरीं प्रा**पावन्ती**विषयभूषणम् ॥१८॥ **युग्मम्**

तस्यां प्रत्यापणं तिष्ठन् लाभयन् वणिजो बहु ।
व्यस्मापयत् कथा-गीतगानाद्यैः स सकौतुकान् ॥१९॥

परां प्राप प्रसिद्धिं च परो नातः कलाधिकः ।
सर्वस्मै रोचते स्मासौ कलावानिव पार्वणः ॥२०॥

तत्रास्त्यतीवलावण्यपात्री सौन्दर्यगर्विता ।
**देवदत्ते**ति वारस्त्री भुवं प्राप्तोर्वशीव सा ॥२१॥

पुरुषा निर्गुणा एव सेति तेषु न रज्यति ।
मधुपीव करीरेषु स शुश्रावेति लोकतः ॥२२॥

विज्ञानाशनिनैतस्याश्चूरये गर्वपर्वतम् ।
इति गातं प्रवृत्तोऽसौ निशाऽन्ते तदगृहान्तिके ॥२३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अन्यान्यवर्णसंवेधरमणीयं सघोलनम् ।
**देवदत्ता** तदाकर्ण्य विस्मिताऽन्तर्व्यचिन्तयत् ॥२४॥

सुधामधुरया वाण्या श्रवसी प्रीणयन्नहो ! ।
विद्याभृत् कोऽपि देवो वा सम्भाव्योऽयं नृरूपभाक् ॥२५॥

श्लाध्यं स्वरवदेतस्य रूपाद्यपि विलोक्यताम् ।
इति चेटी तयाऽऽदिष्टा तं वामनमवैक्षत ॥२६॥

तथाऽऽकृतौ तया तस्मिन्नुक्तेऽपि गुणरागिणी ।
**देवदत्ता** तमानेतुं प्राहिणोत् कुब्जिकां सखीम् ॥२७॥

साऽपि प्राञ्जलिरागत्य **मूलदेव**मदोऽवदत् ।
आह्वास्त मन्मुखेन त्वां स्वामिनी नः स्ववेश्मनि ॥२८॥

गुणज्ञा सा यदि प्रौढगुणाढ्ये त्वयि रज्यति ।
किं विरुद्धमदस्तूर्णमागच्छोत्तिष्ठ सन्मते ! ॥२९॥

वैदग्ध्येनाथ सोऽभाणीत् सोपेक्षं **मागधी**मिति ।
पण्यस्त्रीवेश्मयानेन न प्रयोजनमस्ति मे ॥३०॥

विटानां **कोटयो** यत्र रमन्ते स्वैरमन्वहम् ।
ही ! तदुच्छिष्टभाण्डाभं न स्पृश्यं गणिकावपुः ॥३१॥

***चेतो दुष्टं वचो मिष्टं स्वार्थव्यापारबन्धुरम् ।***
***यासां विगतकारुण्या वेश्यास्ताः कः प्रियीयति ? ॥ ३२॥***

याः कुष्ठिनाऽपि संसर्गं कुर्युर्धनलवाशया ।
सम्बन्धमाभिर्वेश्याभिर्दैया रुष्टोऽपि मा विधे ! ॥३३॥

***वह्नेः शिखेव सौवर्णशस्त्रीव मदिरेव च ।***
***न भोक्तव्या हि वारस्त्री सर्वानर्थाङ्कुरैकभूः ॥ ३४॥***

त्वं याहि कुब्जिके ! गीतसूक्तरागविनोदिनाम् ।
किं तया वेश्ययाऽस्माकं नीरागयतिनामिव ? ॥३५॥

अथ कुब्जाऽवदत् तुष्टा माऽवमंस्था महाशय !।
सा हि सत्पुरुषासक्ता वेश्याऽपि गुणरत्नभूः ॥३६॥

अहम्पूर्विकया राजकुमारेष्वागतेष्वपि ।
निष्कलेषु न सा रागं सुधीर्धत्ते मनागपि ॥३७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निःस्वोऽपि हि कलाशाली विश्रामोऽस्यास्तु चेतसः ।
यदर्थी यो हि तत्रैव स रक्तोऽन्यत्र नो पुनः ॥३८॥

वेश्येत्यभिधयोद्विग्नो मा भूः सद्वंशजेव सा ।
चतुरं प्रीणयित्री त्वां मालतीव मधुव्रतम् ॥३९॥

कलाविदः किलैकस्य को विनोदः स्वसाक्षिणः ? ।
तया समेत्य तद् भद्र ! भवन्तु सफलाः कलाः ॥४०॥

*वेश्यात्वमपि विज्ञानगुणात् तस्या न दोषकृत् ।*
*करभस्याशुगत्या हि च्छादिता दोषसन्ततिः ॥४१॥*

एतत्तद्वाक्यचातुर्यवशादुत्थाय सत्वरम् ।
गृहीत्वा तां करे तस्या गेहं गन्तुमुपाक्रमत् ॥४२॥

व्रजन्नध्वन्यसौ तस्या विज्ञानाद्यतिशेषवान् ।
विद्ययाऽऽस्फल्य मर्मण्यपनिन्ये कुब्जतामपि ॥४३॥

सा प्रापात्यन्तिकं चित्रं गेहं प्रावेशयद् द्रुतम् ।
तं वामनं समालोक्य **देवदत्ता** विसिष्मये ॥४४॥

सलावण्यमहो ! रूपं माधुर्यं कटरि ! ध्वनौ ।
कलाकलापपूर्णेन्दावत्र वामनतामृगः ॥४५॥

ईषदभ्युत्थिता तस्यादापयत् सिंहविष्टरम् ।
अस्मै तत्र निषण्णाय ताम्बूलं सा ददौ स्वयम् ॥४६॥

कुब्जिकाकुब्जनिर्नाशदर्शनोल्लासिचित्तया ।
तया स कर्तुमारेभे आलापान् स्निग्धया गिरा ॥४७॥

विदग्धोचितसंलापैस्तस्याः सोऽवशयन्मनः ।
दुःसाध्यसाधने नृणां प्रियालापो हि कार्मणम् ॥४८॥

*उपकारः प्रियालापः स्थिरा प्रीतिरिति त्रयम् ।*
*सतां स्वभावतः सिद्धमिन्दौ शिशिरता यथा ॥४९॥*

इतश्च तान्त्रिकः कश्चित् तथा तन्त्रीमवादयत् ।
तस्याः पुरो यथा साऽऽसीत् कौतुकैकवशंवदा ॥५०॥

तां दृष्ट्वा कौतुकोत्तुङ्गनगारूढां वराङ्गनाम् ।
साध्वी वीणेति भाषन्तीं **मूलदेवो** व्यभाषत ॥५१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अहो ! **अवन्त्यां** नैपुण्यमश्रावि निखिले जने ।
तद् गन्धर्वपुरीसौधरम्यताश्रुतिसंनिभम् ॥५२॥

सुन्दरासुन्दरत्वं यो ज्ञात्वा श्लाघ्यं प्रशंसति ।
तद्गुणग्रहणं श्लाघ्यमपरं मौढ्यदीपिका ॥५३॥

साऽपि सप्रश्रयं प्रोचे किमत्र क्षूणमीक्षितम् ? ।
वंशतन्त्र्योः सगर्भत्वात् सद्ध्वनिर्नेति सोऽवदत् ॥५४॥

अप्रतीतौ प्रतीत्यर्थं वंशतोऽदर्शि कर्करः ।
विपञ्चीगुणवालश्च स्थितोऽलक्षतया क्वचित् ॥५५॥

स्वयमादाय संस्कृत्य तथाऽवादयदद्भुतम् ।
तदा वेद्यान्तरं वेद न यथा सा पराशया ॥५६॥

प्रत्यासन्नेऽभवद् राजकरेणुरतिचञ्चला ।
साऽपि स्थिरश्रवीभूयाघूर्णयन्निभृतं शिरः ॥५७॥

ननु प्रच्छन्नवेषोऽसौ विश्वकर्मेति हृष्टया ।
आगन्तुकस्तया वीणाभृत् सदानं व्यसृज्यत ॥५८॥

दासीराह्वय मज्जावः सममावामुभावपि ।
इति सख्या कृतालापां **मूलदेवो**ऽभ्यधत्त ताम् ॥५९॥

सख्यं साप्तपदं तच्चाजनि दैवादिहावयोः ।
ततस्त्वयि न मे गोप्यं मयि गोप्यं च ते न हि ॥६०॥

मया तदद्य कर्तव्यमभ्यङ्गादि स्वयं तव ।
त्वमेतदपि जानासीत्येतत् पृष्टे परोऽभ्यधात् ॥६१॥

न शिक्षितं यज्जानामि परं ये तद्विशारदाः ।
तेषामुपनिषण्णोऽस्मि श्रुत्वेत्येषाप्यचिन्तयत् ॥६२॥

अहो ! सर्वातिशाय्यस्य सत्त्वं विश्वत्रयाद्भुतम् ।
*न करोत्येव यद् धीमान् स्वकलाख्यापनं स्वयम् ॥६३॥*

आनिन्ये चाम्पकं तैलमभ्यक्ता तेन सा तथा ।
सविज्ञानं यतश्चक्रे सा पराधीनमानसा ॥६४॥

अहो ! विज्ञानमेतस्यादृष्टमश्रुतमद्भुतम् ।
अपूर्वोऽस्य करस्पर्शः सर्वाङ्गसुखहेतुकः ॥६५॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

कश्चिन्नूनमसौ विद्यासिद्धपुंरत्नमद्भुतम् ।
छन्नरूपोऽन्यथेदृक्षा वामनस्य कुतो गुणाः ? ॥६६॥

कारयामि स्फुटं रूपमनेनेति विचिन्त्य सा ।
पतित्वा पादयो**र्मूलदेवं** साञ्जसमभ्यधात् ॥६७॥

अनन्यसदृशैर्नूनं ज्ञात एव गुणैर्महान् ।
पुरुषस्त्वं महाराजवंशवंशैकमौक्तिकम् ॥६८॥

एतादृशे गुणोत्कर्षे रूपमप्यद्भुतं तव ।
**यत्राकृतिस्तत्र गुणाः श्रुतेरिति विभाव्यते ॥६९॥**

उत्तमोऽसि प्रतिज्ञातधूर्निर्वाहक्षमोऽसि च ।
दाक्षिण्याब्धे ! निजं रूपमाविष्कुरु तदेकदा ॥७०॥

बाढमुत्कण्ठितं नाथ ! त्वद्दर्शनसुधारसम् ।
मन्मनः पातुमात्मानं तदाविर्भावयाधुना ॥७१॥

एतन्निर्बन्धतः प्रेम्णा स्मित्वेषद् गुलिकां मुखात् ।
निरपास्य स्वभावस्थरूपलावण्यवानभूत् ॥७२॥

सा तं भास्करतेजस्कं रूपतर्जितमन्मथम् ।
मोहयन्तं मनो वीक्ष्य तुतोष नवयौवनम् ॥७३॥

यन्नावगणयाञ्चक्रे मद्वचोऽपि प्रिय ! त्वया ।
प्रतिपन्नैकवात्सल्यं व्यक्तमेतेन तेऽभवत् ॥७४॥

इत्युक्त्वा स्वयमभ्यक्तस्नापितोऽसौ तया ततः ।
सहैव तेन बुभुजे गुणगृह्या वराङ्गना ॥७५॥

अम्बराणि परीधाप्य देवदूष्यातिगानि सा ।
विशिष्टगोष्ठ्यामथ तमुवाचेति प्रियोचितम् ॥७६॥

त्वां विना नैव केनापि क्वचिन्मे रञ्जितं मनः ।
अनभ्यासेऽपि तल्लग्नं क्षणादेव दृढं त्वयि ॥७७॥

दृग्भ्यां के न वीक्ष्यन्ते वीप्सया को न भाष्यते ? ।
मनसो यः प्रमोदाय दृष्टः स विरलः पुमान् ॥७८॥

तस्मान्ममानुरोधेन नित्यमेहि ममालये ।
एनं ममार्थनालेशं नान्यथा कर्तुमर्हसि ॥७९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मूलदेवोऽवदद् भद्रे ! यः स्याद् वैदेशिको जनः ।
निर्धनश्च न तत्राशु प्रेम कुर्वन्ति पण्डिताः ॥८०॥

कृतमप्यत्र न प्रेम बाले ! भवति हि स्थिरम् ।
तद्धि कार्यवशाल्लोके न चैतन्मादृशाज्जनात् ॥८१॥

यथा पर्युषितं पुष्पं यथा क्षीणफलस्तरुः ।
यथा शुष्कं सरो लोके तथाऽहमिति मा मुह ॥८२॥

अथैषाऽवोचदात्मीयः परो वा न प्रवर्तते ।
*देशः कोऽपि सतां ते हि सर्वत्राघ्या गुणाद्भुताः ॥८३॥*

*निर्गतोऽब्धेः शशी वासं लेभे हीश्वरमस्तकम् ।*
*गुणिनो यत्र तत्रापि मान्या एव निजैर्गुणैः ॥८४॥*

उक्तञ्च—

**"[१]वाया सहस्समइया सिणेहनिज्झाइयं सयसहस्सं ।**
**सब्भावो सज्जणमाणुसस्स कोडिं विसेसेइ" ॥१॥**

एवमादि वचोभङ्ग्या प्रतिपेदे स तद्वचः ।
पाशेषु हि महान् पाशः सर्वेष्वपि वराङ्गना ॥८६॥

यथेक्षुदण्डे पर्वाग्राद् वर्धमानो रसः क्रमात् ।
प्रणयोऽपि तयोरेवमुपैधत निरन्तरम् ॥८७॥

**देवदत्ता**ऽन्यदा राज्ञः पुरो नृत्यमभावयत् ।
पटहं पटुविज्ञानं **मूलदेवो**ऽप्यवादयत् ॥८८॥

तत्सामग्र्या स कोऽप्यासीद् रसस्तत्र नृपो यतः ।
**देवदत्ता**मुवाचेति प्रसन्नोऽहं वरं वृणु ॥८९॥

अस्तु कोशे वरो ह्येष समये प्रार्थयिष्यते ।
इत्युदीर्य युता तेन सा प्राप निजमालयम् ॥९०॥

बोधितोऽपि तथा द्यूतं कलङ्कमिव चन्द्रमाः ।
**मूलदेवो** न तत्याज पुरुषः प्रकृतिं यथा ॥९१॥

---

१. वाचा सहस्रमतीता स्नेहावलोकनं शतसहस्रम् ।
सद्भावः सज्जनमानुषस्य कोटिं विशेषयति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्षीरौदधौ मषीबिन्दुरिव नात्र गुणोदधौ ।
वैरूप्याय भवेद् द्यूतमित्येषा स्वं समादधे ॥९२॥

अस्ति चास्या दृढप्रेमाऽ**चल**नामा सुहृद्वरः ।
सार्थवाहसुतस्तुल्यवयाः कुलगृहं श्रियाम् ॥९३॥

स यदीप्सितदाताऽस्या **मूलदेवे** नु मत्सरी ।
एकद्रव्याभिलाषित्वं परं हि द्वेषकारणम् ॥९४॥

शङ्कयाऽस्य न यात्येष तद्वेश्मनि यदा तदा ।
प्रवृत्तो व्यसने को हि महानपि न शङ्कते ? ॥९५॥

कुट्टिन्या **देवदत्तो**चे त्यजैनं पुत्रि ! दुर्दशम् ।
किं ते निर्धनचङ्गेनानेन साध्यं प्रयोजनम् ? ॥९६॥

तवाभीप्सितकल्पद्रु**रचलो** हि विराध्यते ।
एतत्प्रीत्या नैककोशे कृपाणद्वितयं भवेत् ॥९७॥

***स्वस्मादपि हि यो हीनस्तत्र यो रागवान् भवेत् ।***
***रागं न तत्र बध्नन्ति मानिनो हि महाशयाः ॥ ९८॥***

द्यूतव्यसनिनं मुञ्च तदमुं मद्वचः शृणु ।
वेश्यानां कुलधर्मोऽयं धनवत्येव रज्यते ॥९९॥

साऽभणन्नाहमम्बाऽस्मि धनमात्रानुरागिणी ।
गुणेषु प्रतिबन्धो मे दुर्लभेषु धनैरपि ॥१००॥

गुणाः स्युस्तस्य के द्यूतकवलीकृतसम्पदः ।
इत्युक्ते साऽवदद् वक्तुं शक्यन्ते तद्गुणाः कथम् ? ॥१०१॥

महेच्छा-धैर्य-गाम्भीर्य-दाक्षिण्यादिगुणाम्बुधिः ।
प्रियभाषी कलाशाली नान्यः कोऽप्यस्ति तत्समः ॥१०२॥

***रोचते यन्मनो यस्मै तस्य सर्वस्वमेव सः ।***
***न मनो रोचते यस्मै स नृपोऽप्यस्य तार्णवत् ॥ १०३॥***

तत् त्याज्यतां कथं याति गुणवानेष मे सुहृत् ? ।
यस्मै दैवेन यो दत्तः स तेन कुरुते रतिम् ॥१०४॥

उपायेन निवर्त्त्येयमस्मादिति विभाव्य सा ।
मार्गितेऽलक्तके पोतं प्रणामयति नीरसम् ॥१०५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चर्वितानिक्षुखण्डांश्च पुष्पवृन्तानि च क्षणे ।
किमेतत् प्रेष्यते मातरित्युक्ते सा भणत्यदः ॥१०६॥

यादृशानि किलैतानि तादृशः स तव प्रियः ।
तं तथाऽपि न तत्याज **देवदत्ता** दृढाशया ॥१०७॥

चिन्तयित्वाऽन्यदा किञ्चिज्जननी भणिता तया ।
इक्षुस्पृहाऽस्ति मेऽतस्ता**नचलं** मार्गय द्रुतम् ॥१०८॥

जनन्यपि तथाऽकार्षीद् भृत्वाऽनः प्राहिणोत् स च ।
तयाऽभाणि किमम्बास्मि करिणी तेन चिन्तिता ॥१०९॥

समूलपत्रसाखेक्षुश्चर्व्यते किं तयेव मे ? ।
जनन्योचे ननूदारोऽधिदाता स मेघवत् ॥११०॥

नैषा महेच्छता किन्तु निर्विचारत्वमुल्बणम् ।
इत्याख्यदितरा सर्वं प्रीतिदानं हि सुन्दरम् ॥१११॥

अस्तीक्षुभक्षणश्रद्धेत्यन्यदा **माधवी**मुखात् ।
ज्ञापितं **मूलदेव**स्य लेशतो **देवदत्त**या ॥११२॥

सोऽपि निस्त्वचयित्वेक्षुयष्टीर्द्वित्राः पवित्रिताः ।
द्व्यङ्गुलानथ तत्खण्डान् मरिचैरवचूर्ण्य च ॥११३॥

अवासयच्च चन्द्राद्यैः शूलैश्चालगयच्छितैः ।
शरावसम्पुटं भृत्वाऽऽच्छाद्य प्रैषीत् तदन्तिके ॥११४॥

**माधव्या** ढौकितं चैतज्जनन्या अप्यदर्शयत् ।
अवदच्चाम्ब ! वीक्षस्व नराणां कियदन्तरम् ? ॥११५॥

डम्बरी सावलेपश्च विवेकरहितो**ऽचलः** ।
निर्व्याजप्रणयो **मूलदेवः** प्रस्तावकोविदः ॥११६॥

अतो गुणानुरक्तायाः स त्यक्तुमुचितः कथम् ? ।
*लक्ष्म्यादि सर्वं सुप्रापं दुष्प्रापो गुणवान् जनः ॥११७॥*

*दोषा अपि गुणा रागाद् विरागात् तद्विपर्ययः ।*
*तक्रमप्यमृतं प्रीतावप्रीतावमृतं विषम् ॥११८॥*

न त्यक्ष्यत्यात्मशक्त्याऽसौ **मूलदेवं** कथञ्चन ।
उपायात् त्याजयिष्यामि कुट्टिनीति व्यचिन्तयत् ॥११९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दुष्टपापिष्ठयैकान्ते बभाषेऽथ तयाऽ**चलः** ।
ग्रामान्तरगमव्याजं कृत्वा सुभटसंहतः ॥१२०॥

झटित्येव सुतागेहमागच्छेस्तं विमानयेः ।
याताऽपमानितो देशान्तरं स स्वयमेव यत् ॥१२१॥

अन्यथा **देवदत्ता** ते नास्तीदं विद्धि निश्चितम् ।
प्रस्तावं ज्ञापयिष्येऽहं तद्वचः स प्रपन्नवान् ॥१२२॥

सोऽन्यदोचेऽम्बुजाक्षीं तां ग्रामान्तरगमं स्फुटम् ।
**मूलदेवः** सुविश्वस्तः प्रविष्टस्तद्गृहं ततः ॥१२३॥

वृद्धाज्ञापिततद्वृत्तः सामग्र्याऽखिलया युतः ।
**अचलो**ऽप्यागमत् तूर्णं विशन् दृष्टश्च वेश्यया ॥१२४॥

**मूलदेव**स्तयाऽथोचे कर्तव्यं किमु सम्प्रति ? ।
धनं प्रतिगृहीतं यदेतत्प्रेषितमम्बया ॥१२५॥

कालक्षेपोऽशुभे कार्योऽधःपल्यङ्कमतो भवान् ।
क्षणं तिष्ठतु संलीनस्तथैवास्थात् स तद्भिया ॥१२६॥

मार्जारादाखुवत् तत्र लीनं **तमचलो**ऽबुधत् ।
न्यषीदत् सोऽपि पल्यङ्के **देवदत्तां** बभाण च ॥१२७॥

कुरु मज्जनसामग्रीं कृता चेत् तामुपानय ।
एतन्नेपथ्यवानेव विधाताऽस्म्यत्र मज्जनम् ॥१२८॥

विनक्ष्यत्येतदखिलं न धेयमिति चेतसा ।
यतो दृष्टो निशि स्वप्नो ध्रुवं तं सत्यतां नयेः ॥१२९॥

तूलिकादिविनाशोऽपि न विचिन्त्यः प्रिये ! त्वया ।
ननु सम्पादयिष्यामि तत् सर्वमपि नूतनम् ॥१३०॥

भणित्वेति द्रुतं कुट्टिन्यानीतोपस्करेण सः ।
तत्रैवास्नात् पतत्तैलखलामलककर्दमम् ॥१३१॥

भृतस्तेनाशिरःपादं **मूलदेवो**ऽप्यधः स्थितः ।
भ्रूसंज्ञाज्ञापितः केशग्राहं कृष्टश्च तद्भटैः ॥१३२॥

पुरोऽ**चलं** धृतश्चैष सोत्प्रासं भणितोऽमुना ।
निरूपय दिशं कोऽस्ति शरण्यः शरणं तव ? ॥१३३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दृष्ट्वा शितायुधान् वीरानात्मनः परितः स्थितान् ।
प्रस्तावज्ञः स वीरोऽपि सविलम्बं व्यचिन्तयत् ॥१३४॥

बहवोऽमी यमाकारा अस्मि निर्बान्धवायुधः ।
वैरिनिर्यातनं जीवन् कर्ताऽस्मि मरणेन किम् ? ॥१३५॥

*सङ्ग्रामे मरणं श्लाघ्यं न तु व्यसनसङ्कटे ।*
*मृत्यावपयशःस्फूर्तिर्वल्लभाया ममापि च ॥१३६॥*

ध्यात्वेत्याह वचो धीरं निरूप्यः कोऽस्ति मेऽधुना ? ।
यत् तुभ्यं रोचते तत् त्वं कुरु किं मम चिन्तया ? ॥१३७॥

तन्निशम्या**चलो** दध्यौ नन्वयं पुरुषोत्तमः ।
ईदृशं धीरभाषित्वमाकृतिश्चान्यथा कुतः ! ॥१३८॥

*न को वा व्यसनं प्राप्तः को वाऽत्र सततं सुखी ? ।*
*कस्य वा सुस्थिरं वित्तं विधिना खण्डितो न कः ॥१३९॥*

*गतिर्विचित्रा दैवस्य संवर्तशतकारिणी ।*
*न निन्द्यो लघुरप्यात्मा न वीक्ष्यो गुरुरेव हि ॥१४०॥*

धिग् वेश्याव्यसनं दुष्टं यद्वशादीदृशो जनः ।
ही ! खलीक्रियमाणोऽस्तीति ध्यात्वाऽऽहा**चलो**ऽपि तम् ॥१४१॥

प्रीत्याधिक्याद् **देवदत्ता** परिणीताङ्गनाऽधिका ।
तत्रैवं चेष्टमानस्त्वं मम द्विष्टोऽसि सर्वथा ॥१४२॥

तथाऽपि ननु मुक्तोऽसि माऽऽगा एतद्गृहं पुनः ।
मामपि व्यसनं प्राप्तं त्वमप्येवमुपाकृथाः ॥१४३॥

श्रुत्वेति दुर्मना **मूलदेव**स्तद्गेहतो निरैत् ।
*धिग् विधिं यद्विपाकस्य परिणामः किलेदृशः ॥१४४॥*

अत्र न्याय्यं न हि स्थातुं न्याय्यं तु विषयान्तरे ।
तत्रस्थेनापकर्तुश्च कर्तव्यं प्रतिविप्रियम् ॥१४५॥

चिन्तयन्निति कासारे गत्वा स्नात्वाऽग्रतोऽचलत् ।
*विपद्यपि सतां नूनं सम्पदीवोन्नतं मनः ॥१४६॥*

**बेन्नातट**मनुश्रित्यातिक्रामन् पूः-पुरादिकम् ।
भट्टस्यैकस्य साहाय्याल्ललङ्घे स महाऽटवीम् ॥१४७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दिनत्रयं द्विजोऽभुङ्क्त पथि सक्त्वादि स स्वयम् ।
**मूलदेवाय** न प्रादात् कियदप्येकदाऽपि हि ॥१४८॥

अल्पपाथेयभट्टोऽसौ नादान्मम ततोऽपि किम् ? ।
वन्यालङ्घनमेतस्य साहाय्यादेव मेऽभवत् ॥१४९॥

निरात्मीयस्य वार्तादिविनोदादेष मे सुहृत् ।
प्रतिप्रियोचितो ह्येष ध्यात्वेति स तमूचिवान् ॥१५०॥

पृथगध्वाऽऽवयोर्भट्ट ! तदाकर्णय मे वचः ।
वन्या गोष्पदवज्जाता दुस्तराऽपि त्वया सह ॥१५१॥

**बेन्नातट**महं यामि **मूलदेवो**ऽस्मि नामतः ।
तत्रागच्छेरहं कर्तोपकारं तव किञ्चन ॥१५२॥

अभिधां साधयात्मीयां टक्कोऽप्याहेति **सद्धडः** ।
परं निर्घृणशर्मेति लोको वदति मां सदा ॥१५३॥

इत्युक्त्वा तु निजग्रामं प्रस्थेऽसौ द्विजस्ततः ।
**मूलदेवो**ऽपि सन्तुष्टोऽभि **बेन्नातट**पत्तनम् ॥१५४॥

कृताष्टमः क्षुधाक्षामो ग्राममेकमथाविशत् ।
तमशेषं परिभ्रम्य श्रान्तो लेभे न किञ्चन ॥१५५॥

कुतश्चिद् गृहतस्तेन राद्धमाषाः किलापिरे ।
द्राक्षापिण्डमिवादाय तान् जलाश्रयमागतम् ॥१५६॥

जिघत्सति स तान् यावत् क्षालितास्यकरक्रमः ।
तावत् पश्यन् दिशोऽद्राक्षीदायान्तं क्षपकं मुनिम् ॥१५७॥

तं दृष्ट्वा निर्भरामोदप्रभूतपुलकाञ्चितः ।
अचिन्त्यदहं धन्यं फुल्लद्भाग्योऽस्मि निश्चितम् ॥१५८॥

''मूर्तं तप इवैतस्मिन् क्षणेऽत्र यदसौ मुनिः ।
समुपेयाय तद् भाव्यं भद्रेणावश्यमेव मे ॥१५९॥

*स्वर्णवृष्टिरसौ दुस्थे मरुषु स्वर्द्रुमोद्गमः ।*
*महाव्रतधरः साधुर्यल्लब्धो भोजनक्षणे ॥१६०॥*

*ज्ञान-दर्शनपूतात्मा क्षान्त्यादिगुणभाजनम् ।*
*स्वाध्याय-ध्यान-सल्लेश्या-गाम्भीर्यगरिमाश्रयः ॥१६१॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*पञ्चापि समितीर्गुप्ती: सम्यक् तिस्रोऽपि पालयन् ।*
*नि:सङ्गश्चैष तत् कोऽस्मादन्य: पात्रं मुनीश्वर: ? ॥ १६२॥*

*ईदृक्पात्रोत्तमक्षेत्रे द्रव्यबीजं प्ररोपितम् ।*
*श्रद्धाजलेन संसिक्तमनन्तगुणतां भजेत् ॥ १६३॥*

धन्या मनोहराहारैः क्षपकं पर्युपासते ।
एतत्क्षेत्रोचितैर्माषैः प्रतिलाभ्यस्त्वयं मम ॥१६४॥

सर्वोऽप्यदायको ग्रामः सन्तुष्टस्तु तपस्व्यसौ ।
कार्त्स्न्येन तदिमान् दास्ये महार्घ्यो मुन्युपग्रहः ॥१६५॥

द्वित्रिर्वाऽहं पुनर्भ्रान्त्वा ग्रामे लब्ध्वाऽशनं क्वचित् ।
ग्रामे गन्ताऽस्मि वा दूरे मुनेरेतत् तु दुष्करम्'' ॥१६६॥

इति ध्यात्वा प्रणम्यास्मै तानदात् सकलानपि ।
मुनिरप्यग्रहीदेतानुपयुक्तोऽर्पितान् मुदा ॥१६७॥

**मूलदेव**स्तदा हृष्टोऽपाठीत् पद्यदलं हृदः ।
कुल्माषा अपि देयाः स्युर्धन्यानां साधुपारणे ॥१६८॥

इतश्च शासनाध्यक्षा तादृक्तद्वृत्तरञ्जिता ।
गगने देवताऽभाणीद् वत्स ! ते साध्वनुष्ठितम् ॥१६९॥

पश्चार्धेन महासत्त्व ! तुभ्यं यद् धीर ! रोचते ।
तद् याचस्व मनोऽभीष्टं **मूलदेव**स्ततोऽभणत् ॥१७०॥

राज्यं करिसहस्रं च **देवदत्तां** च देहि मे ।
श्रुत्वेति देवताऽप्याख्यद् विद्धि सिद्धमदोऽचिरात् ॥१७१॥

*तपस्वीदानकल्पद्रो: प्रयोजनमिदं कियत् ? ।*
*यस्मात् क्षणेन सिध्यन्ति स्वर्महोदयसम्पद: ॥ १७२॥*

अथ तुष्टो मुनिं नत्वा ग्रामे प्राश्य च किञ्चन ।
चचाल पुरतो **बेन्नातटो**पान्तमवाप च ॥१७३॥

प्रसुप्तोऽध्वगशालायां श्रान्तः स्वप्नमवैक्षत ।
निशाऽन्ते पूर्णशशिनं विशन्तं वदनोदरे ॥१७४॥

*बुद्धो देव-गुरून् ध्यात्वा तन्न कस्याप्यसाधयत् ।*
*सुस्वप्नं न फलत्येव वैपरीत्यविचारितम् ॥ १७५॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदा कार्पटिकोऽप्येकः स्वप्नं तादृशमैक्षत ।
न्यवेदयत् स्वयूथ्याग्रे तत्रैकः प्राह तत्फलम् ॥१७६॥

महान्तं रोट्टकं सर्पिर्गुडपूर्णं त्वमाप्स्यसे ।
भिक्षायां सोऽपि तं लब्ध्वा तुतोष स्तोकविस्मयी ॥१७७॥

**मूलदेवो**ऽप्यथ प्रातर्गत्वोद्यानं समुच्चयात् ।
आवर्ज्यारामिकं पुष्प-फलान्यस्मादुपाददे ॥१७८॥

शुचिभूतोऽथ तत्पाणिरगान्नैमित्तिकालयम् ।
नत्वा प्राञ्जलिरेतस्याकथयत् स्वप्नमद्भुतम् ॥१७९॥

उपाध्यायोऽपि तच्छ्रुत्वा तुतोषोच्चैरुवाच च ।
वक्ता स्वप्नफलं तावद् भवाद्य त्वं ममातिथिः ॥१८०॥

तद्वचः प्रतिपद्यैषोऽस्नादभुङ्क्त च तद्गृहे ।
सर्वतोऽलङ्कृतं कृत्वा तं प्रेम्णाऽऽह निमित्तवित् ॥१८१॥

'अस्ति प्राप्तवरा कन्या दत्ता तुभ्यमुपानय ।
त्वामासाद्य कृतार्थाऽस्तु सा चन्द्रमिव चन्द्रिका ॥१८२॥

ततोऽभ्यधान्**मूलदेव**स्तात ! कोऽयं तव भ्रमः ? ।
**अज्ञातकुल-शीलस्य कन्यादानं हि कीदृशम् ? ॥१८३॥**

*अध्वगाय दरिद्राय कितवाय मुमुक्षवे ।*
*अशक्तायाकुलीनाय नो दद्याच्चतुरः कनीम् ॥१८४॥*

अविचार्य न कर्तव्यो जामाता सङ्कटेऽपि हि ।
विनाऽग्निना दहेद् देहं मा कदाचित् कुमित्रवत् ॥१८५॥

अथ तद्वाक्कलातुष्टः स्मित्वोवाच स वाचकः ।
कुलं शीलं च निर्णीतमाकारेणैव ते मया ॥१८६॥

आचाराद् गम्यते वंशो जन्मभूमिश्च जल्पितात् ।
सम्भ्रमादेव च प्रेम तद् विचारेण मे कृतम् ॥१८७॥

*कः कुर्यात् कुवले गन्धं को वा माधुर्यमिक्षुषु ।*
*ध्रुवमेवं कुलीनेषु स्वतः सिद्धा विनीतता ॥१८८॥*

*नूनं यदि गुणाः सन्ति कुलेनापि हि किं ततः ? ।*
*निर्गुणो निष्कलङ्कस्य कुलस्यापि कलङ्ककृत्" ॥१८९॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्यादि साञ्जसालापैरङ्गीकार्य व्यवाहयत् ।
कन्याममुमुपाध्यायः सतीं शिवमिवाद्रिराट् ॥१९०॥

स्वप्नस्य फलमाख्यच्चान्तःसप्तदिवसं तव ।
साम्राज्यं भविता यादृक् तादृग् दिव्यपि दुर्लभम् ॥१९१॥

ततो हृष्टोऽथ चत्वारि दिनानि व्यत्यवाहयत् ।
पञ्चमेऽथ दिने बाह्योद्यान आस्ते तरोस्तले ॥१९२॥

इतस्तत्रैव निष्पुत्रोऽकाण्डे कालमगान्नृपः ।
निष्पुष्पदन्तमाकाशमिवाभूद् राजमन्दिरम् ॥१९३॥

नान्या गतिरतः पञ्च दिव्यान्येव नियोगिभिः ।
अध्यवास्यन्त पूर्भ्रान्त्या तान्यथो बहिरासदन् ॥१९४॥

तत्रोद्याने **मूलदेवं** स्थिरच्छायतरोस्तले ।
वीक्ष्येभोऽगर्जदूर्जस्वी चक्रे हेषां तुरङ्गमः ॥१९५॥

अभ्यषेचयदम्भोभिः कुम्भश्चित्रमचेतनः ।
ततस्तदुपरि च्छत्रं प्रासरज्जलदाभ्रवत् ॥१९६॥

स्वयमुद्घुषितौ रोमगुच्छौ गङ्गातरङ्गवत् ।
करी करेण तं पृष्ठे उपादाय न्यवीविशत् ॥१९७॥

प्रणतो राजवर्गीयै**र्मूलदेवो** नरेश्वरः ।
अहो ! सुरोपितो दानतरुः सद्यः फलेग्रहिः ॥१९८॥

नभोदेवतयाऽभाणि नृप एष महामहाः ।
नाम्ना **विक्रम**राजोऽस्तु प्रतापेनातिभास्करः ॥१९९॥

न स्थास्यति य एतस्य शासने पुण्यशालिनः ।
किमुच्यते क्षयं याता स स्वामिद्रोहपातकात् ॥२००॥

तत् श्रुत्वा शासनस्थैर्यमासदत् सकलो जनः ।
सौधं गत्वा स साम्राज्यमभुङ्क्ताखण्डितप्रभः ॥२०१॥

**विचारधवलाख्येनोज्जयिनी**जानिना सह ।
योग्यसंव्यवहारेण प्रीतिमारचयत् पराम् ॥२०२॥

स्नेहस्तादृक् तयोरासीदनुपाधिः परस्परम् ।
नूनं न वीक्ष्यतेऽन्यत्र यादृक् सोदरयोरपि ॥२०३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इतश्च **देवदत्ता** सा **मूलदेव**विडम्बनम् ।
संनिरीक्ष्य विरक्ताऽभू**दचले** तुच्छचेतसि ॥२०४॥

रूक्षमेनमवादीच्च तवाहं किं कुलाङ्गना ? ।
यत् त्वं न सहसे **मूलदेवं** मन्मन्दिरागतम् ॥२०५॥

वृथा मम कृते स्वात्मा खेदनीयस्त्वया न हि ।
अथ न त्वं ममेत्युक्त्वा सा जगाम नृपान्तिकम् ॥२०६॥

न्यासीकृतं प्रणम्यैनं पूर्वं वरममार्गयत् ।
**मूलदेवं** विनाऽऽज्ञाप्यो नान्यो मन्निलये नरः ॥२०७॥

ज्वलदूर्णायुकल्पश्चाभ्यापतन्न**चलो** गृहे ।
निर्वाय इति मे प्रार्थ्यं भूपोऽपीत्यप्रमाणयत् ॥२०८॥

आख्यच्च रोचते तुभ्यं यत् तदस्तु परं वद ।
अभूद् व्यतिकरः कोऽसौ सा सख्या तमचीकथत् ॥२०९॥

रुरोष भूपती रत्नद्वितयं नगरे ह्यदः ।
चेत् तत् खलीकरोत्येष तन्निग्राह्यो **ममाचलः** ॥२१०॥

ततो निर्मानमाहूय तं रक्ताक्षोऽवदन्नृपः ।
रे ! किं त्वमेव राजाऽत्र यदेवं व्यवसायवान् ? ॥२११॥

मारणात् ते परो दण्डः को महाऽन्यायकारिणः ? ।
इत्युदीर्य हठात् केशेष्वग्राहयदमुं भटैः ॥२१२॥

**देवदत्ता** निपत्याह चरणाब्जे नरेश्वरम् ।
मारणेऽस्ति किमेतस्य काकस्येव दुरात्मनः ? ॥२१३॥

उद्धतारातिभूपालरक्तपानैकलम्पटः ।
कान्दिशीकेऽत्र वणिजि कथं ते निपतत्वसिः ? ॥२१४॥

*मुञ्चैनं स्वयमेवासौ पापः पापेन पक्ष्यते ।*
*मक्षिकोल्लालने कुर्यान्न करी हि करोच्छ्रयम् ॥२१५॥*

भूपोऽप्युवाच मान्याऽसि मुक्तस्तेनैष ते गिरा ।
तस्मिन् नवरमानीते स्थितिरस्यात्र भाविनी ॥२१६॥

इत्युक्ते सोऽपि राजानं प्रणम्याशु विनिर्गतः ।
*को विश्रम्भो नदीवेग-सिंहाग्नीनां नृपस्य च ? ॥२१७॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सम्यग् गवेषयामास तमप्राप्य परं क्वचित् ।
क्षतमानो जनैर्निन्द्यो भृत्वा भाण्डानि सोऽचलत् ॥२१८॥

मृत्युर्वा देशमोक्षो वा मानहानाविदं द्वयम् ।
अङ्गीकृत्यमिति ध्यात्वा पार्श्वकूलं सुवाहनैः ॥२१९॥ **युग्मम्**

इतः सोपायनं लेखं दत्त्वा श्री**विक्रमो** नृपः ।
**उपावन्ती**श्वरं दूतं प्राहिणोत् प्रियवादिनम् ॥२२०॥

नत्वोपविश्य सन्मानं भूपानुज्ञातविष्टरे ।
गम्भीरध्वनिना सभ्यचमत्कारमुदाहरत् ॥२२१॥

देव ! श्री**विक्रम**क्ष्मापः सर्वसाम्राज्यतोऽधिकम् ।
भवत्प्रीतिसुखं चित्ते महासौख्यं हि मन्यते ॥२२२॥

राजन् ! भवत्पुरीप्राप्तं सामान्यमपि मानवम् ।
राजकान्तर्गतोऽप्येष सगौरवमुदीक्षते ॥२२३॥

आवार्धिमेदिनीनाथ ! **विक्रमेणा**प्यवाचि ते ।
प्रीतिप्रणाम इत्युक्त्वा राज्ञो लेखमथार्पयत् ॥२२४॥

नानास्वर्णमणीपूरमढौकयदुपायनम् ।
राजाऽपि लेखमुन्मुद्य सप्रमोदमवाचयत् ॥२२५॥

स्वस्तिवाचमिदं **देवदत्ता**यां दैवतो महान् ।
प्रतिबन्धभरोऽस्माकं तत् तुभ्यं यदि रोचते ॥२२६॥

चेत् साऽप्यागन्तुकामा स्यात् सद्य एव प्रसद्य तत् ।
**देवदत्ता**प्रेषणेनाभिषिच्यः स्नेहपादपः ॥२२७॥

वाचयित्वेति सन्तुष्टः प्रविलोक्य सभासदः ।
दूतमाह विशांनाथः पीयूषौघकिरा गिरा ॥२२८॥

श्री**विक्रमार्क**राजेन परमा प्रीतिरस्ति नः ।
इदं हि विश्वविज्ञातं सूर्याचन्द्रमसाविव ॥२२९॥

श्री**विक्रमे**ति नाम्नोऽपि श्रवणेऽस्मन्मनस्तथा ।
सारस्यमाश्रयेद् रोमाङ्कुरान् धत्ते यथा वपुः ॥२३०॥

रोचते यदि युष्मभ्यं तेनेति किमु लिख्यते ? ।
सर्वस्वं हि तदायत्तमस्माकं सा किमुच्यते ? ॥२३१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्युक्त्वा द्रुतमाहूय **देवदत्ता**मवग् नृपः ।
अद्य भद्रे ! कृतार्थाः स्मः सख्या स्मो येन चिन्तिताः ॥२३२॥

**मूलदेवे**न विख्यात**विक्रमा**ख्येन भूभुजा ।
त्वमप्याकारिताऽसीति चेद् रुचिस्तत्र याहि तत् ॥२३३॥

रोमाञ्चापरकञ्चुक्या तयाऽभाणि ततो नृपः ।
मूर्ध्नोऽप्युपरि मे भाग्यदशा सम्प्रति वर्तते ॥२३४॥

समानसुखदुःखोऽसौ प्रियः प्रणतराजकः ।
मां यद्याह्वयते प्रेम्णा प्रार्थ्यं मे किमतः परम् ? ॥२३५॥

प्रसीद पृथिवीनाथानुजानीह्यधुनैव माम् ।
तत्र गत्वा निजामाशां फलयामि लतामिव ॥२३६॥

**विचारधवलो**ऽप्यन्तर्दधानो मुदमुत्तमाम् ।
सन्मान्य तां च दूतं च व्यसृजत् साभ्युपायनम् ॥२३७॥

प्रयाणैस्त्वरितैरेव **बेन्नातट**मुपागताम् ।
परेण महसा प्रावेशयत् तां **विक्रमो** नृपः ॥२३८॥

तयैकरक्तया भोगान् भुञ्जानो वसुधाधवः ।
वयः कृतार्थयामास स लक्ष्म्येव पुरुषोत्तमः ॥२३९॥

**विचारधवले**नास्य तथा प्रीतिरुपैधत ।
यथैतयो राज्ययुग्ममेकराज्यमिवाजनि ॥२४०॥

मुनिदानप्रभावेन लब्धसाम्राज्यसम्पदः ।
स पुपोषार्हतं धर्मं जन्मद्वयसुखावहम् ॥२४१॥

चैत्यानि कारयामास तत्र बिम्बान्यतिष्ठिपत् ।
चकाराकारयत् पूजां स जैनीं सर्वनीवृति ॥२४२॥

*तप्तायोगोलकल्पस्य न धर्मो दानतः परः ।*
*इत्यसौ रोरनिर्मग्नानुद्दध्रे दानरज्जुना ॥२४३॥*

नेतयो नैव दुर्भिक्षं नोत्पाता न च विग्रहः ।
तत्पुण्योद्रेकतस्तस्य विषये चाभवन्नमी ॥२४४॥

आनुकूल्यभृतस्तस्य श्रीभिर्ववृधिरेतमाम् ।
प्रातिकूल्यभृतस्तस्य स्वयमेव क्षयं ययुः ॥२४५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चौरान्यदारिकद्रोह्यभिधानानि श्रुतेः पथम् ।
शास्त्रेभ्यो यान्ति नेक्ष्यन्ते तद्वाच्यान्यस्य शासने ॥२४६॥

इतश्च सोऽचलः **पार्श्वकूल**तो द्रविणं बहु ।
उपार्ज्य भृतभाण्डोऽथ, आगाद् **बेन्नातटं** पुरम् ॥२४७॥

आवासितः पुरासन्नक्षेत्रेऽपृच्छज्जनानिति ।
किं नामाऽत्र नृपस्तेऽपि स्मित्वा प्रोचुस्तरामिदम् ॥२४८॥

स्वयं प्रकाशवान् राजा **विक्रमो**ऽथ दिनेश्वरः ।
प्रष्टव्यतां तथाऽप्यागात् तवायमिति कौतुकम् ॥२४९॥

मौक्तिकस्थालमापूर्य ततोऽसौ मेदिनीश्वरम् ।
उपतस्थे प्रणम्यैतदनुज्ञातासनेऽविशत् ॥२५०॥

राज्ञोपालक्षि दक्षेण सहस्राक्षेण सोऽचिरात् ।
न विवेद स राजानं **मूलदेव**तया परम् ॥२५१॥

राज्ञाऽभाणि कुतः श्रेष्ठिन् ! पृच्छ्यते ते समागमः ? ।
प्रणम्य सोऽभणत् **पार्श्वकूलाद्** व्याघुटितोऽधुना ॥२५२॥

प्रसीदाधिकृतो देहि सद्यो भाण्डनिरूपकान् ।
वासरा बहवोऽभूवन् देव ! मुक्तगृहस्य मे ॥२५३॥

यद्येवं स्वयमायाता तदस्म्येव भवत्कृते ।
इत्युदीर्य नृपः पञ्चकुलोपेतोऽभ्यगाद् बहिः ॥२५४॥

चन्दनागरु-मञ्जिष्ठा-दन्त-शङ्खाद्यदर्शयत् ।
राज्ञोऽसौ सकलं भाण्डं ततोऽपृच्छन्नरेश्वरः ॥२५५॥

श्रेष्ठिन्नेतावदेवैतदोमित्यभिहितेऽमुना ।
अर्धशुल्कं कुरुध्वं भोः ! श्रेष्ठिनोऽस्येत्यवग् नृपः ॥२५६॥

साक्षान्मम परं तोलयध्वं भाण्डकदम्बकम् ।
ततोऽधिकारिणो राजादेशमप्यप्रमाणयन् ॥२५७॥

ततोऽतिभाराच्चरणप्रहाराद् वंशवेधनात् ।
भाण्डान्तर्गतमुर्वीशः सारभाण्डमलक्षयत् ॥२५८॥

विरलीकृत्य सर्वाणि तानि यावन्न्यरूपयत् ।
क्वचिद् हेम क्वचिन्मौक्तिकादिकं तावदैक्षत ॥२५९॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

ततोऽन्वजिज्ञपद् वीरानरेऽसौ दस्युरद्भुतः ।
न श्रुतोऽहमनेनैतं बध्नीत श्रेष्ठिपांशनम् ॥२६०॥

मा नंष्ट्वा यास्यतीत्युक्त्वा सुधीः सौधमगाद् नृपः ।
अनुराजमसौ निन्ये नियन्त्र्य नृपपूरुषैः ॥२६१॥

तं गाढयन्त्रितं दृष्ट्वा भूपतिः कृपयाऽञ्चितः ।
द्रुतमुन्मोचयामास सर्वाङ्गोद्भूतवेपथुम् ॥२६२॥

उवाच राजा मा भैषीः मां जानास्यथ सोऽवदत् ।
को न वेत्ति भवादृक्षान् समुद्रान्तमहीभुजः ? ॥२६३॥

उपचारवचस्त्यक्त्वा स्फुटं साधय वेत्सि चेत् ।
राज्ञेत्युक्ते प्रभो ! सम्यग् न वेद्मीत्य**चलो**ऽभ्यधात् ॥२६४॥

आह्वयद् नृपति**र्देवदत्ता**मन्तःपुरात् ततः ।
अप्सरा इव साऽप्यागादुपराजमलङ्कृता ॥२६५॥

स तां दृष्ट्वा भृशं त्रेपे तयोक्तं मा त्रपस्व भोः ! ।
*सम्पदो विपदश्चैवास्थायिन्यः प्रायशो जने ॥ २६६॥*

तदा महामहा **मूलदेवो**ऽयं न्यत्कृतस्त्वया ।
नतानेकमहीपालः सोऽधुनाऽयं नृपोऽभवत् ॥२६७॥

तदाऽस्याग्रे त्वयाऽभाणि मामेवं व्यसनागतम् ।
उपाकृथाः प्रभुः सोऽयं त्वयि कृत्योपकृत्क्षणः ॥२६८॥

प्राणसंशयमापन्नः शीर्षच्छेद्यापराधकृत् ।
मुक्तोऽसि हीनदीनानां वत्सलेनाधुनाऽमुना ॥२६९॥

*अपकारिणि विद्विष्टेऽप्युपकारकृतोऽत्र ये ।*
*तेषु मूर्धाभिषिक्तोऽयं श्रीविक्रमनरेश्वरः ॥ २७०॥*

स प्रत्यागतजीवाशोऽनुगृहीतोऽस्म्यहं प्रभो ! ।
वदन्निति प्रभो**र्देवदत्ता**याश्च पदेऽपतत् ॥२७१॥

अवादीच्च पदे लग्नः सात्म्यं सदसतामिदम् ।
*निरर्थमुपकुर्वन्त्येकेऽपकुर्वन्ति चापरे ॥ २७२॥*

शशाङ्कस्येव देवस्य दधतः सकलाः कलाः ।
तमसेव मया यत्प्रागपराद्धं क्षमस्व तत् ॥२७३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्पापस्य मयाऽवाप्तमेव पुष्पं नरेश्वर ! ।
**अवन्त्यां** नानुजानाति मत्प्रवेशं यदुद्धरः ॥२७४॥

अथाख्यद् **मूलदेवो**ऽपि रणेऽपि प्रणतद्विषाम् ।
न दण्डकारिता मेऽस्ति साम्प्रतं ते किमुच्यते ? ॥२७५॥

देव्या प्रसन्नयाऽऽदिष्टं प्रमाणं तन्ममापि हि ।
इत्युक्त्वा बहु सत्कृत्य शुल्कलेशोऽपि नाददे ॥२७६॥

ततो गतो**ऽचलोऽवन्त्यां** विचारधवलो नृपः ।
श्री**विक्रम**नृपात् युक्त्याऽन्वज्ञासीत् तदुपागमम् ॥२७७॥

ग्रामाद् निर्घृणशर्माऽपि **विक्रमो**पान्तमागतः ।
प्रगे द्रष्टव्यवक्त्रोऽसौ योग्यश्चोपकृतेर्मम ॥२७८॥

ध्यात्वेत्यदान्महाग्रामं तमेवादृष्टसेवया ।
***सतां स्वल्पोऽपि सम्बन्धः कृपणेषु गुणायते ॥ २७९॥***

इतः शासति साम्राज्यं **मूलदेवे** नरेश्वरे ।
दृष्टः पूर्णेन्दुसुस्वप्न इदं कार्पटिकोऽशृणोत् ॥२८०॥

अचिन्तयद् मयाऽनेन वीक्षाञ्चक्रे समस्तदा ।
स्वप्नः परं फले भेदः पृच्छाभेदादभूद् मम ॥२८१॥

पुनः पश्यामि चेत् स्वप्नं विचारं कारयामि तत् ।
नैमित्तिकेन साम्राज्यं तद्वन्मेऽपि यथा भवेत् ॥२८२॥

तन्निपीय दधि स्त्यानं स्वपिम्युपसरो निशि ।
येन द्रष्टा पुनः स्वप्नं तादृशं शैत्ययोगतः ॥२८३॥

ध्यात्वेति स तथाऽकार्षीदनिशं न परं वरम् ।
तादृशं स्वप्नमैक्षिष्ट यन्नप्पश्यालजालकम् [?] ॥२८४॥

पश्येत् कार्पटिकः कदाचिदुदितं पूर्णं निशानायकं,
तादृग्यत्नवशात् प्रसन्नसुमनःसाहाय्यतो वा क्वचित् ।
मानुष्यादिकमाप्य येन सुकृतं नो सञ्चितं हारितं;
तेनेदं समवाप्यते न हि पुनर्जन्मस्वनन्तेष्वपि ॥२८५॥

इति **स्वप्ने** षष्ठः ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पुरमिन्द्रपुरं नाम साक्षादिन्द्रपुरं किल ।
सुपर्वजनितानन्दमप्सरोभिर्मनोरमम् ॥१॥

**इन्द्रदत्तो** नृपस्तस्मिन्नासीदिन्द्र इव श्रिया ।
सदानभोगसन्तानप्रीतिश्चित्रं न गोत्रभित् ॥२॥

तस्य द्वाविंशतिः पत्न्यस्तज्जा द्वाविंशतिः सुताः ।
राज्ञी मन्त्रिसुता चैका परं दृष्टा करग्रहे ॥३॥

अन्यदा तामृतुस्नातां दृष्ट्वा राजा जगौ निजान् ।
केयमित्यूचिवांसस्ते त्वद्देवी देव ! मन्त्रिसूः ॥४॥

ततस्तां रजनीमेकां तया सह नृपोऽवसत् ।
साऽभूत् तदा पुष्पवती तद्योगात् फलवत्यभूत् ॥५॥

तद्राजागमनदिनं ते चालापा नरेशितुः ।
साऽथात्मगर्भसम्भूतिं पितुः सर्वमदोऽभणत् ॥६॥

तत् सर्वं मन्त्रिणाऽलेखि काले तस्याः सुतोऽभवत् ।
**सुरेन्द्रदत्त** इत्याख्यः स्वजनाब्धिसुधाकरः ॥७॥

तद्दासीनां च तत्राहन्यभूद् डिम्भचतुष्टयी ।
**अग्निकाख्यः पर्वतको बहुला सागरस्त**था ॥८॥

मन्त्री दौहित्रमात्मीयं सह जातानि तानि च ।
स्वगृहे वर्धयामास ज्ञापितोऽपि न भूपतिः ॥९॥

**अग्निको** दीपयामास **पर्वतो**ऽध्यासयन्मदे ।
**बहुला**ऽचीकरद् मायां **सागर**स्तमलोभयत् ॥१०॥

**सुरेन्द्रदत्त**स्तान् सर्वानवमत्य महामतिः ।
कलाचार्यात् कलाः सर्वा जगृहे मन्त्रिशासनात् ॥११॥

द्वाविंशतिः पुनः पुत्राः शठाः पेठुर्न किञ्चन ।
आक्रोशन् प्राहरन् पिण्डाः पण्डितं गुरुतल्पगाः ॥१२॥

पाठार्थं भापयन्तं च तज्जनन्योऽपि पण्डितम् ।
अवोचन् वेत्सि किं न त्वं पुत्रान् निस्त्रिंश ! दुर्लभान् ! ॥१३॥

इतश्च **मथुरा**पुर्यां **जितशत्रु**नृपोऽङ्गजाम् ।
**निर्वृतिं** युवतीमूचे वत्से ! कीदृग् वरोऽस्तु ते ॥१४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

साऽवदत् तात ! विक्रान्तो राधावेधी वरोऽस्तु मे ।
**ऐन्द्रदत्ति**र्भवेदीदृक् कोऽपीति व्यमृशन्नृपः ॥१५॥

स्वयंवरां ससेनां तां तत्र प्रैषीद् नृपस्ततः ।
**इन्द्रदत्तो**ऽपि हृष्टोऽभूद् धन्योऽहं सुभगाः सुताः ॥१६॥

समुच्छ्रितपताका पूराज्ञाऽकारि तदागमे ।
बहिर्मञ्चा न्यवेश्यन्त राधास्तम्भोऽष्टचक्रयुक् ॥१७॥

तस्योपरिष्टात् पञ्चाली तैलकुण्डमधः पुनः ।
स्वयंवरामण्डपोऽन्तः कारितः स्वःसभोपमः ॥१८॥

उपाविशन् माण्डलिका मञ्चेष्वेकत्र भूपतिः ।
आस्त निर्वृतिरप्यागाद् मिलितं राजमण्डलम् ॥१९॥

ऊचे राज्ञा सुतो ज्येष्ठः **श्रीमाली** वत्स ! **निर्वृतिम्** ।
राज्यं च गृह्यतां कृत्वा वेधं पञ्चालिकादृशः ॥२०॥

सोऽनभ्यासात् ततस्तत्र धन्वादानेऽपि न क्षमः ।
कथमप्यात्तधन्वेषुममुचद् यत्र तत्रगम् ॥२१॥

स चक्रास्फलितो भग्नस्तथाऽन्येषामपीषवः ।
भूधवोऽथाधृतिं धत्ते धिगेतैर्धर्षितोऽस्म्यहम् ॥२२॥

अथोचे मन्त्रिणा देव ! मा मैवमधृतिं कृथाः ।
अपरोऽप्यस्ति ते सूनुर्मत्पुत्रीकुक्षिसम्भवः ॥२३॥

**सुरेन्द्रदत्त** इत्याख्यः सर्वकर्मसु कर्मठः ।
प्रतीत्यै च न्यधाद् धीमान् वहिकाक्षरदर्शनम् ॥२४॥

आह्वयेत्युदिते राज्ञा मन्त्रिणाऽऽनाय्य दर्शितः ।
सोऽथालिङ्ग्य नृपणोचे स्नेहगद्गदया गिरा ॥२५॥

राधावेधं विधायात्र कृत्वाऽस्मन्मुखमुज्ज्वलम् ।
**निर्वृतिं** राज्यलक्ष्मीं च त्वमुद्वह कुलोद्वह ! ॥२६॥

तदा कोदण्डमादाय शरं कृत्वा तु लक्षगम् ।
द्वाविंशतिकुमारांस्तान् प्रत्यूहव्यूहकारिणः ॥२७॥

चतुरो दासचेटांश्च चित्तविक्षोभदायिनः ।
आकृष्टासी भटौ द्वौ च जल्पन्तावित्यभिस्थितौ ॥२८॥

Jain Education International 2010_02    For Private & Personal Use Only    www.jainelibrary.org

राधावेधो न जातश्चेच्छिरश्छेदस्तदा तव ।
सोऽवमत्य समस्तांस्तान् योगीवैकाग्रमानसः ॥२९॥

दत्तदृग् बिम्बिते लक्ष्ये ज्ञात्वा चक्राष्टकान्तरम् ।
पञ्चालीवामदृग्वेधं व्यधात् क्षिप्त्वोर्ध्वगं शरम् ॥३०॥ **चतुर्भिः कुलकम्**

चक्रे जयजयारावः सर्वैरपि जनैस्तदा ।
**निर्वृतिं** परिणिन्ये स राज्यलक्ष्मीमवाप च ॥३१॥

दुष्करोऽयं यथा राधावेधो बलवतामपि ।
तथा मानुष्यकं जन्म दुष्प्रापं पुनरप्यदः ॥३२॥

इति **चक्रे** सप्तमः **॥७॥**

लक्षयोजनमानोऽस्ति क्वापि द्वीपे महाह्रदः ।
सहस्रयोजनप्राप्ताधस्तलो वर्तुलाकृतिः ॥१॥

यो नितान्तोद्ध्र्वसंश्लिष्टशैवालपटलाष्टकः ।
वरुणाम्भोनिधिरिवोत्ताननीलपटावृतः ॥२॥

पुत्र-पौत्रादिसन्तत्या तत्रैकः कच्छपो महान् ।
मूल-शाखा-प्रशाखाद्यैर्वृद्धिं न्यग्रोधवद् ययौ ॥३॥

अथान्यदाऽश्विने मासे वात्यया पुटभेदतः ।
राकनिशार्धे शैवालविचाले विवरोऽभवत् ॥४॥

स च कूर्मस्तदा तत्र दैवादागाज्जलोपरि ।
ददर्श चन्द्रं छिद्रेणादृष्टपूर्वं नभस्तले ॥५॥

सन्ततिं मेलयित्वा स्वां दर्शयाम्येतदद्भुतम् ।
विमृष्येति निमज्ज्यान्तः सकलांताममेलयत् ॥६॥

सकुलोऽप्यागमद् भूयस्तं द्रष्टुं तत्र कच्छपः ।
कपाटसन्धिवद् वातान्मिलितं विवरं च तत् ॥७॥

तत् किं स्याद् विवरं भूयस्तस्य वा चन्द्रदर्शनम् ? ।
भवेद् वा देवभावेन न पुनर्मानुषं जनुः ॥८॥

इति **चर्मणि** कूर्मेऽष्टमः **॥८॥**

**स्वयम्भूरमणा**म्भोधेः पूर्वप्रान्ते युगं भवेत् ।
समिला चापरप्रान्तेऽन्योऽन्यं वीचिविघट्टनात् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

समिला किं युगच्छिद्रं विशेदन्याप्रयोगतः ? ।
सा विशेदपि तच्छिद्रं मानुषं तु सुदुर्लभम् ॥२॥

इति **युगे** नवमः ॥९॥

देवः कोऽप्युपलस्तम्भं चूरयित्वा महाबलः ।
तच्चूर्णं श्लक्ष्णमत्यन्तं चिक्षेप नलिकान्तरे ॥१॥

मेरुचूलामथारुह्य फूत्कृते तस्य पुद्गलाः ।
तत्क्षणात् तेऽनिलोद्धूताः सर्वे जग्मुर्दिशोदिशम् ॥२॥

कोऽपि कुर्वीत तं स्तम्भं पुनस्तैरेव पुद्गलैः ।
न तु मानुष्यकाद् भ्रष्टो मनुष्यो हि पुनर्भवेत् ॥३॥

इति **परमाणौ** दशमो दृष्टान्तः ॥१०॥

तत्र यथा मानुषत्वं दुर्लभं तथाऽऽह—

**समावन्ना ण संसारे नाणागोत्तासु जाइसु ।**
**कम्मा नाणाविहा कट्टु पुढो विस्संभिया पया ॥२॥**

**व्याख्या—समापन्नाः** समन्तादापन्नाः प्राप्ताः '**णे**त्यलङ्कारे' । क्व संसारे पुनः क्व **नानागोत्रास्व**नेकनामसु **जातिषु** क्षत्रियादिषु । **कर्माणि** ज्ञानावरणीयादीनि **नानाविधान्य**नेकप्रकाराणि **कृत्वा पृथगे**कैकशः । 'विस्संभिय त्ति' बिन्दोरलाक्षणिकत्वाद् **विश्वभृतः** क्वचित् कदाचिदुत्पत्त्या सर्वजगद्व्यापकाः । उक्तं हि—

"[१]**नत्थि किर सो पएसो लोए वालग्गकोडिमेत्तो वि ।**
**जम्मण-मरणाबाहा जत्थ जिएहिं न संपत्ता"** ॥१॥

काः ? **प्रजाः** जनसमूहरूपाः ॥२॥

अमुमेवार्थमाह—

**एगया देवलोएसु नरएसु वि एगया ।**
**एगया आसुरं कायं अहाकम्मेहिं गच्छई ॥३॥**

**व्याख्या—एकदा** एकस्मिन् काले **देवलोकेषु, नरकेष्वप्येकदा । एकदा आसुरं कायम**धस्त्यादेवोपलक्षणमिदं **यथाकर्मभिस्त**द्गत्यनुरूपचेष्टितै**र्गच्छन्ति** ॥३॥ तथा—

---

१. नास्ति किल स प्रदेशो लोके वालाग्रकोटिमात्रोऽपि ।
जन्म-मरणाबाधा यत्र जीवैर्न सम्प्राप्ता ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**एगया खत्तिओ होइ तओ चंडालबोक्कसो ।**
**तओ कीडपयंगो य तओ कुंथू-पिपीलिया ॥४॥**

**व्याख्या—एकदा** मनुष्यानुरूपकर्मोदयकाले **क्षत्रियो** राजा **भवति** । **ततो**ऽनन्तरं **तको** वा प्राणी **चाण्डालः** प्रसिद्धः, **बोक्कसो** वर्णान्तरभेदः । तथाऽऽह—

"[१]**बंभणेण सुद्दीए जाओ निसाओ त्ति, बंभणेण वेसीए जाओ अंबट्ठो त्ति वुच्चई । तत्थ निसाएणं जो अंबट्ठीए जाओ सो बोक्कसो भण्णति"** ।

अत्र क्षत्रियादिग्रहणेनोच्च-नीच-सङ्कीर्णजातय उपलक्षिता**स्ततो** मनुष्यत्वानन्तरं **कीटः पतङ्गः** शलभ**स्ततः कुन्थुः पिपीलिका** भवतीति सर्वत्र योज्यम्, शेषतिर्यगुपलक्षणं चैतत् ॥४॥

एवं भ्रमन्तस्ते किं निर्विद्यन्ते नवेत्याह—

**एवमावट्टजोणीसु पाणिणो कम्मकिव्विसा ।**
**न निव्विज्जंति संसारे सव्वट्ठेसु व खत्तिया ॥५॥**

**व्याख्या—एव**मुक्तन्यायेन**ऽऽवर्तः** परिवर्तस्तदुपलक्षिता **योनयो** जीवोत्पत्ति-स्थाननानि **तासु** प्राणिनः **कर्मणा किल्बिषा** अधमास्ते **न निर्विद्यन्ते** कदैतद्विमुक्तिरिति नोद्विजन्ते । क्वेत्याह—**संसारे** भवे केष्विव के न निर्विद्यन्ते ? इत्याह 'सव्वट्ठेसु व त्ति' **सर्वार्थेषु** मनोज्ञशब्दादिषु धन-कनकादिष्विव वा **क्षत्रिया** राजानः ॥५॥

अनिर्विद्यमानास्ते किं स्युरित्याह—

**कम्मसंगेहिं संमूढा दुक्खिया बहुवेयणा ।**
**अमाणुसासु जोणीसु विणिहम्मंति पाणिणो ॥६॥**

**व्याख्या—कर्मभिः सङ्गाः** सम्बन्धास्तैः **सम**िति भृशं **मूढा** वैचित्यमुपगता **दुःखिता बहुवेदनाः** । **अमानुषीषु** नरक-तिर्यगाभियोग्यादिदेवदुर्गति**योनिषु विनिहन्यन्ते** विशेषेण निपात्यन्तेऽर्थात् कर्मभिः **प्राणिनः** । कोऽर्थो न तत उत्तारं लभन्ते इत्यतो मनुजत्वं दुर्लभम् ॥६॥

कथं तदवाप्तिरित्याह—

**कम्माणं तु पहाणीए आणुपुव्वी कयाइ उ ।**
**जीवा सोहिमणुप्पत्ता आययंति मणुस्सयं ॥७॥**

---

१. ब्राह्मणेन शूद्यां जातो निषाद इति, ब्राह्मणेन वैश्यायां जातोऽम्बष्ठ इत्युच्यते । तत्र निषादेन योऽम्बष्ठ्यां जातः स बोक्कसो भण्यते ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—कर्मणां** मनुजगतिविबन्धकानामनन्तानुबन्ध्यादीनां **प्रहाण्या**ऽपगमेन**नानुपूर्व्या** क्रमेण न झगित्येव तुरेवार्थे **कदाचिदेव जीवाः शुद्धिं** कर्मक्षयरूपामनु**प्राप्ता आददते** स्वीकुर्वन्ति **मनुष्यताम्** ॥७॥

श्रुतिदुर्लभतामाह—

**माणुस्सं विग्गहं लद्धुं सुई धम्मस्स दुल्लहा ।**
**जं सुच्चा पडिवज्जंति तवं खंतिमहिंसयं ॥८॥**

**व्याख्या—मानुष्यं विग्रहं** देहं **लब्ध्वा**ऽपि **श्रुतिः** श्रवणं **धर्मस्य दुर्लभा । यं** धर्मं **श्रुत्वा प्रतिपद्यन्ते**ऽङ्गीकुर्वन्ति **तपो** द्वादशविधं **क्षान्तिं** क्रोधजयरूपां मानादिजयोपलक्षणं चैषा **अहिंस्रताम**हिंसनशीलतामनेन शेषव्रतोपलक्षितम् प्रथमव्रतमुक्तमेवं च तपसः क्षान्त्यादिचतुष्कस्य महाव्रतपञ्चकस्याभिधानाद् दशविधयतिधर्मोऽभिहितस्तं च श्रुत्वैव प्रतिपद्यन्ते । नाश्रुत्वा "**सुच्चा जाणइ कल्लाणं**" इत्याद्यागमात् ॥८॥

श्रद्धादुर्लभतामाहुः—

**आहच्च सवणं लद्धुं सद्धा परमदुल्लहा ।**
**सोच्चा नेयाउयं मग्गं बहवे परिभस्सई ॥९॥**

**व्याख्या**—आहच्च' इति **कदाचित् श्रवणं** प्रस्तावाद् धर्मस्य **लब्ध्वा**ऽपि **श्रद्धा** रुचिरर्थाद् धर्मविषयैव **परमदुर्लभा**ऽतिशयदुरापा । कुत इत्याह **श्रुत्वा नैयायिकं** न्यायोपपन्नं **मार्गं** सम्यक्त्वादिमुक्तिपथमपेर्गम्यत्वात् प्राप्यापि **बहवो**ऽनेक एव **परीति** सर्वप्रकारं **भ्रश्यन्ति** च्यवन्तेऽर्थान्न्यायमार्गादेव **जमाल्या**दिवत् ।

तथाहि—

'चतुर्दशसु वर्षेषु व्यतिक्रान्तेषु केवलात् ।
ज्ञानात् श्री**वर्धमान**स्याभवत् प्रथमनिह्नवः' ॥१॥

सुतः **सुदर्शना**नाम्न्याः स्वसुर्**वीर**जिनेशितुः ।
**जमालि**रिति नामाऽभूत् क्षत्रवीरः पवित्रधीः ॥२॥

आर्हतीं परिणिन्येऽसौ नन्दिनीं **प्रियदर्शनाम्** ।
भुक्त्वा भोगान् क्रमाद् दीक्षां जग्राह चरमार्हतः ॥३॥

महोग्रभोगराजन्यक्षत्राणां पञ्चभिः शतैः ।
सम्पूर्णैकादशाङ्गेषु सोऽधीती क्रमशोऽजनि ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सहस्रराजकन्याभिः प्रियाऽप्यस्य समाददे ।
व्रतं तदैव साऽप्यासीत् साध्वी कर्तव्यकर्मठा ॥५॥

अन्यदा स्वाम्यनुज्ञातः स **श्रावस्तीं** पुरीं ययौ ।
सतन्त्र**स्तिन्दुको**द्याने संयमी समवासरत् ॥६॥

तत्र दाघज्वरार्त्योपविष्टः स्थातुमशक्नुवन् ।
मुनीन् बभाण संस्तारं कुरुध्वं विश्रमाय मे ॥७॥

तैश्चोपचक्रमे कर्तुं यावत् तावत् ज्वरातुरः ।
कृतो न वेति सोऽभाणीत् कृत एवेति तऽवदन् ॥८॥

विश्रमाय गतस्तत्र क्रियमाणमवेक्ष्य तम् ।
मिथ्यात्वोदयतश्चिन्तां चकारेति स चेतसि ॥९॥

असौ संस्तारकः साक्षात् क्रियते न कृतः पुनः ।
क्रियमाणं कृतं तस्माद् मिथ्या **वीर**प्ररूपणम् ॥१०॥

इहाभेदमुरीचक्रे यः कृत-क्रियमाणयोः ।
सतः क्रियाप्रबन्धेन सदोषव्यूहमाददे ॥११॥

तथाहि—

कृतं न क्रियमाणं स्यात् सद्भावात् सिद्धकुम्भवत् ।
कार्यापरिसमाप्तिर्वा क्रियावैफल्यमेव च ॥१२॥

भवच्च दृश्यते पूर्वं दीर्घश्चास्य क्रियाक्षणः ।
न चाहत्य घटोत्पत्तिः क्वचिद् दृष्टाऽऽदिमे क्षणे ॥१३॥

तस्मान्न हि क्रियाकाले कृतं तद् व्यपदिश्यते ।
क्रियापरिसमाप्तौ तु कृतं स्याद् युक्तिमानतः ॥१४॥

इति मिथ्याविकल्पाल्पीभूतदृष्टिः क्रमादसौ ।
सज्जः साधून् समाकार्य साक्षेपमिदमभ्यधात् ॥१५॥

''उत्पद्यमानमुत्पन्नमित्याद्याह स्म यज्जिनः ।
प्रमाणबाधितं मिथ्या तन्न श्रद्धत्त किं बुधाः ? ॥१६॥

येऽस्य श्रद्दधिरे वाक्यमेष तैर्मुमुचे न हि ।
सद्दृष्टयस्तु बोधार्थं तं सयुक्तिकमभ्यधुः ॥१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नाकृतं क्रियते किञ्चिदसत्त्वादभ्रपुष्पवत् ।
यद्यसत् क्रियते किञ्चित् खरशृङ्गं तदा कुरु ॥१८॥

सत्त्वे नित्यक्रियाद्यास्तु दोषास्त्वप्यधिकं स्थिता: ।
सतो भावान्तरोत्पत्त्या यदुत्पत्तिस्तु युज्यते ॥१९॥

आकाशं कुरुतेत्यादि प्रतीतेरत्र दर्शनात् ।
असत् तु हेत्ववस्थायां कथं कार्यं तु जायते ? ॥२०॥

मृदोऽन्यथा घट इव पट: किं न हि सम्भवेत् ? ।
मा जायतां घटो वाऽपि स्यात् सज्जन्यं ततो मतम् ॥२१॥

प्रतिक्षणभवद्भूरिविसदृक्पर्यवाश्रय: ।
यदि दीर्घ: क्रियाकालस्तद् घटस्य किमागतम् ? ॥२२॥

अन्यारम्भे तदपर: कथमर्थो भवेत् तत: ? ।
शिवकादिक्षणे कुम्भ: कथमादौ निरीक्ष्यताम् ? ॥२३॥

क्रियाप्रान्त्यक्षणारब्धस्तत्र दृश्यो घटस्तत: ।
कथं प्रागनुभाव्य: स्यादसत्त्वात् खरशृङ्गवत् ॥२४॥

न कृतं क्रियमाणं चेद् वाच्यं क्व तर्हि तत् कृतम् ? ।
चेत् क्रियाविगमे तत् स्यादसत्त्वात् प्राग् न किं कृतम् ? ॥२५॥

क्रियमाणक्षणोऽथाद्यस्तदन्यस्तु क्रियाक्षण: ।
क्रियया न तु कार्यं स्यात् क्रियामुत विनाऽपि हि ॥२६॥

यद्याद्य: कथमन्यत्र समये सा परत्र तत् ।
न वटच्छेदनं भूयात् पलाशच्छेदकर्मणा ॥२७॥

भो: ! क्रियोपरमे कार्यं न तद्भावे इति ब्रूवन् ।
क्रियायास्त्वमहेतुत्वमाख्योऽध्यक्ष्यक्षतिस्तत: ॥२८॥

यदि क्रियां विना कार्यं व्रत-मृन्मर्दनादिकम् ।
व्यर्थं कर्माखिलं मोक्षाद्यर्थिनां च घटार्थिनाम् ॥२९॥

क्रियाकाले तत: कार्यं क्षणमात्रस्त्वसौ यत: ।
दीर्घो घटक्रियाकालो भ्रम एवेति ते तत: ॥३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्तञ्च—

"[१]**पइसमयकज्जकोडीनिरवेक्खो घडगयाभिलासो सि ।**
**पइसमयकज्जकोडि थूलमइ ! घडं मिलाएसि" ॥३१॥**

यावानास्तीर्यते संस्तारको यत्र क्षणे स तु ।
तावांस्तत्र क्षणे जातो विद्धीदमपि निश्चयात् ॥३२॥

उक्तञ्च—

"[२]**पइसमयकज्जकोडीविमुहो संथारयाहिकयकज्जो ।**
**पइसमयकज्जकालं कह संथारं मिलाएसि" ॥३३॥**

**वीरेण** क्रियमाणमुक्तमकृतं विश्वत्रयीस्वामिना,
कुम्भादेर्व्यवहारवर्तिनयतो नीतेरथो निश्चयात् ।
यत् किञ्चित् क्रियमाणमेव हि कृतं तत् सर्वमाख्यज्जिनः,
कर्माविष्टमतः कृतं कृतमथो भाज्यं तथा ते वचः" ॥३४॥

इत्यादि स्थविरैरूचे न तथाऽपि ह्यबुध्यत् ।
गीतार्थास्तं परित्यज्य ततो **वीरा**न्तिकं ययुः ॥३५॥

उपतत्संस्थिताः केऽपि साधवोऽथ **सुदर्शना** ।
स्थिताऽऽस्ते पुरि तत्रैव **ढङ्क**पाककरालये ॥३६॥

साऽपि विप्रतिपन्नाऽऽख्यद् **ढङ्क**स्य निजसम्मतम् ।
सोऽप्यध्यासीन्ननु प्राप्ता मिथ्यात्वमियमद्भुतम् ॥३७॥

प्रवर्तिनि ! वयं सूक्ष्मं न विद्मः किमपीदृशम् ।
गाम्भीर्यादिति सोऽप्युक्त्वा बोधोपायममार्गयत् ॥३८॥

आपाकाग्नेरन्यदाऽसौ मृद्भाजनविवर्तनम् ।
कुर्वन्नग्नेः कणमेकं तत्सङ्घाट्यामथाक्षिपत् ॥३९॥

स्वाध्यायं साऽपि कुर्वन्ती तमुत्पातं विलोक्य तम् ।
प्राह किं **ढङ्क** ! सङ्घाटी दग्धा मे ही प्रमादतः ? ॥४०॥

---

१. प्रतिसमयकार्यकोटिनिरपेक्षो घटगताभिलाषोऽसि ।
प्रतिसमयकार्यकोटिः स्थूलमते ! घटं मेलयसि ॥१॥

२. प्रतिसमयकार्यकोटिविमुखः संस्तारकाधिगतकार्यः ।
प्रतिसमयकार्यकालं कथं संस्तारकं मेलयसि ?॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दह्यमानमदग्धं ते सिद्धान्तः किं स विस्मृतः ? ।
क्व केन तव दग्धेयं सङ्घाटी सोऽप्यदोऽवदत् ॥४१॥

"ऋजुसूत्रनयस्थानां युक्तं श्री**वीर**शासने ।
दह्यमानमिदं दग्धं न **जामालि**मते पुनः ॥४२॥

यत्र क्षणे हि यो देशः सङ्घाट्या दह्यतेतमाम् ।
स दग्ध एव तत्र स्यात् सङ्घाटी तूपचारतः" ॥४३॥

इति तद्वचसा बुद्धोप**जमालि** समेत्य सा ।
प्राज्ञापयद् **ढङ्क**युक्तिं स तु बोधं न भेजिवान् ॥४४॥

ततः साऽन्येऽपि मुनयस्त्यक्त्वा तं **वीर**माश्रिताः ।
**जमालि**रेक एवास्थात् प्रत्यनीकत्वमुद्वहन् ॥४५॥

**चम्पा**यां श्रीजिनोपान्ते सावलेपो वदन्नयम् ।
क्षणान्निरुत्तरीचक्रे **गौतमे**न श्रुतोक्तिभिः ॥४६॥

ततो जिनेऽपि सासूयं मिथ्योक्त्या विप्रतारयन् ।
स्वं परांश्च स पर्यन्ते मृत्वा किल्बिषिकोऽभवत् ॥४७॥

उक्तं चौपपातिकाङ्गे—

**"[1]से जे इमे गामागरनगरसंनिवेसेसु पव्वइया समाणा भवन्ति । तं जहा आयरियप्पडिणीया उवज्झायपडिणीया उभयपडिणीया अयसक्कारगा अवण्णकारगा अकित्तिकारगा बहूहिं असब्भावुब्भावणाहिं मिच्छात्ताभिणिवेसेहि य अप्पाणं परं तदुभयं च वुग्गाहेमाणा उप्पाहेमाणा तस्स ठाणस्स अणालोइयपडिक्कंता कालमासे कालं किच्चा उक्कोसेणं लंतए कप्पे देवकिव्विसिएसु देवकिव्विसियत्ताए उववत्तारो भवन्ति । तहिं तेसिं गती तेरस सागराइं ठिती अणाराहगा" ॥**

तादृक् स्थितिं किल्बिषिकेषु भुक्त्वा च्युतः परिभ्रम्य भवाननेकान् ।
आराध्य जैनीं स **जमालि**राज्ञां शिवं क्रमाद् यास्यति लब्धदृष्टिः ॥४७॥

इति प्रथमनिह्नवः ॥१॥

---

१. ते ये इमे ग्रामाकर-नगर-सन्निवेशेषु प्रव्रजिताः सन्तो भवन्ति । तद्यथा—आचार्य-प्रत्यनीका उपाध्यायप्रत्यनीका उभयप्रत्यनीका अयशःकारका अवर्णकारका अकीर्त्तिकारका बहुभिरसद्भावोद्भावनाभिर्मिथ्यात्वाभिनिवेशैश्च आत्मानं परं तदुभयं च व्युद्ग्राहमाणा उत्पाट्यमानास्तस्य स्थानस्यानालोचितप्रतिक्रान्ताः कालमासे कालं कृत्वा उत्कृष्टेन लान्तके कल्पे देवकिल्बिषिकेषु देवकिल्बिषिकतया उपपत्तारो भवन्ति । तत्र तेषां गतिस्त्रयोदश सागरा स्थितिरनाराधका ॥

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

**वीर**ज्ञानात् षोडशाब्द्यां व्यतीतायां द्वितीयकः ।
पुरे राजगृहे **तिष्यगुप्तो**ऽजायत निह्नवः ॥१॥

आचार्यस्य **वसोः** शिष्यः स चतुर्दशपूर्विणः ।
**आत्मप्रवाद**पूर्वस्यामुमालापकमध्यगात् ॥२॥

**"[१]एगे भंते ! जीवपएसे जीवे त्ति वत्तव्वं सिया ? । नो इणट्ठे समट्ठे । एवं दो तिन्नि जाव दस संखेज्जा असंखेज्जा भंते ! जीवपएसा जीव त्ति वत्तव्वं सिया ? । नो इणट्ठे समट्ठे । एगपएसूणे वि णं जीवे नो जीवे त्ति वत्तव्वं सिया । से केणं अट्ठेणं ? । जम्हा णं कसिणे पडिपुन्ने लोगागासपएसप्पमाणे जीव जीवे त्ति वत्तव्वं सिया । से तेणं अट्ठेणमित्यादि" ॥**

एतत् सूत्रमधीयानो मोहनीयोदयादयम् ।
अन्त्यप्रदेश एवात्मा इति विप्रत्यपद्यत ॥३॥

प्रदेशैरात्मनः शेषैर्नात्मत्वं विदितं श्रुते ।
अन्त्यतद्योगतस्त्वासीत् स एवात्मोच्यते ततः ॥४॥

स ब्रुवन्निदमाचार्यैर्यद्याद्यो न तदाऽन्तिमः ।
प्रदेशोऽपि न जीवः स्यात् परिणामाविशेषतः ॥५॥

आद्यादयो न ते जीवाः किन्त्वन्त्य इति तत् कुतः ? ।
पूरणत्वं तु सर्वत्र तुल्यमन्त्यप्रदेशवत् ॥६॥

न ह्येकेन प्रदेशेन विनाऽऽत्मत्वं प्रजायते ।
तथाऽप्यन्त्यप्रदेशस्य तथात्वं तु कदाग्रहः ॥७॥

श्रुतेनान्त्यप्रदेशस्य जीवतोक्ता तथोदिते ।
प्रदेशसमुदायस्य सोक्तेति किमु संशयः ? ॥८॥

एवंभूतनयो भिन्नं प्रदेशौघं हि मन्यते ।
अवस्तुत्वेन सर्वांशमयं वस्तु हि तन्मते ॥९॥

उपचारोऽपि नान्त्यांशे तदूने वस्तुनि ह्यसौ ।
ऊने पटे पटारोपस्तन्तुमात्रे त्वसौ न हि ॥१०॥

---

१. एको भदन्त ! जीवप्रदेशो जीव इति वक्तव्यं स्यात् ? । नो अयमर्थः समर्थः । एवं द्वौ त्रयो यावद् दश सङ्ख्येया असङ्ख्येया भदन्त ! जीवप्रदेशा जीव इति वक्तव्यं स्यात् ? । नो अयमर्थः समर्थः । एकप्रदेशोनोऽपि जीवो नो जीव इति वक्तव्यं स्यात् । स केन अर्थेन ? । यस्मात् कृत्स्नः प्रतिपूर्णे लोकाकाशप्रदेशप्रमाणो जीवो जीव इति वक्तव्यं स्यात् । स तेन अर्थेनेत्यादि ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इति प्रज्ञापितो यावन्न तत्त्वं प्रतिपद्यते ।
बाह्यः कृतोऽसावुद्धाट्य निह्नव**स्तिष्यगुप्तकः** ॥११॥ सप्तभिः कुलकम्

पुर्या**मामलकल्पायामाम्रशाल**वने स्थितः ।
**मित्रश्रीः** श्रावकस्तत्र तस्य निह्नवतां विदन् ॥१२॥

न्यमन्त्रयत् प्रबोधार्थं गृहे प्रकरणं मम ।
भिक्षा पर्याप्तमादेया भवद्भिस्तत्र निश्चितम् ॥१३॥

**तिष्यगुप्तो**ऽप्यगात् काले **मित्रश्री**रपि सम्भ्रमात् ।
पुरतो भक्ष्य-पक्वान्न-व्यञ्जनादीन्यढौकयत् ॥१४॥

अन्त्यावयवमादायादादेषोऽस्मै तदन्तरात् ।
पटस्यान्त्यमदात् तन्तुमवादीच्चास्मि पुण्यवान् ॥१५॥

प्रत्यलाभि गुरुर्येन सर्वथा सर्ववस्तुभिः ।
सोऽप्याह श्राद्ध ! जैनस्त्वं शठत्वं ते किमीदृशम् ॥१६॥

अस्मभ्यं त्वं वरं मा दा अदत्त्वैवं विकत्थनम् ।
यत् पुनः कुरुषे सेयं पापस्योपरि चूलिका ॥१७॥

श्राद्धोऽवदन्मुधा साधो ! मा कुप्यः स्वमतं स्मर ।
अन्त्यावयववस्तुत्वे सर्वं दत्तं मयाऽद्य वः ॥१८॥

न चेदर्हन्मतं मिथ्या तन्मुञ्चत कदाग्रहम् ।
किं वस्त्रकर्मकारित्वमन्त्यतन्तोः क्वचिद् भवेत् ? ॥१९॥

इत्याद्यैस्तात्त्विकैर्वाक्यैः स मिथ्याऽभिनिवेशतः ।
निवृत्तः सत्यभक्त्या च श्राद्धेन प्रतिलाभितः ॥२०॥

गुरोः पार्श्वे मुदा शोधिमादाय मुनिपर्षदा ।
संयुक्तो विजहारोच्चैर्जैनमार्गं प्रभावयन् ॥२१॥

इति द्वितीयो निह्नवः ॥२॥

चतुर्दशाधिके वर्षशतयुग्मे विमोक्षतः ।
श्री**वीर**स्य व्यतिक्रान्ते तृतीयोऽसावजायत ॥१॥

इह **श्वेतम्बिका**पुर्यां **पौलाषाढा**ख्यचैत्यगः ।
आर्या**षाढा**भिधाचार्यः स्थितः सुबहुसाधुयुक् ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रपन्नागाढयोगास्तच्छिष्यास्तद्वाचनागुरुः ।
स एवाभूत् पराभावाद् विधिज्ञो निपुणो हितः ॥३॥

अन्यदाऽऽयुःक्षयेऽकस्माद् रजन्यां हृदि शूलतः ।
मृत्युमासददाचार्यो ज्ञातश्च न हि केनचित् ॥४॥

**सौधर्मे नलिनीगुल्म**विमानेऽसौ सुरोऽजनि ।
प्रयुक्तावधिरज्ञासीच्छिष्यानागाढयोगिनः ॥५॥

कृपयाऽथ समागत्याश्रित्य देहं पुरातनम् ।
सर्वं रात्रिककालादि सर्वं कृत्यमचीकरत् ॥६॥

कालभङ्गादिको विघ्नः सर्वो दिव्यप्रभावतः ।
न्यवारि तेन साधूनां नीतो योगश्च पूर्णताम् ॥७॥

अथ योगावसानेऽसौ गच्छन् दिवमभाषत ।
अयतेन यता यूयं कारिता वन्दादि यत् ॥८॥

क्षमणीयमिदं सर्वं सुरीभूतस्त्वहं तदा ।
कृपावशादुपागत्य तान् योगान् वः समापयम् ॥९॥

गच्छन्नस्म्यहमित्युक्त्वा त्यक्त्वा देहमगाद् दिवम् ।
साधवोऽपि परिस्थाप्य वपुस्तस्येत्यचिन्तयन् ॥१०॥

ववन्देऽस्माभिरज्ञानाद् बहुकालमसंयतः ।
तद्वन्दनं तु सिद्धान्ते नैवोक्तं यतिनां क्वचित् ॥११॥

देवो यथाऽयमाचार्योऽभूत् परेऽपि तथा यदि ।
तद्वन्दनेन तत्पापानुज्ञा संयमिनो भवेत् ॥१२॥

इत्यव्यक्तत्वमापन्नाः सामाचारीप्रवर्तनम् ।
सर्वे मुमुचुरन्योऽन्यं कृतिकर्म-क्रियादिकम् ॥१३॥

स्थविरास्तत्प्रबोधार्थमेवमाहुरिमान् प्रति ।
शङ्का ह्याकस्मिकभ्रान्त्या का वः प्रत्यक्षसाधुषु ? ॥१४॥

विप्रकृष्टेऽणुजीवादौ परोक्षेषु जिनादिषु ।
किं न शङ्का तदुक्तेश्चेत् तदुक्तेरेव साधवः ॥१५॥

समिता वन्दनीयाः स्युः किञ्च बिम्बं जिनेशितुः ? ।
तद्गुणानास्पदं वन्द्यं यतिरूपं तथा न किम् ? ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भवेन्न चात्र साधुत्वं बिम्बे नास्त्येव वाऽऽप्तता ।
तद्वन्द्यं न कथं वन्द्याः साधवोऽथैवमुच्यते ॥१७॥

असंयताश्रितं साधुरूपं वन्दयतो भवेत् ।
तत्पापानुमतिर्देवाश्रितबिम्बे न सा कथम् ? ॥१८॥

जिनबुद्धाऽथ तद्बिम्बं नमतो न हि दूषणम् ।
यतिबुद्धा यते रूपं नमतोऽपि न तद् भवेत् ॥१९॥

अथैवमवसन्नादिवन्दनाद्यपि युज्यते ।
स्यात् तथा चापसिद्धान्तः श्रुते बहु निषेधनात् ॥२०॥

न तत्र यतिरूपस्याभावाद् यतिमतिर्भवेत् ।
क्षान्त्यादियतिलिङ्गस्यानुपलम्भात् स गम्यते ॥२१॥

प्रत्यक्षदूषणैर्दुष्टान् पार्श्वस्थादीन् नमस्यतः ।
सावद्यानुमतिस्तेषां भवेन्नेतरथा पुनः ॥२२॥

उक्तञ्च—

**"[१]जइ वेलंबगलिंगं जाणंतस्स नमओ हवइ दोसो ।
निद्धंधसं पि नाऊण वंदमाणे धुवो दोसो"** ॥२३॥

किञ्चैवं वस्त्रपात्रादि न ग्राह्यं देवशङ्कया ।
एवं सर्वक्रियोच्छेदो मा मोहं यात भो ! ततः ॥२४॥

अपि च—

**"[२]जइ जिणमयं पमाणं मुणि त्ति तो बज्झकरणपरिसुद्धं ।
देवं पि वंदमाणो विसुद्धभावो विसुद्धो त्ति ॥२५॥
परमरहस्समिसीणं समत्तगणिपिडगभरियसाराणं ।
परिणामियं पमाणं निच्छयमवलम्बमाणाणं ॥२६॥**

---

१. यथा विदूषकलिङ्गं जानतो नमतो भवति दोषः ।
निद्धन्धसमपि ज्ञात्वा वन्दमाने ध्रुवो दोषः ॥

२. यदि जिनमतं प्रमाणं मुनिरिति ततो बाह्यकरणपरिशुद्धम् ।
देवमपि वन्दमानो विशुद्धभावो विशुद्ध इति ॥
परमरहस्यमृषीणां समस्तगणिपिटकभृतसाराणाम् ।
परिणामिकं प्रमाणं निश्चयमवलम्बमानानाम् ॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

**संववहारो वि बली जमसुद्धं पि गहियं सुयविहीए ।**
**कोवेइ न सव्वन्नू वंदइ य कयावि छउमत्थं ॥२७॥**

**णिच्छयववहारनओवणीयमिह सासणं जिणिंदाणं ।**
**एगयरपरिच्चाए मिच्छं संकादओ जेण ॥२८॥**

**जइ जिणमयं पव्वज्जह ता मा ववहारनयमयं मुयह ।**
**ववहारनउच्छेए तित्थुच्छेओ जओवस्सं" ॥२९॥**

नानोपपत्तिभिः पूज्यैस्त एवं प्रतिपादिताः ।
तथाऽपि नाश्रिता मार्गं सङ्घेनोद्घाटितास्ततः ॥३०॥

पर्यटन्तो **राजगृहं** क्रमात् तेऽगुरधीश्वरः ।
तत्र मौर्यान्वयोद्भूतो राज **बलभद्रः** परास्तिकः ॥३१॥

श्रुतपूर्वा प्रभोस्तस्य तेषामव्यक्तवादिता ।
ततः स्वपुरुषान् प्रैष्यानायितास्ते निजाङ्गणाम् ॥३२॥

मारयध्वं कटामर्दमेतानिति समादिशत् ।
भटांस्ते तानथानिन्युर्मर्दनार्थं गजानपि ॥३३॥

साधवोऽप्यब्रुवन् राजन् ! श्रुतोऽसि परमार्हतः ।
तत्कथं श्रमणानस्मानामर्दयितुमिच्छसि ॥३४॥

राजोचे भवतां कक्षा सत्या चेत् क्वाहमास्तिकः ? ।
व्रतिनोऽपि कथं यूयमनमन्तः परस्परम् ॥३५॥

चौरा अभिमरा वा तन्मर्दने दूषणं किमु ? ।
श्रुत्वेत्युज्जातचैतन्या मार्गाभिमुखतां श्रिताः ॥३६॥

ततस्ते क्षामिता राज्ञा पूजिताश्च व्रतस्थिताः ।
आलोचितप्रतिक्रान्ताः सम्यग् मार्गं प्रपेदिरे ॥३७॥

इति तृतीयः ॥३॥

---

संव्यवहारोऽपि बली यदशुद्धमपि गृहीतं श्रुतविधिना ।
कुप्यति न सर्वज्ञो वन्दते च कदाऽपि छद्मस्थम् ॥
निश्चयव्यवहारनयोपनीतमिह शासनं जिनेन्द्राणाम् ।
एकतरपरित्यागे मिथ्या शङ्कादयो येन ॥
यदि जिनमतं प्रपद्यध्वं ततो मा व्यवहारनयमिमं मुञ्चत ।
व्यवहारनयोच्छेदे तीर्थोच्छेदो यतोऽवश्यम् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सविंशतौ गते वीरमोक्षादब्दशतद्वये ।
समुच्छेदकरी दृष्टिरुत्पन्ना **मिथिला**पुरि ॥१॥

तथाहि—

तत्र **लक्ष्मी**गृहे चैत्ये श्री**महागिरि**सद्गुरोः ।
शिष्यः **कौडिन्य**नामाऽस्य शिष्योऽभू**दश्वमित्रकः** ॥२॥

अनुप्रवादपूर्वस्य वस्तु नैपुण्यकाभिधं ।
नयर्जुसूत्रसम्बद्धालापकापूरितं पठन् ॥३॥

"[१]**पडुप्पन्नसमयनेरइया सव्वे वोच्छिज्जिस्संति एवं जाव वेमाणिय त्ति**" ॥

एतदालापकाध्यायं कुर्वन् विप्रतिपत्तिभाक् ।
अभूदिति मतेर्मोहात् सर्वं विच्छेदमेष्यति ॥४॥

प्रत्युत्पन्नक्षणस्यान्ते विनाशो यदि तत् कुतः ? ।
भूयात् फलोपभोक्तृत्वमात्मनः स्वात्तकर्मणः ॥५॥

इति ब्रुवन्नसावूचे श्रुतविद्भिः कृपापरैः ।
वदन् निःशङ्कमुत्सूत्रं मिथ्यात्वं व्रज मा मुधा ॥६॥

उत्पादानन्तरं वस्तु क्षणेऽन्यस्मिन् विनश्यति ।
ऋजुसूत्रनयैकान्तो ह्यसौ स च न हि प्रमा ॥७॥

कालपर्यायमात्रस्य नाशेऽनन्ततदात्मनः ।
कथं हि वस्तुनो नाशः प्रत्यक्षादिविरोधतः ॥८॥

सूत्रे यथर्जुसूत्रस्य मतेनाशाश्वतं जगत् ।
द्रव्यार्थिकनयापेक्षावशात् तदपि शाश्वतं ॥९॥

तथा च सूत्रम्—

"[२]**नेरइया णं भंते ! किं सासया असासया ? । गो० दव्वट्ठयाए सासया भावट्ठयाए असासया**" इत्यादि ॥

---

१. प्रत्युत्पन्नसमयनैरयिकाः सर्वे व्युच्छेत्स्यन्त्येवं यावद् वैमानिका इति ।

२. नैरयिका भदन्त ! किं शाश्वता अशाश्वताः ? । गौतम ! द्रव्यस्थित्या शाश्वता भावस्थित्या अशाश्वताः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अन्यत्राप्युक्तम्—

**''प्रध्वस्ते कलशे शुशोच तनया मौलौ समुत्पादिते,**
**पुत्रः प्रीतिमुवाह कामपि नृपः शिश्राय मध्यस्थताम् ।**
**पूर्वाकारपरिक्षयस्तदपराकारोदयस्तद्द्वया-**
**धारश्चैक इति स्थितं त्रयमयं विश्वं तथा प्रत्ययात् ॥१०॥**

इत्यादियुक्तिभिर्बाढं बोधितोऽपि न बुध्यते ।
स यावत् तावदुद्घाट्य चतुर्थो निह्नवः कृतः ॥११॥

प्ररूपयन् समुच्छेदं सोऽपि **राजगृहं** गतः ।
खण्डरक्षैः शुल्कपालैः श्राद्धैर्ज्ञातः स निह्नवः ॥१२॥

तैः स मारयितुं दृब्धो भीतभीतः स ऊचिवान् ।
श्रुता भोः ! श्रावका यूयं दारुणं किमिदं तु वः ? ॥१३॥

तेऽप्यूचिरे समुच्छिन्नाः श्रमणा भवतां मते ।
श्राद्धत्वं च कुतोऽस्मासु क्षणानन्तरनाशिषु ? ॥१४॥

कदाग्रहं मुमोचासौ भयाद् युक्तेश्च दर्शनात् ।
स्थिरीभूय प्रतिक्रम्य जिनाज्ञानिरतोऽभवत् ॥१५॥

इति चतुर्थः ॥४॥

युक्ते शतद्वयेऽब्दानामष्टाविंशतिवत्सरैः ।
**वीर**मोक्षादतिक्रान्ते निह्नवः पञ्चमोऽजनि ॥१॥

एकस्मि**न्नुल्लुका**नद्यास्तीरे **खेटा**ख्यपत्तनम् ।
परस्मि**न्नुल्लुकातीर**नामकं च महापुरं ॥२॥

**महागिरि**गुरोः शिष्यो **धनदेवा**भिधो गुरुः ।
**खेटे**ऽस्ति **गङ्गदत्त**स्तु तच्छिष्योऽन्यत्र सच्छदः ॥३॥

स शरद्यन्यदाऽऽचार्यवन्दनायाऽऽपगान्तरे ।
गच्छत्सु शीतले मूर्ध्नि खल्वाटोऽबाध्यतार्कजैः ॥४॥

करैस्तीक्ष्णैस्ततश्चित्तेऽचिन्तयद् यज्जिनोऽभ्यधात् ।
युगपन्नक्रियायुग्मं वेद्यं तद् घटते कथम् ? ॥५॥

यतोऽहं पादमूर्द्धभ्यां समं शीतोष्णवेदकः ।
अथोपगुरु सम्प्राप्तः स्वं तत्पक्षं न्यवेदयत् ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गुरुणाऽप्ययमुत्सूत्रं वदन्नवमनन्तकम् ।
मा भ्रमत्विति कारुण्यात् सयुक्तिकमभाष्यत ॥७॥

सौम्य ! क्रमात् क्रियायुग्मं वेद्यं न युगपत् पुनः ।
भ्रमः क्षणमनश्चारसूक्ष्मत्वेन क्रियाद्वये ॥८॥

सूक्ष्ममाशुचरं चित्तं येन खेनात्र बध्यते ।
तदा तज्ज्ञानहेतुः स्यान्नैतरेन्द्रियसंविदः ॥९॥

उपयोगमयो जीवो देशे यत्रोपयुज्यते ।
यदा येनेन्द्रियेणैष भवेत्तन्मात्रवेदनः ॥१०॥

पादमूर्द्धगशीतोष्णवेदनं युगपन्न हि ।
भिन्नदेशत्वतो विन्ध्यमहिमाद्रिस्पर्शवेदवत् ॥११॥

पद्मपत्रशतावेधवत् तुल्यक्षणताभ्रमः ।
दीर्घशष्कुलिकाऽऽस्वादे समं सर्वखसंविदाम् ॥१२॥

सर्वेन्द्रियचरच्चित्तं दुर्लक्ष्यं यदि वेगवत् ।
एकेन्द्रियार्थचार्येतत् सुलक्ष्यं स्यात् कथं वद ? ॥१३॥

***अन्यार्थविनियुक्तं चेन्मनोऽन्यत्र नियुज्यते ।***
***अन्यचित्तो न जानाति गजं तत् किं पुरःस्थितम् ? ॥१४॥***

तद्द्वयेनोपयोगानामानन्त्यं तत्र किं भवेत् ? ।
एकोपयोगान्नानार्थग्रहणे किमु दूषणम् ? ॥१५॥

सत्यमेकोपयोगेन सामान्यार्थग्रहो मतः ।
स्कन्धावारपुरग्रामसमूहाद्युपयोगवत् ॥१६॥

हस्तिनोऽमी हया एते शीतमुष्णमिदं पुनः ।
विशेषार्थग्रहो नानोपयोगजनितो ह्यसौ ॥१७॥

अत्रास्ति बहु वक्तव्यं नोक्तं गौरवशङ्कया ।
इत्यादि बहुधाऽभाणि गुरुणा स तु नाबुधत् ॥१८॥

उद्घाटितः क्रमेणागात् सोऽपि **राजगृहं** पुरम् ।
**मणिनाग**ाख्ययक्षस्य तस्थौ चैत्यस्य सन्निधौ ॥१९॥

द्विक्रियावेदनव्याख्यां कुर्वन् यक्षेण मुद्गरम् ।
उत्पाट्याभाणि साक्षेपमेवमत्र प्ररूपय ॥२०॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

पुरा श्री**वर्द्धमाने**न प्रभुणा विश्वभास्वता ।
न्यषेधि जगदध्यक्षं क्रियाद्वितयवेदनम् ॥२१॥

किं ततोऽप्यधिकोऽसि त्वमिदं मिथ्या प्ररूपणम् ।
मुञ्चान्यथेह लोकेऽपि प्रापयिष्यामि तत्फलम् ॥२२॥

एवं भीयुक्तिसम्बुद्धः परित्यक्तकदाग्रहः ।
सोऽपि तस्मात् प्रतिक्रम्य शुद्धं व्रतमधारयत् ॥२३॥

इति पञ्चमः ॥५॥

शतानि पञ्च चत्वारश्चत्वारिंशच्च वत्सराः ।
**वीर**मोक्षाद् गतास्तावत् षष्ठोऽभूदेष तद्यथा ॥१॥

अत्रास्ति वस्तुसम्पूर्णा पुरी रम्या**ऽन्तरञ्जिका** ।
बलश्रीसंयुतस्तत्र **बलश्री**र्वसुधाधवः ॥२॥

तस्यां भूतगृहे चैत्ये श्री**गुप्ताचार्य**पुङ्गवः ।
अस्थात् सतन्त्रः सूत्राब्धिवातापिद्विट्सहोदरः ॥३॥

तच्छिष्यो **रोहगुप्ता**ख्योऽन्यस्माद् ग्रामात् समाययौ ।
वन्दनार्थं गुरोस्तत्र वादिद्विरदकेसरी ॥४॥

परिव्राट् **पोट्टशाला**ख्यो लोहपट्टसितोदरः ।
जम्बूशाखाकरस्तत्रोदतिष्ठत सुगर्वितः ॥५॥

**जम्बूद्वीपे**ऽखिले विद्याभरभेद्योदरस्य मे ।
नैवास्ति प्रतिवादीत्यवादयत् पटहं पुरे ॥६॥

न्यषेधद् **रोहगुप्त**स्तं वादं कर्ताऽहमुत्थितः ।
इत्युक्त्वोपगुरु प्राप्तस्तं वृत्तान्तमवेदयत् ॥७॥

गुरवोऽप्यूचिरे युक्तं त्वया नानुष्ठितं ह्यदः ।
वादे जितोऽप्यसौ यत् कुविद्याभिरूपतिष्ठति ॥८॥

उक्तं हि—

**"[१]विच्छुय सप्पे मूसग मिगी वराही य कायपोयाई ।
एयाहिं विज्जाहिं सो य परिव्वायगो कुसलो"** ॥९॥

---

१. वृश्चिकः सर्पो मूषको मृगी वराही च काक-पोताकी ।
एतासु विद्यासु स च परिव्राजकः कुशलः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**रोहगुप्तो**ऽभ्यधान्नंष्टुं ततः किं क्वापि शक्यते ? ।
निषिद्धः पटहस्तस्य स्यान्नष्टेऽप्यथ किं शुभम् ? ॥१०॥

दध्युः श्रीगुरवोऽप्येवमयं पात्रं तु नोचितम् ।
रक्ष्यं तु मतमालिन्यमितो व्याघ्र इतस्तटी ॥११॥

यद् भाव्यं तद् भवत्येव शासनोत्सर्पणाऽस्तु तत् ।
ध्यात्वेत्यदुरिमास्तस्मै विद्यास्तत्प्रतिघातिनीः ॥१२॥

उक्तञ्च—

"[१]**मोरी नउलि विराली वग्घी सीही अलूगि ओवाई ।
एयाओ विज्जाओ गिण्ह परिव्वायमहणीओ**" ॥१३॥

अगृह्णाद् **रोहगुप्तस्ता** अभिमन्त्र्य रजोहृतिम् ।
अस्मै गुरुरदादेवमाख्यच्च करुणानिधिः ॥१४॥

तत् क्षुद्रविद्याप्रकृतमन्यच्चेदुपतिष्ठते ।
तदिमां भ्रामयेर्मूर्ध्नि भावि तद् विफलं ततः ॥१५॥

ततः प्रस्खरितेभारिसमोऽभूद् **रोहगुप्तकः** ।
इन्द्रादीनामप्यजेयः सुधी राज्ञः सभामगात् ॥१६॥

आचिक्षेप परिव्राजं रे ! त्वं वेत्सि किमु क्वचित् ? ।
यदृच्छया पूर्वपक्षं कुरु तं न्यत्करोम्यहम् ॥१७॥

सोऽध्यासीन्निपुणा ह्येते दुर्जेयाश्च सिताम्बराः ।
तदेतत् सम्मतं पक्षमदोऽखण्ड्यमुपाददे ॥१८॥

मयाऽऽक्षिप्तेऽप्यवक्ताऽसौ जितस्तु ज्ञास्यते जनैः ।
जीवोऽजीवश्च राशी द्वौ ध्यात्वेति स्वीचकार सः ॥१९॥

शुभाशुभद्वयं यद्वद् दिनरात्रिद्वयं यथा ।
लोकालोकद्वयं यद्वद् जीवाजीवद्वयं तथा ॥२०॥

**रोहगुप्तो**ऽपि तं पक्षं स्वसम्मतमपि द्रुतम् ।
निराचिकीर्षुः प्रस्तावदक्षत्वेनेदमूचिवान् ॥२१॥

---

१. मयूरी नकुली बिडाली व्याघ्री सिंही उलूकी ओलावकी ।
एता विद्या गृहाण परिव्राजकमथनीः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जीवोऽजीवश्च नोजीव इति राशित्रयं मतम् ।
स्वर्गादित्रितयं यद्वद् यद्वन्नीचादिकत्रयम् ॥२२॥

गृहकोकिलपुच्छाद्यं छिन्नं संवीक्ष्यते चलत् ।
तन्न जीवो नाप्यजीवो वैलक्षण्याद् निगद्यते ॥२३॥

नोजीव इत्यतः ख्यातमित्याद्यद्भुतयुक्तिभिः ।
आहतप्रतिभश्चक्रे **रोहगुप्तेन** तापसः ॥२४॥

ततः सोऽलीन् मुमोचाशु विषण्णोऽन्यस्तु केकिनः ।
एतैर्विनिहतेष्वेषु सर्पादीनपि सोऽमुचत् ॥२५॥

प्रसन्नगुरुरन्यस्तान् नकुलाद्यैर्न्यवारयत् ।
ततोऽसौ प्रेरयामास दुर्विद्यासेवधिः खरीम् ॥२६॥

अभावात् प्रतिविद्यायाः परिमूर्द्ध रजोहृतिम् ।
भ्रमयित्वा तयैतां स ताडयित्वा न्यवर्तयत् ॥२७॥

स्खलितैषा परिव्राजो मूर्ध्नि मूत्रपुरीषयोः ।
कृत्वोत्सर्गमदृष्टाऽभूद् निन्द्यतां प्राप गैरिकः ॥२८॥

निर्वासितश्चापि पुराद् **रोहगुप्तः** पुनर्जयी ।
गुरुमूलमगाद् राजकृतोत्सवपुरस्सरम् ॥२९॥

न्यवेदयच्च वृत्तान्तं गुरुणाऽभाण्यसौ ततः ।
सुकृतं यज्जितो वादी नेदमुक्तं परं किमु ? ॥३०॥

नोजीवराशिरित्येष पक्षः सिद्धो न नः परम् ।
प्रतिवादिप्रभाहान्यै प्रयुक्तः साधितोऽपि हि ॥३१॥

अथापि तत्र गत्वाऽऽशु संसदीति निवेदय ।
वत्स ! नोत्सूत्रवृद्धिः स्याद् दुरन्ता भवतो यथा ॥३२॥

मिथ्यात्वोदयतोऽथैष उत्तस्थे सम्मुखं गुरोः ।
आत्मदेशस्य नोजीवतायां को दोष उच्यते ? ॥३३॥

स्कन्धाद् व्यतिरिक्तोऽपि देशः सूत्रे निवेद्यते ।
जीवाजीवविभिन्नोऽपि नोजीवः किं निषिध्यते ? ॥३४॥

न च्छिन्नपुच्छं जीव स्यादूनदेशतया तदा ।
स्फुरणादेर्न चाजीवस्तन्नोजीव इदं मतम् ॥३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आचार्यैः प्रत्यभाण्येष प्रमाणं यदि ते श्रुतम् ।
राशिद्वये तदा कस्ते भ्रमस्तत्र द्वयस्थितेः ? ॥३६॥

तथा च स्थानाङ्गसूत्रम्—

**"[1]दुवे रासी पण्णत्ता तंजहा जीवा चेव अजीवा चेव ।**

अनुयोगद्वारसूत्रेऽप्युक्तम्—

**"[2]कइविहा णं भंते ! दव्वा पण्णत्ता । गोयमा ! दुविहा पण्णत्ता तंजहा जीवदव्वा य अजीवदव्वा य" । अत्रापि वक्ष्यति—"[3]जीवा चेव अजीवा य एस लोए वियाहिए" ॥**

परो नोजीवराशिस्तु श्रुते नाभिहितः क्वचित् ।
श्रुतस्याशातना सौम्य ! किमतः क्रियते त्वया ? ॥३७॥

विवक्षामात्रतः स्कन्धाद् देशो भिन्नो न तत्त्वतः ।
एवमङ्गप्रदेशेभ्यः पुच्छीयास्तेऽप्यभेदिनः ॥३८॥

गृहगोधाऽङ्गतत्पुच्छान्तराले ये व्यवस्थिताः ।
आत्मप्रदेशास्ते सौक्ष्मादमूर्त्तत्वाच्च न स्फुटाः ॥३९॥

उक्तञ्च भगवत्याम्—

**"[4]अहं भंते ! कुम्मे कुम्मा वलिया, गोहे गोहा वलिया, गोणे गोणा वलिया, मणुस्से मणुस्सा वलिया, महिस्से महिस्सा वलिया, एएसि णं दुहा वा, तिहा वा, संखेज्जहा वा च्छिन्नाणं जे अंतरा ते वि णं तेहिं जीवपएसेहिं फुडा हंता फुडा । पुरिसेणं भंते ! हत्थेण वा पाएण वा अङ्गुलियाए कट्ठेण वा आसुसमाणे वा जाव अण्णयरेणं तिक्खसत्थेण जाएणं आछिंदमाणे वा विछिंदमाणे वा जाव तेसिं जीवपएसाणं किंचि**

---

१. द्वौ राशी प्रज्ञप्तौ तद्यथा—जीवाश्चैवाजीवाश्चैव ।

२. कतिविधानि भदन्त ! द्रव्याणि प्रज्ञप्तानि ? । गौतम ! द्विविधानि प्रज्ञप्तानि । तद् यथा जीवद्रव्याणि चाजीवद्रव्याणि च ।

३. जीवाश्चैवाजीवाश्चैष लोको व्याहृतः ।

४. अथ भदन्त ! कूर्मे कूर्मा बलिनः, गोधे गोधा बलिनः, गवि गावो बलिनः, मनुष्ये मनुष्या बलिनः, महिषे महिषा बलिनः, एतेषां द्विधा वा त्रिधा वा सङ्ख्याता वा च्छिन्ना येऽन्तरा तेऽपि तैर्जीवप्रदेशैः स्फुटा हन्तास्फुटाः । पुरुषो भदन्त ! हस्तेन वा पादेन वाऽङ्गुलिकया काष्ठेन वाऽऽशुष्यमाणो वा यावदन्यतरेण तीक्ष्णशस्त्रेण जातेनाच्छिन्दमानो वा विच्छिन्दमानो वा यावत् तेषां जीवप्रदेशानां किञ्चिदाबाधां वा विबाधां वोत्पादयति च्छवीच्छेदं वा करोति ? । नो अयमर्थः समर्थो नो खलु तत्र शस्त्रं सङ्क्रामति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**आवाहं वा विवाहं वा उप्पाएइ छविच्छेयं वा करेइ ? । नो इणमट्ठे समट्ठे णो खलु तत्थ सत्थं संकमइ''** इत्यादि ॥

प्रदीपरश्मयः सौम्य ! कुड्यवन्न नभस्यपि ।
दृश्यते स्फुरणादीनि देहवद् न तदन्तरे ॥४०॥

नरोऽनतिशयी देहं मुक्तजीवं न बुध्यते ।
सूक्ष्मं कार्मणदेहं च गत्यन्तरगताविव ॥४१॥

यथा घटात् पृथग्भूतं घटखण्डं हि नो घटः ।
प्रदेशाः पुच्छगास्तद्वद् नो जीव इति किं न भोः ! ॥४२॥

विकारदर्शनाभावादमूर्त्तद्रव्यतावशात् ।
विनाशहेत्वभावाच्चाकृतकत्वादनन्तवत् ॥४३॥

नात्मनः खण्डशो नाशो घटस्तु व्यतिरेकवान् ।
खण्डनाशे सर्वनाशे सर्वनाशो ह्यात्मनः स्यान्न तन्मतम् ॥४४॥

यदाह—

''[१]**जीवा णं भंते ! किं वड्ढंति हायंति अवट्ठिया वा ? । गोयमा ! वड्ढंति नो हायंति अवट्ठिया''** इत्यादि ।

औदारिकशरीरस्य खण्डं पुच्छं हि नश्यति ।
नश्यतां न तु जीवस्य स्यादमूर्त्तस्य खण्डना ॥४५॥

आत्मप्रदेशनोजीव्ये नोजीवा एव भूरयः ।
न जीवा नाप्यजीवाश्च हानिस्तल्लाभमिच्छतः ॥४६॥

नन्वजीवप्रदेशेषु नोअजीवत्वमुच्यताम् ।
सन्तुष्टो भव राशीनां तव ज्ञातं चतुष्टयम् ॥४७॥

इत्यादि बहुधोक्तोऽपि स यावन्न प्रपद्यते ।
ततो दध्यौ गुरुर्मुग्धान्नष्टोऽयं नाशयिष्यति ॥४८॥

निगृह्योऽयं नृपाध्यक्षमतो ज्ञातो ह्ययं जनैः ।
सर्वस्य भव्यवर्गस्याग्राह्यवाक्यो भविष्यति ॥४९॥

---

१. जीवा भदन्त ! किं वर्धन्ते हायन्ति अवस्थिता वा ? ।
गौतम ! नो वर्धन्ते नो हायन्त्यवस्थिताः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्यवेत्याधिभूपालसंसत् ते तेन चक्रिरे ।
स्वपक्षस्थापकं वादं षण्मासास्त्वतिचक्रमुः ॥५०॥

द्वयोस्तिष्ठति नैकोऽपि गुरूनथ नृपोऽवदत् ।
सीदन्ति राजकार्याणि नाहं श्रोतुमथ क्षमः ॥५१॥

गुरुणोचे नृप ! प्रातर्निर्णयोऽयं करिष्यते ।
विद्यते वस्तु निखिलं विश्वगं कुत्रिकापणे ॥५२॥

नोजीवे प्रार्थिते तत्र दद्यात् तं यदि तत्सुरः ।
तदाऽनेन जितमिति स्वीचक्रेऽदोऽपि पार्थिवः ॥५३॥

गुरुः प्रातर्नृपामात्य**रोहगुप्तादि**संयुतः ।
गतस्तत्र तदध्यक्षं पृथिवीमर्थितः सुरः ॥५४॥

अदाल्लेष्टुमसौ तत्ता पृथ्वीसामान्यतस्त्विह ।
अपृथ्वीं याचितस्तोयं नोपृथ्वीं याचितः पुनः ॥५५॥

लेष्टुदेशमदाल्लेष्टुर्देशः पृथ्व्या न किं भवेत् ? ।
सत्यं सम्पूर्णपृथ्वीत्वं लेष्टावारोपितं पुरा ॥५६॥

लेष्टुरूपमहाद्रव्यापेक्षया तद्दलेऽपि हि ।
महादेशत्वमारोपात् पृथिव्येवान्यथा ह्यदः ॥५७॥

तद्दलं यदि तस्यैव लेष्टुः पृथ्व्यपि नो तथा ।
तथा च पृथ्वीं देहीति सर्वा देया मही भवेत् ॥५८॥

शक्रेणापि न सा देया ततः कुम्भे यथाऽर्थिते ।
सर्वांस्तान्नार्पयेत् कश्चिदशक्यानर्थकत्वतः ॥५९॥

विशिष्टं तु घटं किञ्चिदानयेदेवमर्थितः ।
पृथ्वीं लेष्टुं च नोपृथ्वीं तत्खण्डं पुनरर्पयेत् ॥६०॥

अपेक्षाबुद्धिभेदेन पृथिव्येव हि तत्त्वतः ।
जातिलक्षणयोगेन लेष्टुखण्डस्तु सम्मतः ॥६१॥

नोअपृथ्वीप्रार्थनायां लेष्टुं चाम्बुकणानदात् ।
सर्वदेशनिषेधार्थनोशब्दस्य विकल्पनात् ॥६२॥

पृथ्वीमपृथ्वीं नोपृथ्वीं स दद्याद् व्यवहारतः ।
निश्चयात् तु द्वयं दद्यादापेक्षिकमिदं त्रयं ॥६३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स चतुश्चत्वारिंशत्कपृच्छाशतमिति व्यधात् ।
जलाग्न्यादिष्वपि तथा न्यायसाम्याद् गुरुर्गुरुः ॥६४॥

दद्याज्जीवमजीवं वा नोजीवं न त्वयं सुरः ।
राशिस्तृतीयस्तन्नैवास्त्यसत्त्वात् खरशृङ्गवत् ॥६५॥

निगृहीतो **रोहगुप्तः** प्रत्यनीकतया गुरोः ।
निष्कासितः सभातोऽपि सत्कृता गुरवः पुनः ॥६६॥

उक्तञ्च—

**"[1]वाए पराजिओ सो निव्विसओ कारिओ नरिंदेण ।
घोसावियं च नयरे जयइ जिणो वद्धमाणो त्ति"** ॥६७॥

प्रातिकूल्योद्वेजितेन गुरुणा खेलमल्लकः ।
शिरस्यास्फोट्यतामुष्य ततोऽलिप्यत भस्मना ॥६८॥

तस्मादभिनिवेशात् स षड्द्रव्यादिप्ररूपणम् ।
वैशेषिकमतं प्रावर्तयद् जातश्च निह्नवः ॥६९॥

इति षष्ठो निह्नवः ॥६॥

चतुरशीत्यधिकेषु पञ्चवर्षशतेष्वथ ।
श्री**वीर**तो व्यतीतेषु सप्तमो निह्नवोऽभवत् ॥१॥

तथाहि—

श्री**आर्यरक्षितो वैर**स्वामिनोऽधीत्य धीनिधिः ।
सार्द्धानि नव पूर्वाणि सूरिरासीद् युगोत्तमः ॥२॥

मातरं पितरं **गोष्ठामाहिलं फल्गुरक्षितम्** ।
अभूदन्यानपि प्रव्राजयतोऽस्य महान् गुणः ॥३॥

तत्र **दुर्बलिकापुष्पो विन्ध्यो गोष्ठादिमाहिलः** ।
**फल्गुरक्षित** इत्येते चत्वारः श्रुतपारगाः ॥४॥

आद्यस्तु नवपूर्व्येषु **विन्ध्यं** गुरुनिदेशतः ।
वाचयत्येष पूर्वाणि गुणनाभावतोऽस्य तु ॥५॥

---

१. वादे पराजितः स निर्विषयः कारितो नरेन्द्रेण ।
घोषितं च नगरे जयति जिनो **वर्धमान** इति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्यस्मरन्नवमं पूर्वं ज्ञात्वा दध्युश्च सूरयः ।
यदीदृशस्य प्राज्ञस्याप्यभूत् सूत्रार्थविस्मृतिः ॥६॥

सम्पत्स्यते तदन्येषां सूत्रार्थस्तु सुदुर्धरः ।
ध्यात्वेति तैरनुयोगः पार्थक्येन कृतस्तदा ॥७॥

**मथुरा**यां क्रमाद् **भूतगुहा**यां व्यन्तरालये ।
स्थितेषु **रक्षितार्ये**षु शक्रः **सीमन्धरं** जिनम् ॥८॥

नत्वा श्रुत्वा च नैगोदान् विचारान् विस्मितो हृदि ।
पृष्टवान् **भरते** वक्ता कोऽपीदृक्षोऽस्ति साम्प्रतम् ? ॥९॥

जिनेन रक्षितो दिष्टस्ततो विस्मितकौतुकी ।
स्थविरद्विजरूपेण भिक्षाप्राप्तेषु साधुषु ॥१०॥

आगत्य नत्वा पप्रच्छ वृद्धोऽथ व्याधिमानहम् ।
चिकीर्षन्नस्म्यनशनं तद् वदायुः कियन्मम ? ॥११॥

यविकेष्वायुषः श्रेणावुपयुज्य सुरेश्वरम् ।
ज्ञात्वा श्रुतबलादूचे विहितब्राह्मणाकृतिः ॥१२॥

शक्रोऽसि वार्द्धियुग्मायुस्तुष्टोऽथ हरिरभ्यधात् ।
जिनान्निगोदश्रुत्यादि तद्विचारं च पृष्टवान् ॥१३॥ **युग्मम्**

श्रुत्वा विस्तरतस्तं च जिनादिव गुरोर्गिरा ।
परावर्त्याश्रयद्वारं नत्वाऽगात् त्रिदिवं हरिः ॥१४॥

स्थापितोऽपि हरिर्नास्थान्निदानारेकया हि वः ।
ज्ञापकं द्वाःपरावर्तं कृत्वाऽगादित्युपागतान् ॥१५॥

मुनीनबोधयत् सूरिरेवं ते वासवार्चिताः ।
क्रमाद् **दशपुरं** जग्मुरितश्च **मथुरा**पुरि ॥१६॥

उत्तस्थे विकटो वादी तत्र च प्रतिवादिनः ।
अभावात् साधुयुगलं सङ्घः प्रैषीदुपप्रभु ॥१७॥

विजज्ञिवांश्च दुर्वादिकृतव्यतिकरं च तम् ।
सूरिश्च प्राहिणोद् गोष्ठामाहिलं तर्ककर्कशम् ॥१८॥

न्यग्रहीद् वादिनं सोऽपि द्रुतमेवोरुयुक्तिभिः ।
श्रावकैः प्रावृषं तत्र कारितोऽसौ ततो मुदा ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इतो **दुर्बलिकापुष्य**श्चिन्तितः स्वपदोचितः ।
गुरुभिः साधवो **गोष्ठामाहिलं फल्गुरक्षितम्** ॥२०॥

स्वजनत्वात् समीहन्ते संविग्नाः सूरयस्ततः ।
सर्वगच्छैकमत्यर्थं चक्रुः कुटनिदर्शनम् ॥२१॥

तैलसर्पिर्घटौपम्यं मुक्त्वा वल्लकुटोपमाम् ।
स्वस्य **दुर्बलिकापुष्यं** प्रत्याचार्या न्यवेदयन् ॥२२॥

सूत्रार्थयोरुपादाता कृत्स्नयोस्तदयं गुरुः ।
अस्तु युष्माकमेतेऽपि तथेति प्रतिपेदिरे ॥२३॥

संस्थाप्य स्वपदे सूरिस्तमभाणीद् यथोचितम् ।
गच्छेः सूरिपदं प्राप्य माऽवलेपं मनागपि ॥२४॥

यथाऽहं वर्तितो **गोष्ठामाहिले फल्गुरक्षिते** ।
तथैव समचित्तेन वर्तितव्यं त्वयाऽपि हि ॥२५॥

कुत्राप्युपेक्षां शिक्षायां दार्ढ्यं कुत्रापि कुर्वतः ।
सूरेरपि तवादेयवाक्यता न भविष्यति ॥२६॥

रागतः सहमानेनापराधं कस्यचिन्मुनेः ।
नान्यः शिक्षयितुं शक्यः कुर्वंस्तदवलम्बनम् ॥२७॥

जात्याश्वानिव सच्छिष्यान् परान् दुष्टहयानिव ।
समं शिक्षयतः सूरेर्विनीतो जायते गणः ॥२८॥

मा प्रमादं कृथा ज्ञाने व्रते सूरौ प्रमादिनि ।
प्रमाद्यति गणोऽपि स्युर्मूलस्थैर्ये हि पल्लवाः ॥२९॥

स्मारणायां वारणायां तदुद्यच्छेर्निरन्तरम् ।
मोक्तव्यो ह्यन्यथा भावी गच्छः संयमकामिनाम् ॥३०॥

उपेक्षमाणः स्वं गच्छं दीर्घं कुर्याद् भवं गुरुः ।
विधिना पालयंस्तार्तीयीके याति शिवं भवे ॥३१॥

तपोधनाः ! मया सार्द्धं भवद्भिर्वर्तितं यथा ।
वर्तितव्यं तथाऽनेन कार्यो नाविनयः क्वचित् ॥३२॥

कृतेऽप्यागसि नारुष्यमयं तु न सहिष्यते ।
तद् दक्षत्वं तथा कार्यं यथाऽयं वा न रुष्यति ॥३३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं पक्षद्वयस्यापि दत्त्वा शिक्षां समाधिना ।
द्यामलञ्चक्रिरे भक्तं प्रत्याख्यायाथ सूरयः ॥३४॥

श्रुत्वा वृत्तमदो **गोष्ठामाहिलो**ऽपि समागमत् ।
अहं घृतघटोऽकारीतीर्ष्ययाऽस्थात् पृथक् क्वचित् ॥३५॥

आगाच्चर्योपलम्भायोपाश्रयं सर्वसाधुभिः ।
नत्वाऽभ्युत्थाय सोऽभाषि तिष्ठतात्रैव किं न हि ? ॥३६॥

मानान्नास्थाद् बहिस्तिष्ठन् मुनीनपवदन् गुरून् ।
स व्युद्ग्राहयते नालं तान् व्युद्ग्राहयितुं परम् ॥३७॥

अभिमानाद् गुरोर्व्याख्यामशृण्वन्नुत्थितेष्वथ ।
साधुष्वधीत्य वन्ध्यस्याशृणोत् चिन्तनिकां तदा ॥३८॥

अन्यदा कर्मप्रवादाष्टमपूर्वानुभाषणम् ।
वन्ध्यस्य कुर्वतोऽश्रौषीद् विचारं कर्मगोचरम् ॥३९॥

शुष्ककुड्ये शुष्कचूर्णमिवेर्यापथहेतुकम् ।
निष्कषायस्य यत्कर्माप्राप्य कालान्तरस्थितिम् ॥४०॥ युग्मम्

*जीवप्रदेशैः संयुक्तमात्रं विघटते जिनैः ।*
*बद्धमात्रमिदं कर्माबद्धमुक्तमतः श्रुते ॥४१॥*

*आर्द्रकुड्ये तु सस्नेहचूर्णवत् समयान्तरे ।*
*यत् तेभ्यो भिद्यते बद्धस्पृष्टमेतदुदाहृतम् ॥४२॥*

*यद् गाढाध्यवसायेन बद्धं नीतमयोग्यताम् ।*
*उद्वर्तनापवृत्त्यादेर्विपाकाऽनुभवं विना ॥४३॥*

*नापगच्छति च प्राय आर्द्रकुड्ये सुधोपमम् ।*
*तत् स्यान्निकाचितं कर्मात्रैवं सूचीचयोपमा ॥४४॥ युग्मम्*

गुणैरावेष्टितो लोहपट्टबद्धस्तथाऽग्निना ।
तप्तो घनाऽऽहतः पिण्डीभूतः सूचीचयस्त्रिधा ॥४५॥

एवं कर्माप्यात्मदेशैर्मिलितं तारतम्यतः ।
श्रुत्वैवं प्रावदद् **गोष्ठामाहिलो**ऽभिनिवेशतः ॥४६॥

वन्ध्य ! दुष्टोऽनुयोगोऽयमेवं मोक्षो न कस्यचित् ।
कर्म नापैति जीवेभ्योऽभिन्नत्वात् तत्प्रदेशवत् ॥४७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तस्माद् यथैव निर्मोकः स्पृष्टमात्रो भुजङ्गमम् ।
अन्वेति तद्वत् कर्मापि नाग्न्ययःपिण्डतुल्यता ॥४८॥

एवं कर्मविचारे विप्रतिपन्नोऽन्यदा पुनः ।
यावज्जीवावधिप्रत्याख्यानं नवमपूर्वगम् ॥४९॥

विचार्यमाणमाकर्ण्याऽवदत् स परिमाणकम् ।
तदयुक्तं यदाशंसादोषदुष्टमिदं भवेत् ॥५०॥

पूर्णेऽस्मिन् देवलोकादौ भोक्ष्ये भोगान् सुदुर्लभान् ।
एवंविधपरिणामदूषितं तत् कथं शुभम् ? ॥५१॥

उक्तञ्च—

**"[1]रागेण व दोसेण व परिणामेण व न दूसियं जं तु ।
तं खलु पच्चक्खाणं भावविसुद्धं मुणेयव्वं" ॥५२॥**

पूर्वपक्षमिमं वन्ध्यो गुरोर्नत्वा न्यवेदयत् ।
गुरुरप्युत्तरपक्षं दिदेशास्मै विशेषतः ॥५३॥

स मानाद् गाढमाविष्टस्तन्न हि प्रतिपन्नवान् ।
गुरुणा स्वयमाभाष्य ततः प्रोच सयुक्तिकम् ॥५४॥

कर्म निर्मोकवत् स्पृष्टमबद्धं यदि चोच्यते ।
प्रतिप्रदेशवृत्तं तज्जीवापर्यन्तवृत्तिवान् ॥५५॥

प्रतिप्रदेशवृत्तित्वे साध्यवैकल्यमाप्नुयात् ।
दृष्टान्तः सर्वगं जीवे कर्मैवं खप्रदेशवत् ॥५६॥

त्वचापर्यन्तवृत्तित्वे कर्मणोऽङ्गमलादिवत् ।
न भवान्तरयायित्वं स्यादेवं सर्वनिर्वृतिः ॥५७॥

निष्कारणे च निर्वाणे ब्रह्मचर्यादिकं वृथा ।
देहान्तर्वेदना किञ्च कर्माभावे कथं भवेत् ? ॥५८॥

न च बाह्यनिमित्ताऽसौ तदभावेऽपि सम्भवात् ।
भिन्नदेशस्य हेतुत्वेऽन्यकर्म स्यान्न किं तथा ? ॥५९॥

---

१. रागेण वा दोषेण वा परिणामेन वा न दुषितं यत् तु ।
तत् खलु प्रत्याख्यानं भावविशुद्धं ज्ञातव्यम् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बहिरन्तःप्रचार्ये तत्तन्न निर्मोकसाम्यतः ।
युगपत् सर्वदेहेऽपि या पीडैवं च सा कथम् ? ॥६०॥

भवान्तरानुयायित्वं सञ्चारित्वान्न वायुवत् ।
वेदनाद्युपलम्भेनान्तरप्येतत् त्वचीव तत् ॥६१॥

क्षीरनीराग्न्ययःपिण्डन्यायतो ह्यात्मना सह ।
तल्लोलीभावमापन्नं कर्मेति प्रतिपद्यताम् ॥६२॥

अमुक्तिरित्थमिति चेत् स्वहेतोः कर्मबन्धवत् ।
कर्ममोक्षोऽपि किं न स्याद् ज्ञानचारित्रमुख्यतः ? ॥६३॥

नभसा कर्मणा चैव सहावस्थानमात्मनः ।
वियुज्यते न तत्राद्यं परं हेतोर्वियुज्यते ॥६४॥

वह्न्यौषध्यादिसामग्र्या काञ्चनोपलयोगवत् ।
वह्न्ययःपिण्डयोगोऽपि न किं दृष्टो विनश्वरः ? ॥६५॥

तीव्राशुभाध्यवसायात् कर्मबन्धो यथा मतः ।
विपक्षाध्यवसायेन तन्मोक्षोऽपि ध्रुवस्ततः ॥६६॥

यदूचे परिमाणत्वं प्रत्याख्यानस्य तत्ततः ।
कथं कार्यं ममास्त्वेतद् यावच्छक्तीति चेत् शृणु ॥६७॥

शक्तिरेवेत्थमापन्ना परिमाणं तयाऽवधिः ।
कालोऽनुमीयते सूर्यगत्येह समयादिवत् ॥६८॥

त्यागस्तथा च पक्षस्याशंसायास्तदवस्थता ।
जीवतोऽपि न भङ्गः स्याद् व्रतलोपेऽप्यशक्तितः ॥६९॥

नातिचारो न वा प्रायश्चित्ताद्यप्येवमुद्भवेत् ।
सर्वाप्यनागताद्धोक्तैवं चेदपरिमाणता ॥७०॥

स्वर्गेऽप्सरःपरीरम्भं कुर्वतस्तद्भवान्तरे ।
असम्पूर्णप्रतिज्ञत्वाद् भवेद् भग्नव्रतो मुनिः ॥७१॥

सर्वतदद्धासंवरधारितया भवति संयतः सिद्धः ।
नोसंयतस्तु सूत्रे भणितोऽसौ तद्विरुद्धं स्यात् ॥७२॥

अद्धाया अपरिच्छेदो भवेदपरिमाणता ।
कियत्कालं प्रतीक्ष्यासौ तदा भुङ्क्तां मनोमतम् ॥७३॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

माऽन्यजन्मनि देवत्वं प्राप्तस्य मम जायताम् ।
भोगानासेवमानस्य व्रतभङ्गसुदुर्द्धरः ॥७४॥

एवं शुभपरीणामादायुष्कावधि कुर्वतः ।
प्रत्याख्यानं कुतो भूयादाशंसादोषदुष्टता ? ॥७५॥

न ध्रुवा मुक्तिरित्यस्य जानतस्तद्भवान्तरे ।
स्वाव्रतत्वं परिमाणरहितं तद् न युज्यते ॥७६॥

उक्तञ्च—

**"[1]जो पुणरव्वयभावं मुणमाणोवस्सभाविणं कुणइ ।
वयमपरिमाणमेवं पच्चक्खं सो मुसावाई" ॥७७॥**

***भाव एव भवेत् प्रत्याख्यानमन्यभवे यदि ।
स न स्याद् वचसा किं न परिमाणं विधीयते ? ॥७८॥***

एवं प्रज्ञापितो युक्त्या न श्रद्धत्ते स किञ्चन ।
ततोऽन्यगच्छस्थबहुश्रुतैरुक्तः सयुक्तिकम् ॥७९॥

स प्राह बालिशाः सर्वे यूयं जानीथ किं ननु ? ।
तादृगेवास्म्यहं वेत्ता जिनैर्यादृक् प्ररूपितम् ॥८०॥

सर्वविप्रतिपन्नं तं ज्ञात्वा सङ्घः समोऽपि हि ।
कायोत्सर्गमदाद् भक्तदेवताह्वानहेतवे ॥८१॥

साऽप्युपागत्य सङ्घानुज्ञयाऽर्हन्तं **विदेह**गम् ।
पृष्ट्वाऽऽयात् पारितोत्सर्गं श्रीसङ्घं चाभ्यधादिति ॥८२॥

सम्यग्वादी ध्रुवं सङ्घो मिथ्यावादी परः पुनः ।
इति मह्यं जिनेनोक्तं सप्तमो ह्येष निह्नवः ॥८३॥

स्वल्पर्द्धिकेयं किं वेत्तीत्यनिर्मुक्तकदाग्रहम् ।
सङ्घो द्वादशसम्भोगबाह्यमेनं ततो व्यधात् ॥८४॥

---

१. यः पुनरव्रतभावं जानानोऽवश्यभाविनं करोति ।
व्रतमपरिमाणमेवं प्रत्यक्षं स मृषावादी ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्तञ्च पञ्चकल्पे—

**"[१]उवहि सुय भत्तपाणे अञ्जलीपग्गहे इय ।**
**दायणा य निकाए य अब्भुट्ठाणे त्ति आवरे"** ॥८५॥

**"[२]किइकम्मस्स य करणे वेयावच्चकरणे इय ।**
**समोसरणसन्निसेज्जा कहाए य निमंतणे"** ॥८६॥

एवमुद्घाटितः सोऽथोत्सूत्रयुग्मं प्ररूपयन् ।
वान्तदृष्टिः कुदृष्टित्वात् कर्ता भूरिभवभ्रमम् ॥८७॥

इति सप्तमो निह्नवः ॥७॥

नवाधिकैः शतैः षड्भिरब्दानां **वीर**तो गतैः ।
महान् सर्वविसंवादात् सोऽष्टमो बोटिकोऽभवत् ॥१॥

**रथवीर**पुरे राजसेवकः **शिवभूति**कः ।
सहस्रमल्लतायोगाद् नृपतेरतिवल्लभः ॥२॥

स विलासान् पुरे कुर्वन् परिभ्रमति लीलया ।
रात्रियामद्वये चातिक्रान्ते याति निजं गृहम् ॥३॥

तद्वल्लभाऽन्यदा श्वश्रूमवक् त्वत्तनुजन्मना ।
उद्वेजिताऽहं यदयमतिवेलं समागमी ॥४॥

दिवा भुक्तिं निशि स्वापमकर्त्री तदनागमे ।
उज्जागरबुभुक्षाभ्यां प्रत्यहं बाधिताऽस्म्यहम् ॥५॥

ततोऽम्बयोचे वत्से ! त्वमद्य स्वपिहि जागराम् ।
करिष्येऽद्याहमेवेत्थमकार्षीत् साऽपि तन्निशि ॥६॥

इतरस्यास्तु जाग्रत्या गते यामद्वये निशः ।
**शिवभूतिः** समागत्य द्वारमुद्घाटयेत्यवक् ॥७॥

तया कुपितया प्रोचे रे ! दुर्नयनिधे ! व्रज ।
द्वारमुद्घाटितं यत्रेदानीं तत्र गतत्रप ! ॥८॥

---

१. उपाधिः श्रुतं भक्तपाने अञ्जलिप्रग्रह इति च ।
दानं च निकाचना चाभ्युत्थानमिति चापरम् ॥

२. कृतिकर्मणश्च करणं वैयावृत्यकरणमिति ।
समवसरणासन्निषद्या कथा च निमन्त्रणा ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोऽप्यहङ्कारकोपाभ्यामाविष्टो निर्गतो बहिः ।
भ्रमन्नुद्घाटितद्वारं साधूपाश्रयमैक्षत ॥९॥

प्रविश्यात्र मुनीन् नत्वा निस्सङ्गं व्रतमार्थयत् ।
राजवाल्लभ्यमात्राद्यननुज्ञातो ह्यदुर्न ते ॥१०॥

मल्लकाद् भूतिमादाय कृते लोचेऽमुना बलात् ।
दत्त्वाऽस्य लिङ्गं मुनयोऽन्यत्र भीत्या विजह्रिरे ॥११॥

कियत्यपि गते काले भूयोऽप्याजग्मुरत्र ते ।
प्रीत्या सहस्रमल्लाय राजाऽदाद् रत्नकम्बलम् ॥१२॥

सूरयः **कृष्ण**नामानस्तमूचुः स्यादनेन भो ! ।
अध्वन्यनर्थस्तद् देहि मुनिभ्यस्तद्दलीकृतम् ॥१३॥

तद्गौरवं वचः श्रुत्वा मूर्च्छया तमगोपयत् ।
एकान्ते वीक्ष्यमाणश्च गोचरोपागतोऽन्वहम् ॥१४॥

मुर्च्छितोऽयमिति ज्ञात्वाऽन्यदाऽदीयत सूरिभिः ।
मुनिभ्योऽसावनापृच्छ्य तं ज्ञात्वा स कषायितः ॥१५॥

जिनकल्पविधिव्याख्यामन्यदा कुर्वतो गुरून् ।
श्रुत्वोवाच स किं नाद्य निःसङ्गैः प्रविधीयते ? ॥१६॥

न च वाच्यं व्यवच्छिन्नो निस्सत्त्ववचनं ह्यदः ।
परलोकार्थ्यहं कर्ताऽधुना तं निष्परिग्रहम् ॥१७॥

कषायभयमूर्च्छादिहेतुनाऽनेन मे सृतम् ।
परिग्रहेण यत्प्रोक्ता निष्परिग्रहता श्रुते ॥१८॥

आगमे च मुनिः श्लाघ्यो जिताचेलपरीषहः ।
अचेलत्वं च निर्णीतमाद्यान्त्यजिनशासने ॥१९॥

जिना दिगम्बरा न स्युस्तच्छिष्याः किं दिगम्बराः ? ।
गुरुलिङ्गानुगाः शिष्या इतीदं सर्वसम्मतम् ॥२०॥

आर्य**कृष्ण**स्ततोऽभाणीद् मेदं सूत्रातिगं वद ।
कषायादिनिमित्तत्वं देहस्यापीति तं त्यज ॥२१॥

तद् वस्तु नास्ति यद् विश्वे कषायस्य न कारणम् ।
एवमग्राह्यता धर्मे जिने मुनिषु तेऽजनि ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मोक्षसाधनबुद्ध्यैषु यदि स्याद् गृह्यमाणता ।
तयैव वस्त्रपात्रादेः शुद्धस्य ग्रहणं श्रुते ॥२३॥

मूर्च्छानिमित्तताऽप्यस्य देहस्येव न वै मुनेः ।
बाह्यक्षणिकलभ्येभ्यो वस्त्रेभ्योऽपि च वर्ष्मणः ॥२४॥

दुर्लभत्वान्तरङ्गत्वचिरस्थानादिकारणैः ।
भृशं मूर्च्छानिमित्तत्वं त्वया त्याज्यं तदप्यतः ॥२५॥ युग्मम्

स्यादेतद्देहमात्रे या मूर्च्छा स्वल्पैव सा क्रमात् ।
बह्वी बह्वी तु वस्त्रादौ सत्यस्मिंस्तत् कथं व्रतम् ? ॥२६॥

मैवं यतो वराहाद्या द्रमकाद्याश्च जन्तवः ।
नग्ना अप्यवशात्मानोऽनन्तकर्मार्जका मताः ॥२७॥

संयोजितमहामूल्यवस्त्राभरणका अपि ।
उपसर्गधियाऽन्येन सिद्ध्यन्त्येके तपोधनाः ॥२८॥

तस्मादवशचित्तानां संक्लिष्टानां दुरात्मनाम् ।
अकिञ्चित्करमेवेदं नाग्न्यमात्रमुदाहृतम् ॥२९॥

एतेन भयहेतुत्वमप्येतस्य निराकृतम् ।
पावकश्वापदादिभ्यो देहस्यापि यतोऽस्ति भीः ॥३०॥

एषा व्रतोपकारायोपकृतिर्मे जिनोदिता ।
इत्यसौ गृह्यमाणाऽपि न भवाय मुनेर्भवेत् ॥३१॥

उक्तं च—

**"[1]जे जित्तिया पगारा लोगे भवहेयवो अविरयाणं ।
ते चेव य विरयाणं पसत्थभावाण मोक्खाय" ॥३२॥**

*अग्रन्थोऽयमयं ग्रन्थ इत्येकान्तो न सर्वथा ।
मूर्च्छावतो भवेद् ग्रन्थो न स्याद् ग्रन्थस्त्वसौ मुनेः ॥ ३३॥*

*तत् संयमोपकारित्वाद् ग्राह्यं कल्पादि सन्मुनेः ।
हेतोः प्रत्यक्षसिद्धिश्च सूत्रसिद्धिश्च तद्यथा ॥ ३४॥*

---

१. ये यावन्तः प्रकारा लोको भवहेतवोऽविरतानाम् ।
त एव च विरत्तानां प्रशस्तभावानां मोक्षाय ॥

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

"कप्पा[1] आयपमाणा अड्ढाइज्जा य वित्थडा हत्था ।
दो चेव सुत्तियाओ उन्निओ य तइओ मुणेयव्वो ॥३५॥

तणगहणानलसेवानिवारणा धम्मसुक्कज्झाणट्ठा ।
दिट्ठं कप्पग्गहणं गिलाणमरणट्ठया चेव ॥३६॥

संपाइमरयरेणूपमज्जणट्ठा वयन्ति मुहपोत्तिं ।
नासं मुहं च बन्धइ तीए वसहिं पमज्जन्तो ॥३७॥

आयाणे निक्खेवे ठाणनिसीए तुयट्टसंकोए ।
पुव्वं पमज्जणट्ठा लिङ्गट्ठा चेव रयहरणं ॥३८॥

छक्कायरक्खणट्ठा पायग्गहणं जिणेहिं पन्नत्तं ।
जे य गुणा संभोए भवन्ति ते पायगहणे वि ॥३९॥

आयरिए य गिलाणे पाहुणए दुल्लहे सहसदाणे ।
संसत्तभत्तपाणे मत्तगपरिभोगणुन्नाओ" ॥४०॥

जिनः कथमचेलत्वं परिषह्यं मुनेरवक् ? ।
अहो ! सितपटा वाच्ये कार्ये वोऽनेकरूपता ॥५१॥

चेलोपभोगमात्राच्चेन्नाचेलिक्यपरीषहः ।
तन्मुनिः शुद्धभोजी स्यादजितक्षुत्परीषहः ॥४२॥

अरक्तद्विष्टचित्तस्योद्गमादिपरिशुद्धिमत् ।
भुञ्जानस्यापि वल्लादि क्षुज्जयः स्याद् यथा मुनेः ॥४३॥

---

१. कल्पा आत्मप्रमाणः सार्धद्वितीयाश्च विस्तृता हस्तान् ।
द्वौ चैव सूत्रिकौ ऊर्णिकश्च तृतीयो ज्ञातव्यः (विज्ञेयः) ॥
तृणग्रहणानलसेवानिवारण-धर्मशुक्लध्यानार्थम् ।
दृष्टं कल्पग्रहणं ग्लानमरणार्थं चैव ॥
सम्पातिमरजोरेणुप्रमार्जनार्थं वदन्ति मुखपोतिकाम् ।
नासां मुखं च बध्नाति तया वसति प्रमार्जयन् ॥
आदाने निक्षेपे स्थाननिषीदे गात्रसङ्कोचे ।
पूर्वं प्रमार्जनार्थं लिङ्गार्थं चैव रजोहरणम् ॥
षट्कायरक्षणार्थं पात्रग्रहणं जिनैः प्रज्ञप्तम् ।
ये च गुणाः सम्भोगे भवन्ति ते पात्रग्रहणेऽपि ॥
आचार्ये च ग्लाने प्राघूर्णके दुर्लभे सहसादाने ।
संसक्तभक्तपाने मात्रकपरिभोगानुज्ञातः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*जीर्णस्तोकपरीशुद्धचेलभोगेऽप्यचेलता ।*
*तथा साधोर्यतः प्रोक्तं मूर्च्छाऽभावात् सदप्यसत् ॥४४॥*

यथा कटीवस्त्रबद्धशिरा मग्नो जले नरः ।
नग्न इत्युच्यते लोकैर्नाग्न्यमस्ति तथा मुनेः ॥४५॥

अतुल्यधृतिसंस्थाना एकोनज्ञानिनो जिनाः ।
अच्छिद्रपाणिपात्राश्च जिताखिलपरीषहाः ॥४६॥

व्रतं वस्त्राद्यभावेऽपि धारयेयुस्तथाऽपि ते ।
मुनीनामम्बराज्ञार्थं व्रतारम्भे सचेलकाः ॥४७॥

***वैद्योपदेशतो रोगी वैद्यवेषमनाचरन् ।***
***क्लेशेभ्यो मुच्यते तद्वद् जैनाज्ञाऽऽराधको मुनिः ॥४८॥***

योग्यताया अभावेन तन्नेपथ्यादिकं दधत् ।
प्राप्नोति निन्द्यतां लोकेऽर्हन्तो हि भुवनातिगाः ॥४९॥

जीर्णप्रायोग्यवस्त्राणां निमूर्च्छमुपभोगतः ।
अन्यथा परिभोगाद् वा विद्धि साधूनचेलकान् ॥५०॥

इति प्रज्ञापितोऽप्येष मिथ्यात्वोदयतः कुधीः ।
उपाश्रयाद् विनिर्यातस्त्यक्तवेषः पिशाचवत् ॥५१॥

**उत्तरा**ऽऽख्या स्वसा तस्य साध्वी श्रुत्वैतदद्भुतम् ।
तमुद्यानगतं नन्तुं गता भ्रातृमतानुगा ॥५२॥

त्यक्त्वाऽम्बराणि सर्वाणि भिक्षाऽर्थमविशत् पुरे ।
ददृशे वेश्यया तादृग्बीभत्साकारधारिणी ॥५३॥

मैनां दृष्ट्वा विरक्तोऽभूद् लोकोऽस्मास्विति बुद्धितः ।
तया चीवरमक्षेपि तस्याः शिरसि दक्षया ॥५४॥

तुभ्यं देवतया दत्तमिति सोदरवाक्यतः ।
सा पर्यधात् ततो वस्त्रं **शिवभूति**स्त्वनम्बरः ॥५५॥

**कोडिन्यकोष्ठवीरा**ख्यावभूतां तद्विनेयकौ ।
ततः परम्पराख्यातमभूद् विस्तारि तन्मतम् ॥५६॥

एवं केऽपि भवाब्धितारणतरीं प्राप्यापि बोधिं परां,
मिथ्यात्वोदयतः कदाग्रहधियस्तां नाशयन्ति क्षणात ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पाणिस्रस्तपयोधिमध्यपतितस्वारत्नवत्तामतो;
दुष्प्रापां समवाप्य भोः ! प्रभवतैतद्रक्षणायोद्यताः ॥५७॥

इत्यष्टमो महानिह्नवः, एवं निह्नवचरित्राणि ॥८-९॥

संयमवीर्यदुर्लभतामाह—

**सुइं च लद्धुं सद्धं च वीरियं पुण दुल्लहं ।**
**बहवे रोयमाणा वि नो एणं पडिवज्जए ॥१०॥**

**व्याख्या—श्रुतिं चशब्दात् मनुजत्वं लब्ध्वा, श्रद्धां च वीर्यं** संयमविषयं **पुनर्दुर्लभं** यथा **बहवो रोचमानाः** श्रद्धाना **अपि नो एनं** धर्मं **प्रतिपद्यन्ते** । चारित्रं मोहनीककर्मोदयात् **श्रेणिकादिवत्** ॥

तथाहि—

देवे श्री**वर्द्धमाने** च गुरौ तद्भाषिते वृषे ।
आस्तिक्यवान् **श्रेणिको**ऽभूद् राजा **राजगृहे** पुरे ॥१॥

एवं स क्षायिके सम्यग्दर्शने दृढमानसः ।
श्री**वीरभ**गवद्वाणी सदा श्रवणलालसः ॥२॥

चिकीर्षुरपि सद्धर्मं शिवदं श्रद्दधच्च सः ।
परं न शक्तो विरतिं कर्तुं काञ्चन सर्वथा ॥३॥

*एवं लब्धेऽपि मानुष्ये वचनेऽप्यार्हते श्रुते ।*
*श्रद्धावतोऽपि दुष्प्रापं वीर्यं स्यात् संयमे नृणाम् ॥४॥ ॥१०॥*

चतुरङ्गस्य फलमाह—

**माणुसत्तंमि आयाओ जो धम्मं सुच्च सद्दहे ।**
**तवस्सी वीरिअं लद्धुं संवुडो निद्धुणे रयं ॥११॥**

**व्याख्या—मानुषत्वे आयातः** प्राप्त इत्यर्थः, **यो धर्मं श्रुत्वा श्रद्धत्ते** रोचयते **तपस्वी वीर्यं** च संयमोद्योगं **लब्ध्वा संवृतः** स्थगितसर्वाश्रवः । स किमित्याह—**निर्धुनोति** नितरामपनयति **रजो** बद्ध्यमानं बद्धं च कर्म तदपनयने च मुक्तिमाप्नोतीति भावः ॥११॥

ऐहिकं फलमाह—

**सोही उज्जुयभूयस्स धम्मो सुद्धस्स चिट्ठई ।**
**निव्वाणं परमं जाइ घयसित्ति व्व पावए ॥१२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—शुद्धिः** कषायकालुष्यापगमो भवतीति गम्यम् । **ऋजुकभूतस्य** चतुरङ्गप्राप्त्या मुक्तिं प्रति प्रगुणीभूतस्य तथा च **धर्मः** क्षान्त्यादिः **शुद्धस्य तिष्ठति** निश्चलतयाऽऽस्ते । अशुद्धस्य कदाचित् कषायोदयादसौ विचलत्यपि तदवस्थितौ च **निर्वाणं परमं** प्रकृष्टं **याति** जीवन्मुक्तिमाप्नोतीत्यर्थः ॥ उक्तञ्च—

**"निर्ज्जितमदमदनानां वाक्कायमनोविकाररहितानाम् ।**
**विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम्"** ॥१॥

कथम्भूतः सन् **घृतसिक्तः पावक** इव तपस्तेजोज्वलितत्वेन घृततर्पिताग्निसमान इति ॥१२॥

शिष्योपदेशमाह—

**विगिंच कम्मणो हेउं जसं संचिणु खंतिए ।**
**पाढवं सरीरं हिच्चा उड्ढं पक्कमई दिसं ॥१३॥**

**व्याख्या—वेविग्ध** पृथक् कुरु **कर्मणः** प्रक्रमान्मनुष्यत्वादिविबन्धकस्य **हेतुं** मिथ्यात्वादि तथा **यशः** संयमं विनयं वा **'संचिनु'** उपचितं कुरु कया **क्षान्त्योप**-लक्षणान्मार्दवादिभिश्च । ततः किं स्यादित्याह—**पार्थिवम**मौदारिकं **शरीरं हित्वा** त्यक्त्वो**र्ध्वं** स्वर्गापवर्गरूपं **[दिशं] प्रक्रामति** प्रकर्षेण याति भवानित्युपस्कारः ॥१३॥

किञ्च—

**विसालिसेहिं सीलेहिं जक्खा उत्तरउत्तरा ।**
**महासुक्का व दिप्पंता मन्नंता अपुणच्चवं ॥१४॥**

**व्याख्या—**'विसालिसेहिं'त्ति मागधीभाषया **विसदृशै**र्भिन्नैः **शीलै**र्व्रतपाल-नाद्यनुष्ठानविशेषै**र्यक्षा** देवा ऊर्ध्वं कल्पेषु तिष्ठन्तीत्युत्तरेण सम्बन्धः । **उत्तरोत्तरा** यथोत्तरप्रधाना **महाशुक्ला 'वा** इवार्थे' अत्युज्ज्वलतया चन्द्रादित्या इव **दीप्यमानाः** प्रकाशमाना **मन्यमाना** मनस्यवधारयन्तः कामातिशयातिसुखमग्नतया**ऽपुनश्च्यवम**धस्ति-र्यगादिषूत्पत्तिभावम् ॥१४॥

पुनर्हेतुमाह—

**अप्पिया देवकामाणं कामरूवविउव्विणो ।**
**उड्ढं कप्पेसु चिट्ठंति पुव्वा वाससया बहू ॥१५॥**

**व्याख्या—अर्पिताः** प्राक्पुण्येन ढौकिता इव केषां **देवकामानां** दिव्यशब्दादि-विषयाणां **कामरूपविकरणा** यथेष्टरूपकरणशक्त्युपेता **ऊर्ध्वं कल्पेषु** सौधर्माद्यनुत्तरेषु **तिष्ठन्त्या**यःस्थितिमनुभवन्ति **पूर्वाणि** वर्षसप्ततिकोटिलक्षषट्पञ्चाशत्कोटिसहस्रमितानि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बहूनि। एवं **वर्षशतान्यपि बहून्यस**ङ्ख्येयानीत्यर्थः । पूर्ववर्षतायुषामेव चरणयोग्यत्वेन विशेषतो देशनौचित्यमिति ख्यापनार्थमित्थमुपन्यासः ॥१५॥

**तत्थ ठिच्चा जहाठाणं जक्खा आउक्खए चुया ।**
**उविंति माणुसिं जोणिं से दसंगे भिजायए ॥१६॥**

**व्याख्या—तत्रो**क्तल्पेषु **स्थित्वा यथास्थानं** यद्यस्य स्वानुष्ठानरूपमिन्द्रादिपदं तस्मिन् यक्षा देवा आयुःक्षये च्युता भ्रष्टा **उपयान्ति** गच्छन्ति । **मानुषीं योनिं** 'से' इति **स** सावशेषसुकृतकर्मा जीवो दशाङ्गानि भोगोपकरणान्यस्येति **दशाङ्गोऽभिजायते** । आभिमुख्येनोत्पद्यते । एकवचनात् कश्चिन्नवाङ्गादिरपीति ॥१६॥

दशाङ्गान्येवाह—

**खेत्तं वत्थुं हिरण्णं च पसवो दास-पोरुसं ।**
**चत्तारि कामक्खंधाणि तत्थ से उववज्जई ॥१७॥**

**व्याख्या—क्षेत्रं** ग्रामारामादि सेतुकेतूभयरूपं **वास्तु** खातोत्सृतोभयात्मकं **हिरण्यं** सुवर्णं **च**शब्दाद् रूप्यादि च **पशवो**ऽश्वादयः । **दासा** भृत्याः **पौरुषं** पदातिसमूहः । **चत्वारश्चतुः**सङ्ख्यास्तत्र **क्षेत्रं** वास्त्वित्येकः, **हिरण्यमि**ति द्वितीयः, **पशव** इति तृतीयः, **दासपौरुषेय**मिति चतुर्थः । एते [**चत्वारः**] कामा मनोज्ञशब्दादयस्तद्धेतवः स्कन्धास्तत्तत्पुद्गलसमूहाः **कामस्कन्धा** यत्र स्युस्तत्र तेषु कुलेषु स उपपद्यते । अनेनैकमङ्गमुक्तम् ॥१७॥

शेषाणि नवाङ्गान्याह—

**मित्तवं नाइवं होइ उच्चागोए य वण्णवं ।**
**अप्पायंके महापन्ने अभिजाए जसो बले ॥१८॥**

**व्याख्या—मित्रवान् ज्ञातयः** स्वजनास्तद्वान् **भवत्युच्चैर्गोत्रः**, '**चः**' समुच्चये **वर्णः** स्निग्धत्वादिगुणैः प्रशस्यो गौरादिस्तद्वान्, **अल्पतङ्को** नीरोगः, **महाप्रज्ञः** पण्डितः, **अभिजातो** विनीतः 'जसो'त्ति **यशस्वी** 'बल'त्ति **बली** कार्यकरणं प्रति सामर्थ्यवान् 'उभयत्र मत्वर्थीयलोपः सूत्रत्वात् ' । एकैकोऽपि हि मित्रवत्त्वादिगुणस्तत्कार्यकरणक्षमः, किं पुनरमी समुदिता इति ॥१८॥

पुनरन्यत्फलमाह—

**भोच्चा माणुस्सए भोए अपडिरूवे अहाउयं ।**
**पुव्वं विसुद्धसद्धम्मे केवलं बोहि बुज्झिया ॥१९॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—**भुक्त्वा**ऽऽसेव्य **मानुष्यकान् भोगान्** प्रशस्तशब्दादीन् **अप्रतिरूपान्** अनन्यसदृशान् । **यथा**ऽऽयुरायुषोऽनतिक्रमेण **पूर्वं** पूर्वजन्मसु विशुद्धो निदानरहितत्वेन सच्छोभनो धर्मोऽस्येति **विशुद्धसद्धर्मः, केवलां** निष्कलङ्कां **बोधिम**र्हद्धर्मप्राप्तिरूपां **बुद्ध्वा** प्राप्येत्यर्थः ॥१९॥

ततः किमित्याह—

**चउरंगं दुल्लहं मच्चा संजमं पडिवज्जिया ।**
**तवसा धुयकम्मंसे सिद्धे हवइ सासए ॥२०॥ त्ति बेमि ॥**

**व्याख्या**—चतुर्णामङ्गानां समाहारश्चतुरङ्गी **तामु**क्तस्वरूपां **दुर्लभां** मत्वा **ज्ञात्वा संयमं** सर्वसावद्यविरतिरूपं **प्रतिपद्या**ङ्गीकृत्य **तपसा** द्वादशविधेन धुता अपनीताः कर्मांशा कर्मविभागा येन स **धूतकर्मांशः सिद्धो भवति शाश्वतः** पुनर्भवहेतुकर्मबीजात्यन्तोच्छेदात्। तथा चाह—

**"दग्धे बीजे यथाऽत्यन्तं प्रादुर्भवति नाङ्कुरः ।**
**कर्म्मबीजे तथा दग्धे न रोहति भवाङ्कुरः" ॥१॥**

**इति ब्रवीमी**ति प्राग्वत् ॥ (ग्रं० ८८२ अक्षर १२)

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां तृतीयचतुरङ्गीयाध्ययनं समाप्तम् ॥३॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# चतुर्थमसंस्कृताख्यमध्ययनम्

अथ मनुष्यात्वादिचतुरङ्गी प्राप्यापि महादोषगुणहेतुभूतयोः प्रमादाप्रमादयोर्हेयोपादेयतामाह—

**असंखयं जीविय मा पमायए जरोवणीयस्स हु नत्थि ताणं ।**
**एयं वियाणाहि जणे पमत्ते कन्नु विहिंसा अजया गहिंति ॥१॥**

**व्याख्या—असंस्कृतम**संस्करणीयं **जीवित**मायुर्यन्न शतैरपीन्द्रादिभिः सतो वर्द्धयितुं त्रुटितस्य कर्णपाशवद् अस्य संधातुं वाऽशक्यत्वात् । यतः—

**"मङ्गलैः कौतुकैर्योगैर्विद्यामन्त्रैस्तथौषधैः ।**
**न शक्ता मरणात् त्रातुं सेन्द्रा देवगणा अपि" ॥१॥**

अतो **मा प्रमादीः** प्रमादं मा कृथाः । अथ वार्धक्ये धर्मं करिष्यामीत्याशङ्क्याह—**जरोपनीतस्या**र्थस्यार्थान्मृत्यूपान्तगतस्य **हुर्यस्मान्नास्ति त्राणं** येनासावपनीयते पुनर्यौवनमानीयते । न तच्छरणमस्ति । ततो यावदसौ नासादयति तावद् धर्मे मा प्रमादीः । यदुक्तम्—

**"तद् यावदिन्द्रियबलं जरया रोगैर्न बाध्यते प्रसभम् ।**
**तावच्छरीरमूर्च्छां त्यक्त्वा धर्मे कुरुष्व मतिः" ॥१॥**

जरोपनीतस्य नास्ति त्राण**मट्टन**मल्लवत् । तथाहि—

**जितशत्रु**र्नृपोऽ**वन्त्यामट्टन**स्तस्य मल्लराट् ।
अजेयः सर्वराज्येषु धीरः स्थामैकसेवधिः ॥१॥

**सोपार**पत्तने वार्द्धितीरे **सिंहगिरि**र्नृपः ।
मल्लाय जयिने दत्ते तदौदार्याद् धनं बहु ॥२॥

प्रत्यब्द**मट्टन**स्तत्र गत्वा मल्लान् विजित्य च ।
पताकां हरते भूपादादत्ते द्रविणं बहु ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ममापभ्राजना सेयं दुर्वारेति विचिन्तयन् ।
प्रतिमल्लं नृपः पश्यन्नेकं मात्सिकमैक्षत ॥४॥

वसां पिबन्तमाघ्रातं तज्ज्ञात्वा मल्लतोचितम् ।
स्निग्धान्नैः पोषयित्वैनं मल्लविद्यामशिक्षयत् ॥५॥ **युग्मम्**

**अट्टनः** स तथैवागात् तं मल्लो मात्सिकोऽजयत् ।
स्वावासं विमुखः सोऽथागमद् दध्यौ च चेतसि ॥६॥

त्रुट्यद्बलोऽहं वृद्धत्वाद् युवाऽसावुच्छलद्बलः ।
दिदृक्षुस्तस्य मल्लस्य प्रतिमल्लम**थाट्टनः** ॥७॥

कर्षकं चलितोऽद्राक्षीत् सीरमेकेन पाणिना ।
वाहयन्तं द्वितीयेनोत्खनन्तं फलहीलताः ॥८॥

स्थित्वा तत्र निरैक्षिष्ट तदाहारमथोल्बणम् ।
नीहारं चाल्पमत्यन्तं दृष्ट्वा तद्बलरञ्जितः ॥९॥

त्वामीश्वरीकरोमीति प्रलोभ्य तम**थाट्टनः** ।
तत्पत्न्या वर्त्तनं दत्त्वा निन्ये सह निजां पुरीम् ॥१०॥

विशोध्यान्तः प्रपोष्याथ नियुद्धं शिक्षितोऽखिलम् ।
तेन तेने स मल्लेन्द्रः फलहीमल्लसंज्ञकः ॥११॥

प्राच्यपभ्राजनां लोप्तु**मट्टन**स्तेन संयुतः ।
**सोपार**पुरमायातोऽढौकिष्ट नृपसंसदि ॥१२॥

द्वयोस्तरुणयोस्तत्र नियुद्धे मल्लयोः सति ।
दिनेऽभूत् प्रथमेऽन्योऽन्यं न जयो न पराजयः ॥१३॥

स्वं स्वं तावालयं प्राप्तौ स्वमल्लमव**गट्टनः** ।
सर्वं निवेदयाभ्रान्तं यत्ते किञ्चन दुष्यति ॥१४॥

तेनाख्याते स मर्दित्वा तं चकार पुनर्नवम् ।
राज्ञाऽपि मात्सिकस्यान्ते प्रेष्यन्ते स्माङ्गमर्दकाः ॥१५॥

हसित्वा स्माह तानेष शतमल्लाऽऽहवेऽपि हि ।
किञ्चिद् दुष्यति मे नाङ्गं वृथा किं मर्दनेन मे ? ॥१६॥

समयुद्धौ द्वितीयेऽह्नि तृतीये फलहीमिव ।
अच्छिनत् फलहीमल्लो मात्सिकस्य शिरो द्रुतम् ॥१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तद्युक्तः सत्कृतो राज्ञाऽ**ट्टनोऽवन्तीं** ततो ययौ ।
विमुक्तयुद्धव्यापारस्तत्राऽऽस्ते वार्द्धिकेन सः ॥१८॥

वृद्धश्चाक्षम इत्येतं स्वजनो नानुवर्त्तते ।
जरद्गवोऽयमित्यादि पराभवति चानिशम् ॥१९॥

सोऽभिमानादनापृच्छ्य स्वजनान् प्रययौ ततः ।
**कौशाम्बीं** नगरीं तत्रैकान्तेऽकार्षीद् रसायनम् ॥२०॥

तेनैष नष्टवार्धक्यो मल्लोऽभूद् बलवान् युवा ।
युद्धे वृत्ते राजमल्लं निजघान निरङ्गणम् ॥२१॥

आगन्तुकेन मन्मल्लो हत इत्यत्र मन्युमान् ।
प्रशशंस नृपो नैनं मौनं भेजुर्जना अपि ॥२२॥

निष्फलोऽभूच्छ्रमो शेष इति खेदभृ**दट्टनः** ।
सभाध्यक्षमदोऽवादीद् राज्ञो ज्ञापनहेतवे ॥२३॥

पक्षिणः खचराः सर्वे बुध्यध्वं यूयमप्यदः ।
राजाङ्गणे जघानैषो**ऽट्टनमल्लो** निरङ्गणम् ॥२४॥

इति श्रुत्वा नृपेणैषो**ऽट्टनो** मान्यो महीभुजाम् ।
इति तुष्टेन पर्याप्तमदाय्यस्मै धनादिकम् ॥२५॥

भूयो**ऽट्टनः** समृद्धोऽभूदित्याकर्ण्य कुटुम्बकम् ।
उपतन्निभृतं भक्तं सम्भूयाऽऽस्ते धनाशया ॥२६॥

स तु दध्याविमे दुष्टा मां भजन्तेऽधुनेश्वरम् ।
पुनः पराभविष्यन्ति क्षीणस्वं स्वार्थलालसाः ॥२७॥

जरोपगतमात्मानं यत्नेन महताऽपि हि ।
शक्तः पुनर्नवीकर्त्तुं भविष्यामि कथ पुनः ? ॥२८॥

आत्मन् ! मोहं परित्यज्य जीविते स्वजने धने ।
कुरु किञ्चिच्छुभं कर्म जराग्रस्तस्तु शोक्ष्यसि ॥२९॥

जराजर्जरसर्वाङ्गो लम्बत्वक् क्षीणलोचनः ।
गतश्रुतिप्रभादन्तो लालाऽऽविलमुखोऽक्षमः ॥३०॥

कासश्वासादिरोगार्त्तः परिभाव्यः सुतैरपि ।
भार्ययाऽप्यकृतालापोऽवज्ञातो बान्धवैरपि ॥३१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वदन्नुद्वेगजनको धर्मार्थोद्यमदूरहृत् ।
मृत्यूत्सङ्गगतो वृद्धस्तथापीच्छां न मुञ्चति ॥३२॥

तत् किञ्चिद् यावदद्यापि समर्थतनुरस्म्यहम् ।
तावदात्मार्थसंसिद्धौ प्रयत्नं करवाणि वै ॥३३॥

वार्द्धक्ये ह्यपकरिष्यन्ति स्वजना विदितं त्वदः ।
प्रभूतमपि न द्रव्यं जराऽऽतङ्कनिवारकम् ॥३४॥

अतस्तैस्तेन चालं मे सम्प्रधार्येति धीरधीः ।
परिव्रज्यामुपादत्त तयाऽऽत्मार्थमसाधयत् ॥३५॥

इत्य**ट्टनमल्लः** ॥

**एवमुक्तमर्थं** वक्ष्यमाणं च **विजानाहि** विशेषेण विबुध्यस्व । यथा **जनाः प्रमत्ताः** प्रमादपराः **कमर्थं** त्राणलक्षणं **'नु** वितर्के' **विहिंस्रा** विविधहिंसनशीलास्तथा **अयताः** सावद्यरता **ग्रहीष्यन्ति** ? न कमपि, किन्तु प्रमत्तत्वाद्युपेताः स्वकर्मभिर्नरकादियातनामेवावाप्स्यन्तीति भावः ॥१॥

अथ केचित् कदाशया अर्थस्यैहिकामुष्मिकसुखहेतुतया प्रधानत्वात् तदुपार्जने प्रमादो न कार्य इत्याहुः यथा—

**"धनैर्दुष्कुलीनाः कुलीनाः क्रियन्ते धनैरेव पापात् पुनर्निस्तरन्ते ।**
**धनेभ्यो विशिष्टो न लोकेऽस्ति कश्चिद् धनान्यर्जयध्वं धनान्यर्जयध्वम्" ॥**

इति तन्मतमपकर्त्तुमाह—

**जे पावकम्मेहि धणं मणूसा समाययंती अमइं गहाय ।**
**पहाय ते पासपयट्टिए नरे वेराणुबद्धा नरयं उवेंति ॥२॥**

**व्याख्या—ये** केचन पापकर्मभिः कृषिवाणिज्याद्यनुष्ठानै**र्धनं मनुष्याः समाददते** स्वीकुर्वन्त्य**मतिं** 'नञः कुत्सार्थत्वात्' कुमतिमुक्तरूपां गृहीत्वा सम्प्रधार्य ततश्च प्रहाय प्रकर्षेण हित्वा धनमेव प्रकृतं ते धनैकरसिकाः पुरुषा अपि च पाशा इव पाशाः स्त्र्यादयः उक्तं हि—

**"[1]वारी गयाण जालं तिमीण हरिणाण वग्गुरा चेव ।**
**पासा य सउणयाणं नराण बंधत्थमित्थीओ" ॥१॥**

---

१. वारी गजानां जालं तिमीनां हरिणानां वागुरा चैव ।
पाशाश्च शकुनिकानां नराणं बन्धार्थं स्त्रियः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तेषु **पाशेषु प्रवृत्तास्तैः प्रवर्त्तिता** वा **नरा वैरं** कर्म **तेनानुबद्धाः** सततमनुगता **नरकमुपयान्ति** गच्छन्ति । ते हि धनमुपार्ज्य स्त्र्यादिष्वभिरममाणा नरकगतिभाज एव स्युरिति भावः । तस्मादिह वधाद्यपायहेतुत्वेन परत्र च नरकादिप्रापकत्वेनार्थोऽनर्थहेतुरेव **चौरवत्** ॥

एकस्मिन् नगरे चौरः प्रत्यूषं कोऽपि साहसी ।
क्षात्रं महेभ्यगेहेषु दत्त्वा भूरि स्वमग्रहीत् ॥१॥

स्वगृहस्यैकदेशे च कूपमुत्खन्य स स्वयम् ।
प्राक्षिपत् तत्र रिक्थौघं पुरे तं वेद कोऽपि न ॥२॥

दत्त्वा बहुधनं कन्याः स यथेच्छं व्यवाहयत् ।
अमारयत् प्रसूतास्ताः स पुत्राद् भेदशङ्कया ॥३॥

अन्यदा रूपसौन्दर्यादतिप्रेमालयां प्रियाम् ।
प्रसूतामपि नाहंसीत् पुत्रोऽभूदष्टवार्षिकः ॥४॥

ततो दध्यावतिस्नेहो भावी मेऽनर्थहेतवे ।
आभ्यां प्रकाशिते दम्भे क्व चौरस्य मम स्थितिः ? ॥५॥

तस्मादेनां विनाश्यैनं हनिष्यामि तनूद्भवम् ।
ध्यात्वेति कूपे साऽक्षेपि विधाय गलमोटनम् ॥६॥

गृहान्निर्गत्य तत्कालं पूत्करोति स्म दारकः ।
अवक् च मिलिते लोके मार्यनेनाद्य मत्प्रसूः ॥७॥

तत् परम्परया श्रुत्वाऽग्राह्यसौ राजपूरुषैः ।
कूपोऽपि ददृशे द्रव्यस्वर्णास्थिपरिपूरितः ॥८॥

बद्ध्वोपभूधवं नीतस्तेनाप्यादाय तद्धनम् ।
अघान्यशरणो दीनः पीडयित्वा कुमृत्युना ॥९॥

एवमन्येऽपि हि द्रव्यं प्रधानमिति तत्कृते ।
प्रवर्त्तमानास्त्यक्त्वा तज्जायतेऽनर्थभाजनम् ॥१०॥२॥

तमेवार्थं द्रढयति—

**तेणे जहा संधिमुहे गहीए सकम्मुणा किच्चइ पावकारी ।**
**एवं पया पिच्च इहं च लोए कडाण कम्माण न मोक्खु अत्थि ॥३॥**

**व्याख्या—स्तेनश्चौरो यथेति** दृष्टान्ते **सन्धिमुखे** क्षात्रद्वारे **गृहीतः स्वकर्मणा**-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ऽऽत्मीयानुष्ठानेन **कृत्यते** छिद्यते **पापकारी** । कथं पुनरसौ कृत्यते इत्यत्र सूत्रसूचितो दृष्टान्तस्तथाहि—

एकः कश्चन तस्करो धनिगृहे दुर्भेद्यकुड्येऽकरोत्,
क्षात्रं तत्कपिशीर्षकाकृति विवेशाऽत्रैष यावन्निशि ।
मध्यस्थैर्जगृहे पदोर्बहिरयं मित्रैर्दृढं हस्तयोः;
क्षात्रास्त्रैर्निशितैः प्रपीडिततनुः संकृष्यमाणो मृतः ॥१॥

यथा स्वयं कृतक्षात्रात् पीडितोऽसौ तथा जनः ।
स्वयं कृतेभ्यः पापेभ्यः परत्रेह च पीड्यते ॥२॥

**एव**मुक्तन्यायेन **प्रजाः** प्राणिनः कृत्यन्ते इति योज्यम् **प्रेत्य** परलोके **इहलोके च** । स्यादेतदिहैव कृतमिहैवापगतमत आह—**कृतानां कर्मणां न मोक्षोऽस्ति** इह परत्र चावश्यं वेद्यं कर्म । उक्तञ्च—

**"यदिह क्रियते कर्म तत् परत्रोपभुज्यते ।**
**मूलसिक्तेषु वृक्षेषु फलं शाखासु जायते" ॥१॥**

एवं मत्वा पापकर्म न कार्यं, तदभिलाषोऽपि न कार्यश्चौरस्यैवानर्थहेतुत्वात् ॥ यथा—

दुरारोहे दस्युर्धवलनिलये क्षात्रखननाद्,
धनं नीत्वा प्रातर्बहुजनमगाद् वक्ति किमु कः ? ।
समारूढः सौधे कथमयमहो ! दुर्गविषमे;
लघुक्षात्रद्वारा कथमपि सभारः स निरगात् ॥१॥

इत्याकर्ण्य निजश्लाघां तां च सत्यां विचिन्त्यन् ।
स्वाङ्गं क्षात्रमुखं पश्यन् सुहृद्भ्यश्चानुमोदयन् ॥२॥

तावदारक्षकैः पुम्भिर्लक्षितस्तस्करो ह्यसौ ।
राजादेशाच्छास्यमानः शूलिकायां स रोपितः ॥३॥

इति पापकर्मानुमोदनमपि न कार्यम् ॥३॥

अथ स्वजनेभ्य एव कर्मणां मुक्तिर्भविष्यत्यमुक्तौ चामी धनादिवद् विभज्य कर्म मोक्ष्यन्ते इत्याशङ्क्याह—

**संसारमावन्न परस्स अट्ठा साहारणं जं च करेइ कम्मं ।**
**कम्मस्स ते तस्स उ वेयकाले ण बंधवा बंधवयं उवेंति ॥४॥**

**व्याख्या**—संसरणं नीचोच्चकुलेषु पर्यटनं **संसारस्तमापन्नः** प्राप्तः **परस्यात्म**-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्यतिरिक्तस्य पुत्रादे**रर्थादि**त्यर्थं प्रयोजनाश्रित्य 'क्यब् लोपे पञ्चमी, **च**शब्दो वाऽर्थे' साधारणं वाऽऽत्मनः, पुत्रादेश्चार्थं **यच्च करोति कर्म** कृष्यादि भवान् ततश्च '**कम्मस्स**'त्ति पञ्चम्यर्थे षष्ठीति तस्मात् परार्थात् साधारणाद् वा कृष्यादिकर्मणः सकाशाद् अर्जितस्येति गम्यते । हे कर्मकर्तः ! 'ते' **तव तस्यैव** अशुभप्रकृतिरूपस्य कर्मणो **वेदकाले** विपाकसमये **ने**ति निषेधे **बान्धवाः** स्वजना यदर्थं कर्म कृतवान् करोषि वा ते **बान्धवतां** बन्धुभावं तद्विभजापनयनादिना **नोपयान्ति** । यतः—

**"[1]अत्थोवज्जणहेऊहिं पावकम्मेहि पेरिओ ।**
**एक्कउ चेव सो जाइ दोग्गइं दुहभायणं"** ॥१॥

अतस्तदुपरि प्रेमादित्यागतो धर्म एव सावधानैर्भाव्य**माभीरीवञ्चकवणिग्**वत् ।

तथाहि—

कुत्रापि नगरे कश्चिच्चतुरो वणिगापणे ।
नित्यं व्यवहरन्नस्त्यागत्याऽऽभीरी तमन्यदा ॥१॥

रूपकद्वयकर्पासं ग्राममुग्धा ह्यमार्गयत् ।
अदाद् द्विरेकतल्लभ्यं तोलयित्वा स वक्रधीः ॥२॥

द्विरूपकाऽऽप्यमापीति मन्वाना साऽगमद् गृहम् ।
दध्यौ वणिग्मयैकोऽद्य मुधैवालाभि रूपकः ॥३॥

भुञ्जेऽतः सरसं किञ्चिद् ध्यात्वेत्यप्रेषयद् गृहे ।
सुस्निग्धघृतपूरार्थं समितां गुडसर्पिषी ॥४॥

चक्रे तांस्तत्प्रिया प्रीत्याऽकस्मात् तावत् सुतापतिः ।
ससखाऽऽगाद् व्रजन् ग्राममुत्तालो बुभुजे स तान् ॥५॥

उत्सुकोऽथ गते तस्मिन्नागत्यापणतो वणिक् ।
वल्लादि बुभुजे सर्वं प्रियया परिवेषितम् ॥६॥

सर्वाद्भुतरसैः पूर्णा घृतपूर्णा न किं कृताः ? ।
पृष्टेति तांस्ते जामाता भुक्त्वाऽगादिति साऽवदत् ॥७॥

व्यमृशत् स ततः पश्य यादृशं मयका कृतम् ।
आभीर्यवञ्चि हाऽन्यार्थे स्वात्माऽयोज्युग्रपाप्मना ॥८॥

---

१. अर्थोपार्जनहेतुभिः पापकर्मभिः प्रेरितः ।
एकाक्येव स याति दुर्गतिं दुःखभाजनम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सर्वसाधारणं द्रव्यं पापं केवलमर्जके ।
तदेतत्पापपूर्णस्य भविता मम का गतिः ? ॥९॥
इति चिन्तातुरो ग्रीष्मे गत्वा स नगराद् बहिः ।
वपुश्चिन्ताऽऽदिकं कृत्वा निविष्टोऽभूत् तरोरधः ॥१०॥
तेनाध्वना व्रजन् कोऽपि मुनिरूचेऽथ तेन भोः ! ।
आगच्छोपविशोत्तालोऽसि किं मामिह वार्त्तय ॥११॥
स्वार्थं साधयितुं तूर्णं याताऽस्मीत्यवदन्मुनिः ।
कस्याप्यस्ति परार्थेऽपि गतिरित्यन्वयुङ्क्त सः ॥१२॥
तवैवास्ति कुटुम्बार्थे सततं परितप्यतः ।
मर्मणीव ततः स्पृष्टस्तद्वाचा बुबुधे वणिक् ॥१३॥
अवक् च यूयं कुत्रास्थ तेनोक्तं वनमध्यतः ।
कृताहारे मुनौ तत्र स तत्पार्श्वमगान्मुदा ॥१४॥
सर्वे स्वार्थपराः कोऽपि न कस्याप्युपयुज्यते ।
संसारे न स्थिरो योगः समुद्रेऽम्भस्तरङ्गवत् ॥१५॥
इति तद्वचनं श्रुत्वा व्रतार्थी तदनुज्ञया ।
गत्वा स्ववेश्म स्वजनांस्तान् प्रियां चेति सोऽभणत् ॥१६॥
आपणे व्यवहारं मे कुर्वतोऽपि न तादृशः ।
लाभो देशान्तरं गत्वा कुर्वे वोऽनुज्ञयाऽथ तम् ॥१७॥
तद्योग्यौ सार्थवाहौ द्वौ तत्रैको हि क्रयाणकम् ।
दत्त्वा नयेदिष्टपुरं न मार्गयति चार्जितम् ॥१८॥
न हि भाण्डं न मूल्यं वा दत्ते पूर्वं तदैव वा ।
यदर्जितं तदप्यन्य आच्छिनत्ति सहागमात् ॥१९॥
तद् ब्रूथ कतरेणाहं गच्छाम्यर्थप्रसिद्धये ।
आद्येन सह गन्तव्यमित्यूचुस्तस्य बान्धवाः ॥२०॥
योजयध्वं सहागत्य ततो मां तेन नान्यथा ।
मम कुर्यात् स विश्रम्भमित्युक्ते तेन बान्धवाः ॥२१॥
जग्मुस्तेन सहोद्यानमाहुस्ते सार्थपः क्व ते ? ।
छायायां तमशोकस्य निषण्णं सोऽप्यदर्शयत ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नन्वेष परलोकस्य सार्थवाहो महामुनिः ।
रत्नत्रयादिभाण्डानि दुष्प्रापाणि प्रदास्यति ॥२३॥

तदर्जितं पुनः कैवल्यादिकमर्जयेन्न हि ।
सहैतेन ततो याताऽभीष्टं निर्वृतिपत्तनम् ॥२४॥

इति चातुर्यतो बन्धून् समाधाय स तत्त्वधीः ।
परिव्रज्यामुपादाय क्रमशो निर्वृतोऽभवत् ॥२५॥

यथा स्वतत्त्वमालोच्य स्वजनस्य वणिग्वरः ।
व्रतं प्रत्याहृतस्तद्वद् यतितव्यं परैरपि ॥२६॥

इति **वणिक्**कथा ॥

तथाह वाचकः—

**"माता भ्राता भगिनी भार्या पुत्रास्तथा च मित्राणि ।
न हरन्ति रुजं मृत्युं यदि कः स्वजनान्ययोर्भेदः ? ॥१॥**

**तस्मात् स्वजनस्यार्थे यदिहाकार्यं करोषि रे मूढ ! ।
भोक्तव्यं तस्य फलं प्रेत्येकेनैव ते बाढम् ॥२॥**

**तस्मात् स्वजनस्योपरि सङ्गं परिहाय निर्वृतो भूत्वा ।
धर्मं कुरुष्व यत्नाद् यत् परलोकस्य पथ्यदनम्" ॥३॥** ॥४॥

यथा स्वकृतकर्मभ्यः स्वजनान्न मुक्तिस्तथा न द्रव्यादपीत्याह—

**वित्तेण ताणं न लभे पमत्ते इमंमि लोए अदुवा परत्था ।
दीवप्पणट्ठे व अणंतमोहे नेयाउयं दट्ठुमदट्ठुमेव ॥५॥**

**व्याख्या—वित्तेन** द्रव्येण स्वकृतकर्मणः **त्राणं** रक्षणं **न लभते प्रमत्तो** मद्यादिप्रमादवान् **अस्मिन्** प्रत्यक्ष एव **लोके** 'अदुव'त्ति **अथवा परत्र** परभवे तथेहभवे वित्तं न त्राणाय **विप्र**वत् ।

तथाहि—

एकः कश्चन भूजानिः कस्मिन्निन्द्रमहोत्सवे ।
वनाय याति शुद्धान्ते पटहं पर्यघोषयत् ॥१॥

यथा सर्वे पुरात् पौरा निर्यान्तु पुरुषा बहिः ।
निरीयुस्ते समे वेश्यागृहे पुत्रः पुरोधसः ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्थितो राज्ञोऽतिवाल्लभ्यात् कुतोऽस्ति मम भीरिति ।
कथञ्चिद् राजपुरुषैर्ज्ञात्वा सोऽग्राहि दुर्धरः ॥३॥

तेनापि नृपमान्यत्वात् तेभ्यो दत्त्वाऽपि किञ्चन ।
आत्मा न मोचितो दर्पाद् यत् किञ्चिज्झषता भृशम् ॥४॥

उपभूपं स तैर्नीतो दिष्टो वध्यो नृपेण च ।
पश्चात् पुरोहितोऽवादीदुपराजमुपस्थितः ॥५॥

ददे गृहस्य सर्वस्वं मा मारयत मत्सुतम् ।
कोपाद् भूपेन नो मुक्तः शूलारोपाच्च मारितः ॥६॥

यथा तस्येह सद्वित्तं प्राणत्राणाय नाजनि ।
तथैवान्यैरपि ज्ञेयमन्यजन्मनि किं पुनः ? ॥७॥

तन्मूर्च्छावतो दोषमाह—'दीवे'त्ति प्राकृतत्वेन दीपशब्दस्य परनिपातात् **प्रणष्टदीपः** विगतप्रकाशदीप **इव** अनन्तोऽपर्यवसितो मोहोऽज्ञानमस्येत्य**नन्तमोहो** जन्तु**र्नैयायिकं** न्यायोपपन्नं सम्यग्दर्शनादिकं मुक्तिमार्गं **दृष्ट्वाऽप्यदृष्टैव** यथा भवति तथा स्यान्मोहादि-हेतुत्वाद् वित्तादीनाम् । यदुक्तम्—

**"[१]मोहाऽऽययाणं मयकामवद्धणो जणियचित्तसंतावो ।**
**आरंभकलहहेऊ दुक्खाण परिग्गहो मूलं"** ॥१॥

अत्र दृष्टान्तेन भावार्थः कथ्यते—

नरा दीपकराः केऽपि केऽप्यात्तज्वलनेन्धनाः ।
धातुसिद्धिकृते शैले प्रविष्टा महतीं गुहाम् ॥१॥

दूरदेशं गता यावद् दृष्टसर्वगुहान्तराः ।
दीपाग्नी निर्वृतौ तावत् ततस्तमसि मोहिताः ॥२॥

इतस्ततो भ्रमन्तस्ते प्रतीकारविवर्जिताः ।
गर्तायां पतिताः क्वाऽपि सर्पदष्टा मृताः समे ॥३॥

यथा तेषां गते दीपे ज्ञाताऽप्यविदिता गुहा ।
एवं क्षयोपशमः श्रुताद् भावप्रकाशतः ॥४॥

---

१. मोहायतनं मदकामवर्धनो जनितचित्तसन्तापः ।
आरम्भ-कलहहेतुर्दुःखानां परिग्रहो मूलम् ॥१॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

ज्ञात्वाऽपि न्यायगं मार्गं वित्ताद्यासक्तमानसाः ।
अद्रष्टार इवैते स्युर्मोहाद् दुर्गतिभाजिनः ॥५॥ ॥५॥

यदि धनादिकं न त्राणाय तत् किं कार्यमित्याह—

**सुत्तेसु आवी पडिबुद्धजीवी न वीससे पंडिय आसुपन्ने ।**
**घोरा मुहुत्ता अबलं सरीरं भारंडपक्खी व चरप्पमत्तो ॥६॥**

**व्याख्या—सुप्तेष्व**विवेकिजनेषु द्रव्यतो निद्रां प्राप्तेषु भावतो धर्मं प्रत्यजाग्रत्सु '**चः** पादपूर्तौ, **अपिः** सम्भावने' ततश्च सुप्तेष्वप्यास्तां जाग्रत्सु च गतानुगतिकतया विवेकी न स्वपितीत्युपस्कारः । किन्तु प्रतिबुद्धो द्विधा प्रतिबोधवान् जीवतीत्येवंशील: **प्रतिबुद्ध-जीवी** भवेत् । धर्मिणो जागरणस्यैव बहुफलत्वेन बहुमतत्वात् ॥

तथाहि—

**वत्स**देशेऽस्ति **कौशाम्ब्यां शतानीक**सहोदरी ।
कर्मतो बालविधवा **जयन्ती** परमार्हती ॥१॥

साऽनिशं जिनमानर्चाऽऽवश्यकेषूदयच्छत ।
पात्रदानमदात् स्वैरं त्यक्त्वा शङ्कादिदूषणैः ॥२॥

अन्यदा प्रातिहार्याढ्यः सुरासुरनरार्चितः ।
त्रिलोकीपद्मिनीभानुः श्रीवीरः समवासरत् ॥३॥

प्राप्तः सनागरो राजा जयन्त्यपि नमस्यितुम् ।
नत्वाऽथ देशनां श्रुत्वा सा श्राद्धीदमपृच्छत ॥४॥

यथा तया कृतः प्रश्नः प्रत्युत्तरमदाद् यथा ।
**श्रीवीरः** पञ्चमाङ्गे तद् व्यक्तमेवास्ति तद्यथा ॥५॥

**"[1]सुत्तत्तं भंते ! साहू ? जागरियत्तं भंते ! साहू ? । जयंती ! अत्थेगइयाणं जीवाणं**

---

१. सुप्तत्वं भदन्त ! साधु जागृतत्वं भदन्त ! साधु ? । जयन्ति ! अस्त्येकेषां जीवानां सुप्तत्वं साधु, अस्त्येकेषां जीवानां जागृतत्वं साधु । तत् केनार्थेन भदन्त ! एवमुच्यते ?, अस्त्येकेषां जीवानां जागृतत्वं साधु । जयन्ति ! य इमे जीवा अधार्मिका अधर्मानुगा अधर्मेष्टा अधर्मखादिनो-ऽधर्मप्रलोकिनोऽधर्मसमुदीरका अधर्मेण चैव वृत्तिं कल्पमाना विहरन्ति । एतेषां जीवानां सुप्तत्वं साधु। एते खलु जीवाः सुप्ताः सन्तो नो बहूनां प्राणानां भूतानां जीवानां सत्त्वानां दुःखनतया शोचनतया परितापनतया वर्तन्ते । एते जीवाः सुप्ताः सन्तो आत्मानं वा परं वा तदुभयं वा नो अधार्मिकाभिः संयोजनाभिः संयोजयितारो भवन्ति, एतेषां जीवानां सुप्तत्वं साधु । जयन्ति ! य इमे धार्मिका धर्मानुगा ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सुत्ततं साहू । अत्थेगइआणं जीवाणं जागरियत्तं साहू । से केणट्ठेणं भंते ! एवं वुच्चति ? । [ अत्थेगइआणं जीवाणं सुतत्तं साहू ] अत्थेगइआणं जीवाणं जागरियत्तं साहू । जयंती ! जे इमे जीवा अहम्मिया अहम्माणुया अहम्मिट्ठा अहम्मक्खाई अहम्मपलोई अहम्मसमुदीरया अहम्मेणं चेव वित्तिं कप्पेमाणा विहरंति । एएसि णं जीवाणं सुत्तत्तं साहू । एए णं जीवा सुत्ता समाणा नो बहूणं पाणाणं भूयाणं जीवाणं सत्ताणं दुक्खणयाए सोयणयाए परियावणयाए वट्टंति । एए णं जीवा सुत्ता समाणा अप्पाणं वा परं वा तदुभयं वा नो अधम्मियाहिं संजोयणाहिं संजोएत्तारो भवन्ति । एएसि णं जीवाणं सुत्तत्तं साहू । जयंती ! जे इमे [ जीवा ] धम्मिया धम्माणुया जाव धम्मेण चेव वित्तिं कप्पेमाणा विहरंति । एएसि णं जीवाणं जागरियत्तं साहू । एए णं जीवा जागरमाणा समाणा बहुणं पाणाणं जाव सत्ताणं अदुक्खणयाए जाव अपरितावणाए वट्टंति । ते णं जीवा जागरमाणा [ समाणा ] अप्पाणं वा परं वा तदुभयं वा बहूहिं धम्मसंजोयणाहिं संजोइयत्तारो भवंति । एए णं जीवा जागरमाणा समाणा धम्मजागरियाए अप्पाणं जागरइत्तारो भवंति । एएसि णं जीवाणं जागरियत्तं साहू'' ।

अन्यत्राप्युक्तम्—

''[1]जागरिया धम्मीणं अहम्मीणं तु सुत्तया सेया ।
वच्छाहिवभगिणीए अकहिंसु जिणो जयंतीए'' ॥१॥

इति निद्रापरित्यागव्याख्यामाकर्ण्य संसदि ।
जना निद्रापरित्यागमचिकीर्षन् द्विधाऽपि हि ॥६॥

*नाऽऽलस्येन समं सौख्यं न विद्या सह निद्रया ।*
*न वैराग्यं प्रमादेन नाऽऽरम्भेण दयालुता ॥७॥*

''[2]जागरह नरा ! निच्चं जागरमाणस्स वड्ढए बुद्धि ।
जो सुयइ न सो धन्नो जो जग्गइ सो सया धन्नो'' ॥८॥

---

यावद् धर्मेणैव वृत्तिं कल्पमाना विहरन्ति, एतेषां जीवानां जागृतत्वं साधु । एते खलु जीवा जाग्रन्त सन्तो बहूनां प्राणानां यावत् सत्त्वानामदुःखनतया यावदपरितापनया वर्तन्ते । ते जीवा जाग्रन्त आत्मानं वा परं वा तदुभयं वा बहुभिर्धर्मसंयोजनाभिः संयोजयितारो भवन्ति । एते जीवा जाग्रन्तः सन्तो धर्मजागरिकयाऽऽत्मानं जाग्रयितारो भवन्ति । एतेषां जीवानां जागृतत्वं साधु ॥

१. जागृतता धर्मिणामधर्मिणां तु सुप्तता श्रेयः ।
वत्साधिपभगिनीमकथयज्जिनो जयन्तीम् ॥१॥

२. जागृत नरा नित्यं जाग्रतो वर्धते बुद्धिः ।
यः स्वपिति न स धन्यो यो जागर्ति स सदा धन्यः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"[1]सुयइ सुयतस्स सुयं संकियखलियं भवे पमत्तस्स ।
जागरमाणस्स सुयं थिरपरिचियमप्पमत्तस्स" ॥९॥

इति ज्ञात्वा सभालोकः सन्तुष्टश्चरमं जिनम् ।
नत्वा निजगृहं गत्वा बुद्धजीव्यभवत्तराम् ॥१०॥

प्रतिबुद्धजीवी सन् किं कुर्यादित्याह—**न विश्वसेत्** प्रमादेषु पण्डितो विद्वान् आशु शीघ्रमुचितकृत्येषु प्रज्ञाऽस्येत्या**शुप्रज्ञः** । यतो **घोरा** निरनुकम्पाः शश्वत् प्राणापहारित्वात् **मुहूर्त्ताः** कालविशेषा दिवसाद्युपलक्षणम् । उक्तं च—

"[2]अणुदियहं वच्चंता इमाइं मूढो जणो न लक्खेइ ।
जीवस्स जोव्वणस्स य दिवसनिसाखंडखंडाइं" ॥१॥

अबलं मृत्युदायिनो मुहूर्त्तान् प्रति बलरहितं **शरीरम्** । यतः—

"[3]सत्थ-ग्गी-जल-सावय-विसूइया-वाहि-अहि-विसाईहिं ।
जज्जरमिणं सरीरं उवक्कमेहिं बहुविहेहिं" ॥२॥

एवं तर्हि किं कृत्यमित्याह—**भारुण्डपक्षीवाप्रमत्तश्चर** विहितानुष्ठानमासेवस्व यथा ह्येतेऽन्तर्वर्तिसाधारणचरणा एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणश्च प्रमादपरा विनश्यन्ति । तथा यतिरपि प्रमाद्यन् संयमाद् भ्रश्यति ॥६॥

अमुमेवार्थं स्पष्टयन्नाह—

**चरे पयाइं परिसंकमाणो जं किंचि पासं इह मन्नमाणो ।**
**लाभंतरे जीविय वूहइत्ता पच्छा परिन्नाय मलावधंसी ॥७॥**

**व्याख्या—चरेत्** संयमाध्वनि यायात् **पदानि** मूलगुणादिधर्मस्थानानि **परिशङ्कमानो मा ममेह** प्रवर्त्तमानस्य तन्मालिन्यं स्यादित्यपायं विगणयन् । **यत् किञ्चि**दल्पमपि दुश्चिन्तितादि प्रमादपदं कर्मबन्धहेतुत्वेन **पाशमिव मन्यमानः** । यथा भारुण्डपक्षी पदानि परिशङ्कमानो यत् किञ्चिद् दवरकाद्यपि पाशं मन्यमानश्चरति तथा साधुरपीति परिशङ्कमानः किं

---

१. स्वपीति स्वपतः श्रुतं शङ्कितस्खलितं भवेत् प्रमत्तस्य ।
जाग्रतः श्रुतं स्थिरपरिचितमप्रमत्तस्य ॥

२. अनुदिवसं व्रजत इमान् मूढो जनो न लक्षयति ।
जीवस्य यौवनस्य च दिवस-निशाखण्डखण्डान् ॥१॥

३. शस्त्राग्नि-जल-श्वापद-विशूचिका-व्याध्यहि-विषादिभिः ।
जर्जरमिदं शरीरमुपक्रमैर्बहुविधैः ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कुर्यादित्याह—**लाभान्तरे** पूर्वज्ञानाद्यर्थप्राप्तिविशेषे सति **जीवितं** प्राणधारणरूपं **बृंहयित्वा**ऽपायरक्षणान्नपानादिभिर्वृद्धिं नीत्वा पश्चाल्लाभविशेषप्राप्त्यनन्तरं **परिज्ञाय** यथेदं नेदानीं जराव्याध्यादिभिस्तद्गुणार्जनक्षमम् । उक्तं हि—

**"[१]जरा जाव न पीडेइ वाही जाव न वड्ढई ।**
**जाविंदिया न हायंति ताव धम्मं समायरे" ॥१॥**

एवं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया प्रत्याख्याय भक्तं मलापध्वंसी कर्ममलविनाशी स्यादिति शेषः ।

ततो यावल्लाभं देहधारणमपि गुणायैवेति भावः । यदाह—

**"[२]सव्वत्थ संजमं संजमाओ अप्पाणमेव रक्खिज्जा ।**
**मुच्चइ अइवायाओ पुणो विसोही न याविरई" ॥१॥**

इह च **मण्डिक**चौरदृष्टान्तो यथा—

**बेन्नातटे** पुरे राज्ञि **मूलदेवे** प्रतापिनि ।
**मण्डिका**ख्यस्तन्तुवायः सर्वचौरशिरोमणिः ॥१॥

दिवा जनप्रत्ययार्थं दुष्टस्फोटोऽयमुत्थितः ।
इति प्रकाश्य सक्थ्न्येष पट्टं बध्वाऽविशत् पथि ॥२॥

लोकान् स्फोटप्रतीकारं पृच्छन्नथ सुनिःश्वसन् ।
उपजीवति शिल्पेन तन्तुवायोचितेन सः ॥३॥

व्रजन् दण्डावलम्बेन कथञ्चित् क्रमते शनैः ।
रात्रौ तु क्षात्रपातेन मुष्णाति सकलं पुरम् ॥४॥

तच्च द्रव्यं पुरासन्ने वनोद्देशे गिरेस्तटे ।
नयेद् भूमिगृहं भारवाहकेन स तस्करः ॥५॥

कन्याऽस्य भगिनी तत्र पादशौचच्छलेन तम् ।
आकृष्य पादयोर्मुग्धमन्धकूपे क्षिपेद् द्रुतम् ॥६॥

---

१. जरा यावन्न पीडयति व्याधिर्यावन्न वर्धते ।
यावदिन्द्रियाणि न हीयन्ते तावद् धर्म समाचरेत् ॥१॥

२. सर्वत्र संयमं संयमादात्मानमेव रक्षेत् ।
मुच्यतेऽतिपातात् पुनर्विशोधिर्न चाविरतिः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विपद्यते स तत्रैव ते तेनैवमनेकशः ।
पत्तनं मुष्णता व्यापादिता रात्रौ दुरात्मना ॥७॥

ग्रहीतुं शक्यते नैष दक्षैरप्यधिकारिभिः ।
सम्भूय नागरा भेजुर्नृपं प्राञ्जलयोऽवदन् ॥८॥

अद्य श्वो वा निवृतिः स्याद् विघ्नस्येति किलाशया ।
प्रभुपादा न विज्ञप्ता एतावन्तमनेहसम् ॥९॥

मुषितं पुरसर्वस्वं न किञ्चिदवशिष्यते ।
इत्युद्विग्नोऽखिलः पौरो जनोऽयं त्वामुपस्थितः ॥१०॥

राजन् ! केनाप्युपायेन निगृहाण मलिम्लुचम् ।
अथादिश जनाः सन्तु सुखिनोऽन्यपुरं गताः ॥११॥

दिनसप्तकमादाय जनादारक्षकं परम् ।
अस्थापयद् न सोऽप्यापच्चौरं यत्नशतैरपि ॥१२॥

तृतीयदिवसे **मूलदेवो** नीलपटावृतः ।
अविज्ञाताकृतिः क्वापि रात्रौ नगरमभ्रमत् ॥१३॥

श्रान्तः क्वचिद् देवकुले निषण्णश्चिन्तयाऽऽतुरः ।
तावत् स **मण्डिकश्चौरः** समागत्य बभाण तम् ॥१४॥

रे ! कोऽस्त्यत्र नृपोऽभाणीदस्मि कार्पटिको जनः ।
कुर्वे मनुष्यमुत्तिष्ठोत्तिष्ठाऽऽगच्छ मया सह ॥१५॥

उत्थाय **मूलदेवो**ऽगात् सहानेन स चैश्वरे ।
मन्दिरे क्षात्रमुत्खन्याग्रहीद् द्रव्यं ततो बहु ॥१६॥

ग्रन्थिं कृत्वा **मूलदेव**शिरस्यारोप्य तं पुरः ।
कृत्वोत्कोशकृपाणोऽसौ गतो भूमिगृहं क्रमात् ॥१७॥

द्रव्यं क्षेप्तुं भुवं चौरोऽखनद् भगनीमुवाच च ।
प्राघूर्णकस्य पाच्छौचं देहि साऽपि न्यवीविशत् ॥१८॥

कूपोपकण्ठविन्यस्ताऽऽसने दक्षं धराधवम् ।
विधाता किमियं तावत् पश्यामीति सकौतुकम् ॥१९॥

क्षिपाम्यवट इत्येनं शौचदम्भात् पदेऽग्रहीत् ।
दध्यौ वीक्ष्य पदौ बाला सुकोमलसुलक्षणौ ॥२०॥ **कुलकम्**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मद्भ्रात्रा हि पुराऽऽनीताः केऽपि कार्पटिकादयः ।
निर्नाथा इह विध्वस्ता वराकास्तेऽखिला अपि ॥२१॥
अयं तु कश्चिदम्भोधिमेखलापृथिवीपतिः ।
कथञ्चिदिह सम्प्राप्तो लक्षणैर्बुबुधे ह्ययम् ॥२२॥
मारयित्वैनमखिलकाश्यपीतलजीवनम् ।
किमात्मानं वृथा कुर्वेऽतिरौद्रनरकातिथिः ? ॥२३॥
ततस्तया पदेऽङ्गुष्ठसञ्ज्ञया ज्ञापितो नृपः ।
पलायस्व पलायस्व त्वरितं मारितोऽन्यथा ॥२४॥
दक्षस्तत् सोऽपि विज्ञाय द्रुतमाधात् पलायनम् ।
तयाऽपि तुमुलश्चक्रे हाहाऽसौ पथिकोऽनशत् ॥२५॥
असिमाकृष्य तत्पृष्ठे दस्युर्लग्नो महानिशि ।
क्रमात् सन्निहितं ज्ञात्वा राजमार्गं नृपोऽश्रयत् ॥२६॥
मृत्युञ्जयमहालिङ्गान्तरितोऽस्थाच्च चत्वरे ।
चौरोऽप्यागत्य कोपान्धः कङ्कलोहमहाऽसिना ॥२७॥
लिङ्गं क्षणाद् द्विधाकृत्य निवृत्तोऽसौ मलिम्लुचः ।
मया कार्पटिकोऽमारीत्यानन्दभरमेदुरः ॥२८॥
रात्रौ भूमिगृहे स्थित्वा प्रातर्गत्वान्तरापणे ।
चकार तन्तुवायत्वमहो ! कपटपाटवम् ॥२९॥
कृतकृत्यः सभाऽऽसीनो भटैर्भूपस्तमाह्वयत् ।
सोऽपि क्षुब्धः सभीर्दध्यौ निशि नूनं मृतो न सः ॥३०॥
नन्वासीत् स हि भूपालः किं कृत्यं मेऽथ पाप्मनः ? ।
इत्येष चिन्तयन्नेव स निन्ये तैरुपप्रभु ॥३१॥
अभ्युत्थाय नृपोऽप्येनमासने द्राग् न्यवीविशत् ।
बभाषेति प्रियालापैर्दुर्लक्ष्या हि नृपाशयाः ॥३२॥
यद्येतद् रोचते तुभ्यं मह्यं तद्देहि सोदरीम् ।
दत्ता तेन नृपोऽप्येनां महाभूत्या व्यवाहयत् ॥३३॥
मम प्राणितदा ह्येषा इति तस्यां धराधवः ।
परमप्रेमभागासीच्छिष्टानां चरितं ह्यदः ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथान्यदा समाकार्य **मण्डिकं** भूधवोऽभ्यधात् ।
आर्य ! द्रव्येण मेऽस्त्यर्थः सम्पादयत तत्ततः ॥३५॥

बहुद्रव्यमदात् सोऽपि नृपान्मर्त्तव्यमन्यथा ।
अर्थितः पुनरन्येद्युस्तत् तावत् पुनरप्यदात् ॥३६॥

भृशं सत्कार्य संमान्य सकलं द्रव्यमग्रहीत् ।
कृतेऽस्मिन् हृतसर्वस्वे राज्ञी नृपमवोचत ॥३७॥

स्वामिन्नस्याददे सर्वं द्रव्यमेषोऽथ मुच्यताम् ।
मद्भ्राता त्वत्प्रसादेन तिष्ठत्वत्र यथेप्सितम् ॥३८॥

रिक्तोऽनर्थकृदेषोऽभूदिति निश्चित्य भूपतिः ।
भ्राता न मुच्यते चौरः शालकस्य तु का कथा ? ॥३९॥

***न्यायपक्षा हि राजानः सर्वलोकहितैषिणः ।***
***सहन्ते खलु नान्यायं दाक्षिण्येनापि हि क्वचित् ॥४०॥***

इति सम्बोध्य दयितामाकार्याखिलनागरान् ।
यथाऽभिज्ञानमृक्थादि प्रादात् तेभ्योऽथ भूधवः ॥४१॥

द्रुतमारोपयामास शूलायां **मण्डिकं** ततः ।
**ध्रुवं कृतस्य पापस्य परिणामे विरूपता ॥४२॥**

राज्ञा चौरो यथाऽधारि यावल्लाभमकार्यकृत् ।
धार्यमानिर्जरालाभं तथा वर्ष्मापि साधुना ॥४३॥

इति **मण्डिक**चौरकथा ॥७॥

यदुक्तं जीवितं बृंहयित्वा मलापध्वंसी स्यादिति तत् किं स्वातन्त्र्यत एवोतान्यथेत्याह—

**छंदं निरोहेण उवेइ मोक्खं आसे जहा सिक्खियवम्मधारी ।**
**पुव्वाइं वासाइं चरप्पमत्तो तम्हा मुणी खिप्पमुवेइ मुक्खं ॥८॥**

**व्याख्या—छन्दो निरोधेन** छन्दः स्वाभिप्रायस्तन्निषेध**नोपैति मोक्षं** गुरुपारतन्त्र्ये हि कृत्येषु प्रवर्त्तमानो न कर्मबन्धभाक् स्यात् किन्तु निर्जरावानेव तस्यैव सम्यग्ज्ञानादिहेतुत्वात्। उक्तञ्च—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"[1]णाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य ।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति" ॥१॥

**अश्वो यथा शिक्षितो** वल्गनधावनादिशिक्षां ग्राहितो **वर्मधारी** कवचधारी पदद्वये कर्मधारयः । ततोऽयमर्थो यथाऽश्वः स्वातन्त्र्यविरहाच्छिक्षकतन्त्रतया प्रवर्त्तमानो रणे वैरिभिर्नोपहन्यते तन्मुक्तिं चाप्नोति स्वतन्त्रस्तु प्रागशिक्षितो रणे तैर्हन्यतेऽतो यतिना परतन्त्रेणैव भाव्यम् । अत्रार्थे दृष्टान्तः—

द्वावेकेन नृपेणाश्वावर्पितौ कुलपुत्रयोः ।
शिक्षणीयौ पोषणीयाविमौ सम्यगतिप्रियौ ॥१॥

कालोचितेन तत्राद्यो योग्यान्नेन यवादिना ।
तं पोषयन् धावनाद्याः कला आश्वीरशिक्षयत् ॥२॥

घट्टे वाहयित्वाऽस्मै परो यवतुषानदात् ।
बुभुजे तु स्वयं सारमन्यदाऽथ रणक्षणे ॥३॥

भूपेनाभिहितावेतौ समारुह्याश्वयोस्तयोः ।
आगच्छतं द्रुतं युद्धे तावप्याजग्मतुस्ततः ॥४॥

राजादेशाद्द्वयारूढाववगाढौ रणाम्बुधिम् ।
आद्यः शिक्षावशादश्वोऽभवत् सङ्ग्रामपारगः ॥५॥
अपरस्तु तथाऽभ्यासादगृह्यत युधि भ्रमन् ।
परैर्विसारथीकृत्य लेभे च विजयं न सः ॥६॥
एवं सुशिक्षितः साधुः स्वातन्त्र्यं परिवर्जयन् ।
कर्मशत्रुगणं भित्त्वा मुक्तिमाप्नोति लीलया ॥७॥

इति शिक्षाया**मश्वद्वय**कथा ॥

अयं भावो-यथाऽश्वस्तथा धर्मार्थ्यपि स्वातन्त्र्यरहितो मुक्तिमाप्नोति, अत एव **पूर्वाण्यु**क्तमानानि **वर्षाणि चर** श्रुतोक्तक्रियां सेवस्वा**प्रमत्तः** प्रमादरहितः यत**स्तस्माद**प्रमादादेव **मुनिः क्षिप्रमुपैति** गच्छति **मोक्षम्** । एतदायुषामेव चारित्रसम्भवादिह पूर्वाणीत्युक्तम् ॥८॥

नन्वयं छन्दोनिरोधोऽन्तकाल एव क्रियातामित्याशङ्क्याह—

**स पुव्वमेवं न लभेज्ज पच्छा एसोवमा सासयवाइयाणं ।**
**विसीयई सिढिले आउयंमि कालोवणीए सरीरस्स भेए ॥९॥**

---

१. ज्ञानस्य भवति भागी स्थिरतारतो दर्शने चरित्रे च ।
धन्या यावत्कथं गुरुकुलवासं न मुञ्चन्ति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—यः पूर्वमेवा**प्रमत्तो न स्यात् स एवमितीवार्थत्वात् पूर्वमिवान्त्यकालात् प्राक्काल इव छन्दोनिरोधमप्रमत्ततारूपं **न लभते** नाप्नुयात् **पश्चाद**न्त्यकालेऽपि । **एषोपमा** ज्ञानात्मिका सम्प्रधारणा यदुत पश्चाद् धर्मं करिष्याम इति **शाश्वतवादिनां** निरुपक्रमायुषां ये तथा शाश्वतमिवात्मानं मन्यन्ते तेषामियं युज्येतापि न तु क्षणनश्वरायुषाम् । तथाऽसौ पश्चादपि छन्दोनिरोधमनाप्नुवन् **विषीदति** । हा ! कथमकृतसुकृतोऽहं परत्र स्यामिति दैन्यमनुभवति । कदा ? **शिथिले** आत्मप्रदेशान् मुञ्चति **आयुषि, कालेन** मृत्यु**नोपनीते** ढौकिते क्वेत्याह—**शरीरस्य भेदे** सर्वपरिसाटतः पृथग्भावे । यदुक्तम्—

**"[१]एक्कं पि जस्स सुकयं नत्थि हु तव-नियम-संजमाईणं ।**
**को नाम दढक्कारो मरणंते तस्स मणुयस्स" ॥१॥"**

तस्मादादित एवाप्रमादवद्भिर्भाव्यं येनान्त्यसमयेऽपि न विषादः स्यादुक्तं च—

**"[२]कत्तो चिंता सुचरियतवस्स गुणसुट्ठियस्स साहुस्स ।**
**सुग्गइगमपरिहत्थो जो अच्छइ नियमभरियभरो" ॥१॥ ॥९॥**

किं पूर्वमिव पश्चादपि छन्दोनिरोधं न लभते इत्याह—

**खिप्पं न सक्केइ विवेगमेउं तम्हा समुट्ठाय पहाय कामे ।**
**समिच्च लोगं समया महेसी अप्पाणरक्खी व चरमप्पमत्तो ॥१०॥**

**व्याख्या—क्षिप्रं** तत्क्षण एव **न शक्नोति विवेकं** द्रव्यतो बहिःसङ्गत्यागरूपं भावतः कषायत्यागात्मक**मेतुं** गन्तुं न ह्यकृतपरिकर्मा प्राक् तत्परित्यागं कर्तुमलं **ब्राह्मणी**-वत् । तथाहि—

भूदेवोऽभूत् क्वचिद् ग्रामेऽभ्यस्तविद्यो धनी कनीम् ।
विप्रस्य व्यूढवान् साऽस्थात् सदाऽलङ्कारधारिणी ॥१॥
पत्योचे पर्यधाः पर्वस्वेतांस्त्वं नित्यमण्डिता ।
मा स्थाः गोप्या यथा स्युस्ते स्तेनाद् रोहावरोहतः ॥२॥
तया तद्वागवज्ञाताऽन्यदा ग्राम्यान् विलुण्टितुम् ।
प्रदुष्टा दस्यवस्तत्र पेतुरेकस्तु तस्करः ॥३॥

---

१. एकमपि यस्य सुकृतं नास्ति खलु तपो-नियम-संयमादीनाम् ।
को नाम दृढकारो मरणान्ते तस्य मनुजस्य ? ॥१॥

२. कुतश्चिन्ता सुचरिततपसो गुणसुस्थितस्य साधोः ? ।
सुगतिगमप्रतिहस्तो य आस्ते नियमभृतभरः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गतो द्विजगृहं साऽथालङ्कारानुद्यता करात् ।
अपनेतुमनभ्यासाद् वपुःपौष्ट्याच्च नाशकत् ॥४॥

एवमन्योऽपि यः पूर्वं परिकर्म करोति न ।
पश्चात् कर्तुं स शक्नोति किं विवेकचिकीरपि ? ॥६॥

यत एवं **तस्मात् समि**ति सम्यक् **उत्थाये**ति च पश्चाच्छन्दो निरोत्स्याम इत्यालस्य-त्यागेनोद्यमं कृत्वा तथा **प्रहाय** प्रकर्षेण हित्वा त्यक्त्वा **कामान्** इच्छामदनात्मकान् 'समिच्च'त्ति **समेत्य** सम्यग् ज्ञात्वा **लोकं** प्राणिवर्गं कया **समतया** समशत्रुमित्रतया । तथा च **महर्षिः** सन्नात्मानं रक्षति कुगतिगमनाद्यपायेभ्य इत्येवंशील **आत्मरक्षी** 'चरमप्पमत्तो'त्ति मोऽलाक्षणिकस्त**तश्चराप्रमत्तश्चे**ति प्राग्वत् । इह प्रमादाप्रमादयो**रैहिको**दाहरणं । तथाहि—

अत्र हि **जम्बूद्वीपे** द्वीपे क्षेत्रे च **भारते**ऽपाच्ये ।
**श्रीपुर**मस्ति श्रीमत्पुण्यजनं श्रीदपुरसदृशम् ॥१॥

तत्रास्ति **धनदत्तः** श्रेष्ठी धनदत्तदौःस्थ्यगलहस्तः ।
तस्य च जनी **धनश्री**र्धनभोगाधीनधीरनिशम् ॥२॥

सोऽन्येद्युरन्यदेशं धनार्जनार्थं यियासुरधिकसुधीः ।
शिक्षयति निजां जायां वेश्मसमारचनमाचर्यम् ॥३॥

कर्मकरा भृत्या अपि सन्तोष्या वचनभुक्तिपानाद्यैः ।
गोवृषमहिष्यजाद्याः पशवः सार्यास्तृणाद्यैश्च ॥४॥ **युग्मम्**

एवमुक्त्वा प्रतस्थे स तज्जाया तद्दिनादितः ।
स्नानाङ्गरागभूषादिस्वाङ्गशुश्रूषणाऽऽकुला ॥५॥

नियुञ्जयति नो कर्मकरांश्च स्वस्वकर्मणि ।
न तेषां भोजनं दत्ते काले ते तु गताः क्वचित् ॥६॥

विस्मार्य पतिशिक्षां सा सीदत्कार्याण्युपेक्ष्य च ।
तस्थौ निजवपुःसौख्यं कुर्वाणाऽनन्यकृत्यकृत् ॥७॥

कियत्यपि गते काले ततः स वणिगागमत् ।
शीर्णं स्वपशुभृत्यादित्यक्तं स्वगृहमैक्षत ॥८॥

कान्तां शुश्रूषितस्वाङ्गीमात्मरक्षाप्रमद्वराम् ।
दृष्ट्वा रुष्टः स निर्भर्त्स्य स्वगेहान्निरवासयत् ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततश्च **धनदत्तो**ऽन्यां कन्यां द्युम्नेन भूरिणा ।
वुवूर्षुस्तत्सगीनांश्च स्पष्टमेवमबीभणत् ॥१०॥

भो भोः ! शृणुत यद्येषा कन्या युष्माकमुच्चकैः ।
आत्मानं सर्वथा रक्षेत् तदा परिणये ह्यहम् ॥११॥

ततस्तैः प्रश्निता साऽवक् स्थास्येऽहं त्वात्मरक्षिका ।
ततस्तां स वणिग् वित्तव्ययेनैव व्यवाहयत् ॥१२॥

सज्जीकृत्य पुनः सौधं सर्वकार्याण्यकारयत् ।
भृत्यादिभिर्गवादींश्चाऽऽनयद् विभवतः स तु ॥१३॥

तया सह स भुञ्जानः सुखं सांसारिकं सदा ।
तथैव शिक्षयित्वा तां वाणिज्यार्थं गतोऽन्यदा ॥१४॥

साऽपि कर्मकरादीनां भृतिं भुक्तिं यथोचिताम् ।
ददाना मधुरैर्वाक्यैस्तानुत्साहयतेतराम् ॥१५॥

स्वगेहं च गवादींश्च सारयन्त्यप्रमादिनी ।
नाङ्गशुश्रूषिणी स्वां च रक्षन्ती तस्थुषी सदा ॥१६॥

कियद्भिर्दिवसैरागात् स वणिक् सधनो मुदा ।
स्ववेश्म परिवारं च यथामुक्तं व्यलोकयत् ॥१७॥

ततः स **धनदत्तः** श्राक् सन्तुष्टो दयितोपरि ।
तां चक्रे गृहसर्वस्वस्वामिनीं गुणभाक्तया ॥१८॥

इति तद्वणिजो जायाऽऽद्या प्रमादादसातिनी ।
जाताऽन्या सर्वसम्पत्तिभाजिनी चाप्रमादतः ॥१९॥

एवं मुमुक्षुभिमङ्क्षु मोक्षसौख्यं बुभुक्षुभिः ।
प्रमादत्यागयत्नेन यतितव्यं व्रतेऽनिशम् ॥२०॥ ॥१०॥

अथ प्रमादमूलरागद्वेषपरिहारमाह—

**मुहुं मुहुं मोहगुणे जयंतं अणेगरूवा समणं चरंतं ।**
**फासा फुसंती असमंजसं च न तेसु भिक्खू मणसा पउस्से ॥११॥**

**व्याख्या—मुहुर्मुहुर्**वारंवारं मोहयति जानानमपि जीवमाकुलयति मोहस्तस्य गुणा **मोहगुणा**स्तदुपकारिणः शब्दादयस्तान् **जयन्तम**विच्छेदतस्तज्जयप्रवृत्तम् । अनेकरूपा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अनेकमित्यनेकविधं परुषविषमस्थानादिभेदं रूपमेषामि**त्यनेकरूपाः** । **श्रमणं चरन्तं** संयमाध्वनि यान्तं स्पृशन्ति स्वानि स्वानीन्द्रियाणी गृह्यमाणतयेति **स्पर्शाः** शब्दादयस्ते **स्पृशन्ति** गृह्यमाणतयैव सम्बध्यन्ते । **असमञ्जसं** प्रतिकूलं यथा स्यात् '**चो**ऽवधारणे' स्पर्शस्यैव वा दुर्जयत्वाद् व्यापित्वाच्च तदुपादानं **न तेषु** स्पर्शेषु **भिक्षुर्मनसो**पलक्षणत्वाद् वाचा कायेन च 'पउस्से'त्ति **प्रदुष्येत्** । को भावः ? कर्कशसंस्तारकादिस्पर्शादौ हन्तोपतापिता वयमेतेनेति न चिन्तयेन्न वा वदेन्न त्यजेत् तमिति ॥११॥

तथा—

**मंदा य फासा बहुलोहणिज्जा तहप्पगारेसु मणं न कुज्जा ।**
**रक्खिज्ज कोहं विणएज्ज माणं मायं न सेवेज्ज पयहिज्ज लोहं ॥१२॥**

**व्याख्या**—मन्दयन्ति विवेकिनमपि जनमज्ञतां नयन्तीति **मन्दाः** '**चः** समुच्चये' **स्पर्शाः** प्राग्वच्छब्दादयो बहून् लोभयन्ति मोहयन्तीति **बहुलोभनीयाः** 'तहप्पगारेसु'त्ति अपेर्गम्यत्वात् **तथाप्रकारेष्व**पि मृदुस्पर्शमधुररसादिषु लोभनीयेष्वपि **मनो न कुर्याद्** न निवेशयेदेवं च पूर्ववृत्तेन द्वेषस्यानेन च रागस्य त्याग उक्तः, स कथं स्यादित्यत आह— **रक्षेत् क्रोधं, विनयेत्** स्फेटयेद् **मानं, माया** परवञ्चनात्मिकां **न सेवेत** न कुर्यात्, प्रजह्यात् **परित्यजेल्लो**भं तथा च क्रोधमानयोर्द्वेषात्मकत्वान्मायालोभयोश्च रागरूपत्वात् तन्निग्रह एव तत्परिहार इति भावः ॥१२॥

तम्हा समुट्ठायेत्यादि चरकादिष्वपि स्यादित्याह—

**जे संखया तुच्छपरप्पवाई ते पिज्जदोसाणुगया परज्झा ।**
**एए अहमुत्ति दुगंछमाणो कंखे गुणे जाव सरीरभेउ ॥१३॥ त्ति बेमि ॥**

**व्याख्या—ये** इत्यनुक्तस्वरूपाः **संस्कृता** न तात्त्विकशुद्धिमन्तः, किन्तूपचरित-वृत्तयोऽत एव **तुच्छा** निःसाराः **परप्रवादिनः** परतीर्थिका**स्ते** किमित्याह-**प्रेमद्वेषानुगता** रागद्वेषानुवर्त्तनपरास्तथाहि—सर्वथा संवादकेऽर्हद्वचने कदाग्रहान्निरन्वयोच्छेदैकान्तानित्यतादि-कल्पनं न रागद्वेषाभ्यां विनेति भावः । अत एव 'परज्झा' **परवशा** रागद्वेषग्रहग्रस्ततया तत्तन्त्रास्ततः किमित्याह-**एते**ऽधर्महेतुत्वा**दधर्म इत्युल्लेखेन जुगुप्समान** उन्मार्गप्रवृत्ता एते इति तत्स्वरूपमवधारयन् न तु निन्दन् निन्दायाश्च निषेधात् यदाह—

**"[1]संतेहि असंतेहिं य परस्स किं जंपिएहि दोसेहिं ? ।**
**अत्थो जसो न लब्भइ सो य अमित्तो कओ होइ" ॥१॥**

---

१. सद्भिरसद्भिश्च परस्य किं जल्पितैर्दोषैः ? ।
अर्थो यशो न लभ्यते स चामित्रं कृतो भवति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततश्च किं कुर्यादित्याह—**काङ्क्षेद**भिलषेद् **गुणान्** सम्यग्दर्शनज्ञानचारित्रात्मकान् जिनोक्तान् **यावच्छरीरभेदो** देहात् पृथग्भावो मरणं यावदित्यर्थः । **इति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥१३॥ ग्रन्थाग्रम् ३३८-२८॥

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां चतुर्थमसंस्कृताध्ययनं समाप्तम् ॥४॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# पञ्चममकाममरणाध्ययनम्

इह पूर्वाध्ययने मरणं यावदप्रमाद उक्तः । स च मरणविभागावगमादेव स्यात् ततो बालमरणादि हीयते पण्डितमरणाद्युपादीयते तथा चाप्रमत्तता स्यादित्यनेन सम्बन्धेनाऽऽयातमिद**मकाममरणीया**ध्ययनमारभ्यते । तत्र च सप्तदशमरणप्रकारप्रतिपादिका निर्युक्तिगाथाः—

"[१]आवीइ [२]ओहि [३]अंतिय [४]वलायमरणं [५]वेसट्टमरणं च ।
[६]अंतोसल्लं [७]तब्भव [८]बालं तह [९]पंडियं [१०]मीसं ॥१॥
[११]छउमत्थमरण [१२]केवलि [१३]वेहायस [१४]गिद्धपिट्ठमरणं च ।
[१५]मरणं भत्तपरिन्ना [१६]इंगिणी [१७]पाओवगमणं च" ॥२॥

**व्याख्या**—तत्र वीचिर्विच्छेदस्तदभावादवीचिस्तेन मरणमवीचिमरणं तत् पञ्चधा [१]द्रव्य-[२]क्षेत्र-[३]काल-[४]भव-[५]भावभेदात् । तत्र यन्नारकतिर्यग्नरामराणामुत्पत्तिसमयात् प्रभृति निजनिजायुःकर्मदलिकानामनुसमयमनुभवनाद् विचटनं तद् द्रव्यावीचिमरणं तच्च नारकादिगतिचातुर्विध्याच्चतुर्विधमेवं नरकादि चतुर्गतिविषयक्षेत्रप्राधान्यापेक्षया क्षेत्रावीचिमरणमपि चतुर्द्धैव । देवादिष्वद्धाकालस्यासम्भवाद् देवाऽऽयुष्ककालादिचतुर्भेदप्राधान्यापेक्षया कालावीचिमरणमपि चतुर्विधमेवं देवादिचतुर्विधभवापेक्षया भवाऽऽवीचिमरणं चतुर्द्धा तथा देवादीनां चतुर्विधायुःक्षयलक्षणभावप्राधान्यापेक्षया भावावीचिमरणमपि चतुर्द्धैवेति । अवधिर्मर्यादा तेन यानि नरकादिभवहेतुतयाऽऽयुकर्म दलिकान्यनुभूय म्रियते मृतो वा यदि पुनस्तान्येवानुभूय मरिष्यति तदा तद् द्रव्यावधिमरणम् । सम्भवति हि गृहितोज्झितानामपि कर्मदलिकानां ग्रहणं परिणामवैचित्र्यादेवं क्षेत्रादिषु चतुर्ष्वपि भाव्यम् । यानि नरकाद्यायुष्कतया कर्मदलिकान्यनुभूय म्रियते न पुनस्तान्यनुभूय मरिष्यति, तद् द्रव्यात्यन्तिकमरणमेवं क्षेत्रादिष्वपि वाच्यम् । तथाऽऽवीच्यवध्यात्यन्तिकमरणानि प्रत्येकं पञ्चानां द्रव्यादिभेदानां नरकादिगतिचतुर्विधत्वाद् विंशतिभेदानीति । ये संयमयोगेषु विषण्णास्तपश्चरणादिव्रतमाचरितुं मोक्तुं चाप्यक्षमा भग्नव्रतपरिणामा वलन्तः संयमान्निवर्त्तमाना म्रियन्ते तेषां वलन्मरणम् । ये इन्द्रियविषयवशगताः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्निग्धदीपशिखावलोकनाकुलितपतङ्गवन्म्रियन्ते, तेषां वशार्तमरणम्। ये लज्जयाऽनुचितानुष्ठान-संवरणाऽऽत्मिकया सातादिगौरवत्रयेण च बहुश्रुतमदेन वा दर्शनादिषु शङ्कादिविषयं स्वातिचार-मालोचनार्हाऽऽचार्यादेर्नालोचयन्ति तेषामन्तःशल्यमिवान्तःशल्यमरणं तेषां चानन्तसंसारभ्रमणमेव फलम्। यत् केषाञ्चित् सङ्ख्येयवर्षायुषां कर्मभूमिजानां, तेषां हि ततो देवेष्वेवोत्पादात्, नापि देवानां नैरयिकाणां च तेषां तिर्यङ्मनुष्येष्वेवोत्पादात्। तथा अविरतानां हिंसादिविरतिरहितानां मिथ्यादृशां सम्यग्दृशां वा मरणं बालमरणम्। तथा विरतानां सर्वसावद्यनिवृत्तानां पण्डितमरणम्। देशविरतानां स्थूलप्राणातिपातादिविरतानां बालपण्डितभावेन मिश्रमरणम्। एवं बालादिमरणत्रयं चरणद्वारेणोक्तम्। मनःपर्यायावधिश्रुतमतिज्ञानिनां छद्मस्थमरणं विशुद्धचारित्रिणामेवोत्पत्तेः प्राङ् मनःपर्यायग्रहणं। केवलिनां केवलिमरणं। छद्मस्थादिद्वयं ज्ञानद्वारेण ज्ञेयम्। वृक्षशाखादावुदूर्ध्वं बन्धनमुद्बन्धनं तस्मात्, तरु-गिरि-भृगुपातादेर्वाऽऽत्मनैवात्मजनितं मरणं 'वेहायसं'ति विहायसि भवत्वाद् वैहायसमरणम्। गृध्राणां पक्षिविशेषाणां शिवादीनां वा भक्ष्यं पृष्ठमुपलक्षणादुदरादि च मर्तुर्यस्मिन् गृध्रादिभिरात्मानं पृष्ठादौ भक्षयतीति वा गृध्रपृष्टं मरणम्। एते द्वे मरणे आत्मोपघातकत्वात् कारणे दर्शनमालिन्यपरिहारादिके **उदायि**नृपानुमृताचार्यवदनुज्ञाते न तु निष्कारणे। यत उक्तम्—

**"[1]भावियजिणवयणाणं ममत्तरहियाण णत्थि हु विसेसो ।**
**अप्पाणंमि परंमि य तो वज्जे पीडमुभओ वि" ॥१॥**

**"[2]पाओवगमं भणियं समविसमो पायवो व्व जह पडिओ ।**
**नवरं परप्पओगा कंपेज्ज जहा फलतरु व्व" ॥१॥**

---

१. भावितजिनवचनानां ममत्वरहितानां नास्ति खलु विशेषः ।
आत्मनि परस्मिंश्च ततो वर्जयेत् पीडामुभयोरपि ॥१॥

अत एव भक्तपरिज्ञाऽऽदिषु पीडापरिहाराय संलेखनाविधिरुक्तः स च श्रुतादवसेयः। भक्तं भोजनं तस्य परिज्ञा ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया चाशनादिचतुर्विधाहारस्य त्रिविधाहारस्य बाह्याभ्यन्तरोपधेश्च यावज्जीवं परित्यागात्मकं प्रत्याख्यानं स प्रतिकर्मभक्तपरिज्ञामरणम्। इङ्ग्यते चेष्ट्यते नियतप्रदेशे एवास्यामन-शनक्रियायामितीङ्गिनी तदुपलक्षितं चतुर्विधाहारान्यकृतोद्वर्त्तनादिपरिकर्मत्यागरूपमिङ्गिनीमरणम्। पादपं वृक्षमुपगच्छति सादृश्येन प्राप्नोतीति पादपोपगमनम्। यथा पादपः कथञ्चित् क्वचित् समविषमप्रदेशे पतितो निश्चलमेवाऽऽस्ते तथाऽयमपि भगवानेतदनशनकर्ता समविषमपतितमङ्गमुपाङ्गं च न चालयत्यत एव निश्चलनिष्प्रतिकर्मतया पादपोपगमनं मरणमुक्तं च—

२. पादपोपगमो भणितः सम-विषमे पादप इव यथा पतितः ।
नवरं परप्रयोगात् कम्पेत यथा फलतरुरिव ॥१॥

निश्चलनिष्प्रतिकर्मा निक्षिपति यद् यस्मिन् यथाऽङ्गम् ।
एतत् पादपोपगमनं नीहारि वाऽनीहारि ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**"निच्चलनिप्पडिकम्मो निक्खिवए जं जहिं जहा अंगं ।**
**एयं पाओवगमं नीहारिं वा अनीहारिं" ॥२॥**

तच्च वज्रर्षभनाराचसंहनननानामेव । यद्यपि त्रितयमप्येतत्—

**"[1]धीरेण वि मरियव्वं काउरिसेण वि अवस्समरियव्वं ।**
**तम्हा अवस्समरणे वरं खु धीरत्तणे मरिउं ॥१॥**

इति शुभाशयवानेव प्रतिपद्यते फलमपि च त्रयस्यापि वैमानिकता—मुक्तिलक्षणं समानम् । यदुक्तम्—

**"[2]एयं पच्चक्खाणं अणुपालेऊण सुविहिओ सम्मं ।**
**वेमाणिओ व देवो हवेज्ज अहवा वि सिज्झेज्जा" ॥१॥**

तथाऽपि विशिष्टविशिष्टतरविशिष्टतमधृतिमतामेव क्रमेण तत्प्राप्तिरिति क्रमशो जघन्यादि-विशेषोऽवसेयः । किं चार्हत्सेवितत्वात् पादपोपगमनस्योत्कृष्टत्वमितरयोश्चापरसाधुसेवित-त्वाज्जघन्यमध्यमत्वम् । उक्तं हि—

**"[3]सव्वाहिं लद्धीहिं सव्वे वि परीसहे पराजित्ता ।**
**सव्वे वि य तित्थयरा पाओवगयाओ सिद्धिगया ॥१॥**
**[4]अवसेसा अणगारा तीयपडुप्पन्नणागया सव्वे ।**
**केई पाओवगया पच्चक्खाणिंगिणीं केई" ॥२॥**

आर्यिकादीनां तु भक्तपरिज्ञैव नापरद्वयम् । तदुक्तम्—

**"[5]सव्वावि य अज्जाओ सव्वे वि य पढमसंघयणवज्जा ।**
**सव्वे वि देसविरया पच्चक्खाणेण उ मरंति" ॥१॥**

---

१. धीरेणापि मर्तव्यं कापुरुषेणप्यवश्यमर्तव्यम् ।
तस्मादवश्यमरणे वरं खलु धीरत्वेन मृतः ॥१॥

२. एतत् प्रत्याख्यानमनुपाल्य सुविहितः सम्यक् ।
वैमानिको वा देवो भवेदथवाऽपि सिध्येत् ॥१॥

३. सर्वाभिर्लब्धिभिः सर्वानपि परीषहान् पराजित्य ।
सर्वेऽपि च तीर्थकराः पादपोपगमात् सिद्धिं गताः ॥१॥

४. अवशेषा अनगारा अतीतप्रत्युत्पन्नानागताः सर्वे ।
केचित् पादपोपगताः प्रत्याख्यानेङ्गिनीं केचित् ॥२॥

५. सर्वा अपि चार्याः सर्वेऽपि च प्रथमसंहननवर्जाः ।
सर्वेऽपि देशविरताः प्रत्याख्यानेन तु म्रियन्ते ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अत्र प्रत्याख्यानशब्देन भक्तपरिज्ञैवोक्ता । इत्युक्तः समासतो मरणविभागो विस्तर-विशेषार्थस्तु **बृहट्टीकातो**ऽवसेयः ।

**"[१]एत्थं पुण अहिगारो नायव्वो होइ मणुयमरणेणं ।**
**मोत्तुं अकाममरणं सकाममरणेण मरियव्वं" ॥१॥**

अतः सूत्रं व्याख्यायते—

**अण्णवंसि महोहंसि एगे तिन्ने दुरुत्तरं ।**
**तत्थ एगे महापन्ने इमं पण्हमुदाहरे ॥१॥**

**व्याख्या**—अर्णव **इवार्णवो**ऽदृष्टपरपारतया संसार**स्तस्मिन्** । **महानोघः** प्रवाहो भवपरम्परात्मको यस्मिन् स **तत्र** । **एको** रागादिरहितो गौतमादिस्तीर्ण इव **तीर्णः**, अमुक्तोऽपि पारप्राप्त इव वर्तते 'तरइ'त्ति पाठे तु तरति पारमाप्नोति सुब्व्यत्ययाद् **दुरुत्तरे** दुःखेनोत्तरीतुं शक्ये गुरुकर्मणाम् । **तत्र गौतमादौ** तरणप्रवृत्ते **एको**ऽद्वितीयस्तीर्थ-कृन्नामकर्मोदयात् तीर्थकरः स ह्येकदैक एव भरते भवतीति भावः । महती निरावरणतया गुर्वी प्रज्ञा केवलज्ञानरूपा यस्य स **महाप्रज्ञ इमम**नन्तरं वक्ष्यमाणं **प्रश्नं** प्रष्टव्यार्थरूप-**मुदाहरे**दुदाहृतवान् ॥१॥

तदेवाह—

**संतिमे अ दुवे ठाणा अक्खाया मारणंतिया ।**
**अकाममरणं चेव सकाममरणं तहा ॥२॥**

**व्याख्या**—संतीति वचनव्यत्ययेन **स्तो** विद्येते इमे प्रत्यक्षे '**चः** पुरणे' **द्वे** द्विसंख्ये तिष्ठन्त्यनयोर्जीवा इति **स्थाने आख्याते** अर्हद्गणभृदादिभिः कथिते मारणान्तिके मरणमेवान्तो निजायुषः पर्यन्तो मरणान्तस्तस्मिन् भवे **मारणान्तिके** ते एव नामत आह—**अकाममरणं** वक्ष्यमाणस्वरूपं '**चः** समुच्चये, एवेति पूरणे' **सकाममरणं** वक्ष्यमाणं **तथा** ॥२॥

केषां पुनरिदं कियत्कालं वेत्याह—

**बालाण य अकामं तु मरणं असयं भवे ।**
**पंडियाणं सकामं तु उक्कोसेण सयं भवे ॥३॥**

---

१. अत्र पुनरधिकारो ज्ञातव्यो भवति मनुजमरणेन ।
मुक्त्वाऽकाममरणं सकाममरणेन मर्तव्यम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—बालानां** सदसद्विवेकविकलानां '**तुः**'एवार्थे **अकाममेव मरणमसकृद्** वारं वारं **स्यात्**, ते हि विषयाभिष्वङ्गतो मरणमनिच्छन्त एव म्रियन्ते । तत एव च भवं पुनः पुनर्भ्रमन्ति । **पण्डितानां** चारित्रवतां सकाममिव सकामं साभिलाषं **मरणम्**। तेषां तदसन् त्रस्तत्वेनोत्सवभूतत्वाच्च । तथा च वाचकः—

**"सञ्चिततपोधनानां नित्यं व्रतनियमसंयमरतानाम् ।**
**उत्सवभूतं मन्ये मरणमनपराधवृत्तीनाम्" ॥१॥**

न तु तत्त्वतस्तेषां सकामत्वम्, मरणाभिलाषस्यापि निषिद्धत्वात् । यत उक्तम्—

**"[1]मा मा हु विचिंतिज्जा जीवामि चिरं मरामि य लहुं ति ।**
**जइ इच्छसि तरिउं जे संसारमहोयहिमपारं" ॥१॥**

'तुः' विशेषार्थः तच्चोत्कर्षेणत्कर्षोपलक्षितं केवलिसम्बन्धीत्यर्थः । अकेवलिनो हि संयमजीवितं दीर्घमिच्छेयुरपि तत एव मुक्तिः स्यात् । केवलिनस्तु तदपि नेच्छन्त्यास्तां भवजीवितमिति तन्मरण**स्योत्कर्षेण** सकामता **सकृदे**वकवारमेव **स्याद्**, जघन्येन तु शेषचारित्रिणः सप्ताष्ट वा वारान् **भवे**दिति भावः ॥३॥

आद्यं स्थानमाह—

**तत्थिमं पढमं ठाणं महावीरेण देसियं ।**
**कामगिद्धे जहा बाले भिसं कूराइं कुव्वई ॥४॥**

**व्याख्या—तत्र** तयोः स्थानयोर्मध्ये **इदं** वक्ष्यमाणं **प्रथमं स्थानं महावीरेण देशितं** प्ररूपितम् । किं तदित्याह—कामेष्विच्छा-मदनात्मकेषु गृद्धः काङ्क्षावान् **काम-गृद्धो यथा बालो** विवेकविकलो **भृशमत्यर्थं क्रूराणि** हिंसादीनि **करोति** शक्तावशक्तावपि क्रूरत्वेन तन्दुलमत्स्यवन्मनसा तानि कृत्वा प्रस्तावादकाम एव म्रियत इति ॥४॥

इदमेव प्रपञ्चयितुमाह—

**जे गिद्धे कामभोगेसु एगे कूडाय गच्छई ।**
**न मे दिट्ठे परे लोए चक्खुदिट्ठा इमा रई ॥५॥**

**व्याख्या—यो गृद्धः कामभोगेषु** कामौ शब्दरूपाख्यौ भोगाश्च स्पर्शरसगन्धाख्यास्ते**ष्वेकः** कश्चित् क्रूरकर्मा कूटं द्रव्यतो मृगादिबन्धनं भावतो मिथ्याभाषणादि तस्मै **कूटाय गच्छत्यने**कार्थत्वात् प्रवर्त्तते । स हि मांसलोलुपतया मृगबन्धनाद्यारभते मिथ्या-

---

१. मा मा खलु विचिन्तयेः जीवामि चिरं म्रिये च लब्धिति ।
यदीच्छसि तरीतुं संसारमहोदधिमपारम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भाषणादि वाऽऽसेवते, कैश्चित् प्रेरितश्च वक्ति 'न मे' त्ति **न मया दृष्टः परो लोकश्चक्षुर्दृष्टा** प्रत्यक्षेत्यर्थः, **इयं रति**विषयभोगजनिता चित्तप्रह्लत्तिस्तस्यायमाशयः—कथं दृष्टपरित्यागाददृष्ट-परिकल्पनयाऽऽत्मानं विप्रलम्भयेयेति ॥५॥

पुनस्तदाशयमाह—

**हत्थागया इमे कामा कालिया जे अणागया ।**
**को जाणइ परे लोए अत्थि वा नत्थि वा पुणो ॥६॥**

**व्याख्या**—हस्तगता इव **हस्तगताः** स्वाधीनतया हस्तप्राप्ताः । **इमे** प्रत्यक्षोप-लभ्यमानाः **कामाः** शब्दादयः काले भवाः **कालिका** अनिश्चितकालान्तरप्राप्तयो **ये**ऽनागता भाविजन्मसम्बन्धिनः कथमनिश्चितप्राप्तयोऽमी इत्याह—**पुनः** शब्दस्येह सम्बन्धनात् **कः** पुन**र्जानाति** न कश्चिद् यथा **परलोकोऽस्ति नास्ति वा** सन्दिग्धे हि परलोके क इव हस्तगतान् कामांस्त्यक्त्वाऽनागतकामार्थं यतेतेति भावः ॥६॥

अन्यस्तु कामांस्त्यक्तुमशक्नुवन्निदमाह—

**जणेण सद्धिं हुक्खामि इइ बाले पगब्भई ।**
**कामभोगाणुराएण केसं संपडिवज्जई ॥७॥**

**व्याख्या—जनेन सार्धं** लोकेन सह भविष्यामि बहुजनो भोगी तदहमपि तद्गतिं गमिष्यामीति भावः । **इत्येवं बालोऽज्ञः प्रगल्भते** धाष्टर्यमवलम्बतेऽलीकवाचालतया स्वयं नष्टः परानपि नाशयति, न विवेचयति यथा—किमुन्मार्गप्रवृत्तेन बहुनाऽप्यविवेकिजनेन मम विवेकिनः प्रमाणीकृतेन, स्वकृतकर्मफलभुजो हि जीवाः स चैवं **कामभोगानुरागेण क्लेशमि**ह परत्र च नानाबाधारूपं **सम्प्रतिपद्यते** प्राप्नोतीत्युक्तं च—

"[१]वर विसु भुंजिओ मा विसय एक्कसि विसिणि मरंति ।
नर विसयामिसमोहिया बहुसो नरइ पडंति" ॥१॥

यथा स कामानुरागात् स्यात् तथाऽऽह—

**तओ से दंडं समारभई तसेसु थावरेसु य ।**
**अट्ठाए य अणट्ठाए भूयगामं विहिंसई ॥८॥**

**व्याख्या—ततः** कामानुरागात् **स** धाष्टर्यवान् **दण्डं** मनोदण्डादि **समारभते**

---

१. वरं विषं भुक्तं मा विषया एकस्मिन् विषेण म्रियन्ते ।
नरा विषयामिषमोहिता बहुशो नरके पतन्ति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रवर्त्तयति। **त्रसेषु** द्वीन्द्रियादिषु **स्थावरेषु च** पृथिव्यादिषु । **अर्थाय** वित्तावाप्त्यादि-प्रयोजनाय **च**शब्दाद् **अनर्थाय** यन्नात्मनः सुहृदादेर्वोपयुज्यते । एवमपि कश्चिद् दण्डं समारभते **पशुपाल**वत् । तथाहि—

कोऽप्यजापालको ग्रामे मध्याह्ने प्रत्यहं बहिः ।
अधोन्यग्रोधमुत्तानः प्रसुप्तश्चारयन्नजाः ॥१॥

लघुना धनुषा क्षिप्त्वा कर्करान् छिद्रयन्नसौ ।
वटपत्राणि सच्छिद्राखिलपत्रं चकार तम् ॥२॥

इतश्च—

दायादैर्भ्रंशितो राज्यात् कोऽपि राजसुतस्तदा ।
गच्छंस्तेन पथाऽपश्यत् सच्छिद्रवटमद्भुतम् ॥३॥

**पशुपालं** ततोऽपृच्छद् दक्षः कोऽमुमरन्ध्रयत् ।
सोऽभ्यधात् क्रीडयाऽकार्षमहमेतत् सुदुष्करम् ॥४॥

अस्मै राजसुतो दत्त्वा बहुद्रव्यं प्रलोभ्य तम् ।
अवादीद् यदहं वक्ता तत् करिष्यासि चेच्छृणु ॥५॥

किलैकोऽस्ति विपक्षो मे तस्योत्पाटय लोचने ।
सोऽवग् नय तदभ्यासं नीतस्तेनैष पत्तनम् ॥६॥

तस्यैव राजपुत्रस्य भ्राता तत्रास्ति भूपतिः ।
स गच्छति पथा येनोपतच्छन्नः स रक्षितः ॥७॥

तेनापि गच्छतस्तस्य गोलाभ्यां लघु चक्षुषी ।
अपात्येतामलक्ष्येण किमकृत्यं दुरात्मनाम् ? ॥८॥

राजपुत्रोऽभवद् राजा स तत्र तमथाभ्यधात् ।
ब्रूहि ते किं प्रयच्छामि तमेव ग्राममार्थयत् ॥९॥

दत्तवांस्तं नृपोऽप्यस्मै तत्र गत्वा तदन्तिके ।
कर्षुकैरुचितक्षेत्रे इक्षुवाटमकारयत् ॥१०॥

तद्वृतौ तुम्बकलता नियोगिभिरवापयत् ।
निष्पत्तौ तौम्बकं शाकं गुडयुक्तमपाचयत् ॥११॥

बुभुजेऽथ स तं शाकं रसगृद्धो निरन्तरम् ।
भोजं भोजं विचाले हि श्लोकमेनं पपाठ च ॥१२॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

"अट्टमट्टं[१] पि सिक्खिज्जा सिक्खियं न निरत्थयं ।
अट्टमट्टप्पसाएण खज्जए गुडतुंबयं" ॥१३॥

आसीद् वटदलच्छेदे तस्य दण्डो ह्यनर्थकः ।
सार्थकश्चाक्षिपातेऽभूदेवं दण्डो द्विधा भवेत् ॥१४॥

एवमनर्थदण्डं चारभमाणः स किं कुरुते इत्याह—**भूताः** प्राणिन**स्तेषां ग्रामः** समूहस्तं **विविधैः प्रकारैर्हिनस्ति** व्यापादयति ॥८॥

स किं पुनरन्यदपि करोतीत्याह—

**हिंसे बाले मुसावाई माइल्ले पिसुणे सढे ।**
**भुंजमाणे सुरं मंसं सेअमेयं ति मन्नई ॥९॥**

**व्याख्या—हिंस्रो** हिंसनशीलोऽत एव **बालो**ऽज्ञो **मृषावादी** अलीकभाषकः 'माइल्ले'त्ति **मायी** परवञ्चकः **पिशुनः** परदोषोद्घाटकः **शठो** नेपथ्यादिकरणतोऽन्यथाभूतं स्वमन्यथा दर्शयति **मण्डिक**चौरवत् । अत एव न **भुञ्जानः सुरां** मांसं **श्रेयः** प्रशस्य**मेतदिति** मन्यते उपलक्षणाद् भाषते च—"**न मांसभक्षणे दोषो न मद्ये न च मैथुने**" इत्याद्यनेन मनोवाक्कायैरसत्यतोक्तेति ॥९॥

पुनस्तदेवाह—

**कायसा वयसा मत्ते वित्ते गिद्धे य इत्थिसु ।**
**दुहओ मलं संचिणई सिसुनागो व्व मट्टियं ॥१०॥**

**व्याख्या**—'कायस'त्ति सूत्रत्वात् **कायेन वचसो**पलक्षणान्**मनसा च मत्तो** दर्पिष्ठस्तत्र कायमत्तो मदान्धगजवद् बलवत्तया यतस्ततः प्रवृत्तिमान्, वचसा स्वगुणान् ख्यापयन्, मनसा चाहो ! अहमवधारणाशक्तिमानिति मदाध्मातचेतः । **वित्ते** द्रव्ये गृद्धो लुब्ध इत्यदत्तादानपरिग्रहोपलक्षणं तद्भावभावित्वात् तयोश्च पुनः स्त्रीषु **गृद्ध** इत्यनेन मैथुनासेवित्वमुक्तम् । तदभिरतिमांश्च मैथुनासेव्येव स्यात् । स किं करोतीत्याह—'दुहओ'त्ति **द्विधा** द्वाभ्यां रागद्वेषरूपाभ्यां बहिरन्तःप्रवृत्त्यात्मकाभ्यां वा प्रकाराभ्यां **मलमष्ट**प्रकारं कर्म **सञ्चिनोति** बध्नाति कः कामिवेत्याह—**शिशुनाग** इवालसजीव इव **मृत्तिकां** स हि स्निग्धाङ्गत्वेन बही रजोभिरवगुण्ड्यते । तदेव चाश्नात्येवं बहिरन्तश्च द्विधाप्युपचितमलो रविकरस्पर्शाच्छुष्यन्निहैव विनश्यति । तथायमप्युपचितमलो दुष्कर्मवशादिहैव विनाशं यातीति भावः ॥१०॥

---

१. अट्टमट्टमपि शिक्षेत शिक्षितं न निरर्थकम् ।
अट्टमट्टप्रसादेन खाद्यते गुडतुम्बकम् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अमुमेवार्थं व्यक्तुमाह—

**तओ पुट्ठो आयंकेणं गिलाणो परितप्पई ।**
**पभीओ परलोगस्स कम्माणुप्पेही अप्पणो ॥११॥**

**व्याख्या—ततो** दण्डारम्भाद्युपार्जितमलतः **स्पृष्ट आतङ्के**नाशुघातिशूलादिरोगेण **ग्लानो** मन्दः **परितप्यते** बहिरन्तश्च खिद्यते । **प्रभीतः** प्रकर्षेण त्रस्तः कुतः 'परलोगस्स'त्ति **परलोकात्** 'सुब्व्यत्ययात् पञ्चम्यर्थे षष्ठी' यत इति गम्यम् । कर्म हिंसाऽलीक-भाषणादिक्रियामनुप्रेक्ष्यत इत्येवंशीलः **कर्मानुप्रेक्षी** क**स्यात्मनः** । को भावः ? स हि न किञ्चिन्मया शुभमाचरितं किन्त्वजरामरवच्चेष्टितमिति चिन्तयन्नित्यातङ्काच्चेतसि खिद्यते । भवति हि विषयव्याप्तचेतसोऽपि प्रायः प्राणात्ययेऽनुतापस्तथोक्तम्—

**"भवित्रीं भूतानां परिणतिमनालोच्य नियतां**
**पुरा यद् यत् किञ्चिद् विहितमशुभं यौवनमदात् ।**
**पुनः प्रत्यासन्ने महति परलोकैकगमने**
**तदेवैकं पुंसां व्यथयति जराजीर्णवपुषाम्"** ॥१॥ ॥११॥

एतदेव स्पष्टयन्नाह—

**सुया मे नरए ठाणा असीलाणं च जा गई ।**
**बालाणं कूरकम्माणं पगाढा जत्थ वेयणा ॥१२॥**

**व्याख्या—श्रुतानि** 'मे' **मया नरके स्थानानि** कुम्भी-वैतरिण्यसिपत्रवनादीनि **अशीलानाम**सदाचाराणां च **या गतिर्न**रकात्मिका साऽपि श्रुतेति योगः । तथा **बालानाम**ज्ञानां **क्रूरकर्मणां** हिंस्रमृषाभाषकादीनां प्रगाढाऽत्युत्कटतया प्रकर्षवत्यो **यत्र** यस्यां गतौ **वेदनाः** शीतोष्णादयो वर्त्तन्ते सैवेदृशी गतिर्ममाप्येवंविधानुष्ठानकर्त्तुरिति भावः ॥१२॥

तथा—

**तत्थोववाइयं ठाणं जहा मे तमणुस्सुयं ।**
**अहाकम्मेहिं गच्छंतो सो पच्छा परितप्पई ॥१३॥**

**व्याख्या—तत्र** नरकेष्वुपपाते भव**मौपपातिकं स्थानं** स्थितिर्यथा स्याद् इति शेषः । 'मे' **मया तदित्य**नन्तरोक्त**मनुश्रुतम**वधारितं गुरुभ्य इति शेषः, औपपातिकमित्यनेनास्यायं भावो यदि गर्भजत्वं स्यात्, स्यादपि तदवस्थायां छेधभेदादिनारकदुःखान्तरमौपपातिकत्वे त्वन्तर्मुहूर्त्तानन्तरमेव तथाविधवेदनोदय इति कुतस्तदन्तरसम्भवः । तथा **यथाकर्मभिर्ग**मिष्य-माणगत्यनुरूपैस्तीव्रतीव्रतराद्यनुभावोपेतैः कर्मभिस्तदनुरूपमेव स्थानं **गच्छन्** सन् **स** बालः

**पश्चादि**त्यायुषि हीयमाने **परितप्यते**। यथा धिग् मामसदनुष्ठायिनं किमिदानीं मन्दभाग्यः करोमीति शोचते ॥१३॥

तमेवार्थं दृष्टान्तेनाह—

**जहा सागडिओ जाणं समं हिच्चा महापहं ।**
**विसमं मग्गमोइन्नो अक्खे भग्गंमि सोयई ॥१४॥**

**व्याख्या—यथा शाकटिको** गन्त्रीवाहकः 'जाणं'ति **जानन्न**वबुध्यमानः **सममु**पलादिरहितं **हित्वा** त्यक्त्वा **महापथं विषममुप**लादिव्याप्तं **मार्गं** 'ओइन्नो'त्ति **अवतीर्णो** गन्तुं प्रवृत्तोऽ**क्षे** धुरि **भग्ने शोचते** धिग् मम ज्ञानं यज्जानन्नपीत्थमपायमाप्तवानिति ॥१४॥

उपनयमाह—

**एवं धम्मं विउक्कम्म अहम्मं पडिवज्जिया ।**
**बाले मच्चुमुहं पत्ते अक्खे भग्गे व सोयई ॥१५॥**

**व्याख्या—एवमि**ति शाकटिकवद् **धर्मं** क्षान्त्यादिरूपं 'विउक्कम्म'त्ति **व्युत्क्रम्यो**-ल्लङ्घ्या**धर्मं** हिंसादिकं **प्रतिपद्या**ङ्गीकृत्य **बालो**ऽज्ञो **मृत्युमुखप्राप्तो**ऽ**क्षे भग्न इव शोचते**। हा ! किमेतन्मयाऽनुष्ठितमिति ॥१५॥

ततः किमसौ करोतीत्याह—

**तओ से मरणंतंमि बाले संतसई भया ।**
**अकाममरणं मरई धुत्ते वा कलिणा जिए ॥१६॥**

**व्याख्या—ततः** शोचनान्तरं 'से'त्ति **स मरणान्ते** उपस्थिते इति योज्यं रागाद्या-कुलितचित्तः **सन्त्रस्यति** बिभेति कुतो **भयान्न**रकादिगतिगमनरूपात् । स चैवं किं स्यादित्याह—अकाममनिच्छतो **मरणम**काममरणं तेन 'अत्रार्षत्वाद् द्वितीया' म्रियते क इव **धूर्त्त इव** द्यूतकार इव । वा इवार्थे **कलिनैकेन** प्रक्रमात् तद्दायेन **जितो** यथा ह्ययमेकेन दायेन जितस्सन्नात्मानं शोचयति । तथाऽयमपि विपाककटुभिर्मनुजभोगैर्दिव्यसुखं हारितः शोचंश्च म्रियते ॥१६॥

निगमयितुमाह—

**एयं अकाममरणं बालाणं तु पवेइयं ।**
**इत्तो सकाममरणं पंडियाणं सुणेहि मे ॥१७॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—एतदनन्तरोक्त**मकाममरणं बालानामेव** तुरेवार्थे प्रवेदितं **प्रतिपादित**-**म**र्हद्‌गणधारिदिभिरिति गम्यम्। 'इत्तो'त्ति **इतो**ऽनन्तरं **सकाममरणं पण्डितानां शृणुता**ऽऽकर्णयत 'मे' **मम** कथयत इत्युपस्कारः ॥१७॥

तदेवाह—

**मरणं पि सपुण्णाणं जहा मे तमणुस्सुयं ।**
**विप्पसन्नमणाघायं संजयाणं वुसीमओ ॥१८॥**

**व्याख्या**—मरणमप्यास्तां जीवितमित्य**पे**रर्थः **सपुण्यानां** पुण्यवतां किं सर्वं नेत्याह—**यथा** येन प्रकारेण सकामत्वलक्षणेन 'मे' **मम** कथयत इति गम्यम् । **तदि**ति प्राक् सूत्रोपात्त**मनुश्रुतम**वधारितं भवद्भिरिति शेषः । इतो सकाममरणमित्युपक्षेपस्तत्र मत्सकाशाद् यन्मरणं भवद्भिः श्रुतं तत् सपुण्यानामेव भवतीत्यर्थः । एतदेव विशिष्यते 'विप्पसन्नं' इत्यादि विविधैर्भावनादिप्रकारैः प्रसन्ना मरणेऽप्यनाकुलचित्ता विप्रसन्नास्तत्सम्बन्धिमरणमप्युपचाराद् **विप्रसन्नम्** । न विद्यते आघातो यतनयाऽन्येषामात्मनश्च विधिवत् संलिखिताङ्गतया यस्मिंस्तद**नाघातम्** । केषां **संयतानां** चारित्रिणां 'वुसीमओ'त्ति आर्षत्वाद् वश्यान्यायत्तान्यात्मेन्द्रियाणि येषां ते **वश्यवन्त**स्तेषां एतादृशं च मरणमर्थात् पण्डितमरणमेव । यथा चैतत् **संयतानां** वश्यवतामेव **विप्रसन्नमनाघातं** च सम्भवति । तथा नापुण्यात्मनाम् । "[1]**अंते समाहिमरणं अभव्वज्जीवा न पावंति**" त्ति वचनात् ॥१८॥

तदेवाह—

**न इमं सव्वेसु भिक्खूसु न इमं सव्वेसु गारिसु ।**
**नानासीला अगारत्था विसमसीला हि भिक्खुणो ॥१९॥**

**व्याख्या**—**नेदं** पण्डितमरणं **सर्वेषु भिक्षुषु** परदत्तोपजीविषु व्रतिषु । **नेदं सर्वेष्वगारिषु** गृहिषु चारित्रिणामेवैतत्सम्भवात् । तथात्वे च तेषामपि तत्त्वतो यतित्वात् । एतच्चोपपत्तित आह—**नानाशीला** अनेकविधव्रता **अगारस्था** गृहस्थास्तेषां नैकरूपं शीलं देशविरतिरूपस्य तस्यानेकविधत्वात् । **विषमशीलाश्च** विसदृशशीला **भिक्षवः** । न हि ते सर्वेऽप्यनिदानिनोऽविकलचारित्रिणो वा म्रियन्ते जिनमतप्रतिपन्ना अपि, दूरे तीर्थान्तरीयास्तेषु गृहिणस्तावन्नानाशीला एव । यतः केचिद् गृहाश्रमप्रतिपालनमेव महाव्रतमन्ये तु सप्तशिक्षापदशतानि गृहिणां व्रतमित्याद्यनेकधा ब्रुवते । अतो गृहस्था नानाशीलाः तथा भिक्षवोऽपि विषमशीला एव यतस्तेषु केचन पञ्चयमात्मकं व्रतमपरे कन्दमूलाशिता

---

१. अन्ते समाधिमरणमभव्यजीवा न प्राप्नुवन्ति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्रतमन्ये त्वात्मज्ञानमेव भिक्षूणां व्रतं मन्वत इत्येषां विषमशीलताऽतोऽविकलचारित्राभावान्न सर्वेषां पण्डितमरणमिति ॥१९॥

तामेवाह—

**संति एगेहि भिक्खूहिं गारत्था संजमुत्तरा ।**
**गारत्थेहि य सव्वेहिं साहवो संजमुत्तरा ॥२०॥**

**व्याख्या—सन्ति** विद्यन्ते **एकेभ्यः** कुप्रवचनिभ्यो **भिक्षुभ्यो** 'गारत्थ'त्ति सूत्रत्वाद**गारस्था** गृहस्थाः संयमेन देशविरतिरूपेणोत्तराः प्रधानाः **संयमोत्तराः** कुप्रवचनभिक्षवो हि जीवास्तिक्यादपि बहिर्भूताः, अचारित्रिणश्चेति कथं तेभ्यः सम्यग्दृशो देशचारित्रिणो गृहिणो न संयमोत्तराः ? । **अगारस्थेभ्यश्च सर्वेभ्यो**ऽनुमतिवर्जोत्तमदेशविरतेभ्योऽपि सर्वविरताः **साधवः संयमोत्तराः** । अत्र **श्राद्धवृत्तान्तः**—

श्रद्धावान् श्राद्ध एकोऽभूत् सन्निवेशे क्वचित् पुरा ।
स साधुमन्यदाऽपृच्छत् साधुसुश्रावकान्तरम् ॥१॥

मुनिर्बभाण भो भद्र ! मेरुसर्षपयोर्यथा ।
अन्तरं स ततोऽप्राक्षीदाकुलः श्रावकः पुनः ॥२॥

मिथ्यादृग्लिङ्गिनां तावदास्तिकानां किमन्तरम् ? ।
यावत् सिद्धार्थमेर्वोस्तदित्यमुं मुनिरब्रवीत् ॥३॥

ततः समाहितमनाः श्राद्धधर्मं यथोचितम् ।
अपालयत् तदाधिक्यं विदन् कौलिङ्गमार्गतः ॥४॥

यदुक्तम्—

**"देसिक्कदेसविरया[1] समणाणं सावया सुविहियाणं ।**
**जेसिं परपासंडा सइमं पि कलं न अग्घंति" ॥१॥**

तदनेन तेषां चारित्राभावात् पण्डितमरणाभाव एव ॥२०॥

ननु लिङ्गधारिभ्यः कथमगारस्थाः संयमोत्तरा इत्याह—

**चीराजिणं णिगिणिणं जडी संघाडि मुंडिणं ।**
**एयाण वि न तायंति दुस्सीलं परियागयं ॥२१॥**

---

१. देशैकदेशविरताः श्रमणानां श्रावकाः सुविहितानाम् ।
येषां परपाखण्डाः शतीमपि कलां नार्हन्ति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—**चीराणि** वस्त्राण्य**जिनं** मृगादिचर्माणि 'णिगिणिणं'ति नाग्न्यं 'जडि'त्ति भावप्रधानत्वाज्**जटित्वं सङ्घाटी** वस्त्रसंहतिरूपा **मुण्डित्वं** निःशिखत्वम् । **एतान्यपि** निजनिजप्रक्रियाविरचितवेषरूपाणि लिङ्गान्यपि किं पुनर्गार्हस्थ्यमित्यपेरर्थः । किमित्याह—**नैव त्रायन्ते** भवाद् दुष्कृतकर्मणो वेति गम्यम् । कं ? **दुःशीलं** दुराचारं 'परियागयं'ति **पर्यायागतं** प्रव्रज्यापर्यायप्राप्तमार्षत्वाद् एकयकारलोपः । न ह्यन्तःकषायवतो बहिर्बकवृत्तिरतिकष्टहेतुरपि नरकादिगतिनिवारणायालम् । ततो लिङ्गधारणादिकं भिक्षूणां न गृहस्थेभ्यो वैशिष्ट्यहेतुः ॥२१॥

गृहाद्यभावेऽप्येषां कथं दुर्गतिरित्याह—

**पिंडोलए व दुस्सीलो नरगाओ न मुच्चई ।**
**भिक्खाए वा गिहत्थे वा सुव्वए कम्मई दिवं ॥२२॥**

**व्याख्या**—पिण्डमवलगति सेवते इति **पिण्डावलग**स्तादृशोऽपि **वा**शब्दस्याप्यर्थत्वात् । स्वकीयाहाराभावाद् भिक्षासेव्यप्यास्तां गृहस्थो दुःशीलो नरकात् स्वकर्मोपार्जितान्न मुच्यते **द्रमक**वत् । तथाहि—

**"वैभाराद्रितटे गतो द्रमकको भिक्षार्थमुद्यानिका-**
**भुक्तिव्यग्रजने चिरात् कणमपि प्रापैष नातः क्रुधा ।**
**तद्घाताय शिलां मुमोच महतीं मौढ्यात् तयैवाप्तवान्,**
**मृत्युं श्वभ्रमपि स्वदुष्प्रणिधितो बाह्यं प्रमाणं न तत्"** ॥१॥

तर्हि तत्त्वतः किं सुगतिहेतुरित्याह—'भिक्खाए व'त्ति भिक्षामत्तीति **भिक्षादो** यति**र्गृहस्थो** वा शोभनं निरतिचारं व्रतमस्येति **सुव्रतः क्रामति** गच्छति दिवं स्वर्गं व्रतस्य मुख्यतो मुक्तिहेतुत्वेऽपि जघन्यतः स्वःप्राप्तिहेतुता । उक्तञ्च—

**"[1]अविराहियसामन्नस्स साहुणो सावगस्स य जहन्नो ।**
**सोहम्मे उववाओ भणिओ तेलुक्कदंसीहिं"** ॥१॥

अतो व्रतमेव सुगतिहेतुरिति ॥२२॥

व्रतयोगान् वक्तुमाह—

**अगारिसामाइयंगाइं सड्ढी काएण फासई ।**
**पोसहं दुहओ पक्खं एगराईं न हावए ॥२३॥**

---

१. अविराधितश्रामण्यस्य साधोः श्रावकस्य च जघन्यः ।
सौधर्मे उपपातो भणितस्त्रैलोक्यदर्शिभिः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—अगारिणो** गृहिण: **सामायिकस्य** सम्यक्त्वश्रुतदेशविरतिरूपस्**याङ्गानि** नि:शङ्कितादीनि 'सड्ढि'त्ति **श्रद्धावान् कायेनो**पलक्षणान्मनोवाग्भ्यां **स्पृशति** सेवते पोषणं पोषोऽर्थाद् धर्मस्य तं धत्त इति **पोषधमा**हारपौषधादि तं 'दुहओ पक्खं' ति **द्वयो**रपि सितेतर**पक्षयो**श्चतुर्दश्यादितिथिषु । **एकरात्रमु**पलक्षणदेकदिनमपि 'न हावए'त्ति **न हापयति** न हानिं प्रापयति । रात्रिग्रहणं दिवा व्यग्रतया कर्त्तुमशक्नुवन् रात्रावपि पौषधं कुर्यादिति ज्ञापनार्थं, पौषधस्य सामायिकाङ्गत्वेऽपि पृथग् ग्रहणमत्यादरख्यापनार्थम् ॥२३॥

उपसंहरन्नाह—

**एवं सिक्खासमावन्ने गिहवासे वि सुव्वए ।**
**मुच्चई च्छविपव्वाओ गच्छे जक्खसलोगयं ॥२४॥**

**व्याख्या—एवमुक्त**प्रकारेण शिक्षया व्रतासेवनाऽऽत्मिकया समापन्न: **शिक्षा-समापन्नो गृहवासे**ऽप्यास्तां व्रतपर्याये इत्यपरेर्थ: । **सुव्रत:** शोभनव्रतो **मुच्यते** कुतश्छविस्त्वक् पर्वाणि च कूर्परादीनि छविपर्व तद्योगादौदारिकवपुरपि **च्छविपर्व तस्मात्** ततश्च गच्छेत् समानो लोकोऽस्येति सलोकस्तस्य भावस्तत्ता यक्षैर्देवै: सलोकता **यक्षसलोकता तामर्थाद्** देवगतिं यायात् ॥२४॥

पण्डितमरणफलमाह—

**अह जे संवुडे भिक्खू दोण्हमण्णयरे सिया ।**
**सव्वदुक्खप्पहीणे वा देवे वा वि महिड्ढिए ॥२५॥**

**व्याख्या—अथ** 'जे' इत्ति **य** इत्यनिर्दिष्ट: **संवृत:** पिहिताश्रवद्वारो **भिक्षु**-र्भावयतिर्**द्वयोरन्यतर** एकतर: **स्याद्** ययोरन्तर: स्यात् तावाह—सर्वाणि दु:खानि क्षुत्पिपासानिष्टयोगेष्टवियोगादीनि तै: प्रकर्षेण पुनरनुत्पत्तिरूपेण हीनो रहित: **सर्वदु:ख-प्रहीण:** स सिद्ध एव स्यात् स च **देवो वा** स्यान्**महर्द्धिक:** । '**अपि:** सम्भावने' सम्भवति हि संहननादिवैकल्यतो मुक्त्यनवाप्तौ देवोऽपि स्यादिति ॥२५॥

देवानामावासान् स्वरूपं चाह—

**उत्तराइं विमोहाइं जुईमंताणुपुव्वसो ।**
**समाइन्नाइं जक्खेहिं आवासाइं जसंसिणो ॥२६॥**

**दीहाउया इड्ढिमंता समिद्धा कामरूविणो ।**
**अहुणोववन्नसंकासा भुज्जो अच्चिमालिप्पभा ॥२७॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अनयोर्व्याख्या—उत्तरा** उपरिवर्त्तिनोऽनुत्तरविमानाख्या विमोहा इव **विमोहा** अल्पवेदादिमोहनीयोदयात्। **द्युतिमन्तो** दीप्तिमन्तः तथाविधदेवाश्रयत्वादावासा अप्येवमुच्यन्ते। 'अणुपुव्वसो'त्ति **अनुपूर्वतः** क्रमेण सौधर्माद्यनुत्तरविमानान्तेषु पूर्वपूर्वापेक्षया प्रकर्षेण विमोहादिविशेषणविशिष्टाः **समाकीर्णा** व्याप्ता **यक्षैर्देवैरावासाः** । प्राकृतत्वान्नपुंसकत्वं । देवास्तु तत्र **यशस्विनो** दीर्घं सागरोपमानतया आयुरेषामिति **दीर्घायुषः** । **ऋद्धिमन्तो** रत्नादिसम्पदुपेताः **समिद्धा** अतिदीप्ताः **कामरूपिणो**ऽभिलाषानुरूपकारिणः । अनुत्तरेष्वपि विकरणशक्तेः सत्त्वात्। **अधुनोपपन्नसंकाशाः** प्रथमोत्पन्नदेवसदृशाः। अनुत्तरेषु हि वर्णद्युत्यादि यावदायुस्तुल्यमेव भवति। **भूयः** प्राचुर्येणा**र्चिर्मालिः** सूर्यस्तद्वत् **प्रभा** येषां ते तथा प्रभूतादित्यदीप्तय इति गाथाद्वयार्थः ॥२६-२७॥

उपसंहर्तुमाह—

**ताणि ठाणाणि गच्छंति सिक्खित्ता संयमं तवं ।**
**भिक्खाए वा गिहत्थे वा जे संतिपरिनिव्वुडा ॥२८॥**

**व्याख्या—तान्युक्त**स्वरूपाणि **स्थानान्यावासात्मकानि गच्छन्त्यु**पलक्षणाद् गता गमिष्यन्ति चोपलक्षणात् सौधर्मादिष्वपि तत्रापि तेषां केषाञ्चिद् गमनसम्भवात् **शिक्षित्वा**ऽभ्यस्य **संयमं** सप्तदशभेदं **तपो** द्वादशविधं **भिक्षादा वा गृहस्था वा** भावतो यतय इति **ये** शान्त्योपशमेन परिनिर्वृताः **शान्तिपरिनिर्वृता** विध्यातकषायानला इत्यर्थः ॥२८॥

मरणेऽपि यथाभूता महात्मानः स्युस्तथा चाह—

**तेसिं सुच्चा सपुज्जाणं संजयाणं वुसीमओ ।**
**न संतसंति मरणंते सीलमंता बहुस्सुया ॥२९॥**

**व्याख्या—तेषामुक्त**स्वरूपाणां यतीनां **श्रुत्वो**क्तस्थानावाप्तिमिति शेषः । **सत्पूज्यानां** सतां पूजाऽर्हाणां **संयतानां वश्यवतां** प्राग्वत् **न सन्त्रस्यन्ति** नोद्विजन्ते क्व ? **मरणान्ते शीलवन्त**श्चारित्रिणो **बहुश्रुता** आगमवेदिनोऽयं भावो य एवाधार्मिकास्त एव मरणादुद्विजन्ते । यथा क्वास्माभिर्मृत्वा गन्तव्यम् ? समुपार्जितधर्माणस्तु नोद्विजन्ते ।

उक्तञ्च—

**"[१]सुगहियतवपत्थयणा विसुद्धसम्मत्तनाणचारित्ता ।**
**मरणं ऊसवभूयं मन्नंति समाहियप्पाणो" ॥१॥**

---

१. सुगृहीततपःपथ्यदना विशुद्धसम्यक्त्व-ज्ञान-चारित्राः ।
मरणमुत्सवभूतं मन्यन्ते समाहितात्मानः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उपदेशमाह—

**तुलिया विसेसमादाय दयाधम्मस्स खंतिए ।**
**विप्पसीइज्ज मेहावी तहाभूएण अप्पणा ॥३०॥**

**व्याख्या—तोलयित्वा** परीक्ष्य बालपण्डितमरणे ततो **विशेषं** बालमरणात् पण्डितमरणस्य वैशिष्ट्यलक्ष**णादाय** गृहीत्वा तथा **दयाधर्मस्य** च यतिधर्मस्य चशब्दोऽत्र गम्यः, विशेषं शेषधर्मातिशायित्वलक्षणमादायेति सम्बन्धः । कया **क्षान्त्या** कृत्वा **विप्रसीदेद्** विशेषेण प्रसन्नो भवेन्न तु कृतद्वादशवर्षसंलेखनतथाविधतपस्विवन्निजाङ्गुलिभङ्गादिना कषायितामवलम्बेत । **मेधावी** मर्यादावर्ती **तथाभूतेन** यथैव मरणकालात् प्रागनाकुलचित्तोऽभून्मरणकालेऽपि तथाऽवस्थिते**नात्मनो**पलक्षित इति ॥३०॥

विप्रसन्नश्च यत् कुर्यात् तदाह—

**तओ काले अभिप्पेए सड्ढी तालीसमंतिए ।**
**विणएज्ज लोमहरिसं भेअं देहस्स कंखए ॥३१॥**

**व्याख्या—ततः** कषायोपशमानन्तरं **काले** मरणरूपे**ऽभिप्रेते** कदा च मरणमभिप्रेतं 'यदा योगा नोत्सर्पन्ति' 'सड्ढि'त्ति **श्रद्धावांस्तादृशं** भयोत्थ**मन्तिके** समीपे गुरूणां मरणस्य वा **विनयेद्** विनाशयेत् कं **लोमहर्षं** रोमाञ्चम् । हा ! मे मरणं भावीति भयाभिप्रायभावं । किञ्च **भेदं** विनाशं **देहस्य** काङ्क्षेदिव **काङ्क्षेत्** त्यक्तपरिकर्मतया न तु मरणाशंसया वर्जनीयत्वादस्या इति ॥३१॥

निगमयन्नाह—

**अह कालंमि संपत्ते आघायाय समुस्सयं ।**
**सकाममरणं मरई तिण्हमन्नयरं मुणी ॥३२॥ त्ति बेमि ॥**

**व्याख्या—अथ** मरणाभिप्रायानन्तरं **काले** मरणकाले सम्प्राप्ते—

**"[१]निप्फाइया य सीसा सउणी जह अंडयं पयत्तेणं ।**
**बारस संवच्छरियं अह संलेहं तो करइ" ॥१॥**

इत्यादिक्रमेणायाते 'आघायाय'त्ति **आघातयन्** संलेखनादिभिरुपक्रमणहेतुभिः समन्ताद् विनाशयन् **समुच्छ्रयम्** अन्तः कार्मणशरीरं बहिरौदारिकं । किं कुर्यादित्याह—**सकामस्य**

---

१. निष्पादिताश्च शिष्याः शकुनिर्यथाऽण्डकं प्रयत्नेन ।
द्वादशसांवत्सरिकमथ संलेखं ततः करोति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

साभिलाषस्य **मरणं** तेन **म्रियते** । **त्रयाणां** भक्तपरिज्ञेङ्गिनीपादपोपगमाना**मन्यतरेण** सूत्रत्वाद् विभक्तिव्यत्ययो मुनिस्तपस्वीति ॥ इतीत्यादि प्राग्वत् ॥३२॥ ग्रन्थाग्रम् २९९-१५॥

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां पञ्चममकाममरणाध्ययनं समाप्तम् ॥५॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# षष्ठं क्षुल्लकनिर्ग्रन्थीयमध्ययनम्

अथ क्षुल्लकनिर्ग्रन्थीयाख्यं षष्ठमारभ्यते । तत्रायं सम्बन्धः, प्रागध्ययने विरतानां पण्डितमरणमुक्तं ते च विद्याचरणसम्पन्ना एव विद्याचरणे तु निर्ग्रन्थगुणौ निर्ग्रन्थानां च स्वरूपं निर्युक्तिकृता सप्रपञ्चमुक्तं तद्यथा—

**"★बउसे[1] पुलाये[2] कुसीला[3] निग्गंथे[4] सणायगा[5] य नायव्वा ।**
**एएसिं पंचण्हं वि होइ विभासा इमा कमसो" ॥१॥**

इत्यादिना, ततोऽपि सविशेषतरं च **बृहट्टीकातो** ज्ञेयं, निर्ग्रन्थाश्च ज्ञानिन एवेति तद्विपरीता-ज्ञानिस्वरूपमाह सूत्रकृत्—

**जावंतऽविज्जापुरिसा सव्वे ते दुक्खसंभवा ।**
**लुप्पंति बहुसो मूढा संसारंमि अणंतए ॥१॥**

**व्याख्या—यावन्तोऽविद्या** मिथ्यात्वोपहतकुज्ञानात्मिका तत्प्रधानाः **पुरुषा** अविद्यापुरुषाः । **सर्वे ते दुःखसम्भवास्ते** किमत्याह—**लुप्यन्ते** दारिद्र्यादिभिर्बाध्यन्ते **बहुशो** बहुवारं **मूढा** हिताहितविवेचनं प्रत्यसमर्थाः **संसारे अनन्तके** अविद्यमानान्तेऽनेन निर्ग्रन्थस्वरूपज्ञापनार्थं तद्विपक्ष उक्त इति भावः । अविद्यायां **सिद्धदत्तघटपुरुष**दृष्टान्तः । तथाहि—

ग्रामीणः कोऽपि निःशेषनिर्भाग्यजनशेखरः ।
कुर्वाणः कृषिकर्मापि दौस्थ्येनामुच्यतैष न ॥१॥

यं यं धनार्जनोपायं स चक्रे गतपुण्यकः ।
प्रयासादपरं तस्मान्न स प्राप फलं क्वचित् ॥२॥

विषादान्निर्गतो गेहाच्छून्यचेताः परिभ्रमणन् ।
क्षुत्तृषाद्यापदो लेभे न तु नामापि सम्पदः ॥३॥

---

★ बकुश-पुलाक-कुशीला निर्ग्रन्थ-स्नातकाश्च ज्ञातव्याः ।
एतेषां पञ्चानामपि भवति विभाषेयं क्रमशः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं भुवं परिभ्रम्य प्रत्युताऽऽप्य पराभवम् ।
ववलेऽभिगृहं भूयो ग्रामे कुत्राप्युवास च ॥४॥

रात्रौ देवकुले क्वाप्यप्रमीलश्चिन्तयैक्ष्यत ।
निर्गच्छन्तं ततो रम्यं चित्रकुम्भकरं नरम् ॥५॥

प्रदेशे पावने सोऽपि चित्रकुम्भमपूजयत् ।
श्रीखण्डपुष्पभोगाद्यैः प्राञ्जलिश्चाभणत् पुरः ॥६॥

कुरुष्व लघु तत् सौधं यत्र तिष्ठाम्यहं सुखम् ।
तत्कालं तत्कृतं तेन नानाशालोपशोभितम् ॥७॥

एवं स तेन स्नानान्नपानशय्यासनादिकम् ।
निःशेषं कारयामास भोगसाधनमद्भुतम् ॥८॥

यूनीपीनस्तनीकान्ताः शर्वरीं सोऽखिलामपि ।
नानोपचारैर्बुभुजे स्वाधीनाखिलसम्पदः ॥९॥

प्रातस्तदुपसंहृत्य स्कन्धे संस्थाप्य तं घटम् ।
यावत् सिद्धश्चचालेष तावत् ग्राम्यो व्यचिन्तयत् ॥१०॥

भ्रान्तेन बहुनाऽलं मे उपासे ह्येनमेव तत् ।
एतादृशघटप्राप्त्या येन स्यां भोगसेवधिः ॥११॥

ध्यात्वेत्यवालगत् सिद्धं विनीतोऽसौ निरन्तरम् ।
तुष्टश्च सोऽवदत् किं ते वद कर्त्ताऽहमीप्सितम् ॥१२॥

स प्राह मन्दभाग्योऽस्मि दौर्गत्येन कदर्थितः ।
भवच्छरणमायातः समभोगं विधेहि माम् ॥१३॥

'सिद्धोऽध्यायद् वराकोऽयमलक्ष्मीपरिपीडितः ।
वात्सल्यार्होऽस्ति मे सन्तो यदाश्रितहितावहाः ॥१४॥

*दयालुत्वमनौद्धत्यं दाक्षिण्यं प्रियभाषणम् ।*
*परोपकारकारित्वं मण्डनानि महात्मनाम् ॥ १५ ॥*

*पुण्यतः प्राप्य सम्पत्तिं कार्योपकृतिरङ्गिनाम् ।*
*आत्मम्भरिः किमु श्लाघ्यः काकोऽप्युदरपूरकः" ॥ १६ ॥*

इति ध्यात्वा कृपार्द्रान्तःकरणः सिद्धपुङ्गवः ।
तमाह ते ददे विद्यामुत विद्याऽद्भुतं घटम् ॥१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तेन मन्दधिया विद्यापुरश्चरणभीरुणा ।
दृष्टभोगैकतृष्णेन ययाचे तादृशो घटः ॥१८॥

तस्मै स परिनिष्पन्नमदात् कामघटं मुदा ।
तमादाय स सन्तुष्टमना ग्राममगान्निजम् ॥१९॥

भुज्यते याऽन्यदेशस्थैः किं तथाविधया श्रिया ।
मित्रैस्सह न या भुक्ता यामपश्यन्न चारयः ॥२०॥

इति जानन् घटस्यास्य प्रसादात् सपरिच्छदः ।
यथाऽभिरुचितं भेजे भोगं सौधाङ्गनादिकम् ॥२१॥

मुक्तं कार्षीबलं कर्म सेवाद्यं शिथिलीकृतम् ।
गतं गवादिकं सोऽभूद् घटमात्रैकजीवनः ॥२२॥

अन्यदा सीधु पीत्वाऽसौ स्कन्धे कृत्वा घटं मदात् ।
ननर्त्तास्य प्रभावेन सुख्यस्मीत्यादिगीतगीः ॥२३॥

विह्वलत्वाद् घटस्तस्य पपात स्कन्धदेशतः ।
भग्नश्च तत्कृता भोगसामग्र्योऽपि क्वचिद् गताः ॥२४॥

स तत्परिकरश्चापि ही ! विद्याऽग्राहि नो मुधा ।
तप्यमान इति प्रैष्य कष्टेन स्वमजीवयत् ॥२५॥

सोऽग्रहीष्यत विद्यां चेदकरिष्यद् घटं पुनः ।
अभविष्यत् पुनस्तस्माद् भोगाभोगविलासवान् ॥२६॥

विद्यया विप्रयुक्तोऽसावलक्ष्मीं सोढवान् यथा ।
सङ्क्लिश्यन्ते तथा जीवास्तत्त्वज्ञानविनाकृताः ॥२७॥

इति तत्त्वाज्ञाने **ग्रामीण**कथा ॥१॥

कृत्यमाह—

**समिक्ख पंडिए तम्हा पासजाईपहे बहू ।**
**अप्पणा सच्चमेसिज्जा मित्ति भूएसु कप्पई ॥२॥**

**व्याख्या—समीक्ष्या**लोच्य **पण्डितो** हिताहितविवेकवान् यस्मादेवमविद्यावतो लुप्यन्ते **तस्मात्** किं तत् समीक्ष्येत्याह-पाशा अत्यन्तपारवश्यहेतवः कलत्रादिसम्बन्धाः । यदुक्तम्—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"कलत्रनिगडं दत्त्वा न सन्तुष्टः प्रजापतिः ।
भूयोऽप्यपत्यरूपेण ददाति गलशृङ्खलाम्" ॥१॥

त एव मोहादिहेतुतयैकेन्द्रियादिजातीनां पन्थानस्तत्प्रापकत्वान्मार्गाः **पाशजातिपथास्तान् बहून्** विद्यानां विलुप्तिहेतून् । किमित्याह—**आत्मना** स्वयं न तूपरोधादिना सद्भ्यो हितः **सत्यः** संयमः सदागमो वा **तमेषयेद्** गवेषयेन्**मैत्रीं** च मित्रभावं भूतेषु पृथिव्यादिषु **कल्पयेत्** कुर्यादिति ॥२॥

अपरं च—

**माया पिया ण्हुसा भाया भज्जा पुत्ता य ओरसा ।**
**नालं ते मम ताणाय लुप्पंतस्स सकम्मुणा ॥३॥**

व्याख्या—**माता पिता स्नुषा** वधूः **भ्राता भार्या पुत्राश्चौरसाः** स्वाङ्गोद्भवाः, आस्तामजातपुत्राः । **नालं** न समर्थास्**ते** मात्रादयो **मम त्राणाय** रक्षणाय **लुप्यमानस्य** बाध्यमानस्य **स्वकर्मणा** । यतः—

"[१]पिइ-माइ-भाइ-भगिणी-भज्जा-पुत्ताण जं कए कुणइ ।
पावं तस्स विवागं भुंजइ इक्कल्लओ दुक्खी" ॥१॥ ॥३॥

ततश्च—

**एयमट्ठं सपेहाए पासे समियदंसणे ।**
**छिंद गिद्धिं सिणेहं च न कंखे पुव्वसंथवं ॥४॥**

**व्याख्या—एवमे**तं पूर्वोक्त**मर्थं स्वप्रेक्षया** स्वबुद्ध्या **पश्येद्** अवधारयेत् । शमितं दर्शनं मिथ्यारूपं येन स **शमितदर्शनः** सम्यग्दृष्टिश्**छिन्द्याद् गृद्धिं** विषयाभिकाङ्क्षां **स्नेहं च** स्वजनादिषु **न काङ्क्षेद**भिलषेत् **पूर्वसंस्तवं** पूर्वपरिचयमेकग्रामोषितोऽयमित्यादिकं यतो न कश्चिदिह परत्र वा दुःखसम्भवे धर्मं विना त्राणायेति भावः ॥४॥

अस्यैवार्थस्य फलमाह—

**गवासं मणिकुंडलं पसवो दासपोरुसं ।**
**सव्वमेयं चइत्ता णं कामरूवी भविस्ससि ॥५॥**

**व्याख्या**—गावश्चाश्वाश्च **गवाश्वं मणयश्च कुण्डलानि** च प्रतीतानि उपलक्षणमेतच्छेषालङ्काराणां स्वर्णादीनां च [**पशवः** अजैडकादयः] दासाश्च गृहजातादयः 'पोरुसं' त्ति

---

१. पितृ-मातृ-भ्रातृ-भगिनी-भार्या-पुत्राणां यत्कृते करोति ।
पापं तस्य विपाकं भुङ्क्ते एकाकी दुःखी ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सूत्रत्वात् पौरुषेयं च पदात्यादि **दासपौरुषेयं** सर्वत्र द्वन्द्वः । **सर्वमेतत् त्यक्त्वा** संयमं परिपाल्येत्याशयः । **कामरूपी** मनीषितरूपविकरणशक्तिमान् **भविष्यसि** । इहैव वैक्रियकरणाद्यनेकलब्धियोगात् परत्र च देवभवावाप्तेरिति ॥ अत्रान्तरे थावरेति गाथा प्रक्षेपरूपा ज्ञेया । द्वयोष्टीकयोरव्याख्यातत्वात् ॥५॥

तथा—

**थावरं जंगमं चेव धणं धन्नं उवक्खरं ।**
**पच्चमाणस्स कम्मेहिं नालं दुक्खाउ मोयणे ॥६॥**

**व्याख्या—स्थावरं** सुवर्णभूम्यादि, **जङ्गमं** गोगजादि, **धनं, धान्यमुपस्करश्च** सर्वमेतन्नरकादि**कर्मभिः पच्यमानस्य** जीवस्य **दुःखमोचने नालं** न **पर्याप्तम्** ॥६॥

पुनः सत्यस्वरूपमाह—

**अज्झत्थं सव्वओ सव्वं दिस्स पाणे पियायए ।**
**न हणे पाणिणो पाणे भयवेराओ उवरए ॥७॥**

**व्याख्या—**अध्यात्मं मनस्तस्मिंस्तिष्ठतीत्**यध्यात्मस्थं** सुखादि सूत्रत्वाद् वर्णलोपः **सर्वत** इष्टसंयोगादिहेतुभ्यो जातमिति गम्यम् । **सर्वं** निरवशेषं 'दिस्स'त्ति **दृष्ट्वा** प्रियत्वादिस्वरूपेणावधार्य तथा चस्य गम्यत्वात् प्राणांश्च प्राणिनः प्रिय आत्मा येषां ते तान् **प्रियात्मकान्** दृष्ट्वेत्यत्रापि योज्यं ततो **न हन्या**दुपलक्षणान्नापि घातयेन्न वा घ्नन्तमनु-जानीयात् **प्राणान् प्राणिन** इत्यत्र जातावेकवचनं । कीदृक् **भयवैरादुपरतो** निवृत्तः सन् । प्रियात्मन इत्यत्र दृष्टान्तस्तद्यथा—

**मगधासु** पुरे **राजगृहे श्रेणिक**भूपतिः ।
सभासीनोऽन्यदाऽप्राक्षीत् पार्षद्यान् धीसखादिकान् ॥१॥

संसारे किं महर्घ्यं भोः ! प्रभूतेष्वपि वस्तुषु ? ।
तद्राज्ये सचिवानां हि समस्ति शतपञ्चकम् ॥२॥

तेषु कोऽप्यूचिवान् स्वामिन् ! धान्यमाद्यं महार्घकम् ।
वस्त्रादि लवणं कश्चित् कश्चिदष्टापदादिकम् ॥३॥

कर्पूरं कुङ्कुमं कश्चिद् गोतुरङ्गादि कश्चन ।
एवं महर्घ्यं सर्वेऽन्ये मन्त्रिणः स्वेष्टमूचिरे ॥४॥

ततोऽ**भयकुमाराख्यः** समस्तसचिवाग्रणीः ।
औत्पात्तिक्यादिधीभूमिर्महार्घं मांसमब्रवीत् ॥५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आचख्युरपरे सभ्या भूधवोऽप्यभ्यधादिति ।
किञ्चिदूनेन रूपेण पिशितं प्राप्यते बहु ॥६॥

**अभयो**ऽभणदेवं चेद् भवतां सम्मतं तदा ।
प्रत्ययं दर्शयिष्येऽहमत्रार्थे भोः ! निरीक्ष्यताम् ॥७॥

भूयो भूपं बभाणासौ साम्राज्यं दिनपञ्चकम् ।
देहि तात ! ततस्तेन तस्मै प्रादायि तल्लघु ॥८॥

राजा त्वन्तःपुरे तस्थाव**भयः** पुनरग्र्यधीः ।
राजाङ्गचङ्गिमाहेतोः कालेयं दत्त भो इति ॥९॥

पटहं घोषयामास योऽतिभक्तो नृपे स तु ।
यवद्वितयदध्नं तद् दत्त्वा वाञ्छितभाग् भवेत् ॥१०॥

इत्याकर्ण्य वचोऽनिष्टं मौनमादधिरे जनाः ।
अभाषन्त च तद्दाने म्रियेमहि वयं क्षणात् ॥११॥

अथा**भय** इति श्रुत्वा सर्वान् सभ्यानवीवदत् ।
अस्मिन्नदत्ते लोकानां च्छुटिः स्यात् कथमत्र भोः ! ॥१२॥

ततोऽभिभीतभीतास्ते पौराः प्राञ्जलयः समे ।
अनेकद्युम्नकोटीनां कूटैः पर्वतसन्निभैः ॥१३॥

वेश्म **श्रेणिक**भूपस्य पूरयामासुरञ्जसा ।
सर्वं लोकं समुद्घाती केवलीवात्मपुद्गलैः ॥१४॥ **युग्मम्**

विविधैर्दानसन्मानप्रियालापैः स मन्त्रिराट् ।
पञ्चाहं तोषयामास लोकान् कोकानिवार्यमा ॥१५॥

ततः षष्ठे दिने राजा स्वराज्यमधितस्थिवान् ।
आस्थाने धनकोटीश्च दृष्ट्वाऽभूद् विस्मिताशयः ॥१६॥

पुनः स प्राह भोः पुत्र ! केन दत्तं कथञ्चन ? ।
प्राप्तमेतत् त्वया द्रव्यं पीडिता मत्प्रजाः किमु ? ॥१७॥

पौरान् कथं पीडयामि किञ्चित् पुण्यं विदन्नहम् ।
स्वचरान् प्रेष्य वित्थेदं नृपा हि चरचक्षुषः ॥१८॥

ते प्रोचुर्भूपतिं स्वामिन् ! भ्रमन्तः सर्वतो यशः ।
श्रावं श्रावममात्येशो मुदमादध्महे वयम् ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**श्रेणिकः** कौतुकाकृष्टः पृष्टवानभयं सुतम् ।
इयद्दध्नव्रातः पौरेभ्यश्च यशोऽभितः ॥२०॥

एतद्द्वयं कथं प्राप्तं भवता पञ्चभिर्दिनैः ।
विरुद्धद्वययोगो हि दुर्घटः किल गीयते ॥२१॥ युग्मम्

**अभयः** प्राख्यदप्राक्षीः प्राक् प्रभो ! यत् सभासदः ।
पण्येषु बहुमूल्यं किं मांसमूचे मया तदा ॥२२॥

तच्चाश्रद्दधतां सत्यः प्रत्ययो दर्शितो यतः ।
बह्वपि स्वं ददुर्लोका न चाल्पमपि कालिजम् ॥२३॥

*प्रेयांसो बहुमूल्याश्च प्राणा एव हि मेनिरे ।*
*सर्वैरपि नृपामात्यैस्तादृक्प्रत्ययदर्शनात् ॥ २४ ॥*

अथ मन्त्रीन्दुबुद्ध्याऽतिहृष्टः स्पष्टनयो नृपः ।
पौरान् सत्कृत्य यद् यस्य तत् तस्मै ददिवान् धनम् ॥२५॥

एवं सर्वजन्तूनां प्रियात्मत्वमिति ॥७॥

किञ्च—

**आयाणं नरयं दिस्स नायइज्ज तणामवि ।**
**दोगुंच्छी अप्पणो पाए दिन्नं भुंजिज्ज भोअणं ॥८॥**

**व्याख्या**—आदीयते इत्यादानं धनधान्यादि नरकहेतुत्वान्**नरकं दृष्ट्वा नाददीत** न गृह्णीत **तृणमप्यास्तां** हेमादि । तर्हि कथं प्राणधारणमित्याह-जुगुप्सते आत्मानमाहारं विना धर्माक्षममित्येवंशीलो **जुगुप्सी आत्मनः** स्वस्य **पात्रे** न गृहिभाजने । यदाह—

**"[१]पच्छाकम्मं पुरेकम्मं सिया तत्थ न कप्पई ।**
**एयमट्ठं न भुंजंति निग्गंथा गिहिभायणे" ॥१॥**

**दत्तं** गृहस्थैरिति गम्यम् **भुञ्जीत् भोजनम्** । तथा सत्यमेषयेदित्यनेन मृषावादनिवृत्ति-राक्षिप्ता न हन्यात् प्राणानित्यनेन प्राणातिपातनिवृत्तिः । आदानं हि ग्रहणमेव रूढं तच्च नरकहेतुत्वाददत्तस्येति गम्यते । ततो नाददीत तृणमपीत्यनेन साक्षाददत्तादानविरतिः । गवासमित्यादिना परिग्रहविरतिरुक्ता तदभिधानाच्च नापरिगृहीता स्त्री भुज्यते इति कृत्वा मैथुननिवृत्तिरप्युक्तैवेवमनानुपूर्व्या पञ्चाश्रवनिरोधो भावितः ॥८॥

---

१. पश्चात्कर्म पूरःकर्म स्यात् तत्र न कल्पते ।
एतदर्थं न भुञ्जन्ते निर्ग्रन्था गृहिभाजने ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अत्रार्थे परेषां विप्रतिपत्तिं दर्शयति—

**इहमेगे उ मन्नंति अप्पच्चक्खाय पावगं ।**
**आयरियं विदित्ता णं सव्वदुक्खा विमुच्चई ॥९॥**

**व्याख्या—इह** मुक्तिमार्गविचारे **एके** कापिलादिकुतीर्थ्या**स्तु** पुन**र्मन्यन्ते**ऽङ्गीकुर्वते यथा **अप्रत्याख्याया**निराकृत्य **पापकं** हिंसादिविरतिमकृत्वा 'आयरियं'ति आराज्जातं सर्वज्ञयुक्तिभ्य इत्या**र्यं** तत्त्वं तद् **विदित्वा** ज्ञात्वा **सर्वदुःखा**च्छारीरमानसाद् **विमुच्यते** । तथाऽऽहुस्ते—

**"पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः ।**
**जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः"** ॥१॥

एवं सर्वत्र ज्ञानमेव मुक्त्यङ्गं न चैतद् युक्तम् । न ह्यौषधादिपरिज्ञानमात्रतो बाह्यरोगेभ्य इव भावरोगेभ्यः कर्मभ्यो महाव्रतरूपक्रियामकृत्वा ज्ञानमात्रादेव मुक्तिस्ते चैवमनालोचयन्तो वाचालतयैवात्मानं स्वस्थयन्ति ॥९॥

तथाहि—

**भणंता अकरेंता य बंधमोक्खपइन्निणो ।**
**वायाविरियमेत्तेणं समासासेंति अप्पयं ॥१०॥**

**व्याख्या—भणन्त** उपदिशन्तः प्रक्रमात् ज्ञानमेव मुक्त्यङ्गमिति । **अकुर्वन्तश्च** मुक्त्युपायमनुष्ठानं, बन्धमोक्षयोः **प्रतिज्ञा**ऽङ्गीकार**स्तद्वन्तो**ऽस्ति बन्धोऽस्ति मोक्ष इति वादिन एव केवलं, न तु तथाऽनुष्ठायिनः । वाग्वीर्यं वचनशक्तिर्वाचालता तदेव क्रियाशून्यं **वाग्वीर्यमात्रं तेन समाश्वासयन्ति** ज्ञानादेव वयं मुक्तियायिन इति स्वस्थयन्त्य**ात्मानमि**ति ॥१०॥

तेषामयुक्तत्वं स्वत आह—

**न चित्ता तायए भासा कओ विज्जाणुसासणं ।**
**विसन्ना पावकम्मेसु बाला पंडियमाणिणो ॥११॥**

**व्याख्या—न** चैव **चित्रा** प्राकृतसंस्कृतादिरूपाऽऽर्यविषयं ज्ञानमेव मुक्त्यङ्ग-मित्यादिका वा **त्रायते** रक्षति पापेभ्य इति गम्यम् । **भाषा** वागात्मिका नन्वचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इत्यघोरादिमन्त्रात्मिका वाक् त्राणाय भविष्यतीत्याह—**कुतो विद्या** विचित्रा मन्त्ररूपा तस्या **अनुशासनं** शिक्षणं त्रायते पापान्न कुतोऽपि तन्मात्रादेव मुक्तौ शेषक्रियावैयर्थ्यप्रसङ्गादिति भावोऽत एव ये तदपि त्राणायेति वदन्ति ते यादृशास्तदाह

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**विषण्णा** विविधं मग्नाः **पापकर्मसु** हिंसादिक्रियासु यतस्ते **बाला** रागाद्याकुलाः **पण्डितमानिन** आत्मानं पण्डितम्मन्या इति ॥११॥

साम्प्रतं मुक्तिपथपरिपन्थिनां सामान्येन दोषमाह—

**जे केइ सरीरे सत्ता वण्णे रूवे य सव्वसो ।**
**मणसा कायवक्केणं सव्वे ते दुक्खसंभवा ॥१२॥**

**व्याख्या—ये केचिच्छरीरे सक्ता** लालनाभ्यङ्गस्नानादिषु बद्धाग्रहाः न चैवं ते भावयन्ति—

**"तह तह लालिओ निच्चकालुजोडिओ रुच्चंतइ**
**खलु जिम थक्कइं वलि विवंठ जीवि चलंतइ ।**
**दड्ढसरीरह तासु रे सिजण पाउ म किज्जओ**
**थरहर जीविउ जाइ चित्त परलोयह दिज्जओ"** ॥१॥

तथा **वर्णे** गौरत्वादिके **रूपे** सौन्दर्ये **च**शब्दात् स्पर्शादिषु वस्त्राद्यभिष्वङ्गेषु वाऽऽसक्ताः । 'सव्वसो' त्ति सूत्रत्वात् **सर्वथा** सर्वैः स्वयं करणादिप्रकारै**र्मनसा** कथं वर्णादिमन्तो वयं भाविनः **कायेन** रसाङ्गाद्यासेवनेन **वाक्येन** वचसा रसायनादिप्रश्नरूपेण **सर्वे** ते ज्ञानादेव मुक्तिरिति वादिनो **दुःखसम्भवा** इहामुत्र च दुःखभाज इति ॥१२॥

उपदेशसर्वस्वमाह—

**आवन्ना दीहमद्धाणं संसारंमि अणंतए ।**
**तम्हा सव्वदिसं पस्स अप्पमत्तो परिव्वए ॥१३॥**

**व्याख्या—आपन्नाः** प्राप्ता **दीर्घम**नाद्यनन्तमध्वानमि**वाध्वानम**न्यान्यभवभ्रमणेनैकत्रावस्थितेरभावात् । क्व **संसारे** चातुर्गतिके**ऽनन्तके**ऽपर्यन्ते 'तम्ह'त्ति यस्मादेते दुःखसम्भवा**स्तस्मात् सर्वदिशः** प्रस्तावात् पृथिव्याद्यष्टादशभेदाः । उक्तञ्च—

**"[1]पुढवि जलजलणवाया मूला खंधग्गपोरबीया य ।**
**बितिचउपणिंदितिरिया य नारया देवसंघाया ॥१॥**
**[2]सम्मुच्छिमकम्माकम्मभूमिगनरा तहंतरद्दीवा ।**
**भावदिसा दिस्सइ जं संसारी निययमेयाहिं"** ॥२॥

---

१. पृथ्वी जल-ज्वलन-वाता मूलानि स्कन्धाग्र-पर्व-बीजानि च ।
द्वि-त्रि-चतुः-पञ्चेन्द्रियतिर्यञ्चश्च नारका देवसङ्घाताः ॥१॥

२. सम्मूर्छिमकर्माकर्मभूमिगनरास्तथाऽऽन्तरद्वीपाः ।
भावदिशा दृश्यते यत् संसारी नियतमेताभिः ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**पश्यन्नप्रमत्तो** यथैकेन्द्रियादीनां विराधना न स्यात् तथा **परिव्रजेः** संयमाध्वनि याया भोः शिष्य ! इति ॥१३॥

यथाऽप्रमत्तः प्रव्रजेत् तथाऽऽह—

**बहिया उड्ढमादाय नावकंखे कयाइ वि ।**
**पुव्वकम्मक्खयट्ठाए इमं देहं समुद्धरे ॥१४॥**

**व्याख्या—बहिर्भूतं** भवादिति गम्यम् । **ऊर्ध्वं** सर्वोपरि स्थितमर्थान्मोक्ष**मादाय** गृहीत्वा मयैतदर्थं यतितव्यमिति निश्चित्य **नावकाङ्क्षे**न्नाभिलषेद् विषयादिकं **कदाचिद**-प्युपसर्गादिव्याकुलत्वेऽप्यास्तामन्यदा । एवं देहधारणमप्ययुक्तमाकाङ्क्षाऽसम्भवादत आह— **पूर्वकर्मक्षयार्थं** [इदं] **देहं समुद्धरे**दुचिताहारादिभिः पालयेत् तद्धारणस्य शुद्धिहेतुत्वादुक्तं च—

**"[१]सव्वत्थ संजमं संजमाओ अप्पाणमेव रक्खिज्जा ।**
**मुच्चइ अइवायाओ पुणो विसोही न याविरई"** ॥१॥

ततो देहधारणमपि निरभिष्वङ्गतया विधेयमेवेति भावः ॥१४॥

यथा देहपालनेऽप्यभिष्वङ्गाभावस्तथाऽऽह—

**विविच्च कम्मुणो हेउं कालकंखी परिव्वए ।**
**मायं पिंडस्स पाणस्स कडं लद्धूण भक्खए ॥१५॥**

**व्याख्या—विविच्य** पृथक्कृत्य **कर्मणो** ज्ञानावरणादे**र्हेतु**मुपादानरूपं मिथ्यात्वादि कालं क्रियाप्रस्तावं काङ्क्षति इत्येवंशीलः **कालकाङ्क्षी परिव्रजे**रिति प्राग्वत् । 'विगिंचि'त्ति पाठे **वेवेग्धि** पृथक् कुरु शेषं तथैव । **मात्रां** यावत्या संयमनिर्वाहस्तावतीं ज्ञात्वेति गम्यम् । **पिण्डस्य** भक्तस्य **पानस्य** च खाद्यस्वाद्ययोः प्रायो यतेरसम्भवादि-हानुपादानं **कृतं** गृहिभिः स्वार्थमेव **लब्ध्वा** प्रक्रमात् पिण्डादि **भक्षये**दिति ॥१५॥

किञ्च—

**सन्निहिं च न कुव्विज्जा लेवमायाए संजए ।**
**पक्खी पत्तं समादाय निरविक्खो परिव्वए ॥१६॥**

**व्याख्या—सन्निधि**मन्यदिनभोजनार्थं भुक्तशेषस्याऽन्नादे रात्रौ स्थापनं **न कुर्वीत । लेपमात्रया** यावता पात्रमुपलिप्तं स्यात् तावन्मानमपि सन्निधिं न कुर्वीतास्तां बहु **संयतो**

---

१. सर्वत्र संयमं संयमादात्मानमेव रक्षेत् ।
मुच्यतेऽतिपातात् पुनर्विशुद्धिर्न चाविरतिः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मुनिः । पात्राद्युपकृतिसन्निधेः को विधिः ? इत्याह—इव शब्दस्य लोपात् पक्षीव **पक्षी** यथा पक्षी **पत्रं** पक्षसञ्चयं समादाय गृहीत्वा व्रजत्येवं भिक्षुरपि पात्रमुपलक्षणाच्छेषोपकरणं चादाय निरपेक्षस्तद्विनाशादौ शोकाभावान्निरभिष्वङ्गः परिव्रजेदिति । तथा च प्रत्यहमसंयम-पलिमन्थभीरुतया पात्रादिसन्निधौ न दोष इति भावः ॥१६॥

पूर्वोक्तमेव व्यङ्क्तुमाह—

**एसणासमिओ लज्जू गामे अनियओ चरे ।**
**अप्पमत्तो पमत्तेहिं पिंडपायं गवेसए ॥१७॥**

**व्याख्या**—एषणायामुत्पादनादिविषयायां सम्यगितः स्थित **एषणासमित** इहैषणा-ग्रहणप्राधान्यात् प्रायस्तद्भावे ईर्याभाषासमितिसम्भवाद् वेति । अनेन निरपेक्षत्वमुक्तम्। **लज्जा** संयमस्तद्वान् **ग्रामे** उपलक्षणान्नगरादा**वनियतो**ऽनिश्चितवृत्ति**श्चरेद्** विहरेदनेनापि निरपेक्षतैवेति । चरंश्च किं कुर्यादित्याह—**अप्रमत्तः** सन् **प्रमत्तेभ्यो** गृहस्थेभ्यः **पिण्डपातं** भिक्षां **गवेषयेदि**ति ॥१७॥

प्रागुक्तयोः संयमनिर्ग्रन्थस्वरूपयोरादरोत्पादनार्थमाह—

**एवं से उदाहु अणुत्तरनाणी अणुत्तरदंसी अणुत्तरनाणदंसणधरे ।**
**अरहा नायपुत्ते भयवं वेसालिए वियाहिए ॥१८॥ त्ति बेमि ॥**

**व्याख्या**—**एवम**मुना प्रकारेण **स** इति भगवान् 'उदाहु'त्ति **उदाहृतवाननुत्तरज्ञानी** सर्वोत्कृष्टज्ञानवाननुत्तरमुत्कृष्टं पश्यतीत्य**नुत्तरदर्शी** सामान्यविशेषग्राहितया दर्शनज्ञानयोर्भेदो यत उक्तम्—"[1]**जं सामण्णग्गहणं दंसणमेयं विसेसियं नाणं**"ति अनुत्तरे ज्ञानदर्शने युगपदुपयोगाभावेऽपि लब्धिरूपतया युगपद् धारयतीत्य**नुत्तरज्ञानदर्शनधरः** पूर्वविशेषणाभ्यामुपयोगस्य ज्ञानदर्शन-योर्भिन्नकालतोक्ता । ततश्च मा भूदुपयोगवल्लब्धिद्वयमपि भिन्नकालभावीति व्यामोहोऽतोऽनुत्तर-ज्ञानदर्शनधर इति न पौनरुक्त्यम् । **अर्हंस्ती**र्थकृत् **ज्ञातः** क्षत्रियः स चार्थात् सिद्धार्थस्तस्य **पुत्रः** श्रीवीर इत्यर्थः । **भगवान्** समग्रैश्वर्यादिमान् विशालाः शिष्या यशःप्रभृतयो वा गुणा विद्यन्ते यस्य स **वैशालिकः** 'वियाहिय'त्ति **व्याख्याता** सदेवमनुजायां पर्षदि कथयिता । **इति ब्रवीमी**ति प्राग्वत् ॥ ग्रंथाग्रम्-१७९ अ-१६ ॥

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां षष्ठं क्षुल्लकनिर्ग्रन्थीयमध्ययनं समाप्तम् ॥६॥**

---

१. यत् सामान्यग्रहणं दर्शनमेतद् विशेषितं ज्ञानमिति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# सप्तममौरभ्रीयमध्ययनम्

साम्प्रतमौरभ्रीयमारभ्यते—इह पूर्वाध्ययने निर्ग्रन्थत्वमुक्तं तच्च रसगृद्धित्यागादेव स्यात् स च विपक्षेऽपायदर्शनात् तच्च दृष्टान्तैरेव स्फुटिं भवतीति रसगृद्धिदोषदर्शकोरभ्रादिदृष्टान्तप्रतिपादकमिदमध्ययनमारभ्यते । अत्र चोरभ्रादिदृष्टान्तान् पञ्चाह निर्युक्तिकृत्—

**★"[1]उरब्भे [2]कागिणी [3]अंबए य [4]ववहारे [5]सायरे चेव ।**
**पंचेए दिट्ठंता ओरब्भीयंमि अज्झयणे" ॥१॥**

तत्रोरभ्रदृष्टान्तसूचिकामाद्यां गाथामाह सूत्रकारः—

**जहादेसं समुद्दिस्स कोइ पोसिज्ज एलयं ।**
**ओअणं जवसं देज्जा पोसेज्जा वि सयंगणे ॥१॥**

**व्याख्या—यथे**त्युदाहरणोपन्यासे आदिश्यते विविधव्यापारेषु परिजनोऽस्मिन्नायाते इत्यादेशः प्राघुणकस्तं **समुद्दिश्या**श्रित्य यथाऽसौ समागतश्चैनं भोक्ष्यत इति **कश्चित्** परलोकापायनिरपेक्षः **पोषयेत्** पुष्टं कुर्या**देलकमूरणकमोदनं** कूरं तद्योग्यशेषान्नोपलक्षणम् । **यवसं** मुद्गादि **दद्याद**ग्रतो ढौकयेत् तत एव च **पौषयेदि**ति । पुनर्वचनादरख्यापनार्थम् । **अपि**शब्दात् सम्भाव्यते एवंविधः कोऽपि गुरुकर्मा स्वकाङ्गणे एवान्यत्र नियुक्तनराः कदाचिदोदनादि न दास्यन्तीति **स्वाङ्गणे** इत्युक्तम् । उरभ्रदृष्टान्तो यथा—

क्वचित् प्राघूर्णकस्यार्थे उरभ्रः कोऽप्यपोष्यत ।
सोऽत्यन्तपुष्टसर्वाङ्गः स्नापितश्चाप्यलङ्कृतः ॥१॥

सम्भूतैः शिशुभिः क्रीडाः कार्यमाणः क्रमादभूत् ।
दर्शनीयोऽन्यदा दृष्ट्वा वत्सकस्तं तथाविधम् ॥२॥

---

★ उरभ्रः काकिनी आम्रकश्च व्यवहारः सागरश्चैव ।
पञ्चैते दृष्टान्ता औरभ्रीयेऽध्ययने ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्नेहतो गोपितं मात्रा दोग्ध्रा तदनुकम्पया ।
स्तने मुक्तमपि क्षीरं तन्मात्सर्येण नापिबत् ॥३॥

लिहन्ती जिह्वया प्रेम्णा पश्यन्ती तं प्रसूरवक् ।
दूमितो वत्स ! केनासि न किं पिबसि मे पयः ? ॥४॥

सोऽवदत् पश्यसि न किं मेषोऽयं गृहमानुषैः ? ।
अहम्पूर्विकयाऽभीष्टैरशनैः परिपोष्यते ॥५॥

स्नाप्यते भूष्यते पुत्राविशिष्टः परिपाल्यते ।
तिर्यङ्ङ्पि तथाऽस्त्येष भोगभागी मनुष्यवत् ॥६॥

अहं तु मन्दभाग्योऽस्मि कुण्डोध्न्यां त्वयि मातरि ।
न तृणान्यपि शुष्कानि पर्याप्तानि लभेय यत् ॥७॥

तालुके च तृषा ग्रीष्मे शुष्यत्यपि न कोऽपि माम् ।
पाययत्यम्बु तन्मातर्दुग्धेनालमनादरे ॥८॥

गौरवक् पुत्र ! मा कुप्यश्चिह्नान्येतान्युरभ्रकः ।
असाध्यरोगिणो धत्ते तद् यथोक्तमिदं श्रुतम् ॥९॥

"[1]**आउरचिंधाइं एयाइं जाइं चरइ नंदिओ ।**
**सुक्कत्तिणेहिं जीवेहिं एयं दीहाओ लक्खणम्**" ॥१॥

मुमूर्षुरातुरो यद् यदीप्सेत् किल हिताहितम् ।
तत् तत् प्रदीयते तस्मै कृपया तस्य बन्धुभिः ॥११॥

प्राघूर्णके समायाते मेषोऽयं मारयिष्यते ।
वत्सेक्षिताऽसि त्वमपि तदानीं मा वृथा रुषः ॥१२॥ ॥१॥

ततः स कीदृक् किं करोतीत्याह—

**तओ से पुट्ठे परिव्वूढे जायमेए महोदरे ।**
**पीणिए विउले देहे आएसं परिकंखए ॥२॥**

**व्याख्या—तत** ओदनादिदानात् **स** उरभ्रः **पुष्टः** समांसलः **परिवृढः** समर्थः । **जातमेदा** उपचितचतुर्थधातुरत एव **महोदरः प्रीणित**स्तर्पितो यथाऽर्हाहारादिहेतुभि**र्विपुले देहे सत्यादेशं** प्राघुणकं **परिकाङ्क्षती**च्छति ॥२॥

---

१. आतुरचिह्नान्येतानि यानि चरति नन्दिकः ।
शुष्कतृणैर्जीवैरेतद् दीर्घायुषो लक्षणम् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स पुनः किमित्याह—

**जाव न एइ आएसे ताव जीवइ से दुही ।**
**अह पत्तंमि आएसे सीसं छेत्तूण भुज्जई ॥३॥**

**व्याख्या—यावन्नेति** नायात्यादेशस्तावज्जीवति प्राणान् धारयति **स** उरभ्रो **दुःखी** वध्यमानमण्डनमिवास्यौदनदानाद्यपि तत्त्वतो दुःखमेवेति । **अथानन्तरं प्राप्ते** आगतके **आदेशे शिरश्छित्वा भुज्यते** तेन स्वामिना सादेशेनेति शेषः ॥ उरभ्रकथाशेषः कथ्यते—

प्राप्ते प्राघूर्णके मेषं वध्यमानं स वत्सकः ।
विलोक्य जातभी स्तन्यं नापिबद् वेपथुं दधन् ॥१३॥

मात्राऽभाणि कुतो वत्स ? भयभीत इवेक्ष्यसे ? ।
न मां पिबसि यत् पुत्रप्रेम्णा प्रस्नुवतीमपि ॥१४॥

वत्सः सगद्गदं प्रोचे स्तन्ये मेऽम्ब ? रुचिः कुतः ? ।
अद्य प्राघूर्णकाः केचिदाययुः स्वामिवल्लभाः ॥१५॥

उरभ्रको वराकोऽसौ विलोलनयनो रसन् ।
विनिर्गतललज्जिह्वो मार्यतेऽशरणस्ततः ॥१६॥

तद्दर्शनभयेनाम्ब ! दुग्धेच्छा मे कुतो भवेत् ? ।
गौरप्याह शिरोमध्यं लिहन्ती जिह्वया मुहुः ॥१७॥

तदैवोक्तं मया वत्स ? चिह्नमेतद् यदातुरम् ।
विपाकोऽयं तदेतस्य प्राप्तोऽद्य तव पश्यतः ॥१८॥

पिब स्तन्यं भज स्वास्थ्यं मांसादिसरसाशिनः ।
एवमेव भविष्यन्ति भूयो मरणपीडिताः ॥१९॥

इति **उरभ्रदृष्टान्तः ॥३॥**

दार्ष्टान्तिकमाह—

**जहा से खलु उरब्भे आएसाए समीहिए ।**
**एवं बाले अहम्मिट्ठे ईहई नरयाउयं ॥४॥**

**व्याख्या—यथा** येन प्रकारेण **स उरभ्रः खलु** निश्चये 'आएसाए'त्ति **आदेशाय** प्राघुणकार्थं **समीहितः** कल्पितः सन् यथायमस्मै भविष्यतीत्यादेशं परिकाङ्क्षतीत्यनुवर्तते **एवमेव बालोऽज्ञोऽधर्मिष्ठ ईहते** वाञ्छति तदनुकूलाचारतया **नरकायूरिति** ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्तमेवार्थं प्रपञ्चयति—

**हिंसे बाले मुसावाई अद्धाणंमि विलोवए ।**
**अन्नदत्तहरे तेणे माई कंनुहरे सढे ॥५॥**

**व्याख्या—हिंस्त्रः** प्राणिव्यपरोपणशीलः । **बालो मृषावादी अध्वनि** मार्गे **विलोपकः** पथि जनानां मोषकः । अन्यैरदत्तं हरतीत्य**न्यादत्तहरो** ग्रन्थिच्छेदादिना सर्वापहारकः । **स्तेनः** क्षात्रखननादिना चौर्यकृत् । **मायी** परवञ्चकः । **कंनुहरः** कस्यार्थं नु वितर्के हरिष्यामीत्यध्यवसायी । **शठो** वक्राशयः ॥५॥

तथा—

**इत्थीविसयगिद्धे य महारंभपरिग्गहे ।**
**भुंजमाणे सुरं मंसं परिवूढे परन्दमे ॥६॥**

**व्याख्या—स्त्रीविषयगृद्धः** स्त्रीषु विषयेषु **च** गृद्धोऽभिकाङ्क्षावान् । **महा-नारम्भो** हिंसाकृद्व्यापारः **परिग्रहो** धान्यादिसञ्चयो यस्य **स** तथा **भुञ्जानः सुरां मांसं परिवृढः** पुष्टत्वेन तत्तत्क्रियासमर्थोऽत एव **परन्दमो**ऽन्येषां दमयिता ॥६॥

किञ्च—

**अयकक्करभोई य तुंडिले चियसोणिए ।**
**आउए नरए कंखे जहाएसं व एलए ॥७॥**

**व्याख्या—अजस्य** छागस्य **कर्करम**तिपक्वं मासं यच्चनकवद् भक्ष्यमाणं कर्करायते **तद्भोजी । तुण्डिलो** बृहत्कुक्षिः । **चितमु**पचितं **शोणितं** यस्य स तथा शेषधातूपलक्षणमिदम् । **आयु**र्जीवितं **नरके काङ्क्षति** कं क इव ? इत्याह—**यथा-देशमिवैडकः** ॥७॥

अथैहिकापायमाह—

**आसणं सयणं जाणं वित्तं कामे अ भुंजिया ।**
**दुस्साहडं धणं हिच्चा बहुं संचिणिया रयं ॥८॥**
**तओ कम्मगुरू जंतू पच्चुप्पन्नपरायणे ।**
**अए व्व आगयाएसे मरणंतमि सोयई ॥९॥**

**अनयोर्व्याख्या—आसनं शयनं यानं वित्तं कामान्** शब्दादींश्च **भुक्त्वो**पभुज्य दुःखेन संह्रियते मील्यते स्म **दुःसंहृतं धनं** यतः—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**"अर्थानामर्जने दुःखमर्जितानां च रक्षणे ।**
**आये दुःखं व्यये दुःखं धिगर्थं दुःखभाजनम्" ॥१॥**

**हित्वा** त्यक्त्वा द्यूताद्यसद्व्ययेन **बहु** प्रभूतं **सञ्चित्योपार्ज्य रजो**ऽष्टधा कर्म । **ततः कर्मगुरुः** कर्मभारितो **जन्तुः** प्राणी प्रत्युत्पन्नं वर्त्तमानं तत्र परायणस्तन्निष्ठः **प्रत्युत्पन्नपरायणः** । यथाऽऽह—

**"एतावानेव लोकोऽयं यावानिन्द्रियगोचरः ।**
**भद्रे ! वृकपदं पश्य यद्वदन्ति बहुश्रुताः" ॥१॥**

इति नास्तिकमतानुसारितया परलोकनिरपेक्ष इत्यर्थः । 'अए व्व'त्ति **अज इव** प्रस्तावादुरभ्र इव । 'आगयाएस'त्ति आर्षत्वा**दागते आदेशे** प्राघुणके **मरणान्ते शोचते** । को भावो यथाऽऽदेशे आगते उरभ्रः शोचते तथाऽयमपि धिग् मां विषयव्यामोहोपार्जितगुरुकर्माणं हा ? क्वेदानीं मया गन्तव्यमित्यादिप्रलापात् स खिद्यते इति गाथाद्वयार्थः ॥८-९॥

परलोकापायमाह—

**तओ आउपरिक्खीणे चुता देहा विहिंसगा ।**
**आसुरीयं दिसं बाला गच्छंति अवसा तमं ॥१०॥**

**व्याख्या—ततः** शोचनानन्तर**मायुषि** तद्भवसम्बन्धिनि **परिक्षीणे** क्षयं प्राप्ते **च्युता** भ्रष्टा **देहाद् विहिंसकाः** प्राणिघातकाः । असुराणां रौद्रकर्मकारिणामिय**मासुरीया तां दिशं** भावदिशं नरकगतिमित्यर्थः । **बाला** अज्ञा **गच्छन्ति अवशाः** कर्मपरवशाः । तमोयुक्तत्वात् **तमो**ऽर्थादधोगतिम् । उक्तं हि—

**"[1]निच्चंधयारतमसा ववगयगहचंदसूरनक्खत्ता ।**
**नरया अणंतवेयणा अणिट्ठसद्दाइवसया य" ॥१॥**

काकिण्याम्रदृष्टान्तमाह—

**जहा कागिणीए हेउं सहस्सं हारए नरो ।**
**अपत्थं अंबगं भुच्चा राया रज्जं तु हारए ॥११॥**

**व्याख्या—यथा काकिण्या** रूपकाशीतितमभागलक्षणाया **हेतोर्**निमित्तं **सहस्रं** दशशतात्मकं कार्षापणानामिति गम्यं **हारयेन्नरो**ऽत्र दृष्टान्तः—

ग्राम्यप्रायेण केनापि वाणिज्यादि प्रकुर्वता ।
सहस्रमर्जितं कार्षापणानां विषयान्तरे ॥१॥

---

१. नित्यान्धकारतमसो व्यपगतग्रहचन्द्रसूरनक्षत्राः ।
नरका अनन्तवेदना अनिष्टशब्दादिवशगाश्च ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एतान् नकुलके क्षिप्त्वाऽचलत् सार्थेन केनचित् ।
काकिनीभिर्विभिद्यैकं रूपकं बुभुजे पथि ॥२॥

दिने दिने भुञ्जतोऽस्यावशिष्टैकाऽस्ति काकिनी ।
तां च व्यस्मारयत् क्वापि गच्छन् पथ्यस्मरच्च ताम् ॥३॥

दध्यौ गृहमदूरस्थं सार्थेन किमथो मम ? ।
भेत्तव्यो रूपको मा भूदेकाहव्ययहेतवे ॥४॥

किमर्थं मुच्यते व्यर्थमात्मीयैकाऽपि काकिनी ।
इति ध्यात्वा नकुलकं क्वचित् स्थाने जुगोप सः ॥५॥

स्वयं पराङ्मुखो मुष्टिं बद्ध्वाऽधावत तत्कृते ।
न प्रापत् काकिनीं तत्र हृतां केनापि गच्छता ॥६॥

दृष्टो नकुलकस्तत्र क्षिप्यमाणश्च केनचित् ।
अग्राहि चोभयभ्रष्टस्तमप्राप्याभवत् स तु ॥७॥

गृहं गतः शुशोचैवं मानुष्यसुखलम्पटः ।
पापानि तत्कृते कुर्वन् हारयेद् दिव्यसम्पदः ॥८॥

इति **काकिनी**कथा ॥

तथा **अपथ्यम**हित**माम्रकमा**म्रफलं **भुक्त्वा राजा राज्यं तु**रेवार्थे **हारयेदेवा**त्राम्र-दृष्टान्तस्तथाहि—

नृपस्य कस्याप्यत्याम्राशनादासीद् विशूचिका ।
महारसादिकष्टेनाचिकित्सन् भिषजश्च तम् ॥१॥

अभाणि च नृपो वैद्यैस्त्वं खादिष्यसि तानि चेत् ।
दृढरोगभरोऽसाध्यस्तदा नूनं मरिष्यसि ॥२॥

तदभ्युपेत्य भूपालोऽप्याम्रप्रियतयाऽऽत्मनः ।
धीमानाम्रवनं सर्वं स्वेदेशादुदखानयत् ॥३॥

अन्यदाऽश्वारूढमन्त्रियुगारूह्य हयं नृपः ।
गन्तुं प्रववृते यावत् तावद् वेगेन वायुवत् ॥४॥

धावमानौ महाटव्यामायातां तौ हयौ क्षणात् ।
स्वयं श्रमेण स्थितयोस्तयोरुत्तेरतुश्च तौ ॥५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सच्छायं फलितं चूतममात्यो वीक्ष्य भूधवम् ।
प्राहापथ्यतरोरस्मादपसृत्योपविश्यते ॥६॥

सम्भाव्यते यतोऽनर्थः कश्चिन्नियतमात्मनः ।
छायाऽप्यस्य परीहार्या धीमता दीर्घदर्शिना ॥७॥

नृपोऽप्याह दृढीभूतं मनो मे नैव रज्यते ।
योगिनः स्त्रीष्विवाम्रेषु स्वं सात्म्यमनुपश्यतः ॥८॥

इत्युक्त्वा वार्यमाणोऽपि मन्त्रिणा तत्तरोरधः ।
उपविश्याम्रसौन्दर्यमपश्यन्नयनोत्सवम् ॥९॥

राजन् ! नापथ्यवाञ्छाऽपि विधेयेत्यनुशास्य तम् ।
मन्त्री तृषातुरे राज्ञि जलार्थमगमद् वने ॥१०॥

अथ वायुवशात् पेतुः फलानि नृपतेः पुरः ।
अशक्नुवंस्तु स्वं रोद्धुं तान्यादत्त स्वपाणिना ॥११॥

स्पृष्ट्वा दृष्ट्वा तथाऽऽघ्राय स्मरन्नपि हितं वचः ।
यमभूतग्रस्त इव नाचिन्तयदिदं हृदि ॥१२॥

क्षणसौख्यकरास्वादादाम्राहारात् सदा सुखम् ।
आसमुद्रान्तभूराज्यं दुष्प्रापं हारयिष्यते ॥१३॥

ततो गृद्धिगृहीतात्मा किञ्चिदास्वाद्य तत्फलम् ।
तद्रसं चालयन् वक्त्रे चिरमस्थान्महीपतिः ॥१४॥

अथागच्छन्तमीक्षित्वाऽमात्यमस्मिन्नपश्यति ।
आम्रास्वादं क्षमः कर्तुं तत् कुर्वेऽस्मिन्ननागते ॥१५॥

द्रुतं द्रुतमिति ध्यात्वाऽभक्षयत् तत्फलानि सः ।
दधावे सचिवो यावत् पूत्कुर्वन् वारयन् नृपम् ॥१६॥

अपथ्योत्थमहादोषात् तावदत्यज्यतासुभिः ।
सचिवस्तु पुरं गत्वा राज्यचिन्तामवर्तयत् ॥१७॥

***एवं यत् तत्त्वतो दुःखं स्वल्पकं मानुषं सुखम् ।***
***बालिशास्तत्कृते चित्रं हारयन्ति परं सुखम् ॥ १८॥***

इत्या**म्र**कथा ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दार्ष्टान्तिकयोजनामाह—

**एवं माणुस्सगा कामा देवकामाण अंतिए ।**
**सहस्सगुणिया भुज्जो आउं कामा य दिव्विया ॥१२॥**

**व्याख्या—एवमिति** काकिण्याम्रकतुल्या **मानुष्यकाः कामा** विषया **देवकामानामन्तिके** पार्श्वे किमित्येवमत आह—**सहस्रगुणिताः** सहस्रैस्ताडिता **भूयो** बहून् वारानायुर्जीवितं **कामाश्च**शब्दात् शब्दादयो **दिव्यका** देवसम्बन्धिनो मनुष्यायुःकामापेक्षयेति प्रक्रमः । इह च दिव्यकामानामतिभूयस्त्वेन कार्षापणसहस्रराज्यतुल्यता सूचितेति । आयुर्ग्रहणेन तत्रत्यप्रभावादीनामपि मनुष्यापेक्षया सहस्रगुणितत्वमवसेयम् ॥१२॥

मनुष्यकामानां काकिण्याम्रफलोपमानतां भावयति—

**अणेगवासानउया जा सा पन्नवओ ठिई ।**
**जाणि जीयंति दुम्मेहा ऊणे वाससयाउए ॥१३॥**

**व्याख्या**—अनेकानि च तानि वर्षनयुतानि चा**नेकवर्षनयुतान्य**र्थात् पल्योपमसागरोपमाणि 'प्राकृतत्वात् सकारस्य दीर्घः पुंस्त्वं च' । नयुतानयनोपायस्त्वयं चतुरशीतिवर्षलक्षाः पूर्वाङ्गं, तदेव पूर्वाङ्गेन गुणितं पूर्वं, पूर्वं च चतुरशीतलक्षगुणितं नयुताङ्गम्, तच्चापि चतुरशीतिलक्षाहतं नयुतमिति । कैवमुच्यते ? इति शिष्यं प्रत्याह—**या सा** भवतामस्माकं च प्रतीता, प्रज्ञा क्रियापूर्वकं प्रकृष्टं ज्ञानम् ।

**"तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः ।**
**तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुमिति ?"** ॥१॥

ततः सा विद्यते यस्य स प्रज्ञावान् तस्य **प्रज्ञावतो** ज्ञानक्रियावतः **स्थिति**र्देवभवायूरूपा । तानि च कीदृशानीत्याह-**यान्य**नेकवर्षनयुतानि दिव्यस्थितेर्दिव्यकामानां च विषयभूतानि **जीयन्ते** आर्षत्वात् हारयन्ते तद्धेत्वनुष्ठानासेवनेन **दुर्मेधसो** दुर्धियो विषयैर्जिता जीवा इति । कदा ते तानि जीयन्ते इत्याह—**ऊने वर्षशतायुषि** । प्रभूते ह्यायुषि प्रमादेनैकदा हारितान्यपि पुनरर्जयेरन् । अस्मिंस्तु संक्षिप्तायुष्येकदा हारितानि हारितान्येव । श्री**वीर**तीर्थे प्रायो न्यूनवर्षशतायुषामेवोत्पत्तेः । को भावो द्रमकराजसदृशा दुर्मेधसो दुर्धियः काकिण्याम्रफलोपमाल्पतरमनुष्यायुःकामार्थे कार्षापणसहस्रराज्यतुल्यान् प्रभूतदेवायुःकामान् हारयन्तीति ॥१३॥

व्यवहारोपमामाह—

**जहा य तिन्नि वणिया मूलं घेत्तूण निग्गया ।**
**एगोत्थ लहए लाभं एगो मूलेण आगओ ॥१४॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**एगो मूलं पि हारित्ता आगओ तत्थ वाणिओ ।**
**ववहारे उवमा एसा एवं धम्मे वियाणह ॥१५॥**

**अनयोर्व्याख्या**—'**यथे**ति दृष्टान्तार्थे, **चः** समुच्चये' । **त्रयो वणिजो मूलं** नीवीं **गृहीत्वा निर्गताः** स्वस्थानात् प्रस्थिताः, स्थानान्तरं च प्राप्तास्त**त्रैको** वणिक्कला-कुशलोऽ**त्रै**तेषु मध्ये **लभते लाभं** विशिष्टद्रव्योपचयलक्षणमेकस्तेष्वेवान्यो नातिनिपुणः स **मूलेन** मूलधनेन स्वगृहं **प्राप्त** इति । **एको** द्यूत–मद्यादिष्वत्यन्तमासक्तो **मूलमप्या**स्तां नवं **हारयित्वाऽऽगतः** स्वस्थानमिति । **तत्र** तेषु मध्ये **वाणिजो** वणिक् तथाहि—

एकस्येभ्यस्य वणिजो युवानस्तनुजास्त्रयः ।
बुद्धि–पुण्य–प्रयत्नादि पिता तेषां परीक्षितुम् ॥१॥

अदाद् दशशतं कार्षापणानां स पृथक् पृथक् ।
तेन ते भणिताश्चैवं मूलमेतददायि वः ॥२॥

कालेनैतावतैतव्यं व्यवहृत्य सुतोत्तमाः ! ।
लज्जायै पैत्रिकश्रीणां भोगो युवतनूभुवाम् ॥३॥

इति श्रुत्वा त्रयोऽप्येते पैत्रिकादेशतत्पराः ।
प्रतस्थिरे पुरान्नीवीं तामादायार्जनोत्सुकाः ॥४॥

तत्रैकेन व्यचिन्त्येवं वयं तातस्य वल्लभाः ।
श्रीरपि प्रचुरा गेहे किन्तु सोऽस्मान् परीक्षते ॥५॥

रत्नस्येव सुतस्यापि प्राक् परीक्षां विदुर्बुधाः ।
आदृत्य च ततो योग्याधिकारविनियोजनम् ॥६॥

तस्मात् केनाप्युपायेनार्जित्वाऽऽशु प्रचुरं धनम् ।
मया तातः समावर्ज्यः पुत्रकृत्यं ह्यदः परम् ॥७॥

चञ्चापुरुषतुल्यो हि पुरुषार्थमसाधयन् ।
पुरुषः स्यात् ततः काले पुरुषस्तं प्रसाधयन् ॥८॥

*"प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् ।*
*तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति ?" ॥९॥*

इति निश्चित्य कुत्रापि सुधीर्महति पत्तने ।
गत्वा व्यवहरन् सम्यगनल्पानधिकव्ययः ॥१०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अशेषव्यसनत्यागी दक्षो मधुरवाक् शुचिः ।
व्यवसायादसौ तत्राभवद् विपुललाभवान् ॥११॥

द्वितीयस्तु तदा पुत्र इत्यन्तः पर्यभावयत् ।
प्रभूतमपि तातस्य तावत् सुकृतिनो धनम् ॥१२॥

अचिरात् परमायाति निष्ठां चेन्नार्ज्यते नवम् ।
तन्मूलरक्षया लाभं भुञ्जानोऽहं लभे सुखम् ॥१३॥

चिन्तयित्वेति कुत्रापि पुरे गत्वा स्वमर्जयन् ।
भुञ्जानो लाभतो भोगान् यत्नान्मूलमरक्षयत् ॥१४॥

तार्तीयीकस्त्वथो दध्यौ यावन्नोऽस्ति धनं पितुः ।
धनदस्याप्यसम्भाव्यं तत् तावत् प्रायशो गृहे ॥१५॥

अहो ! वार्धक्ययोगेन पितुर्बुद्धिविपर्ययः ।
वयं बाल्येऽपि यत् तेन प्रेषिता विषयान्तरे ॥१६॥

*सत्यमुक्तं हि शास्त्रेषु प्रस्थास्नोर्यमवेश्मनि ।*
***वार्धक्ये हीयते सर्वं तृष्णैका तरुणायते ॥१७॥***

ममार्जितममी द्रव्यं मा भुञ्जतां तनूद्भवाः ।
इत्यस्मान् जनको गेहादपीष्टान् निरवासयत् ॥१८॥

*यदा नरस्यातिक्रान्ताः पञ्चाशत् परिवत्सराः ।*
*रूपाज्ञौदार्य-ह्री-सत्त्व-प्रयत्ना यान्त्यलं तदा ॥१९॥*

तत् किमर्थार्जनक्लेशैरिति ध्यात्वा क्वचित् पुरे ।
स्थित्वा द्रव्येण तेनायं विलासानभुञ्जद् भृशम् ॥२०॥

द्यूतेन वेश्यया मद्य-मांसाशन-विचेष्टितैः ।
तेन स्वल्पेन कालेन भुक्त्वा द्रव्यं समापितम् ॥२१॥

यथोक्तकाले ते सर्वे सम्प्राप्ताः पितुरन्तिके ।
तत्र यश्छिन्नमूलोऽभूत् स गृहे किङ्करीकृतः ॥२२॥

द्वितीयस्य पुनर्वस्तुनिक्षेपोत्क्षेपकारिणः ।
न दातव्यं न भोक्तव्यं स्वत इत्यधिकारिता ॥२३॥

प्रथमस्याखिलं वेशमस्वामित्वं जनको व्यधात् ।
तस्यैवाज्ञा व्यये भोगे दाने सद्भाग्यशालिनः ॥२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अन्ये प्राहुरिदं त्रयो हि वणिजो द्रव्यार्जनायोद्यतास्,
तत्रैको शुभकर्मणा व्यपगते मूलेऽगमत् प्रेष्यताम् ।
मूलेनापि सुरक्षितेन च परो भूयो धनान्यर्जयद्;
भाग्यस्यातिशयात् प्रवृद्धकमलोऽन्योऽभूत् परं सौख्यभाक् ॥२५॥

इति व्यवहारोदाहरणम्, उपनयमाह—**व्यवहारे** व्यवहारविषया **उपमा** दृष्टान्त **एषा** पूर्वोक्ता । **एवं** वक्ष्यमाणन्यायेन **धर्मे** धर्मविषयामेनामेवोपमां **विजानीता**वबुध्यध्वमिति गाथाद्वयार्थः ॥१४-१५॥

कथमित्याह—

**माणुसत्तं भवे मूलं लाभो देवगई भवे ।**
**मूलच्छेएण जीवाणं नरग-तिरिक्खत्तणं धुवं ॥१६॥**

**व्याख्या—मानुषत्वं भवेत्** स्यान्**मूलं** स्वर्गापवर्गात्मकं तदुत्तरोत्तरलाभहेतुत्वेन । तथा लाभ इव **लाभो** मनुजगत्यपेक्षया विषयसुखादिभिर्विशिष्टत्वाद् **देवगतिर्भवेत्** । एवं स्थिते किमित्याह-**मूलच्छेदेन** मनुष्यगतिहान्यात्मकेन **जीवानां नारकत्वं तिर्यक्त्वं** च दुर्गतिरूपं **ध्रुवं** निश्चितं भवेदिति शेषः । अत्र संसारित्रयसम्प्रदायः—

*"संसारिणस्त्रयः सत्त्वाः प्राप्ता मानुष्यकं भवम् ।*
*तत्रैको मध्यमारम्भपरिग्रहपरायणः ॥ १॥*

*मार्दवादिगुणोपेतः कालं कृत्वाऽऽर्जवाशयः ।*
*कार्षापणसहस्राभं नृत्वमाप्नोति तत् पुनः ॥ २॥*

*द्वैतीयीकः पुनः सम्यग्दर्शनज्ञानसुस्थितः ।*
*सरागसंयमेनाप देवत्वं लाभसन्निभम् ॥ ३॥*

*तृतीयः प्राप हिंसादिसावद्याचारयुक् पुनः ।*
*तिर्यङ्नरकभावं स च्छिन्नमूलवणिक् यथा" ॥ ४॥* ॥१६॥

एतदेवाह—

**दुहओ गई बालस्स आवई वहमूलिया ।**
**देवत्तं माणुसत्तं च जं जिए लोलयासढे ॥१७॥**

**व्याख्या—द्विधा** द्विप्रकारा **गतिः** सा च प्रक्रमान्नरकगतिस्तिर्यग्गतिश्च **बालस्य** रागाद्याकुलस्य स्यादिति गम्यम् । तत्र च गतस्य 'आवई'त्ति **आपत्** सा कीदृशी **वध**स्ताडनं **मूलमा**दिर्यस्याः **सा** तथा । मूलग्रहणाच्छेद-भेदातिभारारोपणादिपरिग्रहः ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लभन्ते हि नरक-तिर्यक्षु जीवाः स्वकर्मवशतो विविधा आपदः । उक्तञ्च—

**"[1]छिज्जंति य भिज्जंति य सत्थेहि य अग्गिणा य डज्झंति ।**
**सीउण्हेहिं विलिज्जंति जंति पीलंति नेरइया ॥१॥**

**छिंदणं भिंदणं भारारोवणं दमणंकणं ।**
**सीउण्हखुप्पिवासाओ सहंते तिरिया दुहं" ॥२॥**

किमित्येवमत आह—**देवत्वं मानुष्यत्वं च यद्** यस्मा**ज्जितो** हारितो लोलता मांसादिलाम्पट्यं तद्याप्तत्वात् सोऽपि **लोलतेत्युक्तः** । **शठो** विश्वस्तवञ्चकः ततो द्वन्द्वः । इह लोलता पञ्चेन्द्रियवधाद्युपलक्षणम् । स च नरकहेतुर्यथोक्तम्—

**"[2]महारंभयाए महापरिग्गहयाए कुणिमाहारेणं ।**
**पंचिंदियवहेणं जीवा नरयाउं कम्मं बंधंति" ॥**

शठ इति शाठ्यं तच्च तिर्यग्गतिनिमित्तं यतो "**माया तैर्यग्योनस्य**" इति । अत्रायमाशयो यतोऽयं बालो लोलतया शाठ्येन च मनुजत्वं मूलरूपं देवत्वं च लाभरूपं हारितोऽतोऽस्य तच्छेदेन नरकत्वं तिर्यक्त्वं च भवतीति ॥१७॥

मूलच्छेदमेवाह—

**तओ जिए सई होइ दुविहं दुग्गइं गओ ।**
**दुल्लहा तस्स उम्मग्गा अद्धाए सुचिरादवि ॥१८॥**

**व्याख्या—ततो** देवत्वमनुजत्वजया**ज्जित** एव 'सइ'त्ति **सदा भवति द्विविधां** नरकतिर्यग्रूपां **दुर्गतिं गतः** प्राप्तः । सदा जितत्वमेवाभिव्यञ्जयन्नाह-**दुर्लभा तस्य** हारितदेवत्वमनुजत्वस्य बालस्य 'उम्मग्ग'त्ति सूत्रत्वा**दुन्मज्या** दुर्गतिनिर्गमनस्वरूपा कदा **अद्धायां** कालेऽर्थादागामिन्यां **सुचिरादपि** प्रभूतायामपि । इदं बाहुल्यादुक्तमन्यथा हि केचिदेकभवेनैव सिद्धयन्त्यपीति ॥१८॥

अथ पश्चानुपूर्व्या मूलहारिणः प्रागुपनयमुक्त्वा मूलप्रवेशोपनयमाह—

---

१. छिद्यन्ते च भिद्यन्ते च शस्त्रैश्चाग्निना च दह्यन्ते ।
शीतोष्णैर्विलीयन्ते यन्त्रे पील्यन्ते नैरयिकाः ॥१॥
छेदनं भेदनं भारारोपणं दमनाङ्कनम् ।
शीतोष्णक्षुत्पिपासाः सहन्ते तिर्यञ्चो दुःखम् ॥२॥

२. महारम्भतया महापरिग्रहतया मांसाहारेण ।
पञ्चेन्द्रियवधेन जीवा नरकायुःकर्म बध्नन्ति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**एवं जियं सपेहाए तुलिया बालं च पंडियं ।**
**मूलियं ते पवेसंति माणुसं जोणिमिंति जे ॥१९॥**

**व्याख्या—एवमुक्त**नीत्या **जितं** लोलतया शाठ्येन च देवत्वमनुजत्वे हारितं बालं **संप्रेक्ष्य** सम्यगालोच्य । तथा **तोलयित्वा** गुणदोषवत्तया परिभाव्य **बालं** चास्य भिन्नक्रमत्वात् **पण्डितं च** तद्विपरीतमर्थान्मनुष्यदेवगतिगामिनम् । तथा च **मौलिकं** मूलधनं **ते प्रवेशयन्ति** मूलप्रवेशकवणिक्तुल्यास्त इत्याशयः । **ये मानुषीं योनिमा-यान्त्या**गच्छन्ति बालत्वत्यागेन पण्डितत्वमासेवमाना इति ॥१९॥

यथाऽथ मानुषीं योनमायान्ति तथाऽऽह—

**वेमायाहिं सिक्खाहिं जे नरा गिहि सुव्वया ।**
**उविंति माणुसं जोणिं कम्मसच्चा हु पाणिणो ॥२०॥**

**व्याख्या—विमात्राभि**र्विविधपरिमाणाभिः **शिक्षाभिः** प्रकृतिभद्रकत्वादिरूपाभि-रुक्तं **चौपपातिको**पाङ्गे—

**"[१]चउहिं ठाणेहिं जीवा मणुयाउयं बंधंति तं जहा ।**
**पगइभद्दयाए, पगइविणीययाए, साणुक्कोसयाए अमच्छरियाए त्ति" ॥**

**ये नरा गृहिणः सुव्रताः** सत्पुरुषव्रता देवगतिहेतुश्रुतोक्तव्रतपालनस्यासत्त्वात् ते हि प्रकृतिभद्रकत्वाद्यभ्यासाद् विपद्यपि न विषीदन्ति, सदाचारं नोल्लङ्घन्ते । यतः—

**"विपद्युच्चैः स्थेयं पदमनुविधेयं हि महतां,**
**प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।**
**असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यस्तनुधनः;**
**सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्" ॥१॥**

ते किं स्युरित्याह—**उपयान्ति मानुषीं योनिं** सत्यान्यवन्ध्यफलानि कर्माणि ज्ञाना-वरणीयादीनि येषां ते सत्यकर्माणः । प्राकृतत्वात् कर्मशब्दस्य प्राग् निपातः **कर्मसत्या** हुर्यस्मात् **प्राणिनो** निरुपक्रमकर्मापेक्षमिदमिति ॥२०॥

लब्धलाभोपनयमाह—

**जेसिं तु विउला सिक्खा मूलियं ते अइच्छिया ।**
**सीलवंता सविसेसा अदीणा जंति देवयं ॥२१॥**

---

१. चतुर्भिः स्थानैर्जीवा मनुजायुर्बध्नन्ति तद् यथा—
प्रकृतिभद्रतया प्रकृतिविनीततया, सानुक्रोशतया, अमत्सरितयेति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—येषां तु पुनर्विपुला** निःशङ्कितत्वादिसम्यक्त्वाचाराणुव्रत-महाव्रतादि-विषयत्वेन विस्तीर्णा **शिक्षा** ग्रहणासेवनारूपाऽस्तीति गम्यम् । **मौलिकं** मूलधनमिव मानुषत्वं **ते** 'अइच्छिय'त्ति **अतिक्रम्योल्लङ्घ्य शीलवन्तः** सदाचाराणुव्रतादिमन्तः । सह विशेषेणोत्तरोत्तरगुणप्रतिपत्तिलक्षणेन वर्तन्ते इति **सविशेषाः** । अत **एवादीनाः** परीषहोप-सर्गादिसम्भवेऽपि न दैन्यभाजो **यान्ति देवत्वं** देवभावं साम्प्रतं विशिष्टसंहनना-भावान्मुक्त्यभावाद् देवत्वमुक्तमिति ॥२१॥

उपदेशमाह—

**एवमद्दीणवं भिक्खुं अगारिं च वियाणिया ।**
**कहन्नु जिच्चमेलिक्खं जिच्चमाणो न संविदे ? ॥२२॥**

**व्याख्या—एवम**मुना न्यायेन लाभान्वित**मदैन्यवन्तं भिक्षुं** यति**मगारिणं** गृहस्थं च **विज्ञाय** विशेषेण तथाविधशिक्षावशाद् देवमनुजगतिगामित्वलक्षणेनावबुध्य यतमान इति शेषः । **कथं** कथञ्चिदित्यर्थो **नु**र्वितर्के 'जिच्चं'ति सूत्रत्वा**ज्जीयेत** हार्येत विवेकी कषायो-दयादिभिरिति गम्यम् । 'एलिक्खं'ति कथं च **ईदृक्षं** देवत्वलक्षणं लाभं **जीयमानो** हार्यमाणः कषायादिभिः 'न संविदे'त्ति प्राकृतत्वान्न **संवित्ते** न जानीते ? यथाऽहमेभिर्जीय इति । अपि तु जानीत एव ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च संविदानश्च यथा देवगतिरूपं लाभं न जीयेत कषायादिभिस्तथा यतेतेति भावः ॥२२॥

समुद्रदृष्टान्तमाह—

**जहा कुसग्गे उदगं समुद्देण समं मिणे ।**
**एवं माणुस्सगा कामा देवकामाण अंतिए ॥२३॥**

**व्याख्या—यथा कुशाग्रे** दर्भकोटावुद**कं** जलं **समुद्रेण** तात्स्थ्यात् तद्व्यपदेश इति समुद्रजलेन **समं** तुल्यं **मिनुयात्** परिच्छिन्द्यात् । तथा किमित्याह—**एवं मानुष्यकाः कामा देवकामानामन्तिके** पार्श्वे कृता इति शेषः । को भावो यथाऽज्ञः कुशाग्रे जलबिन्दु-मालोक्य समुद्रवन्मन्यते तथा मूढश्चक्रवर्त्यादिकामान् देवकामोपमान् मन्यते तत्त्वतस्तु कुशाग्रोदबिन्दुसमुद्रवन्मनुष्यदेवकामानां महदन्तरमिति ॥२३॥

निगमयन्नुपदेशमाह—

**कुसग्गमित्ता इमे कामा सन्निरुद्धंमि आउए ।**
**कस्स हेउं पुरा काउं जोगक्खेमं न संविदे ॥२४॥**

**व्याख्या—कुशाग्रस्थजलबिन्दुमात्रा** दर्भाग्रबुद्बुदतुल्या **इमे** प्रत्यक्षाः **कामा**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मनुष्यसम्बन्धिनः **सन्निरुद्धे आयुषि** न पल्योपमादिवत् द्राघीयसि । अनेन मनुष्यायुषोऽल्पतया सोपक्रमतया वा कामानामप्यल्पत्वं समृद्ध्याद्यल्पतोपलक्षणमिदम् । दिव्यकामानां तु जलधितुल्यत्वमर्थादुक्तम् । 'कस्स हेउ'त्ति प्राकृतत्वात् **कं हेतुं पुरस्कृत्या**श्रित्यालब्धस्य च धर्मस्य लाभो योगो लब्धस्य च तस्य पालनं क्षेमस्तयोर्द्वन्द्वे **योगक्षेमं तन्न संवित्ते** न जानीते जन इति शेषः । तदसंवित्तौ हि मनुष्यविषयाभिष्वङ्ग एव हेतुस्ते च धर्मप्राप्यभोगापेक्षया कुशाग्रबिन्दुप्राया एव ततस्तत्त्यागाद् विषयाभिलाषिणापि धर्मे एव यतितव्यमिति । इत्थं दृष्टान्तपञ्चकमुक्तम् । तत्र प्रथममुरभ्रदृष्टान्तेन भोगानामायतावपायबहुलत्वम् १। काकिण्याम्रफलदृष्टान्तेन तत्तुच्छत्वम् २-३। वणिग्व्यवहारोदाहरणेनायव्ययतोलना ४। साऽपि च कथं कर्तव्येति समुद्रदृष्टान्तस्तत्र दिव्यकामानां समुद्रजलोपमत्वम् ५। तथा च तदुपार्जनं महानायोऽनुपार्जनं तु महान् व्यय इति दर्शितमेव ॥२४॥

इह योगक्षेममासंवेदने कामानिवृत्तिरेव स्यादिति तद्दोषमाह—

**इह कामानियट्टस्स अत्तट्ठे अवरज्झई ।**
**सुच्चा नेयाउयं मग्गं जं भुज्जो परिभस्सई ॥२५॥**

**व्याख्या—इह** मनुष्यत्वे जिनमते वा प्राप्ते कामेभ्योऽनिवृत्तोऽनुपरतः **कामानिवृत्तस्तस्यात्मार्थः** स्वर्गादि**रपराध्यति** धातुनामनेकार्थत्वान्नश्यति दुर्गतिगमनेन । कथं कामानिवृत्तिरित्याह—**श्रुत्वोप**लक्षणात् प्रतिपद्य च **नैयायिकं मार्गं** सम्यग्दर्शनादिमुक्तिपथं **यद्** यस्माद् **भूयः** पुन**र्भ्रश्यति** कामानिवृत्तेरिति शेषः । जिनागमश्रवणात् कामनिवृत्तोऽपि गुरुकर्मत्वात् प्रतिपतति । ये श्रुत्वाऽपि न प्रतिपद्यन्ते न शृण्वन्ति च ते कामानिवृत्ता एवेति भावः ॥२५॥

कामनिवृत्तस्य गुणमाह—

**इह कामनियट्टस्स अत्तट्ठे नावरज्झई ।**
**पूइदेहनिरोहेणं भवे देवे त्ति मे सुयं ॥२६॥**

**व्याख्या—इह** नरत्वे **कामनिवृत्तस्यात्मार्थः** स्वर्गादि**र्नापराध्यति** न भ्रश्यति । यतः **पूतिः** क्वथितो **देहो**ऽर्थादौदारिकं शरीरं तस्य **निरोधो**ऽभाव**स्तेन भवेत्** स्यात् कामनिवृत्तो यति**र्देवः** सौधर्मादिषु सिद्धो वा **इति मे** मया **श्रुतं** गुरुभ्य इति ॥२६॥

यदसावाप्नोति तदाह—

**इड्ढी जुई जसो वन्नो आउं सुहमणुत्तरं ।**
**भुज्जो जत्थ मणुस्सेसु तत्थ से उववज्जई ॥२७॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—ऋद्धिः** स्वर्णादिर्**द्युति**र्दीप्ति**र्यशः** पराक्रमजा प्रसिद्धि**र्वर्णो** गाम्भीर्यादिगुणश्लाघा गौरत्वादिर्वाऽऽयुर्जीवितं **सुख**मीप्सितावाप्तावाल्हादः । **अनुत्तरं** प्रधानमिति सर्वत्र योज्यम् । **भूयः** पुनस्तान्युत्तराणि भवन्ति **यत्र मनुष्येषु तत्र स उत्पद्यते** ॥२७॥

एवं कामानिवृत्तो बालो विपरीतस्तु पण्डित इत्यर्थादुक्तम् । अथानयोः स्वरूपं फलं चाह—

**बालस्स पस्स बालत्तं अहम्मं पडिवज्जिया ।**
**चिच्चा धम्मं अहम्मिट्ठे नरए उववज्जई ॥२८॥**

**धीरस्स पस्स धीरत्तं सव्वधम्माणुवत्तिणो ।**
**चिच्चा अहम्मं धम्मिट्ठे देवेसु उववज्जई ॥२९॥**

**अन्योर्व्याख्या—बालस्या**ज्ञस्य **पश्य** प्रेक्षस्व **बालत्वम्** । **अधर्मं** विषयासक्तिरूपं **प्रतिपद्या**ङ्गीकृत्य **त्यक्त्वा धर्मं** विषयनिवृत्तिरूप**मधर्मिष्ठो नरके**ऽन्यत्र दुर्गतौ **वोत्पद्यते । धीरो** धीमान् परीषहादिभ्योऽक्षोभ्यो वा **तस्य पश्य धीरत्वम्** । सर्वधर्मं क्षान्त्याद्यनुवर्तत इत्येवंशीलः **सर्वधर्मानुवर्ती तस्य** । कथमित्याह—**त्यक्त्वा अधर्मं** विषयाभिष्वङ्गं **धर्मिष्ठो** देवेषूत्पद्यते इति गाथाद्वयार्थः ॥२८-२९॥

यद् विधेयम्, तदाह—

**तुलियाण बालभावं अबालं चेव पंडिए ।**
**चइऊण बालभावं अबालं सेवई मुणी ॥३०॥ त्ति बेमि ॥**

**व्याख्या—तोलयित्वा** गुणदोषवत्तया परीक्ष्या **बालभावं** बालत्वं, **अबालं** भावप्रधानत्वादबालत्वम् । '**च**ः समुच्चये', **एवे**त्यनुस्वारलोपे एवमुक्तप्रकारेण **पण्डितस्त्यक्त्वा बालभावम्, अबालत्वं सेवते मुनि**रिति । **इति ब्रवीमी**ति पूर्ववत् ॥३०॥ ग्रं० २९४ अ० १६॥

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायाम्**
**उरभ्रीयं सप्तमध्ययनं समाप्तम् ॥७॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# अष्टमं कापिलीयमध्ययनम्

साम्प्रतं **कपिल**मुनिप्रणीततया कापिलीयाख्यमष्टममारभ्यते । इह प्रागध्ययने रसगृद्धित्याग उक्तः, स च निर्लोभस्यैव स्यादिति निर्लोभत्वाभिधायकस्यास्याध्ययनस्य प्रस्तावनाय **कपिल**र्षिचरित्रमुच्यते—

**कौशाम्ब्यां** पुरि भूपालो **जितशत्रुः** पुरोहितः ।
**काश्यपा**ख्योऽस्य सद्विद्यापारदृश्वाऽस्ति सम्मतः ॥१॥

**सुयशा**श्चास्य भार्याऽऽसीत् **कपिला**ख्यस्तयोः सुतः ।
आससाद मृतिं दैवात् तस्य बाल्येऽपि **काश्यपः** ॥२॥

अदात् तद्वृत्तिमन्यस्य ब्राह्मणस्य धराधिपः ।
निर्विद्यत्वेन बालस्य पौरोहित्यायवेदिनः ॥३॥

यथाऽभूत् **काश्यपः** पूर्वं तथाऽभूत् स द्विजस्ततः ।
अन्यदाऽगाद् धृतच्छत्रोऽश्वारूढ उपतद्गृहम् ॥४॥

तं तथाऽऽडम्बरं राजपथे यान्तं व्यलोकयत् ।
**कपिलाम्बा** ततः पत्युः स्मृत्वाऽरोदीन्मुहुर्मुहुः ॥५॥

निर्बन्धात् **कपिलो**ऽपृच्छत् ततोऽभाणीत् प्रसूरिति ।
पुरैवमेव त्वत्तात ऋद्धिविच्छर्द्दिवानभूत् ॥६॥

त्वमासीस्तस्य निर्विद्यः सुतस्तेन क्षितीशिता ।
अस्मिंस्तद्वृत्तिसर्वस्वं न्यधाद् विद्या हि कामधुक् ॥७॥

अहमप्यधीये विद्यामित्युक्ते तनुजन्मना ।
साऽवग् न मत्सरादत्र कोऽपि त्वां पाठयिष्यति ॥८॥

**श्रावस्तीं** व्रज तत्रास्ते **इन्द्रदत्तः** पितुः सुहृत् ।
मित्रपुत्रतया स त्वां पाठयिष्यत्यसंशयम् ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोऽभ्युपेत्य गिरं मातुस्तत्समीपमगाद् द्रुतम् ।
अवन्दत पदौ तस्य प्राञ्जलिश्चेदमब्रवीत् ॥१०॥

**काश्यपो** यो भवन्मित्रं विद्यापात्रं द्विजोऽभवत् ।
सुतस्तस्यास्मि विद्यार्थी भवन्मूलमुपागतः ॥११॥

तात ! विद्याप्रदानेनोपगृहाण प्रसीद माम् ।
**स्वपुत्रमित्रपुत्रेषु सतां स्नेहो न भिद्यते ॥१२॥**

**इन्द्रदत्त**स्तमालिङ्ग्याङ्गजन्मानमिवावदत् ।
विद्याऽध्ययनयत्नस्ते वत्स ! युक्तः श्रियां निधिः ॥१३॥

***परत्रामुत्र विद्या हि सर्वकल्याणहेतवे ।***
***निर्विद्यस्य विवेकेन हीनत्वात् पशुतैव हि ॥ १४ ॥***

वाङ्मयं सर्ववर्णेषु श्लाघ्यं विप्रे विशेषतः ।
तद्विना नैष लभते काणामपि वराटिकाम् ॥१५॥

तदधीयस्व सामग्री पुस्तिकाद्यखिलाऽस्ति मे ।
निःकलत्रतया किन्तु भोजनं नास्ति मे गृहे ॥१६॥

तदन्तरेणाध्ययनं न हि निर्वाहमश्नुते ।
ऐहिकामुष्मिके कार्ये परमाङ्गं हि भोजनम् ॥१७॥

उक्तञ्च—

**"आरोग्य-बुद्धि-विनयोद्यम-शास्त्ररागाः,**
**पञ्चान्तराः पठनसिद्धिकरा भवन्ति ।**
**आचार्य-पुस्तक-निवास-सहाय-वल्भाः;**
**बाह्यास्तु पञ्च पठनं परिवर्धयन्ति" ॥१८॥**

**कपिलः** प्राह पौरेभ्यो भिक्षामादाय नित्यशः ।
भोजं भोजमधीष्येऽह**मिन्द्रदत्त**स्ततोऽभणत् ॥१९॥

वत्स ! प्रतिगृहं भिक्षां भ्रमता साध्यते श्रमः ।
न तु विद्या न नैश्चिन्त्यं विनाऽसौ प्राप्यते यतः ॥२०॥

तत् त्वमागच्छ कोऽपीभ्यः प्रार्थ्यते भोजनाय ते ।
इत्युक्त्वा **शालिभद्र**स्य गृहे स **कपिलो**ऽगमत् ॥२१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गायत्र्याशिषमाधत्त वद विप्र ! प्रयोजनम् ।
इत्युक्ते श्रेष्ठिनौदार्यगुणपात्रेण सोऽभणत् ॥२२॥

मित्रसूरेष **कौशाम्ब्या** विद्यार्थ्युपमदागमत् ।
पाठयिष्याम्यहं विद्यां किन्तु मे नास्ति भोजनम् ॥२३॥

विद्योपग्रहमाधेहि तत् त्वं भुक्तिप्रदानतः ।
एवं हि ते महत् पुण्यं यत उक्तं विचक्षणैः ॥२४॥

**"पठति पाठयते पठतामसौ वसन-भोजन-पुस्तक-वस्तुभिः ।**
**प्रतिदिनं कुरुते य उपग्रहं स इह सर्वविदेव भवेन्नरः" ॥२५॥**

श्रेष्ठ्यपि प्रतिपेदे तद् भूदेवस्य हितं वचः ।
अथैष तद्गृहे भुङ्क्तेऽधीते च सततं द्विजात् ॥२६॥

नियुक्ता श्रेष्ठिना दासी पादशौचादिकर्मणि ।
**कपिल**स्याखिलां तप्तिं चक्रे च परिवेषणम् ॥२७॥

स हास्यवान् स्वभावेन युवा बहुविकारवान् ।
स्मरस्य दुर्जयत्वेन क्रमाद् दास्यामरज्यत ॥२८॥

साऽपि तत्रानुरक्ताऽभूदिति गाढानुरागयोः ।
तयोः कामवशित्वेन शून्ययोर्यान्ति वासराः ॥२९॥

दास्यभाणीदिमं नान्यस्त्वां विना मेऽस्ति वल्लभः ।
न किञ्चित् तव किन्त्वस्ति येन स्यान्मेऽम्बरादिकम् ॥३०॥

सद्भावस्तु त्वयि स्थायी तद्वासो मूल्यहेतवे ।
अन्याननुचरन्त्यै मे रुषितव्यं न हि त्वया ॥३१॥

तेनाप्यभ्युपजग्मे तद् रहः प्रीतिषु को हठः ? ।
स तु व्यग्रमना एव पपाठ प्रणयात् ततः ॥३२॥
**इन्द्रदत्तो**ऽथ तं प्राह किं शून्य इव लक्ष्यसे ? ।
वत्स ! नान्यमनस्कानां विद्याः सिध्यन्ति दुर्लभाः ॥३३॥

उक्तञ्च—

**"नानुद्योगवता न च प्रवसता मानं न चोत्कर्षता,**
**नालस्योपहतेन नान्यमनसा नाचार्यविद्वेषिणा ।**
**न भ्रूभङ्गकटाक्षसुन्दरमुखीं सीमन्तिनीं ध्यायता;**
**लोके ख्यातिकरः सतां बहुमतो विद्यागुणः प्राप्यते" ॥३४॥**

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

एषोऽनुशासितोऽपीति दासीप्रीतिं न चामुचत् ।
मदीयं सात्म्यमेवेदं गुरुमुत्तरयन्निति ॥३५॥

**इन्द्रदत्तो**ऽप्यदो वेद क्वचिद् रक्तोऽस्ति योषिति ।
नन्वयं नान्यथा भूयात् सचिन्ता जडतेदृशी ॥३६॥

विद्याऽर्थमागतो नार्यामन्वरज्यत मूढधीः ।
असावमृतपानार्थी विषभाण्डमुपाददे ॥३७॥

*क्षीराब्धौ हि घटः क्षिप्तः स्वयोग्यं लभते जलम् ।*
इत्युदासमनास्तस्मि**न्निन्द्रदत्तो**ऽप्यवर्तत ॥३८॥

अन्यदा तत्र दासीनां सम्प्राप्ते महसि क्वचित् ।
चिक्रीडुः कानने दास्यः स्रगम्बरविभूषिताः ॥३९॥

तदानीं तत्प्रिया दध्यौ निर्दैवेनामुना कृतम् ।
मया प्रेमाधुनाऽसौ मे कुतो दाता स्रगादिकम् ? ॥४०॥

बहिर्वृत्त्या यदन्येऽपि मयोपचरिता विटाः ।
ममैतत्प्रणयाधिक्यात् पश्याहो ! तेऽप्युदासिरे ॥४१॥

निर्धनेनागन्तुकेनाविचार्य प्रीतिराहिता ।
उपस्थिते क्वचित् कार्ये पश्चात्तापाय जायते ॥४२॥

इति चिन्तातुरां म्लानवदनां **कपिलो**ऽथ ताम् ।
वीक्ष्य पप्रच्छ भद्रेऽद्य चिन्तया स्वीकृताऽसि किम् ? ॥४३॥

साऽऽह दासीमहः श्वोऽस्ति ताम्बूलमपि नास्ति मे ।
ही ! भविष्यति मे प्रातः सखीमध्ये विगोपनम् ॥४४॥

वक्त्रे ममानयाऽधृत्या कुतः स्याच्छविरुज्ज्वला ? ।
श्रुत्वेति तद्वचः सोऽपि तद्दुःखमुकुरोऽभवत् ॥४५॥

साश्रुनेत्रस्ततोऽभाणि तयाऽसौ माऽधृतिं कृथाः ।
अमन्दे सत्यपि स्नेहे नासद्दातुं क्षमो जनः ॥४६॥

परमाकर्णयोपायं श्रेष्ठ्यत्रास्ति **धनावहः** ।
यस्तं वर्धापयेत् पूर्वं प्रभातेऽनागते परे ॥४७॥

माषकद्वितयं हैमं सोऽस्मै दत्ते महेच्छधीः ।
त्वं तथा कुरु मे तेन भावि वस्त्र-स्रगादिकम् ॥४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निशि सोऽथ न सुष्वाप मा यायात् कश्चनापरः ।
रात्रिशेषे घनेऽद्यापि तदर्थ्युत्थाय चाचलत् ॥४९॥

व्रजन्नारक्षकैश्चौर इत्यगृह्यत बन्धनैः ।
बद्ध्वा **प्रसेनजिद्भू**पसभां निन्येऽरुणोदये ॥५०॥

राजा तदाकृतिं वीक्ष्य नायं दस्युरिदं विदन् ।
उन्मोच्य बन्धनान्येनमपृच्छत् त्वं कुतोऽसि कः ? ॥५१॥

सोऽप्याचचक्षे सद्भावं का माया नृपतेः पुरः ? ।
भूधवोऽप्याह सन्तुष्टो यत् त्वं वाञ्छसि तद् ददे ॥५२॥

विमृश्य प्रार्थये राजन्नित्युक्त्वाऽनुमतिं नृपात् ।
आदायाशोकवनिकामेत्य ध्यातुमुपाक्रमत् ॥५३॥

यदर्थितप्रदो भूपः सुबह्वपि तदर्थये ।
स्वर्णमाषकयुग्मेन नालङ्कारादि सेत्स्यति ॥५४॥

तत् सुवर्णशतं प्रार्थ्यं यद्वैतन्मात्रतो मम ।
गेह-वाहन-यानाद्यो न सर्वो भाव्युपस्करः ॥५५॥

याच्यं हेमसहस्रं तदतोऽपि न भविष्यति ।
भविष्यड्डिम्भरूपाणां विवाहादिव्ययोऽखिलः ॥५६॥

मार्गयामि ततो लक्षमथवाऽतो भवेत् कथम् ? ।
दीनोद्धारादिकं बन्धुपोषणं कीर्त्युपार्जनम् ॥५७॥

कोटिं कोटिशतं कोटिसहस्रं राज्यमेव वा ।
तद् याचे ध्यातुरित्यादि निवृत्तिं नाप तस्य तृट् ॥५८॥

सत्कर्मणः परिपाकात् कस्याप्याकस्मिकादथ ।
तृष्णातिशयनिर्विण्णो विरागादित्यचिन्तयत् ॥५९॥

*"स्वर्ण-माषकयोः कार्ये प्राप्तस्यापि न मे मनः ।*
***कोट्यादौ लभते स्थैर्यमहो ! लीलायितं तृषः ॥६०॥***

मात्रादेशेन विद्याऽर्थमिहायातोऽस्मि यत् पुनः ।
ही ! दास्यामनुरक्तोऽस्मि तत् कियच्छोच्यतेतराम् ? ॥६१॥

विद्याऽऽयं विगणय्योच्चैरवधीर्य प्रसूमपि ।
औपाध्यायं हितं वाक्यं कुलं चोपेक्ष्य निर्मलम् ॥६२॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

विटैघैर्भुज्यमानायां यदस्यामपि योषिति ।
दोषज्ञोऽप्यभवं विप्रः किङ्कर्यामपि किङ्करः ॥६३॥

अहो ! मे बलवत् कर्म यत् सुधार्थ्यहमम्बुधिम् ।
प्राप्तोऽप्यभाग्यतः कालकूटस्यैवास्मि भाजनम् ॥६४॥

*गुरूणां गौरवं कीर्तिर्ह्रीर्वैराग्यमकार्यभीः ।*
*तावद् यावन्नरो नार्यां नात्यन्तमनुरागभाक् ॥६५॥*

असौ श्लाघ्यश्च सत्कर्मा शिवमार्गस्थितोऽप्यसौ ।
सात्त्विकोऽसौ न यो नार्यां रागवान् स्यात् कथञ्चन ॥६६॥

एकं तावदकृत्यं तद् दास्यां यन्मे भुजङ्गता ।
अकृत्यमपरं त्वेतल्लोभाब्धौ यन्निमग्नवान् ॥६७॥

***पर्वतप्रायहेमादिप्राप्तावपि न लोभिनः ।***
***सन्तोषसुखलेशोऽपि दुष्पूरस्य समुद्रवत् ॥६८॥***

तदलं काञ्चनौघेन विषयैरप्यलं मम ।
प्रतिबन्धो न मे युक्तः प्राप्ते वस्तुन्यनेकशः" ॥६९॥

इत्यादि भावयन् जातिं स्मृत्वाऽबुध्यत स स्वयम् ।
कृतलोचः साधुलिङ्गं देवतादत्तमग्रहीत् ॥७०॥

उपराजमथायातं नृपोऽवक् किमचिन्तयः ? ।
विस्तारं स्वतृषः सोऽपि कथयित्वेदमभ्यधात् ॥७१॥

**"[१]जहा लाहो तहा लोहो लाहा लोहो पवड्ढए ।**
**दोमासकणयं कज्जं कोडीए वि न निट्ठियं" ॥७२॥**

भूपो बभाण सन्तुष्टः स्वाधीनाः कोटयोऽपि मे ।
ता यथेच्छमुपादाय भुङ्क्ष्व भोगान् मनीषितान् ॥७३॥

**कपिलः** प्राह पर्याप्तं स्वेनासन्तोषहेतुना ।
सन्तोषसुखमादेयं त्यक्तसङ्गस्य मेऽधुना ॥७४॥

राजन् ! विनश्वरं विश्वं विश्वमालोकयन्नपि ।
मोहनिद्रां विमुच्याशु किं न जागर्षि तत्त्वतः ? ॥७५॥

---

१. यथा लाभस्तथा लोभो लाभाल्लोभः प्रवर्धते ।
द्विमाषकनकं कार्यं कोट्याऽपि न निष्ठितम् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्ष्माप ! साम्प्रतदर्शी त्वं न विमर्ष्टाऽस्यनागतम् ।
यत् तुच्छान् नोज्झसे भोगान् परिणामे सुदारुणान् ॥७६॥

एवमाद्युपदिश्यैष धर्मलाभ्य धरेश्वरम् ।
निर्ययौ समितीर्गुप्तीर्दधानो व्यहरद् भुवि ॥७७॥

तस्योग्रतपसस्तीव्रब्रह्मणो निरहङ्कृतेः ।
निर्ममस्यासहायस्यास्खलितव्रतधारिणः ॥७८॥

अप्रमत्तस्य षण्मासपर्यायस्य महामुनेः ।
प्रकाशकं समुत्पेदे **कपिलस्यास्य** केवलम् ॥७९॥ **युग्मम्**

अनुराजगृहं यातोऽरण्येऽष्टादशयोजने ।
तस्करा **बलभद्रा**द्याः ख-ख-बाणमिताः (५००) पथि ॥८०॥

अरौत्सुरस्य पन्थानं प्राहुश्चास्मान् न वेत्सि किम् ? ।
यन्निःशङ्कमिहायातो वह्नौ वातेरितैधवत् ॥८१॥

प्रबोधं प्रविदन्नेषां बभाणैष महाशयः ।
वनदावानलाद् भीताऽध्वानं **गङ्गा**ऽपि किं त्यजेत् ? ॥८२॥

अरे ! धृष्टोऽयमित्युक्त्वाऽथैष निन्ये नियन्त्रितः ।
उपसेनापतौ सर्वे परितस्तेऽवतस्थिरे ॥८३॥

ग्राह्यं नास्मात् किमप्यस्ति तद् दृश्यं कौतुकं क्षणम् ।
इति सेनापतिः स्माह नृत्तयेत्युन्नियन्त्र्य तम् ॥८४॥

सोऽप्याह वादको नास्ति तेऽथासंस्तालकुट्टकाः ।
सोऽपि नर्तितुमारेभे अधुवेत्याद्यमुच्चरन् ॥८५॥

नृत्यंस्तारस्वरं गायत्युच्चैर्ध्रुवकमद्भुतम् ।
तदन्तरे बहून् श्लोकान् वैराग्योद्भेदकान् पठन् ॥८६॥

केचित् प्रीता द्वितीयेन केचिदन्येऽपरैरपि ।
श्लोकैस्ते प्रत्यबुध्यन्त चौराश्च प्राव्रजन् समे ॥८७॥

तत्पञ्चशतचौरर्षियुक्तः **कपिल**केवली ।
विजह्रे तन्निगीर्णाऽदोऽध्ययनार्थः प्रपञ्च्यते ॥८८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तद्यथा—

**अधुवे असासयंमी संसारंमि दुक्खपउराए ।**
**किं नाम हुज्ज तं कम्मयं जेणाहं दुग्गइं न गच्छेज्जा ॥१॥**

**व्याख्या—अध्रुवे** एकास्पदाप्रतिबद्धे **अशाश्वते** अनित्ये सर्वमिह हि राज्याद्यशाश्वतमेव । तथाऽऽह **हारिल्लवाचकः**—

**"चलं राज्यैश्वर्यं धनकनकसारः परिकरो,**
**नृपात् तद् वाल्लभ्यं चलममरसौख्यं च विपुलम् ।**
**चलं रूपारोग्यं चलमिह वरं जीवितमिदं;**
**जनो दृष्टो योऽसौ जनयति सुखं सोऽपि चपलः"** ॥१॥

क्व ? **संसारे प्रचुरकाणि** बहूनि **दुःखानि** शारीरादीनि यत्र स तथा तस्मिन् पूर्वपरनिर्देशः प्राकृतत्वात् । '**किमि**ति प्रश्ने, **नामे**त्यलङ्कारे' **भवेत्** स्यात् **तत् कर्मकम**नुष्ठानं **येन** कर्मणा**ऽहं दुर्गतिं** नरकादिकां **न गच्छेय**मत्र तस्यर्षेः संशयाभावेऽपि दुर्गत्यभावेऽपि च प्रबोध्यपूर्वसङ्गतिकापेक्षमित्थमभिधानम् ॥१॥

एवं च तालकुट्टनपूर्वं तैस्तद्ध्रुवके प्रत्युद्गीते भगवानाह—

**विजहित्तु पुव्वसंजोगं न सिणेहं कहिंचि कुव्विज्जा ।**
**असिणेह सिणेहकरेहिं दोस-पओसेहि मुच्चए भिक्खू ॥२॥**

**व्याख्या—विहाय** त्यक्त्वा पूर्वैः **पूर्व**परिचितमात्रादिभिरुपलक्षणाद् धनदिभिः **संयोगं** सम्बन्धं **न स्नेह**मभिष्वङ्गं **क्वचिद्** बाह्याभ्यन्तरे वस्तुनि **कुर्वीत** । तथा च को गुणः ? इत्याह—**अस्नेहः** प्रतिबन्धरहितः 'सूत्रत्वाद् विसर्गलोपः' । **स्नेहकरेष्व**पि पुत्रादिष्वास्तामन्येषु तादृशोऽसौ **दोषै**रिह मनस्तापादिभिः **प्रदेषैः** परत्र च दुर्गत्यादिभि**र्मुच्यते भिक्षुः** ॥२॥

पुनस्तत्कृत्यमाह—

**तो नाण-दंसणसमग्गो हियनिस्सेसाए सव्वजीवाणं ।**
**तेसिं विमोक्खणट्ठाए भासई मुणिवरो विगयमोहो ॥३॥**

**व्याख्या—ततो भाषते मुनिवर** इति संटङ्कः । स कीदृक् **ज्ञान-दर्शनाभ्यां** प्रस्तावात् केवलाभ्यां **समग्रः** सहितः । किमर्थम् ? इत्याह—**हितः** पथ्यो भावारोग्यहेतुत्वात्, **निःश्रेयसो** मोक्षस्**तदर्थम्** । केषां ? **सर्वजीवानां** 'चस्य गम्यत्वात्' **तेषां** च पञ्चशतसङ्ख्यचौराणां **विमोक्षणार्थम**ष्टकर्मपृथक्करणार्थं **भाषते विगतमोहो** यथाख्यातचारित्रवान् ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यद् भाषते तदाह—

**सव्वं गंथं कलहं च विप्पजहे तहाविहं भिक्खू ।**
**सव्वेसु कामजाएसु पासमाणो न लिप्पई ताई ॥४॥**

**व्याख्या—सर्वं ग्रन्थं** बाह्यं धनाद्यान्तरं मिथ्यात्वादि **कलहं** क्रोधं चशब्दान् मानादींश्च **विप्रजह्यात्** परित्यजेत् **तथाविधं** कर्मबन्धहेतुं न तु धर्मोपकरणमपीत्यर्थो **भिक्षुः** साधुः । ततः किं स्यात् ? **सर्वेषु कामजातेषु** कामप्रकारेषु 'पासमाणो'त्ति **प्रेक्ष्यमाणो**ऽतिकटुकं तद्विषयदोषमिति गम्यम् । **न लिप्यते** कर्मणा त्रायते रक्षत्यात्मानं दुर्गतेरिति **त्रायी** ॥४॥

ग्रन्थात्यागे दोषमाह—

**भोगामिसदोसविसन्ने हियनिस्सेयसबुद्धिविवज्जत्थे ।**
**बाले य मंदिए मूढे बज्झई मच्छिया व खेलंमि ॥५॥**

**व्याख्या**—भोगा एव गृद्धिहेतुत्वादामिषं तदेव दोषो **भोगामिषदोष**स्तत्र **विषण्णो** विशेषेण मग्नः । हिते पथ्ये निःश्रेयसे मोक्षे बुद्धिस्तत्प्राप्त्युपायविषया मतिः सा विपर्यस्ता विपरीता यस्य स **हितनिःश्रेयसबुद्धिविपर्यस्तः । बालश्चा**ज्ञो **मन्दो** धर्मकार्यानुद्यतो **मूढो** मोहाकुलो **बध्यते** श्लिष्यतेऽर्थात् कर्मणा **मक्षिकेव खेले** श्लेष्मणि रजसेति गम्यम् । यथैषा तद्गन्धादिभिराकृष्टा खेले च मग्ना रेण्वादिभिर्बध्यते एवं जीवोऽपि कर्मणेति भावः ॥५॥

भोगानां दुस्त्यागतामाह—

**दुपरिच्चया इमे कामा नो सुजहा अधीरपुरिसेहिं ।**
**अह संति सुव्वया साहू जे तरंति अतरं वणिया व ॥६॥**

**व्याख्या—दुष्परित्यजा इमे कामाः** शब्दादयो **नो** नैव **सुहानाः** सुखत्याज्या विषमिश्रितमधुरान्नवत् कैः ? **अधीरसत्त्वै**नरैर्धीरैः सुत्यजा एवेति । यच्चेह दुष्परित्यजा इत्युक्त्वा पुनर्नो सुहाना इत्यत्यन्तदुस्त्यजत्वख्यापनार्थमुक्तम् । **अथ सन्ति** विद्यन्ते **सुव्रताः साधवो ये तरन्ति** पारप्राप्त्याऽतिक्रामन्ति कम् ? **अतरं** तरीतुमशक्यं विषयगणं भवं वा क इव ? **वणिज इव** वाशब्दस्येवार्थत्वाद् यथा वणिजोऽतरं समुद्रं पोतेन तरन्ति, तथैतेऽपि धीरा व्रतादिना भवमिति । यतः—

**"विषयगणः कापुरुषं करोति वशवर्तिनं न सत्पुरुषम् ।**
**बध्नाति मशकमेव हि लूतातन्तुर्न मातङ्गम्" ॥१॥** इति ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किमेवं सर्वेऽपि तरन्ति ?, नेत्याह—

**समणा मु एगे वयमाणा पाणवहं मिया अयाणंता ।**
**मंदा नरयं गच्छंति बाला पावियाहिं दिट्ठीहिं ॥७॥**

**व्याख्या—श्रमणाः** साधवः **मु** इत्यात्मार्थे **वयमेके** केचित् कुतीर्थ्या **वदमानाः** स्वाभिप्रायमुदीरयन्तः **प्राणवधं मृगा** अज्ञा **अजानन्त** इति के प्राणिनः के वा केषां प्राणाः कथं वा वध इत्यनवबुध्यमाना अनेनाद्यव्रतमपि न जानन्त्यासतां शेषाणीत्यत एव **मन्दा** मिथ्यात्वादिरोगग्रस्तया **नरकं गच्छन्ति । बाला** विवेकविकलाः **पापिकाभिः** पापहेतुर्भि-**दृष्टिभिर्**दर्शनाभिप्रायरूपाभिः "**ब्रह्मणे ब्राह्मणमिन्द्राय क्षत्रं मरुद्भ्यो वैश्यं तपसे शूद्रमालभेत**" इत्यादिकाभिरिति ॥७॥

अत एवाह—

**न हु पाणवहं अणुजाणे मुच्चिज्ज कयाइ सव्वदुक्खाणं ।**
**एवारिएहिं अक्खायं जेहिं इमो साहुधम्मो पन्नत्तो ॥८॥**

**व्याख्या—नैव प्राणिवधं** मृषावादाद्युपलक्षणमिदम् । अपेर्लुप्तत्वाद**नुजानन्**प्यास्तां कुर्वन् कारयन् वा **मुच्येत कदाचिद**पि सुब्व्यत्ययात् **सर्वदुःखैः** शारीर-मानसैः । **एवमुक्त**-प्रकारेण**ार्यै**रर्हदादिभि**राख्यातं यैरयं साधुधर्मो** हिंसानिवृत्त्यादिरूपः **प्रज्ञप्तः** प्ररूपितोऽयमि-त्यनेनात्मनि वर्तमानं प्रबोध्य चौराणां प्रत्यक्षं साधुधर्ममुपदिशति ॥८॥

ततः किं कृत्यमित्याह—

**पाणे अ नाइवाइज्जा से समिए त्ति वुच्चई ताई ।**
**तओ से पावयं कम्मं निज्जाइ उदयं व थलाओ ॥९॥**

**व्याख्या—प्राणान् नातिपातयेत्** स्वयमिति शेषः । **च**शब्दात् कारणानु-मत्योर्निषेधो मृषावादाद्युपलक्षणमिदम् । य इति गम्यत्वाद् यः प्राणान् नातिपातयिता 'से'त्ति **स समित इत्युच्यते** । किम्भूतः ? **त्रायी** प्राणित्राता । **ततः** समितात् साधोः **से** इत्यथ **पापक**मशुभं **कर्म निर्याति** निर्गच्छति । किमिव कुतः ? **उदकमिव स्थलाद**-त्युन्नतप्रदेशादिति ॥९॥

एतदेव स्पष्टयति—

**जगनिस्सिएहिं भूएहिं तसनामेहिं थावरेहिं च ।**
**नो तेसिमारभे दंडं मणसा वयस कायसा चेव ॥१०॥**

**व्याख्या—जगन्निश्रितेषु** लोकाश्रितेषु **भूतेषु** जन्तुषु **त्रसनामसु** त्रसनाम-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कर्मोदयवत्सु द्वीन्द्रियादिषु, **स्थावरेषु च** पृथिव्यादिषु **नो** नैव **तेषु** रक्षणीयेषु **आरभेत** कुर्याद् **दण्डं** वधात्मकं **मनसा वचसा कायेन** **च**शब्दान्न कारयेन्नाप्यनुमन्येत । **एवो**ऽवधारणे ।

**"[१]सव्वे वि दुक्खभीरू सव्वे वि सुहाभिलासिणो सत्ता ।**
**सव्वे वि जीवणपिया सव्वे मरणाउ बीहंति ॥१॥**

**वरमन्न-भोगदाणं धण-धन्न-हिरण्ण-रज्जदाणं वा ।**
**न कुणइ तं मणहरिसं जायइ जं अभयदाणाओ" ॥२॥**

इति मत्वा कस्यापि जन्तोर्हिंसां न कुर्यादिति भावः अभयदानोदाहरणम्—

**द्रुमा**भिधः क्षितीशोऽभूत् श्री**वसन्तपुरे** पुरे ।
**प्रियङ्गवा**दिदयिताशतपञ्चकवल्लभः ॥१॥

सलोप्त्रं तस्करं तत्रारक्षकैर्धृतमन्यदा ।
शूलायां दुःखमूलायां वध्यमादिष्टवान् नृपः ॥२॥

तावत् **प्रियङ्गवा** राज्ञी याचित्वैकाहमाप्य तम् ।
भूपान्नीत्वा स्वकावासमभ्यङ्गोद्वर्तनादिकम् ॥३॥

स्नानं विलेपनं भुक्तिं सद्वासःपरिधापनम् ।
सर्वाभरणभूषां च भोगान् पञ्चाप्यचीकरत् ॥४॥ **युग्मम्**

तथैव स्पर्धयाऽन्याभिरपि भूपपुरन्ध्रिभिः ।
अरक्षि मारणात् सोऽह्नामेकोनशतपञ्चकम् ॥५॥

अथान्त्याऽऽह प्रिया भूपं ममाप्येषोऽर्प्यतां प्रभो ! ।
पङ्क्तिं न वञ्चयन्त्येव सन्तो हि समताजुषः ॥६॥

नित्यशोऽभयदानेन देहि मेऽमुं प्रसीद माम् ।
नान्यत् किमपि मे दत्तमेतावन्तमनेहसम् ॥७॥

तत्कारुण्यान्नृपस्तुष्टः पुष्टो दिष्ट्येदमूचिवान् ।
दत्तो मया त्वयं तुभ्यं यावज्जीवं हि जीवतात् ॥८॥

---

१. सर्वेऽपि दुःखभीरवः सर्वेऽपि सुखाभिलाषिणः सत्त्वाः ।
सर्वेऽपि जीवनप्रियाः सर्वे मरणाद् बिभ्यति ॥१॥

वरमन्न-भोगदानं धन-धान्य-हिरण्य-राज्यदानं वा ।
न करोति तद् मनोहर्षं जायते यदभयदानतः ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततः सा हृष्टहृदया समासात् स्नान-भोजनम् ।
दत्त्वा चाल्पानि वासांसि प्रददौ सर्वतोऽभयम् ॥९॥

सोऽपि प्राप्याभयं राज्यादधिकं बुबुधे मुदा ।
सत्यं हि जीवितव्यार्थी मुञ्चेदैश्वर्यमप्यहो ! ॥१०॥

अथ राजाह का जातिः को देशः काभिधा तव ? ।
भद्राकारतया ह्येतद् विरुद्धं चौर्यकर्म ते ॥११॥

चौरः प्रोचे शृणु स्वामिन्नहं **विन्ध्य**पुरेशितुः ।
**विन्ध्य**धात्रीधवस्यातिप्रीतस्य श्रेष्ठिनः सुतः ॥१२॥

**वसुदत्ता**भिधेयस्य **वसन्ता**ख्योऽस्मि लालितः ।
पालितः पाठितोऽत्यर्थं वणिक्कन्यां विवाहितः ॥१३॥

दुष्कर्मवशतः सोऽहं द्यूतासक्तोऽभवं पुनः ।
नामुचं व्यसनं चैतत् पित्राद्यैः शिक्षितोऽप्यलम् ॥१४॥

ततो विज्ञप्य भूपालं पित्रा निःसारितो गृहात् ।
भ्रामं भ्रामं भुवं भिक्षावृत्त्या जीवामि कष्टतः ॥१५॥

द्यूतेन रममाणोऽहं तच्च द्रव्यं विना न हि ।
अनन्योपायकश्चौर्यप्रवृत्तस्त्वन्नरैर्धृतः ॥१६॥

शूलारोपे समादिष्टे कम्पमानो भयादहम् ।
९ ९ ४
नव-ग्रहाब्धिसङ्ख्याभिस्त्वत्पत्नीभिश्च साञ्जसम् ॥१७॥

स्वगेहे भोज्यमानोऽपि सुस्निग्धाहारभोजनम् ।
प्रकाममुपभुञ्जानः शब्दादिविषयानपि ॥१८॥

न तथा तुष्टिमापेदे शून्यचित्त इवाभवम् ।
वृकदृष्ट्या मृग इव प्रातः स्वीयां मृतिं स्मरन् ॥१९॥ **त्रिभिर्विशेषकम्**

ततोऽन्त्यत्वत्प्रिया**शीलमती**सद्मनि किञ्चन ।
भुक्तमात्रोऽप्यहं तुष्टो यावज्जीवाभयार्पणात् ॥२०॥

प्रसन्नेन नृपेणाथ **शीलमत्याः** प्रमोदतः ।
पट्टराज्ञीपदं दत्तमभयं हीप्सितप्रदम् ॥२१॥

सा च **शीलमती** शुद्धधर्मकर्मसु कर्मठा ।
जीवरक्षाप्रभावेण जज्ञे सुगतिभागिनी ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एतद्राज्ञीधर्मपुत्रो **वसन्तो** भूपसम्मतः ।
श्राद्धधर्मं गुरोः पार्श्वे लात्वा स्वःसुखभागभूत् ॥२३॥

इत्थं चाभयदानस्य श्रुत्वा फलमनुत्तरम् ।
भवन्तोऽप्यत्र भो भव्याः ! सादरा भवताद्भुते ॥२४॥

इत्यभयदाने **राज्ञीकथा** ॥१०॥

मूलगुणानुक्त्वोत्तरगुणमुख्यैषणासमितिमाह—

**सुद्धेसणाइ नच्चा णं तत्थ ठविज्ज भिक्खू अप्पाणं ।**
**जायाए घासमेसिज्जा रसगिद्धे न सिया भिक्खाए ॥११॥**

**व्याख्या**—शुद्धा निर्दोषा एषणा उद्‌गमाद्याः **शुद्धैषणा ज्ञात्वा तत्र** तासु **स्थापयेद् भिक्षुरात्मानम्** । को भावोऽनेषणीयत्यागेनैषणाशुद्धमेव ग्राह्यमिति । किमर्थम् ? 'जायए'त्ति **यात्रायै** संयमनिर्वाहार्थं **ग्रासमेषयेद्** गवेषयेद् भोजयेच्च । उक्तञ्च—

"[1]**जह सगडक्खो चंगो कीरइ भरवहणकारणा नवरं ।**
**तह गुणभरवहणत्थं आहारो बंभयारीणं**" ॥१॥

भुञ्जानश्च रसेषु मधुरादिषु गृद्धो **रसगृद्धो न स्याद् भिक्षादो** भिक्षुरनेन रागत्याग उक्तस्तद्विपर्यये द्वेषस्यापि सम्भवात् तत्त्यागोऽप्युक्तो ज्ञेयो राग-द्वेषरहितो भुञ्जीतेति भावः । यतः—"[2]**रागद्दोसविमुक्को भुंजिज्जा निज्जरापेहि**" त्ति ॥११॥

अगृद्धश्च यत् कुर्यात् तदाह—

**पंताणि चेव सेविज्जा सीयपिंडं पुराणकुम्मासं ।**
**अदु बक्कसं पुलागं वा जवणट्ठाए निसेवए मंथुं ॥१२॥**

**व्याख्या—प्रान्तान्येव** नीरसान्येव **सेवेत** भुञ्जीत न तु स्निग्धानि मोहोदयहेतुत्वात् तेषाम् । तान्येवाह-**शीतपिण्डं** शीताहरम् । शीतोऽपि शाल्यादिः सरसः स्यादित्याह—**पुराणा** बहुकालधृताः **कुल्माषास्ते** ह्यतिनीरसाः स्युर्जीर्णमुद्‌गादीनामुपलक्षणम् । 'अदु' इत्य**थवा बक्कसं** मुद्‌गादिनिःपीडितरसं **पुलाकम**सारं वल्ल-चनकादि वा । किमर्थम् ? **यापनार्थं** निर्वाहार्थं **निषेवेतोप**भुञ्जीत । 'मंथुं' **बदरादिचूर्णम**स्याप्यतिरूक्षत्वात् प्रान्तत्वम् । किञ्च यापनार्थमित्यनेन यदि वातोद्रेकादिना देहयापना न स्यात् तर्हि स्निग्धाद्यपि सेवेत

१. यथा शकटाक्षश्चङ्गः क्रियते भरवहनकारणान्नवरम् ।
तथा गुणभरवहनार्थमाहारो ब्रह्मचारिणाम् ॥१॥

२. राग-द्वेषविमुक्तो भुञ्जीत निर्जरापेक्षी इति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्थविरकल्पिक इति ज्ञापितम् । जिनकल्पी तु प्रान्तान्येव तस्य तथैवानुज्ञानात् । पुनः क्रियाऽभिधानं च न सकृदेवाप्तान्यमूनि सेवेत, किन्त्वनेकधाऽपीति ख्यापनार्थमिति ॥१२॥

शुद्धैषणा स्वात्मानं स्थापयेदित्युक्तमतो विपर्यये बाधकमाह—

**जे लक्खणं च सुविणं च अंगविज्जं च जे पउंजंति ।**
**न हु ते समणा वुच्चंति एवं आयरिएहिं अक्खायं ॥१३॥**

**व्याख्या—ये** साधवो **लक्षणं** पुरुषादीनाम्, यथा—

**"पद्म-वज्राङ्कुश-च्छत्र-शङ्ख-मत्स्यादयस्तले ।**
**पाणि-पादेषु दृश्यन्ते यस्यासौ श्रीपतिर्भवेद्"** ॥१॥ इत्यादि ।

**स्वप्नं च** शुभाशुभफलसूचकं, यथा—

**"[1]दहि-छत्त-हेम-चामर-वत्थ-न्न-फलं च दीव-तंबोलं ।**
**संख ज्झओ य वसहो दिट्ठो लद्धो धणं देइ ॥१॥**

**पढमंमि वासफलया बीए जामंमि होइ छम्मासा ।**
**तइयंमि तिमासफला चरमे सज्जफला होंति"** ॥२॥ इत्यादि ।

**अङ्गविद्यां** शुभाशुभसूचिकां प्रणव-मायाबीजादिवर्णन्यासात्मिकां वा यथा—

**"[2]सिरफुरणे किर रज्जं पियमेलो होइ बाहुफुरणंमि ।**
**अच्छिफुरणंमि य पियं अहरे पियसंगमो होई"** ॥१॥ इत्यादि ।

**ये प्रयुञ्जते** तद्वाचकशास्त्राणि व्यापारयन्ति, **न हु** नैव **ते श्रमणा उच्यन्ते** । पुष्टालम्बने तानि व्यापारयन्त्यपि राजसभाकरवीरलताभ्रामकमुनिवत् । पुनर्ये इत्युपादानं लक्षणादिभिः पृथक् पृथक् सम्बन्धार्थम् । **एवमार्यैराख्यातमुपदिष्टम्** ॥१३॥

एवंविधानामुत्पत्तिमाह—

**इह जीवियं अनियमेत्ता पब्भट्ठा समाहिजोएहिं ।**
**ते कामभोगरसगिद्धा उववज्जंति आसुरे काए ॥१४॥**

---

१. दधि-च्छत्र-हेम-चामर-वस्त्रान्न-फलं च दीप-ताम्बूले ।
शङ्खो ध्वजश्च वृषभो दृष्टो लब्धो धनं ददाति ॥१॥

प्रथमे वर्षफला द्वितीये यामे भवन्ति षण्मासाः ।
तृतीये त्रिमासफलाश्चरमे सद्यफला भवन्ति ॥२॥

२. शिरःस्फुरणे किल राज्यं प्रियमेलो भवति बाहुस्फुरणे ।
अक्षिस्फुरणे च प्रियमधरे प्रियसङ्गमो भवति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—इह **जीवितम**संयमजीवित**मनियम्य** तपःक्रियादिनाऽनियन्त्र्य **प्रभ्रष्टा**-श्च्युताः **समाधियोगेभ्यश्चि**त्तस्वास्थ्यप्रधानकायादिव्यापारेभ्यः अनियन्त्रितात्मनां हि पदे पदे तद्भ्रंशसम्भव इति **ते** पूर्वोक्ताः **कामभोगेषु रसेषु च गृद्धा उपपद्यन्ते** जायन्ते **आसुरे काये** असुरसम्बन्धिनि निकाये । एवंविधाः किञ्चिदनुष्ठानं कुर्वाणा अप्यसुरेष्वेवोत्पद्यन्ते इति भावः ॥१४॥

ततश्च्युताः किमाप्नुवन्तीत्याह—

**तत्तो वि य उवट्टित्ता संसारं बहुं अणुपरियडंति ।**
**बहुकम्मलेवलित्ताणं बोही होइ सुदुल्लहा तेसिं ॥१५॥**

**व्याख्या**—**ततोऽपि चासुरनिकायादुद्वृत्त्य** निःसृत्य **संसारं** चतुर्गतिरूपं **बहुं** विपुलं बहुप्रकारं वा चतुरशीतियोनिलक्षतया 'अणुपरियडंति'त्ति **अनुपर्यटन्ति** सातत्येन पर्यटन्तीत्यर्थः । किञ्च **बहुकर्मलेपलिप्तानां बोधिः** प्रेत्य जिनधर्मावाप्ति**र्भवति सुदुर्लभा तेषां** ये लक्षणादि प्रयुञ्जतेऽत उत्तरगुणाराधनायां यतितव्यमिति भावः ॥१५॥

लोभाकुलस्यात्मनो दुष्पूरतामाह—

**कसिणं पि जो इमं लोगं पडिपुन्नं दलेज्ज इकस्स ।**
**तेणावि से न तुसिज्जा इइ दुप्पूरिए इमे आया ॥१६॥**

**व्याख्या**—**कृत्स्नमपि** सम्पूर्णमपि **यः** सुरेन्द्रादिरिमं प्रत्यक्षं **लोकं परिपूर्णं** धन-धान्यादिभृतं 'दलेज्ज'त्ति **दद्यात्** । किं बहुभ्यो नेत्याह—'इक्कस्स' त्ति **एकस्मै** कस्मैचिदा-राधकाय **तेनापि** धनादिभृतलोकदायकेन हेतुना 'से' त्ति **स न सन्तुष्येन्न** हृष्येत्, को भावो ममैतावद् ददताऽनेन परिपूर्णता कृतेति न तुष्टिमाप्नुयात् । उक्तञ्च—

**"न वह्निस्तृण-काष्ठेषु नदीभिर्वा महोदधिः ।**
**न चैवात्माऽर्थसारेण शक्यस्तर्पयितुं क्वचित्" ॥१॥**

**इत्येवमर्थे** एवमुक्तन्यायेन दुःखेन पूरयितुमशक्यो **दुष्पूरकोऽयमात्मा** । एतदिच्छायाः पूरयितुमशक्यत्वादिति ॥१६॥

किमिति न सन्तुष्यतीत्याह—

**जहा लाहो तहा लोहो लाहा लोहो पवड्ढई ।**
**दोमासकयं कज्जं कोडीए वि न निट्ठियं ॥१७॥**

**व्याख्या**—**यथा लाभो**ऽर्थावाप्ति**स्तथा लोभो** भवतीति शेषः । किमित्येवमि-त्याह—**लाभाल्लोभः प्रवर्धते** । यथा तथेत्यत्र वीप्सा गम्यते ततो यथा यथा लाभस्तथा तथा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लोभः प्रवर्धते। कुत इत्याह—द्वाभ्यां माषाभ्यां पञ्चरक्तिकामनाभ्यां कृतं **द्विमाषकृतं कार्यं** पुष्प—ताम्बूलादिमूल्यरूपं **कोट्यापि** सुवर्णशतलक्षात्मिकया **न निष्ठितं** न निष्पन्नं तदधिकाधिकवाञ्छात इति भावः ॥१७॥

तदनिष्ठितः स्त्रीमूलेति तत्त्यागोपदेशमाह—

**नो रक्खसीसु गिज्झिज्जा गंडवच्छासु णेगचित्तासु।**
**जाओ पुरिसं पलोभित्ता खेलंति जहा व दासेहिं ॥१८॥**

**व्याख्या—नो** नैव राक्षस्य इव **राक्षस्यः** स्त्रियो यथा हि राक्षस्यो रक्तसर्वस्वमाकृष्य जीवितमपहरन्तयेवमेता अपि तत्त्वतो ज्ञानादिजीवितमर्थं वाऽपहरन्ति **तासु** 'गिज्झिज्ज'त्ति **गृध्येद**भिकाङ्क्षेत कीदृशीषु ? गण्ड इव गडु इव इहोपचितमांसपिण्डरूपं तदुपमत्वाद् **गण्डे** कुचौ **वक्षसि** यासां तास्तासु वैराग्योत्पादनार्थमित्थमुक्तम्। तथा-**ऽनेकचित्तास्व**तिचञ्चलतया। आह च—

**"हृद्यन्यद् वाच्यन्यत् कार्येऽप्यन्यत् पुरोऽथ पृष्ठेऽन्यत्।**
**अन्यत् तव मम चान्यत् स्त्रीणां सर्वं किमप्यन्यत्"** ॥१॥

तथा **याः पुरुषं** कुलीनमपीति गम्यम्। **प्रलोभ्य** त्वमेव मे शरणं त्वमेव मे प्रीत इत्यादि वाग्भिर्विप्रतार्य **क्रीडन्ति**। 'जहा व'त्ति वाशब्दस्यैवार्थत्वाद् **यथैव दासैरे**ह्यागच्छ मा वा यासीरित्यादिकपटक्रीडाभिर्विलसन्तीति ॥१८॥

पुनस्तासां त्यागमाह—

**नारीसु नो पगिज्झिज्जा इत्थी विप्पजहे अणगारे।**
**धम्मं च पेसलं नच्चा तत्थ ठविज्ज भिक्खू अप्पाणं ॥१९॥**

**व्याख्या—नारीषु** स्त्रीषु 'नो' **नैव प्रगृध्येत्** प्रशब्दस्यादिकर्मार्थत्वाद् गृद्धिमारभेतापि किं पुनः कुर्यादिति भावः। 'इत्थि' त्ति **स्त्रियो विप्रजह्यात्** त्यजेत्। पूर्वत्र नारीग्रहणान्मानवीनामिह च देव—तिरश्चां स्त्रीणां त्याज्यतयोपदेशान्न पौनरुक्त्यम्। **अनगारो** यति**र्धर्ममेव** ब्रह्मचर्यादि चस्यैवार्थत्वात् **पेशल**मेकान्तहितत्वेन मनोज्ञं **ज्ञात्वा तत्र** धर्मे **स्थापयेद् भिक्षुरात्मानं** विषयाभिलाषनिषेधादिति ॥१९॥

अध्ययनोपसंहारमाह—

**इइ एस धम्मे अक्खाए कविलेणं च विसुद्धपन्नेण।**
**तरिहिंति जे उ काहिंति तेहिं आराहिया दुवे लोग ॥२०॥ त्ति बेमि ॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—इतीत्यनेन** प्रकारेण **एष** पूर्वोक्तो **धर्मो** यतिधर्म **आख्यातः** कथितः । केन ? **कपिलेने**त्यात्मानमेव निर्दिशति । पूर्वसङ्गतिकत्वादमी मद्वचनतः प्रतिपद्यन्तामिति । **चः** पूरणे किं भूतेन ? **विशुद्धप्रज्ञेन** विमलावबोधेनातोऽर्थसिद्धिमाह—'तरिहिंति' त्ति **तरिष्यन्ति** भवाम्भोधिमिति शेषः । **ये** इत्यविशिष्टा**स्तु**र्विशेषार्थे ततोऽविशेषत एव **तरिष्यन्ति**। ये **करिष्यन्**त्यमुं धर्ममन्यच्च **तैरा**राधितौ **द्वौ लोकावि**हलोक-परलोकावित्यर्थः। इह महाजनपूज्यतया परत्र च सिद्धिसुखप्राप्त्येति । इति ब्रवीमीति प्राग्वत् ॥२०॥ ग्रं० २५९-१६॥

**इति श्रीकमलसंयमोपाध्यायविरचितायां श्रीसर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायाम् अष्टमं कापिलीयमध्ययनं समाप्तम् ॥८॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# नवमं नमिप्रव्रज्याख्यमध्ययनम्

इह पूर्वाध्ययने निर्लोभत्वमुक्तम्, तदनुतिष्ठत इहैवेन्द्रादिपूजोपजायते इति दर्श्यते इत्यनेन सम्बन्धेन नमिप्रव्रज्याख्यं नवममध्ययनमारभ्यते—

प्रस्तुतं चरितं यद्यप्यत्र भूमिभुजो **नमेः** ।
तथापि तद्वदेवान्ये विश्रुता वीरशासने ॥१॥

प्रत्येकबुद्धाश्चत्वारः **करकण्डवा**दयोऽभवन् ।
समकालजनुर्दीक्षा-ज्ञान-सिद्धिसमागमाः ॥२॥

इति प्रसङ्गतस्तेषामपि वक्तव्यतोच्यते ।
श्रोतृवैराग्यपुष्ट्यर्थं यथाश्रुतमविस्तरम् ॥३॥

दृष्ट्वा गामिन्द्रकेतुं च वलयं चाम्रपादपम् ।
प्रत्येकं **करकण्ड्वा**द्या बुद्धोपाददिरे व्रतम् ॥४॥

तत्रादौ कथ्यते पुष्टं वृषभं प्रेक्ष्य तत्क्षणम् ।
प्रबुद्धस्य प्रसिद्धस्य **करकण्डोः** कथानकम् ॥५॥

भूभामिनीहृदि स्फारहारश्रीसोदरा वरा ।
वैरिवर्गकृताकम्पा **चम्पा**नाम्न्यभवत् पुरी ॥६॥

तत्र धात्रीधवः सत्रं नीतेः प्रीतः प्रजाहितः ।
स्वर्गे स्वर्गाधिप इव **दधिवाहन** इत्यभूत् ॥७॥

**पद्मावती** पट्टराज्ञी तस्यासीच्छीलसुन्दरा ।
सती सर्वावरोधाग्र्या सुता **चेटक**भूपतेः ॥८॥

अन्यदा सा महादेवी गर्भं भेजे शुभोदयात् ।
गर्भस्थार्भकमाहात्म्यादुत्पेदे दोहदो हृदि ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रौढमत्तगजारूढा नृपनेपथ्यभूषिता ।
भर्त्रा धृतातपत्रेण राजिता राजकावृता ॥१०॥

ददाना बहुदानानि गीतानि च निशृण्वती ।
विहरामि कदा हन्त ! स्वोद्यानेषु यदृच्छया ॥११॥ **युग्मम्**

तस्मिन्नपूर्णे क्षामाऽसौ पृष्टा राज्ञाऽमुमभ्यधात् ।
सुखसाध्यः कियानेष इत्युक्त्वोत्थाय भूधवः ॥१२॥

पट्टद्विपं समारुह्य देवीमारोहयत् पुरः ।
दधावधिशिरश्छत्रं स्वयं तस्याः स हर्षतः ॥१३॥

शुभाकारैरलङ्कारैर्भासमानैरलङ्कृता ।
परितः परिवारेण परीतोद्यानमाप सा ॥१४॥

यशोनिदानदानानि ददाना सा यथेप्सितम् ।
शुशुभे कल्पवल्लीव शैलशृङ्गसमुच्छ्रिता ॥१५॥

अस्मिन्नवसरे सारासारमेघाभिषेकतः ।
सर्वतः सुरभिर्गन्ध उदच्छलदिलातलात् ॥१६॥

तं तथाविधमाघ्राय स्मृत्वा **विन्ध्याचलाट**वीम् ।
मतङ्गजो मदोन्मत्तो वेगात् तं प्रत्यधावत ॥१७॥

भटैरस्खलितः शीघ्रं वेगवांश्चण्डवायुवत् ।
राज्ञीं राजानमादाय स जगाम महाटवीम् ॥१८॥

वटवृक्षं पुरो दृष्ट्वा राज्ञीं तत्राह भूपतिः ।
वटस्याधस्तरां याति यदाऽसौ दयिते ? गजः ॥१९॥

लम्बमानास्तत्प्ररोहास्तत्रादेयास्त्वया रयात् ।
यथा तदवलम्बेन स्थित्वा यावः पुरं पुनः ॥२०॥

इत्युक्त्यनन्तरं वेगात् तत्र प्राप्ते गजे नृपः ।
आललम्बे लब्धलक्षः प्रलम्बां वटवल्लरीम् ॥२१॥

राज्ञी तु स्त्रीस्वभावेनालब्धलक्षतयाकुला ।
तच्छाखां नाशकद् धर्तुं गजारूढैव साऽगमत् ॥२२॥

नरेन्द्रोऽपि विलक्षोऽभूत् सम्भ्रान्तनयनद्वयः ।
स्फालच्युतो द्रुमालम्बी शाखामृग इवाञ्जसा ॥२३॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

गजपृष्ठौ दधावेऽथ बद्धमुष्टिर्नराधिपः ।
धावमानो गजस्तस्यादृश्योऽभूद् भूतवत् क्षणात् ॥२४॥

राजा दध्यावितो दूरे पुरी सेभा गता प्रिया ।
हा ! हा ! करोमि किमहमितो व्याघ्र इतस्तटी ॥२५॥

अथवा शीलमाहात्म्यात् स्वयमेव महासती ।
एषा समेष्यति गृहं किं क्लिश्यामि मुधा ततः ॥२६॥

एवं विचिन्त्य राजाऽथ ववले स्वपुरं प्रति ।
**चम्पा**यामागतो राज्यं स पूर्ववदपालयत् ॥२७॥

बहुमार्गं समुल्लङ्घ्य तपनातपतापितः ।
गजोऽथ सलिलापूर्णं प्रविवेश सरोवरम् ॥२८॥

स तत्र सलिलोल्लोलैर्लोलैश्चिक्रीड शीतलैः ।
**पद्मावत्य**पि सातङ्कमुत्ततार शनैः शनैः ॥२९॥

तरन्ती राजहंसीव निःससार सरोवरात् ।
साऽपश्यत् सर्वतः शून्यं मृगीवास्वजनं वनम् ॥३०॥

कान्दिशीकाऽथ सा दध्यौ का कर्मोपस्थितिर्मम ? ।
ययेदृशीं दशां सद्यः प्रापिताऽहं सुदुस्सहाम् ॥३१॥

किं करोमि क्व गच्छामि भविता मेऽत्र का गतिः ? ।
विषद्येत्यादि सा पश्चादुचितां धीरतां दधौ ॥३२॥

प्रमृज्याश्रूणि पाणिभ्यां चित्ते सैवं व्यचिन्तयत् ।
शोकं विवेकमुक्तानामुचितं किं करोम्यहम् ? ॥३३॥

***नानेकैः शोक-सन्तापैर्न विलापैर्न रोदनैः ।***
***कदाचिन्मुच्यते प्राणी पुरातनकुकर्मणा ॥ ३४ ॥***

मध्ये व्याघ्रादिजीवानां कश्चिद् व्यापादयिष्यति ।
परलोकस्य पाथेयं किञ्चिद् धर्मं करोमि तत् ॥३५॥

***अर्हन्तः शरणं सन्तु सिद्धाश्च शरणं मम ।***
***साधवः शरणं शुद्धो धर्मोऽस्तु शरणं मम ॥ ३६ ॥***

अशिश्रयदसावित्थं चतुःशरणमञ्जसा ।
पापान्यालोचयामास निन्दन्ती स्वं मुहुर्मुहुः ॥३७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*क्षमयामि सर्वजन्तून् क्षाम्यन्तु मयि जन्तवः ।*
*मैत्री समस्तभूतैर्मे वैरं मम न केनचित् ॥३८॥*

क्षान्त्वा च क्षमयित्वा च शम-संवेगमागता ।
सा साकारं तदा भक्तप्रत्याख्यानं मुदाऽकरोत् ॥३९॥

तथाहि—

"[१]जइ मे हुज्ज पमाओ इमस्स देहस्स इमाइ वेलाए ।
आहारमुवहिं देहं सव्वं तिविहेण वोसरियं" ॥४०॥

*तथा सस्मार सैकाग्रा परमेष्ठिनमस्क्रियाम् ।*
*अमुत्रेह च यस्याः स्युः कल्याणानां परम्परा ॥४१॥*

*व्याधिः फणी जलं वह्नि-चौर-केसरि-कुञ्जराः ।*
*तस्याः स्मरणमात्रेण प्रभवन्ति भिये न हि ॥४२॥*

*नमस्कारदिनाधीशप्रतापेन न जृम्भते ।*
*सर्वतो दुरितध्वान्तं क्षेमाब्जं च विजृम्भते ॥४३॥*

*तदेकाग्रनमस्कारप्ध्यानध्यानप्रभावतः ।*
*व्याघ्र-व्यालादयो दुष्टाः पशवो नोपदुद्रुवुः ॥४४॥*

अथैकां दिशमाश्रित्य सा गच्छन्ती शनैः शनैः ।
पुरस्तादेकमद्राक्षीत् तापसं सोपतद् ययौ ॥४५॥

कृतप्रणामा साऽप्रच्छि कुतो वत्से ! त्वमागमः ? ।
कथं दशेदृशी प्राप्ता काऽसि कस्य सुतासि वा ? ॥४६॥

श्री**चेटक**प्रसूताऽहं **दधिवाहन**वल्लभा ।
गजेनापहृता दैवादाचचक्षे तयेति सः ॥४७॥

तापसः प्राह हे वत्से ! स्वज्ञातीयो भवेन्मम ।
त्वत्पिता **चेटकः** स्पष्टं दिष्ट्या दृष्टासि साम्प्रतम् ॥४८॥

*मा शोकं कुरु मा रोदीर्यतोऽपारे दुरुत्तरे ।*
*संसारे संसरन् जीवः क्वचिद्दुःखी क्वचित् सुखी ॥४९॥*

---

१. यदि मे भवेत् प्रमादोऽस्य देहस्यास्या वेलायाम् ।
आहारमुपधिं देहं सर्वं त्रिविधेन व्युत्सृष्टम् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*संयोगो विप्रयोगाक्तः सुखं दुःखसमाकुलम् ।*
*जनुः कालसमाक्रान्तमीदृश्येव भवस्थितिः ॥५०॥*

मा भैषीस्तव तातोऽस्मीत्युक्त्वा वनफलैः कलैः ।
प्राणवृत्तिं तथाऽम्भोभिरनिच्छन्त्यपि कारिता ॥५१॥

ततः स दर्शयन् मार्गं तां निन्ये सजनावनिम् ।
पुरो दृष्ट्वा हलाकृष्टां महीमिति बभाण च ॥५२॥

एतस्यां भुवि नास्माकं गन्तुं समुचितं भवेत् ।
वत्से ! गच्छ यथेच्छं त्वमितो **दन्तपुरं** वरम् ॥५३॥

**दन्तवक्रो**ऽत्र भूपालः प्राप्यन्ते चात्र नित्यशः ।
सार्था व्रजन्त**श्चम्पायै** गन्तव्यं तत्र तैस्त्वया ॥५४॥

ववले मुनिरित्युक्त्वा साऽपि प्रापाचिरादथ ।
विवेकिलोकसङ्कीर्णं नगरं तज्जहर्ष च ॥५५॥

धर्मार्थिनी सा साध्वीनां ज्ञात्वा लोकात् प्रतिश्रयम् ।
जगामाशु ववन्दे ताः प्रवर्तिन्यन्तिकेऽविशत् ॥५६॥

साऽप्यस्याः प्रश्नमाधत्त त्वमायाः श्राविके ! कुतः ? ।
तामाख्यातयथाभूतवृत्तां च रुदतीमवक् ॥५७॥

*मा शुचः श्राद्धि ! निर्विघ्नशीलधर्मे ! मनागपि ।*
*मा गाः खेदमलङ्घ्योऽसौ परिणामो विधेर्महान् ॥५८॥*

*यत्नान्निष्पादितं कार्यं क्षणाद् विघटयेद् विधिः ।*
*साधयेच्चापि दुःसाध्यं सर्ग-भङ्गक्षमो ह्ययम् ॥५९॥*

*चलं रूपं चला लक्ष्मीः चलं प्रेम चलं वयः ।*
*चलेन वपुषा किञ्चिन्निश्चलं पुण्यमर्ज्यताम् ॥६०॥*

किञ्च—

**वातोल्लालितजीर्णपर्णवदमी शून्यं भ्रमन्त्यङ्गिनः,**
**पुंनारीधनहेमरत्नवसुधाभोगादिरागाकुलाः ।**
**स्थैर्यं तावदवाप्नुवन्ति न हि ते यावत् परात्माऽचले;**
**श्रीसन्तोषशिलातलोरुविवरं निर्मारुतं नागताः" ॥६१॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अपि च—

**यदा वातक्षुब्धाम्बुनिधिलहरीचञ्चलतरं,**
**बलं लक्ष्मीः स्नेहः परिजनजने यौवनमपि ।**
**स्थिरस्वात्मैवैकः शुभपथगमीति व्यवसितं;**
**तदा क्लेशोद्विग्नं परमपदवीं वाञ्छति मनः** ॥६२॥

श्रुत्वाऽनुशासनमिदं परं संवेगमागता ।
उपप्रवर्तिनिप्राप्तव्रताऽभूत् कुशलार्थिनी ॥६३॥

न मां प्रव्राजयिष्यन्ति गुर्विणीमिति नाभ्यधात् ।
पतिन्यासमसौ पृष्टं प्रवर्तिन्या व्रतोत्सुकी ॥६४॥

कियद्दिनात्यये गर्भलक्षणेषु स्फुटेष्वथ ।
निर्ग्रन्थीषु विषण्णासु महाऽपभ्राजनाभयात् ॥६५॥

महासति ! किमेतत् ते जातं लोकद्वयाहितम् ।
इत्याख्यान्त्याः प्रवर्तिन्याः सा स्वभावं न्यवेदयत् ॥६६॥

प्रच्छन्नं रक्षिता काले प्रभाभासितदिक्तटम् ।
अजीजनत् सुतं साऽथ पूर्वा दिगिव भास्करम् ॥६७॥

दीपवद् दीप्यमानाङ्गं रूपवन्तमनङ्गवत् ।
प्रेक्ष्य सा तनयं स्वीयं निर्ममाऽपि मुदं दधे ॥६८॥

पितुर्नामाङ्कितां मुद्रां क्षिप्त्वा बालकराङ्गुलौ ।
स्मशाने साऽत्यजद् यत्नाद् रत्नकम्बलवेष्टितम् ॥६९॥

देवतानां कुमारोऽयं किं वा पातालवासिनाम् ? ।
अनिरुद्धकुमारो यः श्रूयते सोऽयमेव वा ? ॥७०॥

अथवाऽहमपुत्रोऽस्मि तेन मे कुलदेवता ।
एनं सुतमदाद् नूनं पूज्यमाना दिवानिशम् ॥७१॥

इत्याशङ्काकुलः स्फारनेत्रः सानन्दमानसः ।
स्मशानपालकोऽभ्येत्य तमादत्त स्तनन्धयम् ॥७२॥ **युग्मम्**

निर्ग्रन्थ्यां वीक्षमाणायां स लात्वा बालकं करे ।
निधानमिव सम्प्राप्तं भार्यायै प्रददौ मुदा ॥७३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दम्पतीभ्यामपुत्राभ्यां प्राप्ते तस्मिन्स्तनन्धये ।
चिन्तामणौ दरिद्रेणेवातोषि महिमावति ॥७४॥

गूढगर्भा पुरैषाऽऽसीदधुनाऽसूत नन्दनम् ।
इति लोकप्रथा जज्ञे लोकाः खलु बहिर्मुखाः ॥७५॥

**पद्मावती** निजं बालं गतं चण्डालवेश्मनि ।
विज्ञान हृदये दूना सखेदा सत्यचिन्तयत् ॥७६॥

यद्वा—

"**सङ्गो न जायते नूनं सदसद्गुणकारणम् ।**
**मणिर्हि विषभृच्छीर्षस्थितो विषहरः स्मृतः** ॥७८॥

अनेनैषोऽपि चाण्डालो भविता निर्मलः खलु ।
श्यामलं व्योम चन्द्रेण निर्मलं क्रियते न किम् ? ॥७९॥

ध्यात्वेत्युपाश्रयं साऽगात् पृष्टा साध्वीभिरभ्यधात् ।
दैवादजनिषं पुत्रं स्मशाने मृतमत्यजम् ॥८०॥

वृद्धिं प्राप शिशुस्तत्र लाल्यमानः शनैः शनैः ।
कल्पद्रुमाङ्कुर इव दैवादवकरावनौ ॥८१॥

अवकर्णित इत्यस्य श्वपाको निर्ममेऽभिधाम् ।
क्रीडतोऽस्य ददावम्बा प्रेम्णा वर्षोपलादिकम् ॥८२॥

आभाषयति तं बालं श्वपच्या सह सर्वदा ।
करोति प्रतिसंसर्गं सुतस्नेहो हि दुर्धरः ॥८३॥

ततोऽवकर्णितोऽप्यस्यामनुरक्तोऽभवद् भृशम् ।
मातुः स्नेहादपरं च यो ददाति स देवता ॥८४॥

श्वपाकोऽपि समृद्धोऽभूत् तादृग्बालप्रभावतः ।
प्रदीपो हरति ध्वान्तं यत्र कुत्रापि संस्थितः ॥८५॥

खेलन् **पद्मावती**पुत्रो राजपुत्रस्वभावतः ।
नृपीभूयार्भकानूचे क्रीडतः परितः स्थितान् ॥८६॥

कण्डूयत शरीरं मे करोऽयं भवतां मयि ।
रूक्षखर्जूसमायोगान्मम कण्डूयनस्पृहा ॥८७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदादि तेऽर्भकास्तस्य चक्रुः कण्डूयनं सदा ।
ततोऽस्य बालकैराख्या **करकण्डु**रितीरिता ॥८८॥

क्रमात् कला उपादत्त महाराजोचिताः समाः ।
यतः कुतश्चित् सम्पत्तिर्भवत्येव शुभोदये ॥८९॥

स्मशानं पालयन्नेष समर्थो मतिसेवधिः ।
अन्यदोपवंशजालि मुनी यान्तौ समैक्षत ॥९०॥

तयोराद्यः समस्तानां वंशानां वेत्ति लक्षणम् ।
वंशं तत्रैकपर्वाणमालोक्यैषोऽभ्यधात् परम् ॥९१॥

मुने ! जानास्यदो वंशकृतदण्डस्य सत्फलम् ? ।
नेत्युक्ते सोऽभ्यधात् तर्हि सप्रपञ्चं निशम्यताम् ॥९२॥

*"एकपर्वा प्रशस्या स्याद् द्विपर्वा कलहप्रदा ।*
*वंशयष्टिर्भवेल्लातुस्त्रिपर्वा लाभहेतवे ॥ ९३ ॥*

*मृत्यवे स्याच्चतुःपर्वा पञ्चपर्वा त्वसौ कलिम् ।*
*वारयेत् पथि पान्थानां षट्पर्वाऽऽतङ्कदायिनी ॥ ९४ ॥*

*अष्टाङ्गुलप्रतिष्ठाना सप्ताङ्गुलसमुच्छ्रया ।*
*मत्तेभवारिणी सप्तपर्वाऽऽरोग्यकरी तथा ॥ ९५ ॥*

*अष्टपर्वा भवेद् यष्टिरसम्पत्तिविधायिनी ।*
*नवपर्वा यशोहेतुर्दशपर्वा तु सम्पदे ॥ ९६ ॥*

*बहुवर्णा सशुषिरा दग्धा वक्रा सकीटका ।*
*ऊर्ध्वशुष्का भवेद् यष्टिर्वर्जनीया प्रयत्नतः ॥ ९७ ॥*

*वर्धमानलसत्पर्वैकवर्णा स्निग्धदीधितिः ।*
*इत्यादिलक्षणैर्युक्ता यष्टिः सर्वसमृद्धये ॥ ९८ ॥*

तं वंशमेकपर्वाणं विशिष्टं वाञ्छितप्रदम् ।
अङ्गुल्या विषयीकृत्य तद्गुणानभ्यधान्मुनिः" ॥९९॥

अयमेतेषु सारोऽस्ति तारकेष्विव चन्द्रमाः ।
भाग्यातिशयवानेनं ग्रहीता भूपताप्रदम् ॥१००॥

ग्रहीतुः सप्तमे राज्यं दिने भवति निश्चितम् ।
प्रतिपाल्या परं यावच्चतुरङ्गुलवर्धिता ॥१०१॥

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

**करकण्डु**स्तदोपान्तवर्ती तच्चतुरोऽशृणोत् ।
विप्रोऽप्येकोऽथ विहृते पुरस्तस्मिन् मुनिद्वये ॥१०२॥

वर्धतामेष मे भूमिसम्पन्नश्चतुरङ्गुलम् ।
पश्चादप्यहमादातेत्यभूत् सुस्थोऽवकीर्णकः ॥१०३॥

विप्रस्त्वचिन्तयद् धीमान् भाग्यश्रव्यमिदं वचः ।
मुनीनां नान्यथा भावि वेदस्य वचनं यथा ॥१०४॥

तदस्य ग्रहणे यत्नं करोम्यचिरकालतः ।
***श्रेयांसि बहुविघ्नानि श्रूयन्ते वाङ्मयेषु यत् ॥१०५॥***

साधुवाक्याञ्जनेनायं निधानमिव वीक्षितः ।
पश्चादभाग्ययोगेन मा स्म यासीददृश्यताम् ॥१०६॥

साम्प्रतं त्वयमग्राह्यो विघ्नाय च विलम्बितम् ।
प्रपञ्चः कोऽपि तत् कार्य इति तस्थौ द्विजः क्षणम् ॥१०७॥

जातधीः स महीपीठं चखान चतुरङ्गुलम् ।
तमुद्धार सहसाऽऽदाय हृष्टस्ततोऽचलत् ॥१०८॥

भाग्यवान् **करकण्डु**स्तं यान्तमालोक्य दण्डिनम् ।
तमाच्छिद्याददे तस्मादथारेभे कलिं द्विजः ॥१०९॥

मिलितेऽथ जने प्राह **करकण्डु**रसौ द्विजः ।
जहार चौरवद् वंशं मदीयप्रेतभूमितः ॥११०॥

स्वं वस्तु न सहेऽन्यत्र तन्मयोच्छिद्य गृह्यते ।
लोभाभिभूतहृदयो वृथाऽयं कलहायते ॥१११॥

यदि स्वर्णसहस्रं मे ददात्येष तथाऽप्यहम् ।
न दाताऽमुं मनोऽभीष्टचिन्तामणिरयं यतः ॥११२॥

सप्तमे दिवसे राज्यं लब्धाऽस्म्येतत्प्रभावतः ।
जहासैतत् समाकर्ण्य लोको बालकवागिति ॥११३॥

ऊचे च जायते राज्यं यदि तेऽस्य प्रभावतः ।
अभिरामस्तदा ग्रामो दातव्योऽस्मै द्विजाय ते ॥११४॥

एवं लोकोऽन्तरागत्य निराकार्षीत् तयोः कलिम् ।
प्रद्विष्टाऽभूत् परं विप्रः स्वजातीयानमेलयत् ॥११५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्यापाद्यैनं बलाद् ग्राह्यो दण्डो राज्यरमाप्रदः ।
इति मन्त्रमधात् तं च कुतश्चित् श्वपचोऽशृणोत् ॥११६॥

ततोऽनश्यत् तमादाय सभार्यः स पुरात् ततः ।
वन्ध्येव सर्वविप्राणां सङ्कल्पो निष्फलोऽजनि ॥११७॥

अथाविच्छिन्नगमनैर्गच्छन्तस्ते त्रयोऽपि हि ।
सप्तमे दिवसे प्रापुः श्री**काञ्चनपुरा**न्तिकम् ॥११८॥

श्रान्ताः सुषुपुरेकस्य वृक्षस्याधः श्रमच्छिदे ।
ममारेतश्च निष्पुत्रस्तत्र दैवान्महीपतिः ॥११९॥

सामन्त-मन्त्रिणश्चक्रुः पञ्चदिव्याधिवासनाम् ।
तानि चोपतदाजग्मुर्भाग्याकृष्टा हि सम्पदः ॥१२०॥

**करकण्डोः** प्रसुप्तस्य निःशङ्कं तत्र मस्तके ।
राज्याभिषेकमाधत्त करी कलशढालनात् ॥१२१॥

हयो हेषारवं चक्रे छत्रेणोच्छ्रितमम्बरे ।
अवीजि चामराभ्यां स स्वयं भाग्यैकसेवधिः ॥१२२॥

किमेतदिति सम्भ्रान्तो यावदुत्तस्थिवानसौ ।
तावदारोहयद् दन्ती स्वपृष्ठौ स्वयमेव तम् ॥१२३॥

**करकण्डु**रिति ख्यातो नाम्ना भोः ! भवतां नृपः ।
भाग्यलभ्योऽभवद् व्योम्नि देवगीरित्यजायत ॥१२४॥

मिलिताः परितः सर्वे तस्य सामन्त-मन्त्रिणः ।
तैर्विज्ञप्तोऽथ नगरं प्रवेष्टुमुपचक्रमे ॥१२५॥

तत्पिता कुत्सिताकारः श्वपाकोऽज्ञायि वाडवैः ।
ततो मन्युभराक्रान्तैः सर्वैः सम्भूय मन्त्रितम् ॥१२६॥

मातङ्गः स्वोचितं चक्रे मातङ्गस्याभिषेचनम् ।
***सदृशाः सदृशेष्वेव रज्यन्ते नापरेषु यत् ॥१२७॥***

विवेकरहिता नूनं सामन्ताः पशुसन्निभाः ।
अहो ! चाण्डालराज्येन च्छुप्त्या विश्वं विगोपितम् ॥१२८॥

अस्माभिर्मलिनस्यास्य शुचिभिर्न प्रवेशनम् ।
***दास्यते सति सूर्ये किं प्रवेष्टुं क्षमते तमः ? ॥१२९॥***

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मन्त्रयित्वेति ते विप्रा अरौत्संस्तत्पथं हठात् ।
उद्दण्डदण्डानुत्पाट्योदतिष्ठंश्चास्य सम्मुखम् ॥१३०॥

ब्रह्मघातभयात् केचित् केचिद् भक्तेरभावतः ।
प्रायः सर्वेऽपि सुभटा उदासीना इवासते ॥१३१॥

स्वभाग्यनिश्चयं जानन् **दधिवाहन**नन्दनः ।
तदाऽधिकमहावंशयष्टिं तामुदपाटयत् ॥१३२॥

विद्युदुद्दण्डदण्डाभं दृष्ट्वैवैनं भयङ्करम् ।
मूर्च्छिता वाडवाः पेतुर्निर्जीवा इव कातराः ॥१३३॥

एवं विप्रानपाकृत्य प्रकटौजा महीपतिः ।
प्रविश्य क्रमतः सौधेऽध्यास राजन्यविष्टरम् ॥१३४॥

क्षितीश्वराः परे सर्वे भेजुस्तं भक्तिभासुराः ।
आज्ञोल्लङ्घनमाधत्त तस्य कोऽपि न कुत्रचित् ॥१३५॥

चाण्डालनिलये विप्रान् स सामर्थ्यादजेमयत् ।
विप्रवैरं स्मरन् भूपस्तांश्चान्योन्यं व्यवाहयत् ॥१३६॥

छायायां स्वातपत्रस्य संस्नाप्य श्वपचान् नृपः ।
विप्रीचकार सन्तो हि पावयन्ति निजाश्रयम् ॥१३७॥

अत एवोच्यते—

**"दधिवाहनपुत्रेण राज्ञा तु करकण्डुना ।**
**वागधानकवास्तव्याश्चाण्डाला ब्राह्मणीकृताः"** ॥१३८॥

एवं तेजोभराक्रान्तनिःशेषोग्रमहीपतिः ।
प्रशशास प्रजा न्यायसेवधिः स नराधिपः ॥१३९॥

अस्य साम्राज्यमाकर्ण्य स विप्रो विश्वविश्रुतम् ।
प्रपन्नग्राममादित्सुरेत्य तस्येदमूचिवान् ॥१४०॥

*उपकारिण्युपकृतिं बहवोऽपि हि कुर्वते ।*
*अपकारिण्युपकृतिं कुर्वते विरला जनाः ॥ १४१॥*

*पुंसः कल्पितुकामस्य च्छायां कुर्वन्ति पादपाः ।*
*सन्तो दुराशयस्यापि प्रियं प्रायः प्रकुर्वते ॥ १४२॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

 

सोऽहं येन कलिश्चक्रे तद्वंशादानहेतवे ।
तत् तदाऽङ्गीकृतं ग्रामं देहि मे धेहि सद्यश: ॥१४३॥

धराधीशस्तदाकर्ण्य तमाह द्विज ! रोचते ।
यत् ते ग्रामोऽथ नगरं तद् याचस्वास्मि तद् ददे ॥१४४॥

दध्यौ विप्रोऽत्र विषये न कोऽपि स्वजनोऽस्ति मे ।
आत्मवर्गपरित्यक्ते तद् ग्रामेणात्र मे सृतम् ॥१४५॥

***स्थानभ्रष्टमनुष्यस्य म्लानिरेव क्षणे क्षणे ।***
***पादपादपनीतस्य प्रसूनस्येव जायते ॥ १४६ ॥***

स्मृत्वेति वक्रधीर्विप्रो निकृत्योवाच साञ्जलि: ।
प्रतापतस्त्वदायत्ता राजन् ! सर्वाऽपि मेदिनी ॥१४७॥

प्रतिज्ञातसमुद्रस्य पारं चेद् गन्तुमिच्छसि ।
**चम्पा**देशे तदा ग्रामं देहि मे तत्रवासिन: ॥१४८॥

पृष्टवानथ भूनाथस्तं कस्तत्र क्षितीश्वर: ? ।
**दधिवाहन** इत्युक्ते दूतं प्रैषीत् तदन्तिके ॥१४९॥

दूतोऽप्युपतदागत्य लेखं दत्त्वेत्युवाच तम् ।
**करकण्डु**र्मम स्वामी भवन्तमिति भाषते ॥१५०॥

मत्प्रेषिताय विप्राय ग्राम एक: स्वनीवृति ।
इष्ट: प्रदेय एवात्र देशे ग्राह्य: स तादृश: ॥१५१॥

***वस्तुना गृह्यते वस्तु न्याय एष महीतले ।***
***एवं च नौ भवेत् प्रीतिस्तवापि स्यात् तत: शुभम् ॥ १५२॥***

परेऽपि सति सामर्थ्ये न्याय्य: पन्था न मुच्यते ।
**करकण्डु**नृपेणात: प्रतिदानमपीष्यते ॥१५३॥

इति दूतवच: श्रुत्वा जज्वालाङ्गपति: क्रुधा ।
स्फुरदोष्ठो बभाषे तं पश्यन्नभि भुजार्गलम् ॥१५४॥

स रे ! नात्मानमावेत्ति त्वत्स्वामी **करकण्डुक:** ।
यदस्माभि: श्वपाक: सन् व्यवहर्तुं समीहते ॥१५५॥

तद् याहि स निजे देशे दत्तां ग्रामं द्विजन्मने ।
नाहं दाता निजं ग्रामं तत्सन्देशेन कर्हिचित् ॥१५६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*वस्तु दत्त्वा परं वस्तु गृह्णन्ति वणिजो हि ये ।*
*स्वभूलवं विना युद्धं राज्ञे दद्युर्न भूधवाः ॥१५७॥*

मा देहि स कृपाणेन ग्रहीता तेऽखिलां श्रियम् ।
इति ब्रुवन् निरैद् दूतः **करकण्डु**मुपागमत् ॥१५८॥

तस्मात् तद्वृत्तमाकर्ण्य क्षणादुत्थाय विष्टरात् ।
चतुरङ्गबलोल्लासी **चम्पेशं** सोऽभ्यषेणयत् ॥१५९॥

साधयन् मार्गभूपालानुप**चम्पं** न्यवीविशत् ।
सैन्यं तेन महीमब्धिनेव तां परिवेष्ट्य सः ॥१६०॥

**करकण्डु**र्बली दुर्गबली तु **दधिवाहनः** ।
इत्येतयोरेकयायी न जयो न पराजयः ॥१६१॥

सम्भूयते बहिः सैन्यमन्तस्तु परिहीयते ।
अन्नागमादिरोधेनेत्यङ्गनाथोऽस्मरद् हृदि ॥१६२॥

बिलेषु मूषकेणेव हीनसत्त्वेन यन्मया ।
द्वाराण्याच्छाद्य दुर्गस्य स्थीयते तन्न युज्यते ॥१६३॥

**करकण्डु**शशः कोऽस्ति सिंहस्येव ममाग्रतः ? ।
लज्जया निरगां नाहं तेन योद्धुमियच्चिरम् ॥१६४॥

अथाविनीततां कुर्वंश्चाण्डालोऽपि निगृह्यते ।
ध्यात्वेति सबलो दुर्गान्निरगाद् **दधिवाहनः** ॥१६५॥

स्वयमेवागतं श्रुत्वा तं परोऽपि स्वयं ययौ ।
दृष्ट्वाऽन्योन्यं तयोरासीच्चित्रमाकस्मिकी हि मुत् ॥१६६॥

क्षेत्रे तथाऽपि तौ क्षत्रव्यवहारवशाच्चिरम् ।
भूर्भुवःस्वस्त्रयीचित्रप्रदं चक्रतुराहवम् ॥१६७॥

**चम्पेश**स्तं सुतं मेने तं च तातमिवापरः ।
इत्यन्योन्योच्छलत्स्नेहावपि तौ न न्यवर्तताम् ॥१६८॥

चिरं नियुध्य सन्ध्यायां निवृत्य **दधिवाहनः** ।
प्रत्यगब्धिमिवादित्यः प्राविशन्नगरान्तरे ॥१६९॥

प्राकारकपिशीर्षस्थभटैः सह तयोरथ ।
सङ्ग्रामो जायते नित्यमन्योन्यमतिदुःसहः ॥१७०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**करकण्डु**प्रसूरेनं साध्वी **पद्मावती** सती ।
अश्रौषीत् क्रमतो लोकाद् विग्रहं पितृ-पुत्रयोः ॥१७१॥

बालोत्पत्त्यादि निखिलं प्रवर्तिन्यै निवेद्य तत् ।
सैन्येऽङ्गजान्तिके साऽगात् क्षणज्ञा तदनुज्ञया ॥१७२॥

अभ्युत्थिता नता तेनासनस्थेत्यभ्यधीयत ।
वत्सलोऽस्मि ध्रुवं मातर्वदागमनकारणम् ॥१७३॥

साऽप्याख्यत् प्राणसंहारकारणे रणकर्मणि ।
यत्नः कोऽयं गुरुं यत्र त्वं सुतोऽपि जिघांससि ॥१७४॥

विस्मितः **करकण्डु**स्तामुवाच किमितीदृशम् ? ।
भगवत्योदितं वाक्यं व्रतिन्याऽपि ह्यसङ्गतम् ॥१७५॥

पिता मम श्वपाकोऽयं तं तु सेवेऽस्मि देववत् ।
साध्व्युवाच वदेर्मैवं क्षत्रवंशैकभास्कर ! ॥१७६॥

राजन् ! प्रतीहि माताऽहं पिताऽयं **दधिवाहनः** ।
दोहदस्त्वयि गर्भस्थे ममाभूद् गजरोहणे ॥१७७॥

इत्यादि तावदाख्यत् सा यावत् त्यक्तोऽसि जन्मनि ।
सोऽपि श्वपाकाद् वृत्तान्तं निश्चिकाय जहर्ष च ॥१७८॥

वत्सैनं विग्रहं मुञ्च **पद्मावत्ये**ति भाषिते ।
ज्ञाततातोऽप्यसौ गर्वान्न तद्वाक्यममन्यत ॥१७९॥

युवाऽयं यौवनोन्मादी गुरूनप्यवमन्यते ।
तद् याम्यन्तरुपाङ्गेशं सोऽस्याभ्यायास्यति स्वयम् ॥१८०॥

इति ध्यात्वा समुत्थाय प्राप **चम्पा**न्तरद्भुतम् ।
राजसौधमसौ राजतन्त्रः सर्वोऽपि पिप्रिये ॥१८१॥

ज्ञात्वा **पद्मावतीं** साध्वीं भक्त्या नेमुर्नृपाङ्गनाः ।
सत्वरं नरनाथोऽपि श्रुत्वाऽऽयातस्तदन्तिकम् ॥१८२॥

प्रागेवागत्य सप्रेमाऽपृच्छद् गर्भः क्व सोऽस्ति मे ? ।
सर्वमाख्याय सोवाच त्वां योऽरौत्सीत् स ते सुतः ॥१८३॥

तं सुतागमवृत्तान्तं फुल्लरोमाञ्चकञ्चुकः ।
निशम्य भूपस्त्वरितं प्रतस्थेऽभि तदुत्सुकः ॥१८४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दृष्ट्वा सतन्त्रमायान्तं प्रशान्तं **दधिवाहनम्** ।
तातं नन्तुं पादचारी तमभ्यागात् परोऽपि हि ॥१८५॥

तेजोऽर्कं तरुणं पुत्रं प्रणतं राज्यधूर्धरम् ।
यमालिङ्ग्यान्वभूद् हर्षं तं वेद **दधिवाहनः** ॥१८६॥

उभावपि प्राविशतामन्त**श्चम्पं** महोत्सवैः ।
वीक्ष्यमाणौ सकुतुकं पौरनारीविलोचनैः ॥१८७॥

**करकण्डुं** निवेश्याङ्केऽध्यास सिंहासनं नृपः ।
कृतकृत्य इव स्वान्ते चिन्तयामासिवानदः ॥१८८॥

"राज्यभारक्षमा एते विश्वाभीष्टाः प्रतापिनः ।
**करकण्डु**समा पुत्रा ममाभूवन्ननेकशः ॥१८९॥

तस्मात् सुगुरुसंयोगः साम्प्रतं जायते यदि ।
इदं राज्यं परित्यज्य व्रतराज्यं तदाददे" ॥१९०॥

ध्यायन्तमिति तत्कालं नृपमुद्यानपालकः ।
ग्रीष्मेऽनभ्रपयोदाभमिदमेत्य व्यजिज्ञपत् ॥१९१॥

**धर्मघोषा**भिधः सूरिर्वनेऽद्य समवासरत् ।
इत्यभिज्ञापिता राजन्नधिकारितया मया ॥१९२॥

अस्मै नृपोऽपि सन्तुष्टो दत्त्वा द्राक् पारितोषिकम् ।
**करकण्डो**र्महाराज्याभिषेकं कृतवान् मुदा ॥१९३॥

स्वयं तु विधिवत् सूरिपार्श्वे संविग्नमानसः ।
चारित्रधुरमादाय परमार्थमसाधयत् ॥१९४॥

अथ पैतृकसाम्राज्यमाप्यासौ दिद्युतेऽधिकम् ।
**करकण्डुः** करस्थश्रीः शारदीं ग्लौरिव च्छविम् ॥१९५॥

अनेकरथ-हस्त्यश्व-पत्तिवानप्यसौ नृपः ।
भेजे गोकुलवात्सल्यं प्रकृत्या सा हि दुस्त्यजा ॥१९६॥

गो-धेनु-तर्णकाकीर्णान् स्वेच्छयैव व्रजान् निजान् ।
पश्यन्नप्यभवत् प्रीतः स पिबन्निव तत्पयः ॥१९७॥

अन्यदैकं व्रजं प्राप्तस्तत्रैकं नूत्नतर्णकम् ।
घटितं मक्षणेनेव धवलं स व्यलोकयत् ॥१९८॥

चिरान्मित्रमिवालोक्य तं नृपोऽभूत् प्रहर्षवान् ।
उत्पाट्य तन्मुखं चुम्बन् मोहादित्याह वल्लवान् ॥१९९॥

भो वल्लवा ! न दोग्धव्या माताऽस्य सुभगाकृतेः ।
अयं पाययितव्यश्चान्यासामपि गवां पयः ॥२००॥

राजादेशममुं प्राप्य राजपुत्रमिवादरात् ।
गोपालाः पालयामासुस्तं वत्सं वत्सलाशया: ॥२०१॥

ककुद्मान् पिच्छलच्छायः स्थूलकायो निरामयः ।
सुतीक्ष्णशृङ्गशुभ्राङ्गो वृषभः सोऽभवत् क्रमात् ॥२०२॥

तमन्यदा नृपो वीक्ष्य प्राप्तो व्रजदिदृक्षया ।
प्रीत्येत्याहग व्रजाध्यक्षान् साध्वेष परिपालितः ॥२०३॥

सुवर्णशृङ्खलेनैनमाभूष्य पुनरासदत् ।
पुरीं नरेश्वरस्तस्य वात्सल्यं मनसोद्वहन् ॥२०४॥

असकृत् प्रेषयामास नृपस्तस्मै गुडादिकम् ।
पशुर्वाऽस्तु पुमान् वाऽस्तु पोष्य एव स्ववल्लभः ॥२०५॥

कियत्यपि गते काले नृपोऽगाद् गोकुलं पुनः ।
एकं जरद्गवं तत्रापश्यद् गोष्वस्थिपञ्जरम् ॥२०६॥

गलल्लालकरालास्यं वायसैर्व्याकुलीकृतम् ।
तमतिक्षीणमालोक्य गोपालान् भूधवोऽभ्यधात् ॥२०७॥

आबाल्यादपि मन्नेत्रामृतं क्व स महावृषः ? ।
तै राजन् ! सोऽयमित्युक्ते विरक्तोऽचिन्तयन्नृपः ॥२०८॥

**"[१]गोट्ठंगणस्स मज्झे ढेक्कियसद्देण जस्स भज्जंति ।**
**दित्ता वि दरियवसहा सुतिक्खसिंगा समत्था वि ॥२०९॥**

**पोराणय गयदप्पो गलंतनयणो चलंतवसहुट्ठो ।**
**सो चेव इमो वसहो पड्डुयपरिघट्टणं सहइ" ॥२१०॥**

---

१. गोष्ठाङ्गनस्य मध्ये ढेक्कितशब्देन यस्य भज्यन्ते ।
दीप्ता अपि दर्पितवृषभाः सुतीक्ष्णशृङ्गाः समर्था अपि ॥
पौराणको गतदर्पो गलन्नयनश्चलद्वृषभोष्ठः ।
स चैवायं वृषभः पड्डुकपरिघट्टनं सहते ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तद् यथैतस्य सौन्दर्यं मया दृष्टं विनश्वरम् ।
सर्वं विश्वं तथा काऽऽस्था ततोऽस्मिंस्तत्त्ववेदिनाम् ? ॥२११॥

*भोगोपभोगयोर्बीजं धनं तदपि न स्थिरम् ।*
*ध्वज-शक्रधनुर्विद्युद्-बुद्बुदादिनिदर्शनैः ॥२१२॥*

*क्षणं बहिर्मनोहारि विचारेऽन्तर्न सुन्दरम् ।*
*वपुः-पुत्र-कलत्रादि सर्वं तत् कोऽत्र रज्यते ? ॥२१३॥*

इति वैराग्यवान् बाढं जातजातिस्मृतिर्नृपः ।
ज्ञातपूर्वभवाभ्यस्तैकादशाङ्गो ललौ व्रतम् ॥२१४॥

देवतादत्तलिङ्गोऽसौ प्राप्तः प्रत्येकबुद्धताम् ।
**करकण्डु**श्चिरं पृथ्वीं विजहार महामनाः ॥२१५॥

उक्तञ्च—

**[१]"सेयं सुजायं सुविभत्तसिंगं जो पासिया वसहं गोट्ठमज्झे ।**
**रिद्धिं अरिद्धिं समुपेहिया णं कलिंगराया वि समेक्खधम्मं" ॥२१६॥**

इति **करकण्डु**प्रत्येकबुद्धः ॥१॥

श्री**काम्पील्य**पुरे राजा हरिवंशनभोरविः ।
न्यायौदार्यावधिः पात्रं **जया**ख्यो विजयश्रियः ॥१॥

**गुणमाले**ति तत्पत्नी स्पृहणीयतराऽभवत् ।
मालेव सन्मनोभृङ्गैर्याऽसेव्यत निरन्तरम् ॥२॥

मन्त्रिषु न्यस्तधूर्भूपः सह वल्लभया तया ।
संसारसुखसर्वस्वं भेजे शच्येव वासवः ॥३॥

अन्यदा संसदासीनो दूतं देशान्तरागतम् ।
स्वसाम्राज्यमदात् पर्यन्वयुङ्क्त वसुधाधिपः ॥४॥

विषयान्तरसञ्चारचतुरस्त्वं तदुच्यताम् ।
तत् किञ्चिदस्ति विश्वायां राज्ये यन्मम नास्ति भोः ! ॥५॥

प्रोवाच प्रणिधिः प्राप्यं राज्ये ते सर्वमद्भुतम् ।
परं न भ्राजते देव ! सौधं चित्रसभां विना ॥६॥

---

१. श्वेतं सुजातं सुविभक्तशृङ्गं यो दृष्ट्वा वृषभं गोष्ठमध्ये ।
ऋद्धिमनृद्धिं सम्प्रेक्ष्य कलिङ्गराजोऽपि समीक्ष्य धर्मम् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आह्वाय्य स्थपतीनेवं दिदेशाथ विशाम्पतिः ।
शालां चित्रोचितां वेगात् कुरुध्वं चित्रकारिणीम् ॥७॥

उपाक्रामन्त भूशुद्धिमाधातुं तेऽपि तत्कृते ।
तस्यां विधीयमानायामथ पञ्चमवासरे ॥८॥

दिक्सर्पितेजसाऽत्यर्कः प्राप्तोऽशंसि महीभुजे ।
जात्यरत्नमयोत्तंसः पुरुषैरधिकारिभिः ॥९॥

सोऽपि तुष्टमना मौलिं तमलात् क्षणपूर्वकम् ।
वस्त्रादिभिर्यथौचित्यं स्थपत्यादीनपूपुजत् ॥१०॥

अथाचिरेण निष्पन्नां विशदां चित्रसंसदम् ।
अलञ्चक्रे महीजानिः सुमुहूर्ते महोत्सवैः ॥११॥

तत्र सिंहासनासीनः शिरसोत्तंसमादधे ।
तारायामिव तद्रत्नेऽभवद् द्रष्टुर्मुखच्छविः ॥१२॥

तेन **द्विमुख** इत्येष नृपतिर्विश्रुतोऽभवत् ।
तद्दिव्यमौलिमाहात्म्यात् प्रतापी चाजनि क्रमात् ॥१३॥

**गुणमाला**भवास्तस्य तनयाः सप्त जज्ञिरे ।
करोति स्त्रीस्वभावत्वात् सुता नास्तीति साऽधृतिम् ॥१४॥

**मदनाख्यं** महायक्षमानर्चे तत्कृतेऽथ सा ।
तत्प्रभावाद् दधौ गर्भं घनमालेव विद्युतम् ॥१५॥

कल्पद्रुमञ्जरीस्वप्नसूचितां कन्यकां क्रमात् ।
साऽसूत सोत्सवं चक्रे नाम्ना **मदनमञ्जरी** ॥१६॥

वर्धमाना क्रमाद् बाल्यमुक्ता तारुण्यसङ्गता ।
रूप-सौभाग्य-साम्राज्यराजधानीव साऽभवत् ॥१७॥

इतश्च दूताच्छुश्रावा**वावन्त्यां प्रद्योत**भूपतिः ।
**जयस्य** तादृशोत्तंसाद् **द्विमुख**त्वं सुविस्मितः ॥१८॥

विससर्ज ततो दूतमुपतन्मौलिलुब्धधीः ।
देह्येतदथवा युद्धसज्जः स्या इत्यचीकथत् ॥१९॥

यजोऽप्युवाच तं दूतं मुकुटो दीयते मया ।
**प्रद्योतो**ऽपि परं मह्यं ददात्वेतन्महीभुजे ॥२०॥

Jain Education International 2010_02     For Private & Personal Use Only     www.jainelibrary.org

द्विपो **नलगिरिर्जाया** **शिवादेवी** रथोऽ**ग्निभी**: ।
**वज्रजङ्घ**स्तथा दूतो मृग्यमेतच्चतुष्टयम् ॥२१॥

प्रत्यावृत्त्याथ दूतेन **प्रद्योताय** निवेदिते ।
स चुकोप परं राज्यसारस्य परिमार्गणात् ॥२२॥

चतुरङ्गचमूपेतस्तं हठादभ्यषेणयत् ।
द्विपञ्चलक्षहस्त्यश्वसप्तकोटिपदातिभि: ॥२३॥

**पञ्चाल**सीमसम्प्राप्तं **द्विमुखो**ऽपि तमभ्यगात् ।
गारुडाम्भोनिधिव्यूहप्रधानोऽभूत् तयो रण: ॥२४॥

जायमाने नि:समाने दुर्लक्षे दारुणे रणे ।
अनेके मिमिलुर्व्योम्नि देवता: कौतुकाकुला: ॥२५॥

मौलिरत्नप्रभावेन **प्रद्योत**बलवारिधिम् ।
भटकोटिसुरोपेतो ममन्थ **जय**मन्दर: ॥२६॥

क्षणाज्जग्राह्य जीवन्तं **प्रद्योतं** त्रस्तसैनिकम् ।
वाद्यमानजयातोद्यमनैषीन्नगरं **जय**: ॥२७॥

सुवर्णनिगडाबद्ध: **प्रद्योत**स्तत्र तस्थिवान् ।
सुखेन स्नान-युवती-भोग-सद्भोजनादिभि: ॥२८॥

चरन्तीं कुट्टिमे दृष्ट्वाऽन्यदा **मदनमञ्जरीम्** ।
दग्ध: कामाग्निना बाढं नात्मानमपि वेद स: ॥२९॥

अन्तस्तापभराक्रान्त: कथञ्चिदपि यामिनीम् ।
व्यतीत्य प्रातरास्थानमायातो**ऽवन्ति**नायक: ॥३०॥

तं तथा म्लानवदनमालोक्य **द्विमुखो**ऽवदत् ।
राजन् ! किं बाधते तेऽङ्गं केनचिद् दूमितोऽथवा ? ॥३१॥

न्यग्मुखो लज्जया मौनी पृष्टस्तेनाथ वीप्सया ।
किं ह्रियेति सुनि:श्वस्य **प्रद्योतो** **द्विमुखं** जगौ ॥३२॥

*राजन् वाच्यं किमस्तीह दुष्टोऽयं स्मरकेशरी ।*
*पीडयन् निखिलं विश्वं ज्ञात एव भवादृशाम् ॥३३॥*

*मुमूर्षोर्मदनार्तस्य क्रुद्धस्याथ च रोगिण: ।*
*अतिवृद्धस्य बालस्य कुतो मत्तस्य च त्रपा ? ॥३४॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किं गोप्यं न क्षमः स्थातुं विना **मदनमञ्जरीम्** ।
तत् तां देह्यन्यथा वह्निर्निषेव्यो निश्चितं मया ॥३५॥

ज्ञात्वाऽस्य निश्चितं रागमौचित्यं चाधिराजताम् ।
**मालवा**धिपतेः पत्नीं स्वसुतां **द्विमुखो** व्यधात् ॥३६॥

तया सहैष सानन्दं स्थित्वाऽथ कतिचिद् दिनान् ।
प्रीत्या **जयाभ्य**नुज्ञातो भूयः शास्ति स्म **मालवान्** ॥३७॥

**मालवेश्वर-पञ्चालेश्वर**योरनयोस्तदा ।
वर्धमानाधिकप्रीत्योरैकराज्यमिवाभवत् ॥३८॥

अन्यदा तद् दिनं प्राप्तं स्याद् यत्रेन्द्रमहोत्सवः ।
तदाऽऽदिदेश भूजानि**र्द्विमुखो** नागराणिति ॥३९॥

इन्द्रकेतुमलङ्कृत्योद्‌र्ध्वयध्वं भोस्तदग्रतः ।
एषमोऽधिकविच्छित्त्या कुरुतेन्द्रमहोत्सवम् ॥४०॥

तैरप्यूद्‌र्ध्वीकृतः स्तम्भश्चत्वरे धवलध्वजः ।
किङ्किणीजालवाचालो मणि-माल्यविभूषणः ॥४१॥

मुक्ताजालक-केयूरैकावली-कटकादिभिः ।
सोऽभूष्यत तथा विश्वस्पृहणीयोऽभवद् यथा ॥४२॥

तदग्रे विदुराः साङ्गं नृत्यमादधिरे नटाः ।
गायना अपि सोल्लासं जागति स्म कलध्वनिम् ॥४३॥

गाथा-षट्पद-काव्यानि कवयः पेठुरुच्चकैः ।
आतोद्यिका मृदङ्गादि चारुवाद्यान्यवादयन् ॥४४॥

नागरा ददुरन्योन्यमुच्छलद्घुसृणच्छटाः ।
अपि ताम्बूल-वस्त्रादि स्त्रियो हल्लीसकान्यपि ॥४५॥

आहूत**मालवेशा**दिराजयुग् **द्विमुखो**ऽपि हि ।
व्यधात् परिवृतः पौरैः सप्ताहं विविधोत्सवान् ॥४६॥

पूर्णिमास्यां विशेषेण तमभ्यर्च्य नृपादयः ।
परिपूर्णोत्सवाः कार्यैरयुज्यन्त निजैर्निजैः ॥४७॥

उच्छ्रितोऽपि ध्वजस्तम्भः स्वदिनातिगमे जनैः ।
पातितोऽभूत् पुनर्धूलि-विण्-मूत्राद्यवगुण्ठितः ॥४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तं ददर्शान्यदा पृथ्वीनाथस्तेन पथा व्रजन् ।
तादृशामेध्यदुर्गन्धं संविग्नश्चेत्यचिन्तयत् ॥४९॥

*"ही ! चित्रं केतुरैन्द्रोऽसौ विश्वासाराणुमानिव ।*
*तदाऽभूदधुनैवायं कीदृशोऽजनि धिग् भवम् ॥५०॥*

*धराधरधुनीनीरपूरपारिप्लवं वपुः ।*
*जन्तूनां जीवितं वातधूतध्वजपटोपमम् ॥५१॥*

*लावण्यं ललनालोकलोचनाञ्चलचञ्चलम् ।*
*यौवनं मत्तमातङ्गकर्णतालचलाचलम् ॥५२॥*

*स्वाम्यं स्वप्नावलीसायं चपलाचपलाः श्रियः ।*
*प्रेम द्वित्रिक्षणस्थेम स्थिरत्वविमुखं सुखम् ॥५३॥*

*कृत्रिमाऽऽसीत् तदाऽमुष्मिन् शोभाऽऽरोपितवस्तुभिः ।*
*सर्वत्रैतादृशैर्वेयं ही ! भ्रान्तिर्मुग्धदेहिनाम् ॥५४॥*

अपि च—

"सुमतिरमतिः श्रीमानश्रीः सुखी सुखवर्जितः,
सुतनुरतनुः स्वाम्यस्वामी प्रियः स्फुटमप्रियः ।
नृपतिरनृपः स्वर्गी तिर्यग् नरोऽपि च नारकस्;
तदिति बहुधा नृत्यत्यस्मिन् भवी भवनाटके" ॥५५॥

*पर्यन्तविरसाः सर्वे संसारे विषया इमे ।*
*खलमैत्रीव तत् त्याज्याः परिभाव्येति पार्थिवः" ॥५६॥*

प्रत्येकबुद्धता प्राप्तः पञ्चमुष्ट्युदपाटयत् ।
मूर्धजान् व्रतमादाय त्यक्तसङ्गो विजह्रिवान् ॥५७॥

उक्तञ्च—

**"जो[१] इंदकेउं सुअलंकिय तं दट्ठुं पडंतं पविलुप्पमाणं ।**
**रिद्धिं अरिद्धिं समुपेहिया णं पंचालराया वि समेक्ख धम्मं" ॥५८॥**

इति **द्विमुख**प्रत्येकबुद्धः ॥२॥

---

१. य इन्द्रकेतुं स्वलङ्कृतं तं दृष्ट्वा पतन्तं प्रविलुप्यमानम् ।
ऋद्धिमनृद्धिं सम्प्रेक्ष्य पञ्चालराजाऽपि समीक्ष्य धर्मम् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अस्ति **मालवभूत्तंसं** पुरं नाम्ना **सुदर्शनम्** ।
तस्मिन् **मणिरथो** नाम पृथ्वीनाथो महारथः ॥१॥

युवराजो **युगबाहुरस्य** सौभ्रात्रभाजनम् ।
प्रिया **मदनरेखाऽ**स्य सीमभूः शील-रूपयोः ॥२॥

मिथ्यादृष्टिषु वैमुख्यमाभिमुख्यं मतेऽर्हताम् ।
परमश्राविका साऽभूत् कौशल्यमपि बिभ्रती ॥३॥

रोहिण्येव बुधः सूनुस्तया **चन्द्रयशोऽ**भिधः ।
सुषुवे वर्णिका यस्य यशसश्चन्द्रमण्डलम् ॥४॥

तामन्यदा गवाक्षस्थां नृपो दृष्ट्वाऽऽङ्गजैः शरैः ।
अपनीतविवेकत्वादित्ययुक्तमचिन्तयत् ॥५॥

कदा ममैतया भावी सम्बन्धः शर्मवारिधिः ? ।
वञ्चितोऽहमभुक्त्वैनां ही ! इयन्तमनेहसम् ॥६॥

वधूरनुजपत्नीति चिन्तनं सुखविघ्नदम् ।
मद्बन्धोर्यन्ममैवैतत् तद्द्रोगे किं विरुध्यते ? ॥७॥

इत्यनुध्याय ताम्बूल-दुकूलादि महीपतिः ।
प्रजिघाय रहस्तस्यै साऽप्यदुष्टा तदग्रहीत् ॥८॥

अभाण्यथैकदैकान्ते तेनैषा यदि मां पतिम् ।
स्वीकरोषि तदा कुर्वे त्वां साम्राज्यैकभागिनीम् ॥९॥

साऽपि दन्तेऽङ्गुलीं दत्त्वा सतीरत्नमदोऽवदत् ।
कथञ्चित् ज्येष्ठ ! चेद् ध्यातं तद् वाचोदचरः कथम् ? ॥१०॥

यां दृशाऽपि न पश्यन्ति ज्येष्ठा रागभिया वधूम् ।
तां नृप ! प्रार्थयन् भुक्त्यै पशुभ्योऽप्यतिरिच्यसे ॥११॥

पर्याप्तं तेन राज्येन यदकार्यनिबन्धनम् ।
त्वद्भ्रातृराज्यभागेन स्वल्पेनापि हि मे मुदः ॥१२॥

*अप्यवश्यागतो मृत्युर्न भिये स्यान्महात्मनाम् ।*
*लोकद्वयविरुद्धार्थोपस्थितिः प्राणहारिणी ॥१३॥*

विश्वस्तस्याद्भुतप्रेम्णो नानुजस्यापि ते त्रपा ।
यदेवं श्वभ्रगर्तैकपातहेतुं चिकीर्षसि ॥१४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वस्ववस्तुनि सन्तोषः सतां तत् तिष्ठ सत्पथे ।
दुःखं क्षणैकसौख्यार्थे कल्पसह्यं किमार्जयः ? ॥१५॥

श्रुत्वेति त्रपितः क्ष्मापो निवृत्त्येदमचिन्तयत् ।
स्वकामितं करिष्यामि व्यापाद्यापि स्वबान्धवम् ॥१६॥

रजन्यामन्यदा स्वप्ने पुण्यान्**मदनरेखया** ।
पूर्णेन्दुः शारदो दृष्टः शिष्टश्च **युगबाहवे** ॥१७॥

सर्वोर्वीवासवः सूनुस्तव भावीति सोऽवदत् ।
व्याख्याश्रुति-जिनार्चानां दोहदं चाप्यपूरयत् ॥१८॥

स्पृहणीये वसन्तर्तौ **युगबाहु**स्तया सह ।
कुर्वन्नुपवने केलिं कर्हिचिद् दिनमत्यगात् ॥१९॥

निशि श्रान्तश्च तत्रैव स्वल्पतन्त्रः प्रियायुतः ।
अभीः सुरभिते पुष्पैस्तस्थिवान् कदलीगृहे ॥२०॥

नृपस्तं छिद्रमुत्प्रेक्षाभ्यगात् तत्रोदसिर्निशि ।
किमरण्ये स्थितो बन्धुर्दम्भेनेति स्फुटं वदन् ॥२१॥

केलीगृहं प्रविश्याशु प्रबुद्धं विनयोत्थितम् ।
प्रणतं बान्धवं स्कन्धे निजघान शितासिना ॥२२॥

करादपाति ही ! शस्त्रं निहतः सोदरो हहा ! ।
इति प्रपञ्चयन् वीरानपसार्य स निर्ययौ ॥२३॥

तुमुलान्मिलिते लोकेऽभ्यागाच्**चन्द्रयशाः** स्वयम् ।
आदाय त्वरितं मन्त्रि-शस्त्रघातचिकित्सकान् ॥२४॥

**युगबाहो**र्वपुर्वीक्ष्य च्युतनिःशेषशोणितम् ।
व्रणकर्मणि मर्मज्ञैर्वैद्यैस्त्यक्तस्तदादरः ॥२५॥

क्षणान्तरे प्रणष्टा वाग् नेत्रयुग्मं निमीलितम् ।
अनिष्पन्दानि चाङ्गानि दन्ताश्चासन्नसंवृताः ॥२६॥

भर्तु**र्मदनरेखा**पि विज्ञायेत्यन्तिमां दशाम् ।
प्रोवाच धैर्यमालम्ब्योपकर्णं तत्क्षणोचितम् ॥२७॥

"शृणु प्राणेश ! मे वाक्यं मोहं देहादिषु त्यज ।
धर्मं स्वीकुरु जैनेन्द्रं त्यजार्तिं रौद्रतामपि ॥२८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

देहो गृहं कुटुम्बं श्रीः प्रतिष्ठा सर्वमाप्यते ।
अर्हदुक्तस्तु धर्मोऽयं सुकृतैर्यदि लभ्यते ॥२९॥

ध्यात्वाऽर्हतो गुरून् नत्वा सम्यक्त्वं मनसा श्रय ।
रत्नत्रयमयं पन्था मोक्षस्याभिमतोऽस्तु ते ॥३०॥

शरणं चार्हतः सिद्धान् साधून् धर्मं च संश्रय ।
न जीवांस्त्रातुमन्योऽस्ति यत् कोऽपि परमीश्वरः ॥३१॥

ज्ञान-दर्शन-चारित्र-तपो-वीर्यात्मनां स्वयम् ।
त्वमालोचय पञ्चानामाचाराणामतिक्रमम् ॥३२॥

दुष्कृतं यत् कृतं चात्र भवे पूर्वभवेऽपि वा ।
तच्च तस्य च कर्तारं गर्हस्वात्मानमात्मना ॥३३॥

स्वस्यान्येषां च सत्कर्माण्यनुमोदस्व भावतः ।
एवं हि वृद्धि-स्वीकारौ पुण्यस्याभिमतौ जिनैः ॥३४॥

भवेऽत्रैव तथाऽन्यत्र मनो-वाक्-कर्मभिस्त्वया ।
ये दुःखे स्थापिता जीवास्तान् सर्वान् क्षमयाधुना ॥३५॥

सुखं दुःखं च कर्मोत्थं निमित्तमपरो मुधा ।
परमार्थेन जीवानां न तन्मित्रं न वा रिपुः ॥३६॥

दुर्गत्यै देहिनां वैरमियं मैत्री तु मुक्तये ।
वैरं व्युत्सृज्य तन्मैत्रीमेवं जीवेषु चिन्तय ॥३७॥

यस्मै षट्कायजीवानामारम्भः क्रियते जनैः ।
प्रत्याख्याहि तमाहारमेवं ते हितमायतौ ॥३८॥

अष्टादशाथ स्थानेभ्यः प्रतिक्रमणमस्तु ते ।
भावयानित्यतां धेहि जैनयोगे स्थिरं मनः ॥३९॥

आवर्तय नमस्कारं पञ्चानां परमेष्ठिनाम् ।
श्रेयःश्रियं वशीकर्तुं प्रभुर्मन्त्रो जयत्ययम् ॥४०॥

भावतः स्मरतः पञ्चपरमेष्ठिनमस्क्रियाम् ।
यस्य प्राणाः प्रतिष्ठन्ते मृतोऽपि हि स जीवति ॥४१॥

एतत् सर्वं त्रिधा शुद्ध्या प्रतीष्टं **युगबाहुना** ।
जिनाज्ञोपहितस्वान्तः स्वश्च प्राप स तत्क्षणात ॥४२॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

शोकाक्रान्तेऽखिले लोके औरसे च विशेषतः ।
अतिदक्षा शुचं त्यक्त्वा सती सेति व्यचिन्तयत् ॥४३॥

धिग् मे रूपमनर्थैकहेतु सम्प्रत्यसौ नृपः ।
शीलध्वंसमनिच्छन्त्या अपि कर्ता कदाचन ॥४४॥

अथवाऽस्मिन् कुमारोऽपि पापः पापं करिष्यति ।
कालोचितमिदं तन्मेऽधुना क्वापि पलायनम् ॥४५॥

*वरं मे मृत्युरप्यस्तु न पुनः शीलखण्डना ।*
*मृतोऽपि शीलवान् श्लाघ्यो जीवन्नपि न तच्च्युतः ॥४६॥*

इत्थं निशीथे निश्चित्य निःसृत्य तरसाऽथ सा ।
उत्पथेन तथाऽयासीद् भग्नशुल्को यथा वणिक् ॥४७॥

यान्ती महाटवीमापाति चक्राम च यामिनीम् ।
मध्याह्नेऽथ सरो लेभे सफलद्रुमशालितम् ॥४८॥

व्रतार्थं संयमीवैषा गर्भार्थं वृत्तिमादधे
फलान्यत्त्वा पयः पीत्वा निरपेक्षाऽपि जीविते ॥४९॥

संकीर्णकदलीच्छाये वने सुष्वाप सा क्षणम् ।
साकाराहारसंन्यासमाधायाध्वपरिश्रमात् ॥५०॥

डुढौकेऽत्र पुना रात्रिस्तत्रास्या नाभवद् भयम् ।
शीलाङ्गरक्षगुप्तायाः शिवा-व्याघ्रादिफूत्कृतैः ॥५१॥

वेदनार्ताऽर्धरात्रेऽथ प्रभूताद्भुतलक्षणम् ।
काष्ठाष्टककृतोद्योतमसूतैषा सती सुतम् ॥५२॥

आमुक्तभर्तृनामाङ्कमुद्रं भद्रममुं शिशुम् ।
रत्नकम्बलसंवीतं न्यस्य तत्रैव सा प्रगे ॥५३॥

वपुषो वाससां शौचं कर्तुमागात् सरोऽन्तरम् ।
जलेभेन करेणैषोत्पाट्यात्र प्रापिताऽम्बरम् ॥५४॥

युवा विद्याभृदेकस्तां पतन्तीं वीक्ष्य खाद् भुवि ।
रूपाल्लक्ष्मीमिवाध्यक्षां पाणिभ्यां प्रयतोऽगृहीत् ॥५५॥

**वैताढ्यं** तेन नीताऽसौ स्वकर्मप्रतिकूलताम् ।
स्मरन्ती तमुवाचैवं वृत्तं स्वीयं कृपावहम् ॥५६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

महासत्त्व ! प्रसूताऽहमद्यैव तनुशुद्धये ।
सरो गताऽम्बुनागेनोत्क्षिप्ताऽऽत्ता च त्वयाऽधुना ॥५७॥

अद्य जातोऽर्भकोऽरण्ये हिंस्रैर्व्यापादयिष्यते ।
तत् तत्र नय मां तं वाऽत्रानयार्य ! ममाङ्गजम् ॥५८॥

हतो भर्ता ज्येष्ठभीत्या त्यक्ता पुत्रान्विता पुरी ।
वियोजयसि किं तेन मां बालेन निराश्रयाम् ? ॥५९॥

आकाशकुट्टनप्रायकटाक्षक्षेपपूर्कम् ।
सोऽप्युवाचास्ति **गन्धारदेशे रत्नावटं** पुरम् ॥६०॥

**मणिचूडो**ऽत्र विद्याभृन्नृपोऽस्य **कमलावती** ।
प्रिया **मणिप्रभ**स्तस्याङ्गजोऽहमतिवल्लभः ॥६१॥

तातो न्यस्य मयि श्रेणिद्वयीचक्रित्वमात्मना ।
आत्तव्रतश्चतुर्ज्ञानी सोऽस्ति **नन्दीश्वरे**ऽधुना ॥६२॥

तं च चैत्यानि चानन्तुं यानहं त्वामवाप्य खे ।
निवृत्तस्तन्मया सार्धं सुभ्रु ! भुङ्क्ष्वोल्बणां श्रियम् ॥६३॥

सिद्धप्रज्ञप्तिविद्योऽहं जाने नूनं तवाङ्गजम् ।
**मिथिलेन्द्रो** हयानीतः प्रेम्णा निन्ये वनात् पुरीम् ॥६४॥

तच्छुचं मुञ्च पश्येमं प्रेम्णाऽऽदेशकरं जनम् ।
भविष्यन्ति पुनः पुत्रा बहवोऽपि महारथाः ॥६५॥

श्रुत्वेति निभृतं वज्राहतेवार्तिमुपेयुषी ।
वीप्सयाऽऽपत्करं दैवमेवोपालब्ध सा सती ॥६६॥

**निर्विवेकः स्मरार्तोऽङ्गी जानीयान्न हिताहितम् ।**
तदुपायं दधे किञ्चिच्छीलरक्षार्थमात्मनः ॥६७॥

ध्यात्वेति स्वादु साऽवादीदार्येदं मतमेव मे ।
नय **नन्दीश्वरं** किन्तु तत्र त्वत्प्रियमादधे ॥६८॥

ततो नीत्वा सहर्षस्तां विमानेन **मणिप्रभः** ।
**नन्दीश्वरे** द्विपञ्चाशच्चैत्यान्यनमयत् क्षणात् ॥६९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्तञ्च—

"[१]अंजणगिरीसु चउसुं तह सोलस दहिमुहेसु सेलेसु ।
बत्तीस रइकरेसुं नंदीसरदीवमज्झंमि ॥७०॥
[२]जोयणसयदीहाइं पन्नासं वित्थडाइं विमलाइं ।
बावत्तरूसियाइं बावन्ना हुंति जिणभवण" ॥७१॥

मुक्तकल्पमिवात्मानं मन्वानैतन्नमस्यया ।
साऽनंसीन्**मणिचूडर्षि** शिलास्थं समणिप्रभा ॥७२॥

सोऽपि ज्ञात्वा तयोर्भावमुपदेशं तथा व्यधात् ।
उपशान्तो यथा मेने स्वसारं तां **मणिप्रभः** ॥७३॥

श्रमणं देशनाप्रान्ते साऽपृच्छद् विहिताञ्जलिः ।
प्रवृत्तिं निजबालस्य सोऽप्याख्यत् ज्ञानवानिति ॥७४॥

विजये **पुष्कलावत्यां** पुरेऽभून्**मणितोरणे** ।
चक्री **मित्रयशा** नाम्ना **पुष्पवत्य**स्य वल्लभा ॥७५॥

**पुष्पसिंह-रत्नसिंहा**वेतयोर्धर्मिणौ सुतौ ।
अब्ध्यष्टपूर्वलक्षाणि तौ भुक्त्वा राज्यवैभवम् ॥७६॥

चारणश्रमणोपान्तात्तव्रतौ तानि षोडश ।
अभूतां तत् परीपाल्याच्युते सामानिकौ सुरौ ॥७७॥

ततोऽपि **धातकीखण्ड-भरतार्धे**ऽर्धचक्रिणः ।
पत्न्यां **समुद्रदत्तायां हरिषेण**स्य नन्दनौ ॥७८॥

आद्यः **सागरदेवो**ऽभूत् परः **सागरदत्त**कः ।
आबाल्यादप्युभौ राज्यनिराकाङ्क्षौ बभूवतुः ॥७९॥

**दृढसुव्रत**देवस्य द्वादशस्य स्वयम्भुवः ।
तीर्थेऽथ तौ विनिष्क्रान्तौ संवेगादुपसद्गुरु ॥८०॥

---

१. अञ्जनगिरिषु चतुर्षु तथा षोडश दधिमुखेषु शैलेषु ।
द्वात्रिंशति रतिकरेषु नन्दीश्वरद्वीपमध्ये ॥

२. योजनशतदीर्घाणि पञ्चाशद् विस्तृतानि विमलानि ।
द्वासप्तत्युच्छ्रितानि द्वापञ्चाशद् भवन्ति जिनभवनानि ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तृतीयवासरे विद्युन्निपातेन निपातितौ ।
तावभूतां सुरौ शुक्रेऽम्बुधिसप्तदशस्थिती ॥८१॥

अन्यदा **भरते**ऽत्रैव ताभ्यां श्री**नेमि**तीर्थकृत् ।
साक्षाद् व्याख्याक्षणे पृष्टः कियानद्यापि नौ भवः ? ॥८२॥

एको वां **मिथिला**धीश-**जयसेना**ङ्गजः परः ।
**युगबाहो**रुभावन्त्यदेहाविति जगौ प्रभुः ॥८३॥

श्रुत्वेत्येकावतारत्वं नीत्वाऽऽयुस्त्रिदशालये ।
**मिथिला**यां तयोराद्यो **जयसेन**सुतोऽभवत् ॥८४॥

युवा **पद्मरथा**ख्योऽसौ राज्यमासाद्य पैतृकम् ।
सम्राडभून्नृपव्यूहमौलिमाल्यार्चितक्रमः ॥८५॥

आर्ये ! परः पुनश्च्युत्वा स त्वदीयौरसोऽभवत् ।
तं च **पद्मरथो** वक्रहयानीतोऽधुनाऽऽप्तवान् ॥८६॥

पत्न्यै स **पुष्पमाला**यै तेन पुत्रतयार्पितः ।
जन्मैवोद्दिश्य चक्रे च महांस्तस्य महोत्सवः ॥८७॥

पूर्वसौभ्रात्रतोऽत्रापि प्रश्रयो मिथिलेशितुः ।
तस्मिंस्तथाऽस्ति न यथाऽन्यस्य स्यात् तनुजे पितुः ॥८८॥

वृष्टिरत्रान्तरे पौष्पी दिवोऽभूद् रत्नमिश्रिता ।
विमानमेकमागाच्च सहस्रकिरणोज्ज्वलम् ॥८९॥

उत्तीर्यास्मात् सुरः कश्चित् संसद्यस्यां महामहाः ।
सतीं **मदनरेखां** प्राक् त्रिः परीत्य मुदाऽनमत् ॥९०॥

पश्चात् तं मुनिमानम्यासीनमेनं **मणिप्रभः** ।
विनयव्यत्यये हेतुमपृच्छत् प्राह सोऽप्यदः ॥९१॥

**युगबाहु**रहं पूर्वभवे **मणिरथा**नुजः ।
हतोऽग्रजेन तद्वैरानुबन्धाच्छमितोऽनया ॥९२॥

यस्मादजनि देवर्द्धिर्धर्मे तस्मिन्नसौ गुरुः ।
कृतज्ञेन मया पूर्वं सादरं तदियं नता ॥९३॥

***यो येन विमले धर्मे गृहिणा यतिनापि वा ।***
***स्थापितो धर्मदानेन तस्यासौ निश्चितं गुरुः ॥९४॥***

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

*दृग्दायिनां च नानृण्यमपि सर्वेष्टयोजनात् ।*
*तदवज्ञा पुनर्मोहक्लेशमार्गैकदीपिका ॥९५॥*

**मणिप्रभो**ऽप्यदः श्रुत्वा धर्मसामर्थ्यमद्भुतम् ।
आसीज्जिनोदिते धर्मे स्थिरदृष्टिः प्रयत्नवान् ॥९६॥

सुरस्तामाह तेऽभीष्टं किं करोमि समादिश ? ।
साऽवग् मम प्रियो मोक्षस्तं दातुं न क्षमाः सुराः ॥९७॥

किन्तु पुत्रमुखं द्रष्टुं **मिथिलां** मां नयैकदा ।
परमात्महितं येन ततः कुर्वे समाधिना ॥९८॥

सा तां तेन क्षणान्नीता **नमि-मल्लि**जनुर्भुवम् ।
तच्चैत्यानि नमस्कृत्यानमत् साध्वीरुपाश्रये ॥९९॥

प्रवर्तिन्याऽथ साऽभाणि नात्मीयमिह किञ्चन ।
**स्निह्यन्ति धर्मादन्यत्र वृथा मोहनियन्त्रिताः ॥१००॥**

***अस्मिन् नित्यपरपरिक्षुण्णे जीवैः संसारवर्त्मनि ।***
***गच्छन् प्रियः प्रियस्यापि मुहूर्तं न प्रतीक्षते ॥१०१॥***

***अपि स्वर्णसहस्रेण नावाप्यो मानुषः क्षणः ।***
***कृतार्थयन्ति तं धन्यास्तत्त्वधर्मोपचर्यया ॥१०२॥***

इतश्चाभ्यर्थिता द्रष्टुं सुतं देवेन सा जगौ ।
भवैकबन्धनेनालमिदानीं प्रणयेन मे ॥१०३॥

अथैतां विनयान्नत्वा त्रिदिवं त्रिदशे गते ।
तत्रैवात्तव्रता नाम्ना साध्वी साऽजनि **सुव्रता** ॥१०४॥

इतः **पद्मरथा**वासे शिशौ तत्रागते तदा ।
सर्वेऽरयो नतास्तेन पप्रथे **नमि**रित्यसौ ॥१०५॥

दीप्तबुद्धिगुणादर्शे तस्मिन् भाग्यैकधामनि ।
विनाऽऽयासमुपाध्यायात् कलाः सञ्चक्रमुः स्वयम् ॥१०६॥

अष्टोत्तरं सहस्रं स कनी**रिक्ष्वाकु**वंशजाः ।
पितृभ्यां निभृताह्लादाद् युगपत् पर्यणाय्यत ॥१०७॥

राज्यं दत्त्वाऽन्यदा तस्मै नृपः **पद्मरथः** स्वयम् ।
प्रव्रज्य केवली भूत्वा प्रतिपेदे महोदयम् ॥१०८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्षमः क्षमी प्रभुर्न्यायी विद्यानिधिरनुद्धतः ।
सुभगः शीलवानासीत् सैष **पद्मरथा**धिकः ॥१०९॥

तत्सौराज्यवशात् तस्य देशेऽजायन्त लेशतः ।
क्वचित् कदापि नैवेति-रोर-मारि-द्विषां भियः ॥११०॥

अहन् **मणिरथो** यच्च **युगबाहुं** तदंहसा ।
तुर्यं कृष्णाहिदष्टोऽसौ श्वभ्रमाप तदा निशि ॥१११॥

हत्वा बन्धुं स्मरेणान्धः स्वयमप्यमृताधमः ।
***पूर्वमासन्नपातानां पापेषु रमते हि धीः ॥११२॥***

राज्येऽभ्यषिच्यत तदा योग्य**श्चन्द्रयशाः** पुनः ।
प्रचण्डशासनः सोऽभूद् दुस्साध्यानपि साधयन् ॥११३॥

एकदा मन्त्रि-सामन्त-वीरोपेतः स भूपतिः ।
वाहवाहार्हसद्वेषो वाह्यालीभुवमासदत् ॥११४॥

इतश्चौजस्विनः पृथ्वीशक्रस्य **नमि**भूभुजः ।
पट्टद्विपश्चतुर्दन्तो विश्वादान्तोऽर्जुनच्छविः ॥११५॥

उद्दण्डशुण्डादण्डश्रीरुन्मूल्यालानमोजसा ।
मत्तो दिशैकया धावन् विगणय्योत्कटान् भटान् ॥११६॥

क्षणेन चित्तवद् भूमिमुल्लङ्घ्या**वन्ति**नीवृति ।
**सुदर्शन**पुरासन्नमागान्नागगणाग्रणीः ॥११७॥

अतिश्रान्तः क्षुधाक्रान्तो वशीकृत्य धिया भटैः ।
उपनिन्ये तदा सद्यः स **चन्द्रयशसे** गजः ॥११८॥

राज्यश्रीजीवनं नागं विशामीशस्तमुत्सवैः ।
**सुदर्शन**पुरं प्रावीविशन्मोदवशंवदः ॥११९॥

वासरैरथ सप्ताष्टैः श्रुत्वा तन्**नमि**भूपतिः ।
विससर्ज द्रुतं दूतं चतुरं **चन्द्रकीर्तये** ॥१२०॥

अथापमानिते दूते प्रत्यावृत्ते **नमि**र्नृपः ।
मदाध्मातश्चमूचक्राक्रान्तविश्वम्भरोऽचलत् ॥१२१॥

पन्थानमतिलङ्घ्यासौ कैश्चिदेव प्रयाणकैः ।
**सुदर्शन**पुरोपान्ते सैन्यमावासयन्निजम् ॥१२२॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

यियासुरपि युद्धाय **चन्द्रः** सचिववारितः ।
शतघ्नीभिश्च यन्त्रैश्च दुर्गमुच्चैरसज्जयत् ॥१२३॥

प्रतीक्ष्यमाणयोः क्षेत्रे निर्णीतरणवासरम् ।
अधःस्थैरुपरिस्थानां नित्यं प्रववृते रणः ॥१२४॥

श्रुत्वैतत् **सुव्रता** साध्वी मुधा मा भूज्जनक्षयः ।
इत्येत्यैकार्यया सार्धं शिबिरे श्री**नमे**रगात् ॥१२५॥

प्रणम्य तां **नमि**बद्धाञ्जलिर्दत्तासनोऽविशत् ।
तत्पुरो भुवि साऽप्युच्चैस्तेने कुशलदेशनाम् ॥१२६॥

*"तुच्छचञ्चलसाम्राज्यलवगर्वविचेतनः ।*
*वृथा करोषि मानुष्यमवाप्तमतिदुर्लभम् ॥१२७॥*

*यं समाश्रित्य तिष्ठन्ति सर्वभूतानि निर्भयम् ।*
*तस्यैव प्रभविष्णुत्वं श्लाघ्यमस्खलितौजसः ॥१२८॥*

ज्येष्ठेन बन्धुनाऽग्राहि स्वयमभ्यागतः करी ।
तत् किमन्यत्र कुत्रापि गतो यत् कुरुषे क्रुधम् ? ॥१२९॥

*सर्वत्रापि कृतः क्रोधोऽदभ्रश्वभ्रविपत्करः ।*
*गुरून् प्रति कृतो यस्तु कथ्यते तस्य का कथा ?" ॥१३०॥*

विस्मितोऽथ **नमि**र्दध्यौ किमिदं वक्ति संयती ? ।
क्व स **चन्द्रयशाः** क्वाहं पृथग्देशकुलोद्भवौ ? ॥१३१॥

ज्यायानेष कनिष्ठोऽहमिति सङ्गच्छते कथम् ? ।
सन्दिहानमिति क्ष्मापं **नमिमा**ह महासती ॥१३२॥

प्रत्येहि **युगबाहु**स्ते पिता तत्त्वात् प्रसूरहम् ।
वने जातस्तथाऽऽत्तोऽसि **मिथिलेशेन** तद्यथा ॥१३३॥

नृपः **पद्मरथः पुष्पमाला**ऽस्य महिषी च ते ।
बालधारश्च धात्री च ज्ञात्वैवं स्वं हितं कुरु ॥१३४॥

सोदरेऽपि हि मोहान्धश्चेष्टसे किं विपक्षवत् ? ।
अवश्यत्याज्यराज्याय किं गुरूनवमन्यसे ? ॥१३५॥

असंदिग्धमिदं मेने **नमिः** सर्वं प्रसूवचः ।
परमं तीर्थमिव तां प्रमोदेन ननाम च ॥१३६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अदूरस्थं महानन्दमविबाधाकरं तपः ।
आत्मनः स्नानमजडं मेने मातुः स दर्शनम् ॥१३७॥

तदनूचे च सद्युक्त्या ज्यायान् मे मान्य एव हि ।
परं मातरबद्धास्यो दुष्प्रत्याज्यो ह्ययं जनः ॥१३८॥

ज्येष्ठं बन्धुं **नमिश्चन्द्रं** नत्वा चक्रे पराजितः ।
इतीरयन् कथं वार्यो मातरुच्छृङ्खलो जनः ? ॥१३९॥

ज्येष्ठः कनिष्ठवात्सल्या**च्चन्द्रो**ऽभ्यायाति चेत् पुरः ।
तदा तदाज्ञयावश्यं वर्तितव्यं मया मुदा ॥१४०॥

*मान-कीर्त्योर्लोभ-तृष्णे वीराणां न धनायुषोः ।*
श्रुत्वेत्यन्तःपुरं साऽगात् साध्वी **चन्द्रयशो**ऽन्तिके ॥१४१॥

प्राप्तामकस्माज्जननीं ववन्देऽसौ मुदां पदम् ।
अपृच्छद् वृत्तमौत्सुक्याद् गर्भस्थस्यानुजन्मनः ॥१४२॥

तं तस्मै साऽनुजन्मानं **नमिम**ज्ञापयत् क्रमात् ।
स तच्छ्रुत्वा त्रपा-प्रीति-प्रमोदैर्व्यानशेऽधिकम् ॥१४३॥

*कलत्रं सम्पदः पुत्राः सुहृदः सुलभाः सताम् ।*
*लोके सहोदरो बन्धुः कुशलैरेव लभ्यते ॥१४४॥*

**चन्द्रो** द्रुतमथोत्थाय स्वयं सानुचरो बहिः ।
आगच्छन् **नमि**नाऽभ्येत्य भूपीठलुठता नतः ॥१४५॥

**चन्द्रो नमिं** समुद्धृत्याश्लिष्यन् प्रणयपूरितः ।
न तृप्तिं प्राप तद्वक्त्रालोकनालिङ्गनादिषु ॥१४६॥

चित्रस्थेष्विव तच्चित्रदर्शनाद् नृषु सर्वतः ।
सुदर्शनपुरैश्वर्यं **चन्द्रो** द्राग् **नमये** ददौ ॥१४७॥

स्वयं तु व्रतमादत्त व्रतादाने हि तादृशाः ।
**इक्ष्वाकवः** प्रतीक्षन्ते नवरं राज्यधूर्धरम् ॥१४८॥

**मिथिलाया अवन्ती**नामीश्वरोऽभूत् ततो **नमिः** ।
अभूदेतस्य साम्राज्यं स्पृहणीयं हरेरपि ॥१४९॥

महीमहीनाहीनाङ्गभुजो दध्रे तथा **नमिः** ।
यथाऽन्यनृपसाम्राज्यनिःस्पृहोऽभूज्जनोऽखिलः ॥१५०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अन्यदाऽऽकस्मिको दाघज्वरोऽभून्नमिभूभुजः ।
असाध्य इति षण्मासैस्तत्यजे यो भिषग्वरैः ॥१५१॥

ततो निर्वृतये तस्य तावानन्तःपुरीजनः ।
स्वयं जघर्ष श्रीखण्डखण्डानासन्नवेश्मसु ॥१५२॥

निःस्वानस्वनवत् कर्णमर्माघातकरः स्वरः ।
वलयान्योन्यसंघर्षभवोऽभूद् दुःसहो **नमेः** ॥१५३॥

तामर्तिमथ विज्ञायावरोधवनिता **नमेः** ।
एकैकं स्थापयामासुः करे मङ्गलकङ्कणम् ॥१५४॥

कङ्कणानां क्वणः क्वागादिति पृच्छति भूधवे ।
एकैकत्वेन कैवल्यभाजामेष कुतो भवेत् ? ॥१५५॥

इत्यमात्यवचः श्रुत्वोद्बुद्धतात्त्विकवासनः ।
चिन्तयामास संक्लेशं संयोगैकनिबन्धनम् ॥१५६॥

*"यावद्भिर्युज्यते जीवः सुखलेशैकवाञ्छया ।*
*दुःखाख्यविषवृक्षस्य तावन्तो यान्ति बीजताम् ॥१५७॥*

*सुहृत्-पत्नी-सुतादीनां जन्तुर्योगेन हृष्यति ।*
*न वेत्ति परिणामोऽस्य शल्यतुल्यो भविष्यति ॥१५८॥*

*ऐक्यभावनयैकान्ते द्विधा सम्बन्धनिस्तृषः ।*
*ध्यायन्नेकं परात्मानं परानन्दमवाप्नुयात्" ॥१५९॥*

इतो रोगाद् विनिर्मुक्तो निरारम्भः क्षमी दमी ।
निस्सङ्गो व्रतमाधाय यतिष्ये सिद्धिसिद्धये ॥१६०॥

सुप्तः कृत्वा मनस्तादृक् पुण्यचिन्तासमीहितम् ।
षण्मासान्तरनायातां प्राप निद्रां नरेश्वरः ॥१६१॥

मेरुमूर्धानमारूढोऽहमारुह्येन्द्रकुञ्जरम् ।
रात्रौ विभातप्रायायां स्वप्नमेतद् तं ददर्श च ॥१६२॥

ततो नान्दीरवोद्बुद्धः परमारोग्यभाग् नृपः ।
अमुं शैलमहं क्वापि दृष्टपूर्वीत्यचिन्तयत् ॥१६३॥

जातिस्मृतिमथासाद्याज्ञासीत् प्राग्जन्मनिर्मितम् ।
स्वःशैलेऽर्हज्जनुःस्नात्रमहिमानं स्वयं कृतम् ॥१६४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रत्नसिंहादिजन्मात्तव्रतश्रुतमपि स्मरन् ।
कङ्कणानामिवैकत्वे निर्बाधं पर्यभावयत् ॥१६५॥

पुरमन्तःपुरं राज्यं विहायैकपदेऽखिलम् ।
**नमिः** प्रत्येकबुद्धोऽभूत् संयमी विमलाशयः ॥१६६॥

विरागमार्गाभिव्यक्तिहेत्वितश्चरितं परम् ।
**नमे**र्यदस्ति तत्सूत्रव्याख्यायां ज्ञापयिष्यते ॥१६७॥

इति **नमि**प्रत्येकबुद्धः **॥३॥**

रम्यं **गान्धार**देशेऽस्ति पत्तनं **पुण्ड्रवर्धन**म् ।
नृपः **सिंहरथो**ऽत्राभून्नीतिस्फीतिनिकेतनम् ॥१॥

अन्यदोपायनप्राप्तौ तुरङ्गावुत्तरापथात् ।
अवाञ्छत् तद्गतिं द्रष्टुं कौतुकान्नृपत्तिः स्वयम् ॥२॥

एकस्मिन् स्वयमारूढः परस्मिंस्तत्सुतो हरौ ।
एवं जगाम वाह्याल्यां वृतोऽयं सादिनां शतैः ॥३॥

भ्रमण-प्लवनाद्यस्य नाना कृत्वा परीक्षणम् ।
मुक्तो गत्याऽथ पञ्चम्याऽश्वो ययौ प्लुतसंज्ञया ॥४॥

वल्गां यथा यथाऽऽकर्षद् बलोत्कर्षान्नरेश्वरः ।
वक्रानुशासनादश्वोऽप्यधावत तथा तथा ॥५॥

स्थितेऽखिले परे सैन्ये तेन नीतो नरेश्वरः ।
महाटवीं श्रमाद् वल्गां व्यमुचत् पाणिपल्लवात् ॥६॥

ततस्तस्थावसौ भूपोऽप्युत्ततार तरोरधः ।
नियन्त्र्यैनं प्राणवृत्तिं चकार सलिलैः फलैः ॥७॥

आरुरोह ततः सायं नृपः कञ्चन भूधरम् ।
प्रासादमेकमद्राक्षीत् तत्र चैकाकिनीं कनीम् ॥८॥

सा तस्मै मनसा सार्धं राज्ञे सिंहासनं ददौ ।
तत्रासीनो विशामीशः प्रियालापेन तां जगौ ॥९॥

का त्वं नगेऽत्र वासः किं किं सौधं कोऽत्र रक्षिता ? ।
ममाश्चर्यकरं सर्वं बालेऽदः प्रतिभासते ॥१०॥

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

मुक्तालीं विकिरन्तीव कन्या प्राह महीश्वरम् ।
असौ नेदीयसी वेदी तत्र मामुद्वहाधुना ॥११॥

गान्धर्वेण विवाहेन ततोऽहं निर्वृता सती ।
स्वं वृत्तं सर्वमाख्यास्ये सुस्था निजपतेः पुरः ॥१२॥

नृपोऽप्यथैतया युक्तो नत्वाऽभ्यर्च्य जिनेश्वरम् ।
वैदिकाग्निं परीत्यास्याश्चकारोद्वाहमङ्गलम् ॥१३॥

सर्वसौख्यक्षणमयीं तया विश्रम्य शर्वरीम् ।
प्रबुद्धः कृतजैनार्चादिकार्यः शुद्धिमत्तनुः ॥१४॥

सदाऽग्रेऽपि ममैवेयमहमस्याः सदा पतिः ।
इतीव प्रतिभातीदमिति दध्यौ हृदीशिता ॥१५॥

युवत्यत्रान्तरेऽवादीत् कृतार्थाऽथास्म्यहं विभो ! ।
शुश्रूषितामतो वार्तामुच्यमानां मया शृणु ॥१६॥

पुरे **क्षितिप्रतिष्ठाने जितशत्रु**नभून्नृपः ।
यत्प्रतापैकदीपान्तः शत्रुभिः शलभायितम् ॥१७॥

परेषामयमुत्कृष्टं श्रुत्वाऽऽसीत् तत्र कौतुकी ।
क्षणेनाचीकरत् तच्च दुःसाद्यं किं हि तादृशाम् ? ॥१८॥

विभो ! चित्रसभैवैका रम्या नो तव सद्मनि ।
विज्ञप्त इति दूतेनान्यदोपाक्रमयत् स ताम् ॥१९॥

तत्र सर्वान् समाहूय निपुणांश्चित्रशिल्पिनः ।
समांशेन सभाभित्तीस्तेभ्यश्चित्राय सोऽर्पयत् ॥२०॥

एकश्चित्रकलोत्कर्षी वर्षीयांस्तत्र चित्रकृत् ।
चित्रं चित्राङ्गदाख्योऽयं स्वांशकुड्ये प्रचक्रिवान् ॥२१॥

तस्यान्वहं गृहाद् भक्तं सुता **कनकमञ्जरी** ।
निष्पुत्रादिसहायस्यानिनाय प्राप्तयौवना ॥२२॥

एकदा वेगमुक्तेन वाजिना राजवर्त्मनि ।
एकं सादिनमद्राक्षीत् सा यान्ती राजशोभितम् ॥२३॥

पलाय्य लोकवत् साऽपि क्षणं स्थित्वाऽथ सादिनि ।
अतिक्रान्ते द्रुतं प्रापोपतातं चित्रसंसदि ॥२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तां वीक्ष्य कायचिन्तार्थी **बहिश्चित्राङ्गदो**ऽगमत् ।
सा विमुच्यान्नमाच्छाद्यादत्त तद्वर्णकान् करे ॥२५॥

तैरेषा केकिनः पिच्छमलिखत् कुट्टिमोपरि ।
सूक्ष्मतूलिकया साक्षादक्षेपेण मनोहरम् ॥२६॥

राजाऽप्यत्रान्तरे तत्रैकाकी तच्चित्रमीक्षितुम् ।
प्राप्तोऽङ्गणतले साक्षाद् बर्हभ्रान्त्याऽक्षिपत् करम् ॥२७॥

तत्रैष नखनिर्भङ्गविलक्षो दिक्षु दत्तदृक् ।
सोत्प्रासमिदमाख्यायि चित्रकृत्सुतया तया ॥२८॥

मञ्चकस्य त्रयः पादा ममाभूवन् पुरापि हि ।
भाग्याल्लब्धो मया तुर्यस्त्वमद्याज्ञशिरोमणिः ॥२९॥

केऽमी इति नृपप्रश्ने साप्याह सुभगाक्षरम् ।
आद्यः स योऽद्य साद्यश्वं राजमार्गेऽप्यवाहयत् ॥३०॥

सुतादिभूरितन्त्राणामन्येषामिव मत्पितुः ।
वृद्धस्यैकस्य निःस्वस्य राट् द्वितीयः समांशदः ॥३१॥

तृतीयो मत्पिता क्षीणाशेषार्थः परकर्मणा ।
कवोष्णान्ने मयाऽऽनीते याति यः सरलो बहिः ॥३२॥

अप्रेक्षापूर्वकृच्चित्रबर्हे करमवाहयः ।
चतुर्थस्त्वमतो मह्यं तेभ्योऽपि खलु रोचसे ॥३३॥

तस्या वचनवैचित्र्यचमत्कृतमना नृपः ।
सन्निवेश्य मनस्तस्यां परतोऽगच्छदात्मना ॥३४॥

आपृच्छ्य मन्त्रिणं भृत्वा चित्राङ्गगृहं धनैः ।
उपयेमे महाभूत्या नृपः **कनकमञ्जरीम्** ॥३५॥

नृपप्रसादमासाद्य गणैः शिल्पिसुताऽपि सा ।
सर्वासां राज्यवंश्यानां सपत्नीनामुपर्यभूत् ॥३६॥

अगोप्यहृदया तस्या दासी **मदनिका**ऽभिधा ।
सखीव प्रेमपात्रत्वादासीद् विश्वासभाजनम् ॥३७॥

तद्वासवेश्म सम्प्राप्तेऽन्यदा भूपे रतिक्लमात् ।
सुषुप्सति सुखी तस्याः पूर्वं सङ्केतिताऽवदत् ॥३८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आवर्तय कथां काञ्चिद् यथातिक्रमते निशा ।
साऽप्याह स्वपितु स्वामी भणिष्यामि कथां ततः ॥३९॥
तत्कथां काम्यति श्रोतुं भूधवे शयिते मृषा ।
सुधामिव स्रवन्ती तामाख्यत् **कनकमञ्जरी** ॥४०॥
ग्रामे कस्यापि वणिजस्तनुजोद्भिन्नयौवना ।
मात्रा पित्रा तथा भ्रात्राऽन्यत्रान्यत्र वृताऽथ सा ॥४१॥
परस्परमजानद्भिर्ज्ञापिते तैः शुभे क्षणे ।
डुढौकिरे त्रयोऽप्येते वराः पाणिग्रहेच्छया ॥४२॥
मात्रादिषु सचिन्तेषु जने चोल्लासिकौतुके ।
वराः कन्यामिमां वीक्ष्याभवन् निभृतमादृताः ॥४३॥
अत्रान्तरेऽहिना दष्टा मृताऽकस्माद् वणिक्सुता ।
तेष्वेकोऽतिदृढस्नेहश्चितां सह तयाऽविशत् ॥४४॥
वियोगतो वरं मृत्युरेकशो हि स पीडयेत् ।
नित्यं प्रियवियोगाग्निदग्धस्य प्राणिते न किम् ? ॥४५॥
द्वितीयोऽनशनं भेजे यतः प्रियजनं विना ।
सर्वमाहारशय्यादि विषादप्यतिरिच्यते ॥४६॥
कातर्येण कृतं किञ्चिज्जीवनोपायमादधे ।
इति ध्यात्वा तृतीयेन देवताऽऽराधनं कृतम् ॥४७॥
प्राप्य सञ्जीवनं मन्त्रं तेन द्वाप्यजीवयत् ।
अथोपतस्थिरे भूयस्ते तत्पाणिजिघृक्षवः ॥४८॥
इतो **मदनिका**वादीदेतेषां तुल्यमिच्छताम् ।
एकेन कन्यका केन पर्यणायि वरेण सा ? ॥४९॥
राज्युवाच प्रमीलायां प्रविष्टे मम लोचने ।
श्वः पृच्छेर्यदि ते चित्रमित्युक्त्वा सुखमस्वपीत् ॥५०॥
जिज्ञासुना कथातत्त्वं राज्ञाऽन्येऽह्नि सकौतुकम् ।
दत्तेऽस्यै वारके दासी मृषासुप्ते नृपेऽवदत् ॥५१॥
स्वामिन्याख्याहि युवती प्रेयसी कस्य साऽभवत् ? ।
कौतुकेनामुना कृच्छ्रं व्यतिक्रान्तो मया दिनः ॥५२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

देव्याह सखि ! किं चित्रं तस्याः सञ्जीवकः पिता ।
सहोद्भूतस्तु सोदर्यस्त्यक्तभक्तः परं पतिः ॥५३॥

पृष्टा भूयस्तयाऽऽख्यानमाख्यन्नरवराङ्गना ।
पूरे **सुरपुरे** भूपः समृद्धोऽभून्नृवाहनः ॥५४॥

रत्नालोकादलङ्कारान् हेमकारैरजीघटत् ।
गुप्तभूमिगृहे क्वापि पत्न्यै निर्भानुरोचिषि ॥५५॥

स्वर्णाध्यक्षाय तत्रैकः कश्चिन्नाडिन्धमोऽवदत् ।
प्रदोषसमयो जज्ञे संवृणुपस्करं ततः ॥५६॥

प्रदोषं कथमज्ञासीदिति प्रश्ने सखीकृते ।
तथैवाह्न्यपरे राज्ञी तदाख्यत् प्राप्तवारका ॥५७॥

दिवसान्तं निशाऽन्धत्वात् कलावित् तत्र वेदः सः ।
अन्यच्चाख्यानमारेभे सा सखीं प्रति तद् यथा ॥५८॥

राज्ञा केनाप्यवध्यौ द्वौ बन्धयोग्यौ मलिम्लुचौ ।
पेटायां न्यस्य नीरन्ध्र्यां मध्ये वारिधेर्वाहितौ ॥५९॥

कैश्चिद् दिनैस्तटे क्वापि तां पेटां प्राप्य कश्चन ।
उद्घाट्यावोचदद्यायं कतिथो वामभूद् दिनः ? ॥६०॥

एतस्तत्राह तुर्योऽद्य दिनस्तद् वेत्त्यसौ कथम् ? ।
सैवान्येद्युस्तथैवाह स तुरीयज्वरी यतः ॥६१॥

अन्यच्च क्वचिदप्यासीन्निवेशे कश्चिदौष्ट्रिकः ।
वल्लभं करभं कञ्चित् सुवनेऽचारयच्चिरम् ॥६२॥

मरुप्रियेण तेनापि प्रविलोकयताऽचिरात् ।
क्वचित् पत्रफलैराढ्यऽदर्शि बब्बूलपादपः ॥६३॥

तदुपान्तमथागत्य सरलीकृतकन्धरः ।
ताम्यति स्मैष तं भक्ष्यं चिखादिषुरनाप्नुवन् ॥६४॥

कथमप्यनवाप्याथ मत्सरच्छुरितान्तरः ।
तस्य भूमीरुहो मौलावुत्ससर्ज मलं क्रुधा ॥६५॥

ग्रीवाग्रेणाप्यनाप्येऽस्मिन् कथमुष्ट्रोऽत्यजन्मलम् ? ।
तथैवान्येद्युराहैषा कूपान्तः स हि पादपः ॥६६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किञ्च क्वचित् पुरे श्रेष्ठी वरुणाख्यो व्यधापयत् ।
ग्राव्णैकेनैव हस्तैकमितं देवकुलं कृती ॥६७॥

देवं चतुःकरं तत्र न्यस्यासौ नित्यमार्चयत् ।
देवार्चनं हि वार्धक्ये परं पारत्रशम्बलम् ॥६८॥

कथमेककरे देवकुले देवश्चतुष्करः ? ।
इति पृष्टेऽन्यदा साऽऽख्यद् देवः स हि चतुर्भुजः ॥६९॥

तथा—

श्रेष्ठिनः क्वचिदेकस्य द्वे भार्ये पितुरालयात् ।
एका प्राप्तानि भूयांसि भूषणानि घटेऽक्षिपत् ॥७०॥

सप्तन्या दुःस्थवंश्यायाः साऽऽलोके शङ्कया घटम् ।
मुद्रितं न्यस्य सततं यान्त्यायान्ती ददर्श सा ॥७१॥

अन्यदान्तरमासाद्य सपत्न्या तानि जह्रिरे ।
तथैवामुद्रयत् कुम्भं साऽऽयाता वेद तत्क्षणम् ॥७२॥

अनुन्मुद्य घटं तानि कथमात्तानि वेद सा ।
तथैवान्येद्युराहैषा सोऽभूत् काचमयो घटः ॥७३॥

किञ्च—

नृपकन्या गवाक्षस्था क्वापि जह्रे खचारिणा ।
मयाऽऽनेतुरसौ देया प्रतिज्ञामित्यधान्नृपः ॥७४॥

नैमित्तिको निमित्तेन ज्ञात्वोवाचोचितां दिशम् ।
रथकृद् रथमातेने पक्षिवद् गगनाध्वगम् ॥७५॥

एतौ सहस्रयोधश्च भिषक् चेत्यास्य तं रथम् ।
चत्वारोऽप्यनुविद्याभृद् ययुः प्रापुश्च तं क्रमात् ॥७६॥

युद्धं विधाय साहस्रस्तं जघान खचारिणा ।
हन्यमानेन कन्याया असिना चिच्छिदे शिरः ॥७७॥

भिषक् सञ्जीवनौषध्या क्षणात् कन्यामजीवयत् ।
निन्युश्चोपनृपं कन्यां तां सर्वेभ्योऽप्यसौ ददौ ॥७८॥

कन्याऽऽह यो मया साकं कर्ता श्वः काष्ठभक्षणम् ।
पत्यैकस्यैव तस्याहं भविता राजवंशजा ॥७९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सखि ! प्रातश्चतुर्ष्वेकः प्रविश्य ज्वलितां चिताम् ।
तामुद्वाह्य तया सार्धमुपाभुङ्क्त चिरं सुखम् ॥८०॥
कथं सोऽग्नौ न जज्वालेत्युक्त्वाऽन्येद्युरुवाच सा ।
नैमित्तो ज्ञातसौरङ्गमार्गः स्वैरमिदं दमभ्य ॥८१॥
कथाप्रथाभिरत्येवं परिमोहयमाणया ।
तया **कनकमञ्जर्या** विशामीशो वशीकृतः ॥८२॥
तस्यामत्यन्तमासक्तस्तथाऽजनि नृपो यथा ।
प्रवृत्तिमपि राज्ञीनां नान्यासां समपृच्छत ॥८३॥
सर्वास्तां द्वेषविषयं चक्रुः **कनकमञ्जरीम्** ।
नीचावमानप्रभवो मन्युर्दुर्विषहो यतः ॥८४॥
रूपं कुलं कलां लक्ष्मीं सर्मप्यवमत्य नः ।
ही ! शिल्पकृत्सुतावश्योऽवश्यं भूमानचेतनः ॥८५॥
तां सपत्न्योऽन्यदा वीक्ष्यैकान्ते किञ्चिज्जपोद्यताम् ।
राज्ञेऽशंसन् करोत्येषा ध्रुवं किमपि कार्मणम् ॥८६॥
नृपो निशम्य तत् ताभ्यः सम्यग् जिज्ञासुरात्मना ।
अगात् तत्र तदन्वेष्टुं यत्र गूढगृहेऽस्ति सा ॥८७॥
इतश्चासौ यदैवोढा राज्ञा **चित्राङ्गदात्मजा** ।
तत्प्रभृत्येव मध्याह्ने नित्यं साऽऽत्मानमित्यशात् ॥८८॥
राजवेषं विमुच्यैषां तं परीधाय पैतृकम् ।
तत्त्वज्ञानवती बालाऽऽत्मानमित्थमबोधयत् ॥८९॥
"आत्मन्नेतां निजां भूतिं विलोकय पुरातनीम् ।
मा कार्षीर्भूपतेर्भूत्या गर्वं गर्वो हि पातकृत् ॥९०॥
आत्मानं स्वामिसम्पद्भिर्मा विस्मार्षीः पुरातनम् ।
**मद्याद् विषादपि श्रीणां मोहशक्तिर्गरीयसी ॥९१॥**
*माणिक्यैर्न च मुक्ताभिर्न वेषैर्न परिच्छदैः ।*
*केवलेनैव शीलेनालङ्क्रियन्ते हि योषितः" ॥९२॥*
अनुशास्येति साऽऽत्मानं भूयो भूपात्तवेषभृत् ।
ददृशे मेदिनीन्द्रेण तत् तथाऽररिसन्धिना ॥९३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तां पट्टमहिषीं चक्रे ततः प्रमुदितो नृपः ।
**निष्कृत्रिमा हि नारीणां भक्तिर्भर्तृषु कार्मणम् ॥९४॥**

अन्यदा **विमलाचार्य**व्याख्यामाकर्ण्य भूधवः ।
श्रमणोपासको जज्ञे सपत्नीकः सुतत्त्ववित् ॥९५॥

अथ **चित्राङ्गदो** राज्ञ्या सम्यग् निर्यामितः पिता ।
नमस्कारं स्मरन् मृत्वा व्यन्तराख्यसुरोऽभवत् ॥९६॥

देवीत्वमाप्य सौधर्मे धर्मात् **कनकमञ्जरी** ।
च्युत्वा ततोऽपि **वैताढ्ये तोरणाख्यपुरे**ऽजनि ॥९७॥

**दृढशक्ति**खगेन्द्रस्य पुत्री **कनकमालिका** ।
**वासवा**ख्यखगः कामी युवतीं तामपाहरत् ॥९८॥

नगेऽत्र सौधमासूत्र्य तामन्तरमुचन्मुदा ।
किलात्रोद्वाहयिष्यामीत्येनां वेदीं चकार च ॥९९॥

गान्धर्वाय विवाहाय यावदासीत् समुत्सुकः ।
आगात् **कनकमाला**याः स्वर्णार्चिस्तावदग्रजः ॥१००॥

नियुद्ध्यमानौ द्वावेतौ मिथः क्रोधाहुतौ हतौ ।
कान्दिशीकां तदा कन्यां कश्चिदेत्य सुरोऽवदत् ॥१०१॥

मा शुचः सोदरं वत्से ! प्रधनेऽभिमुकं हतम् ।
साक्षिणो विक्रमे यस्य सुरा अप्यस्मदादयः ॥१०२॥

***तपोधना जितात्मानः सम्मुखं निहता भटाः ।***
***भर्तृभक्तास्तथा नार्यो भवन्ति स्वर्गभाजनम् ॥१०३॥***

शोकाच्छोकैकसन्तापो ह्यर्थादर्थ इदं ध्रुवम् ।
तच्छुचं त्यज यत् पुत्री त्वं मेऽतः प्रोच्यसे मया ॥१०४॥

एनामेतावदुत्प्रीतिः सुरो यावदवार्तयत् ।
पुत्रान्वेषणधीस्तावद् **दृढशक्ति**रुपागमत् ॥१०५॥

वासवं च सुतं चैव वीक्षामास मृतावुभौ ।
सुतां **कनकमालां** च लूनमूर्धानमैक्षत ॥१०६॥

संवेगादित्यसौ दध्यौ निराशेन ममाङ्गजा ।
प्राग् वासवेन निहता पुत्रः सोऽपि ततो मृतौ ॥१०७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*"अहो ! संसारवैरस्यं दुर्लक्ष्यं मूढमानसैः ।*
*कामाद्यैर्यत्र जन्तूनां सुप्रापाऽनुपदं विपत् ॥१०८॥*

*क्व सुतः क्व च सा पुत्री वासवः क्व स तस्करः ? ।*
*अस्थिरत्वं यथैतेषां सर्वस्य जगतस्तथा ॥१०९॥*

*कः शत्रुः कोऽथवा मित्रमहो ! मोहविजृम्भितम् ।*
*येन मूढधियो लोका न जानन्त्यात्मनो हितम् ॥११०॥*

*उत्पथप्रस्थितः शत्रुर्मित्रं सत्पदमाश्रितः ।*
*अयमात्मैव बाह्येषु भ्रान्ते शत्रुत्व-मित्रते ॥१११॥*

*जनो जानात्वदस्तत्त्वं व्यक्तं वैराग्यकारणम् ।*
*असन्तोषः परं दुःखं सन्तोषः परमं सुखम्"* ॥११२॥

इति संविग्नधीः शान्तः प्राग्भवाधिगमादभूत् ।
तदैव चारणः साधुः स्वयम्बुद्धः स खेचरः ॥११३॥

ततः **कनकमालां** तां जीवन्तीं वीक्ष्य विस्मितः ।
**दृढशक्ति**मुनिस्तेन व्यन्तरेणेदमौच्यत ॥११४॥

वराकी बालिका नैतद् वेत्ति तत् कल्पितं मया ।
कारणं शृणु तत्रापि किं गोप्यं हि मुनेः पुरः ? ॥११५॥

**जितशत्रोः** पुरा राज्ञो राज्ञी **कनकमञ्जरी** ।
अन्ते **चित्राङ्गदं** तातं विधिना निरयामयत् ॥११६॥

स मृत्वा व्यन्तरोऽस्म्येष क्रमात् सेयं तवात्मजा ।
वासवापहृता शैलेऽत्राज्ञाय्यवधितो मया ॥११७॥

हते चौरे हते बन्धौ यावदाश्वासयाम्यहम् ।
युष्मांस्तावदिह प्राप्तान् वीक्ष्य मायामयोजयम् ॥११८॥

पुत्रीमादाय तातोऽसौ मा गादिति धिया मया ।
रागेण या कृता माया तां क्षमस्व महामुने ! ॥११९॥

मुनिराख्यत् प्रसन्नाक्षस्त्वया माया यदाहिता ।
सा साध्वी मे महामाया यया भवमयी हता ॥१२०॥

त्वयोपकृतमेतर्हि नापराद्धं मनागपि ।
इति प्रोच्याशिषं दत्त्वा विजह्रे नभसा मुनिः ॥१२१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदा प्राग्भववृत्तान्तमाकर्ण्य व्यन्तरोदितम् ।
आसीत् **कनकमालायाः** प्राग्वर्णितभवस्मृतिः ॥१२२॥

ययाचे व्यन्तरं साऽथ तमेवात्र भवे पतिम् ।
देहि येन निजं जन्म कृतार्थं करवाण्यहम् ॥१२३॥

सुरोऽप्याह सुते ! भर्ता देवो भूत्वा च्युतः क्रमात् ।
राज्ञो **दृढरथस्या**भूत् पुत्रः **सिंहरथा**भिधः ॥१२४॥

वक्राश्वेन हृतोऽत्रैव स एष्यति नगे स्वयम् ।
अस्यां वेद्यादिसामग्र्यां ध्रुवं त्वां परिणेष्यति ॥१२५॥

जागरूकाणि वर्तन्ते भागधेयानि ते ततः ।
निराकुलाऽत्र तिष्ठ त्वं यावदायाति स क्षणः ॥१२६॥

व्यन्तरस्त्वधुना मेरुं गतोऽस्ति जिनवन्दकः ।
आर्यपुत्र ! त्वमप्यागा अपराह्णेऽद्य तावता ॥१२७॥

साऽहं **कनकमाला**स्मि ययोत्सुकतया भृशम् ।
विवाहे तस्य तातस्य नागमाय प्रतीक्षितम् ॥१२८॥

इमां श्रुत्वा कथां जातिस्मरः **सिंहरथो**ऽभवत् ।
व्यन्तरोऽप्यागतस्तावदप्सरःपरिवारितः ॥१२९॥

तद् वीक्ष्य निभृतं हृष्टोऽस्पष्टयद् रम्यमुत्सवम् ।
मध्याह्नेऽथ नृपोऽर्हन्तमभ्यर्च्याभुङ्क्त सद्विधिः ॥१३०॥

देवप्रसादसम्पूर्णाशेषकामक्षितीश्वरः ।
मासमत्र नगे पत्नीयुक्तो निन्ये क्षणार्धवत् ॥१३१॥

नृपोऽन्यदा प्रियामाख्यच्छत्रुवर्गो निरर्गलः ।
उपद्रोष्यति मे राज्यं तद् यामि पुरमेकदा ॥१३२॥

अनुमन्यस्व मां प्राप्तं पञ्चमेऽह्न्यत्र वीक्षसे ।
साऽप्याह योषितां कान्तवचः सिद्धान्तसन्निभम् ॥१३३॥

किन्तु प्रज्ञप्तिविद्यां मद् गृहाण सुखमेतया ।
यातायातं भवेद् व्योम्ना भूपथे हि श्रमाय तत् ॥१३४॥

प्रियातस्तामथासाद्य साधयित्वा च खाध्वना ।
प्रत्यागान्नगरं राजा नागरैः कृतमङ्गलम् ॥१३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ताद्दग् व्यतिकरं ज्ञात्वाऽमात्याद्या अधिविस्मयाः ।
निश्चिन्वन्ति स्म तत्पुण्यकस्मात्सम्पदावहम् ॥१३६॥

वासरांश्चतुरस्तत्र निर्गम्य नगरे नृपः ।
नभोऽध्वनाऽत्यगात् प्रीत्या पुनरेत्य नगं दिनान् ॥१३७॥

नगे च नगरे वाऽस्याभूदङ्गेन गतागतम् ।
मनः **कनकमालां** तु कदाचिदपि नामुचत् ॥१३८॥

अतत्येष नगे यस्मात् तन्**नग्गति**रितीरितः ।
नृपः **सिंहरथो** लोकैस्तन्नामैव क्रमादभूत् ॥१३९॥

अन्यदा व्यन्तरो भूपमिदमाख्यन्नगागतम् ।
प्रणयाद् वां नगेऽमुत्र चिरमस्थामशङ्कितः ॥१४०॥

स्वाम्यादेशोऽधुनाऽऽयातो यातव्यं तत्र निश्चितम् ।
करिष्यत्यधृतिं पुत्रीं मां विना तन्निशम्यताम् ॥१४१॥

नैकाकिनीयं मोक्तव्या मा नैषीः शून्यतां नगम् ।
इत्युदित्वा सतन्त्रोऽसौ व्यन्तरोऽगाददर्शनम् ॥१४२॥

नगरं नग एवास्मिन् भूपोऽपि निरमापयत् ।
तन्**नगाति**पुरं नाम्ना पप्रथे नागराश्रितम् ॥१४३॥

तस्मिन् विहारशीर्षस्थस्वर्णकुम्भोत्करैर्दिवा ।
वीक्ष्यमक्षीणतेजोभिः **शतभानु**नभस्तलम् ॥१४४॥

अस्मिन्नप्सरां कुलानि विबुधा अस्मिन् प्रभाभासुराः ।
नार्यः शच्यतिरेकिरूपकलिताः सर्वत्र सुस्थो जयः ॥
पूज्यन्ते गुरवोऽत्र च प्रतिगृहं रम्या सुधर्मेक्ष्यते ।
न स्वर्गेऽस्त्यधिकं **नगाति**पुरतः किञ्चिद् बहुश्रीभरात् ॥१४५॥

पुरेऽत्र तस्य भूपस्य यशःकुसुमसौरभम् ।
दिशोऽध्यवासयत् कल्पद्रुमस्येवोपकुर्वतः ॥१४६॥

उत्तुङ्गजैनप्रासादान् जैनप्रतिकृतीरपि ।
नैकाः स कारयामास पूजाश्चासामवर्तयत् ॥१४७॥

अन्योन्यमव्याबाधेन पुमर्थास्तं सिषेविरे ।
त्रयोऽपि तुर्यस्त्वासन्नः समयं प्रत्यपालयत् ॥१४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

न्यायधर्मान्वितं राज्यं भक्तानेकावनीश्वरम् ।
सुखं पालयतस्तस्य सुमहान् समयोऽत्यगात् ॥१४९॥

वसन्तोत्सवमन्येद्युर्वीक्षितुं पुरसीमनि ।
सामन्तामात्यसंयुक्तोऽश्वारूढोऽगात् क्षितीश्वरः ॥१५०॥

मञ्जरीपिञ्जरं मञ्जुगुञ्जद्भ्रमरसङ्कुलम् ।
मार्गे स चूतमैक्षिष्ट स्पष्टं छत्रमिवावनेः ॥१५१॥

तदा मोदैकसौरभ्यलुभ्यद्घ्राणोऽवनीधवः ।
दर्शं दर्शममुं मित्रमिव भेजे परां रतिम् ॥१५२॥

लीलया मञ्जरीमेकामग्रहीन्मकरन्दिनीम् ।
तस्य राजाऽथ जिघ्रंस्तां क्रीडाऽर्थी पुरतोऽगमत् ॥१५३॥

गतानुगतिकैस्तस्य सैनिकैस्तद्वनस्पतेः ।
मञ्जरी-पल्लव-दलप्रमुखं सर्वमाददे ॥१५४॥

वासन्तीं विभुराधाय क्रीडां प्रत्यावृतः क्रमात् ।
तं काष्ठशेषमालोक्य सहकारं व्यचिन्तयत् ॥१५५॥

*"अहो ! संसारवैरस्यं क्षणिकाः सर्वसम्पदः ।*
*योऽभूल्लोचनलेह्यश्रीश्चूतः सोऽजनि हीदृशः ॥१५६॥*

*क्व ताः सम्प्रति मञ्जर्यो घ्राणाह्लादैकजीवनम् ? ।*
*प्रवालपटलाकाराः क्व ते चूतस्य पल्लवाः ? ॥१५७॥*

*यत् प्रातस्तन्न मध्याह्ने यन्मध्याह्ने न तन्निशि ।*
*यन्निशि स्यान्न तत् प्रातरस्थैर्यमिदमद्भुतम् ॥१५८॥*

*अलोम सम्पूर्णशशाङ्कशोभि मुखं तु यूनां कतिचिद् दिनानि ।*
*भवेत् ततः श्मश्रुविशालजालसेवाललीनानतुलां बिभर्ति ॥१५९॥*

*धूमेन चित्रं तुहिनेन पद्मं तामिस्रपक्षेण यथेन्दुबिम्बम् ।*
*पीतं यथा नैव विभाति तद्वत् प्रान्ते जराजर्जरितस्य रूपम् ॥१६०॥*

*न लक्ष्यते कालगतिः सवेगं चक्रभ्रमभ्रान्तिविधायिनीयम् ।*
*यया मनुष्यः स्फुटयौवनाढ्यो विधीयते विद्रुतविग्रहोऽन्ते ॥१६१॥*

*न कुटुम्बं न वा लक्ष्मीर्न लीलाललितं वयः ।*
*दृष्टं चिरस्थिरं किञ्चित् पद्मपत्राम्बुबिन्दुवत् ॥१६२॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*पूर्वपुण्यभवा भूतिर्यावत् तावन्मनोज्ञता ।*
*तत्क्षया तत्क्षये साऽपि क्व स्यादिति हि निश्चितम्'' ॥१६३॥*

इत्यादि चिन्तयन् जातिस्मरः प्रत्येकबुद्धताम् ।
**नग्गति**नृपतिः प्राप्य विजह्रे व्रतिनां वरः ॥१६४॥

उक्तञ्च—

''[1]**जो चूयरुक्खं तु मणाभिरामं समञ्जरी-पल्लव-पुप्फचित्तं ।**
**रिद्धिं अरिद्धिं समुपेहिया णं गन्धारराया वि समेक्ख धम्मं**'' ॥१६५॥

चत्वारोऽमी क्रमात् **क्षोणीप्रतिष्ठान**पुरेऽन्यदा ।
गत्वाऽविशंश्चतुर्द्वारि लघुदेवकुले क्वचित् ॥१६६॥

यक्षस्तत्र क्रमात् तेषां पूर्वादिद्वारवेशिनाम् ।
वैमुख्याशातनाभीरुश्चतुरास्यत्वमादधे ॥१६७॥

आत्मध्यानसुधापानसुस्थितस्वान्तवृत्तयः ।
तस्थुस्ते तत्र चत्वार इव स्तिमितसागराः ॥१६८॥

**करकण्डु**स्तदा कण्डूमपनुद्य स्ववर्ष्मणः ।
शलाकां गोपयन् कर्णे **द्विमुखेने**दमौच्यत ॥१६९॥

''[2]**जया रज्जं च रट्ठं च पुरं अंतेउरं तहा ।**
**सव्वमेयं परिच्चज्ज सञ्चयं किं करेसिमं ?**'' ॥१७०॥

प्रतिवक्ति तदा यावत् **करकण्डु**र्महामनाः ।
तावदाविर्भवत्तर्को **नमिर्द्विमुखम**भ्यधात् ॥१७१॥

''[3]**जया ते पेइए रज्जे कया किच्चकरा बहू ।**
**तेसिं किच्चं परिच्चज्ज अज्ज किच्चकरो भवं**'' ॥१७२॥

**द्विमुखो** नोत्तरं दत्ते याव**न्नमिम**हामुनेः ।
तावद् **गान्धारराजर्षिर्नग्गति**र्गिरमाददे ॥१७३॥

---

१. यश्चूतवृक्षं तु मनोऽभिरामं समञ्जरी-पल्लव-पुष्पचित्रम् ।
ऋद्धिमनृद्धिं सम्प्रेक्ष्य गान्धारराजाऽपि समीक्ष्य धर्मम् ॥

२. यदा राज्यं च राष्ट्रं च पुरमन्तःपुरं तथा ।
सर्वमेतत् परित्यज्य सञ्चयं किं करोषीमम् ? ॥

३. यदा ते पैतृके राज्ये कृताः कृत्यकरा बहवः ।
तेषां कृत्यं परित्यज्याद्य कृत्यकरो भवान् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"[1]जैया सव्वं परिच्चज्ज मोक्खाय घडसी भवं ।
परं गरहसी कीस अत्तनीसेसकारए ?" ॥१७४॥

शान्तं कान्तं हितं स्वादु मुधाकृतसुधारसम् ।
करकण्डुरुवाचेति ततः शुचि वचो मुनिः ॥१७५॥

"[2]मोक्खमग्गं पवन्नेसु साहूसु बंभयारिसुं ।
अहियत्थं णिवारंते न दोसं वत्तुमरिहसि ॥१७६॥

रूसउ वा परो मा वा विसं वा परियत्तउ ।
भासियव्वा हिया भासा सपक्खगुणकारिया" ॥१७७॥

अनुशास्ति प्रपद्यैनां ते सर्वेऽपि महर्षयः ।
काले केवलमासाद्याभजन्त परमं पदम् ॥१७८॥

एवं प्रत्येकबुद्धानां सहस्राणि चतुर्दश ।
परेषामप्यजायन्त नूनं श्रीवीरशासने ॥१७९॥

उक्तञ्च श्रीनन्द्यध्ययनटीकायाम्—"भगवतश्च श्रीऋषभस्वामिनश्चतुरशीतिसहस्रप्रमाणोत्कृष्टश्रमणसम्पत् । तेन प्रकीर्णकान्यपि तावत्प्रमाणान्येव । प्रत्येकबुद्धा अपि तावन्त एव । एवं शेषतीर्थकृतामपि श्रमणसम्पदनुसारेण भावना कार्या । वर्धमानस्वामिनस्तु चतुर्दश सहस्राणि अभवन्, प्रत्येकबुद्धा अपि तावन्त एव" । तथा च मूलग्रन्थः-"[3]इह पत्तेयबुद्धपणीयं पइण्णगं भणियव्वं । जओ पइण्णगपरिमाणेण चेव पत्तेयबुद्धपरिमाणं कीरइ । भणियं पत्तेयबुद्धा वि तत्तिया चेव त्ति" इत्यलं प्रसङ्गेन ॥

इति प्रत्येकबुद्धानां चतुर्णामपि लेशतः ।
वृत्तमुक्तं नमेस्त्वत्राधिकारस्तेन तद् यथा ॥१८०॥

**चइऊण देवलोगाओ उववन्नो माणुसंमि लोगंमि ।**
**उवसंतमोहणिज्जो सरई पोराणियं जाइं ॥१॥**

---

१. यदा सर्वं परित्यज्य मोक्षाय घटते भवान् ।
परं गर्हति कथमात्मनिःशेषकारकः ? ॥

२. मोक्षमार्गं प्रपन्नेषु साधुषु ब्रह्मचारिषु ।
अहितार्थं निवारयति न दोषं वक्तुमर्हसि ॥
रुष्यतु वा परो मा वा विषं वा परिवर्तताम् ।
भाषितव्या हिता भाषा स्वपक्षगुणकारिका ॥

३. इह प्रत्येकबुद्धप्रणीतं प्रकीर्णकं भणितव्यम् । यतः प्रकीर्णकपरिमाणेनैव प्रत्येकबुद्धपरिमाणं क्रियते । भणितं प्रत्येकबुद्धा अपि तावन्त एवेति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—च्युत्वा देवलोकादुत्पन्नो मानुषे लोके** प्राणिगणे । उपशान्तमनुदय-प्राप्तं मोहनीयं दर्शनमोहनीयाख्यं यस्यासावु**पशान्तमोहनीयः स्मरति** 'वर्तमानत्वं तत्कालापेक्षया' **पौराणिकीं** चिरन्तनीं **जातिमु**त्पत्तिं देवलोकादाविति प्रक्रमः ॥१॥

ततः किमित्याह—

**जाइं सरित्तु भयवं सहसंबुद्धो अणुत्तरे धम्मे ।**
**पुत्तं ठवित्तु रज्जे अभिनिक्खमई णमी राया ॥२॥**

**व्याख्या—जातिं** प्रागुक्तां **स्मृत्वा भगवान्** धीमान् 'सह'त्ति **स्वयं सम्बुद्धो** नान्यबोधितोऽ**नुत्तरे** प्रधाने **धर्मे** चारित्रधर्मे । **पुत्रं स्थापयित्वा राज्येऽभिनिष्क्रामति** प्रव्रजति **नमी राजा** ॥२॥

किं कुर्यादित्याह—

**सो देवलोगसरिसे अंतेउरवरगओ वरे भोए ।**
**भुंजित्तु नमी राया बुद्धो भोए परिच्चयई ॥३॥**

**व्याख्या—स** इति **नमिर्देवलोकसदृशान्** देवभोगतुल्यान्, **वरमन्तःपुरं तत्र गतः** 'प्राकृतत्वात् परनिपातो वरशब्दस्य' **वरान्** प्रधानान् **भोगान्** शब्दादीन् **भुक्त्वा** नमी **राजा बुद्धो** ज्ञाततत्त्वो **भोगान् परित्यजति** । पुनर्भोगग्रहणं मुग्धानां स्मृत्यर्थम् ॥३॥

किञ्च—

**मिहिलं सपुर-जणवयं बलमोरोहं च परियणं सव्वं ।**
**चिच्चा अभिनिक्खंतो एगंतमहिट्ठिओ भयवं ॥४॥**

**व्याख्या—मिथिलां** नगरीं **सह पुरै**रन्यनगरै**र्जनपदेन** च वर्तते या सा । तथा **बलं** गजादिचतुरङ्गम् । **अवरोधमन्तःपुरं परिजनं** परिकरं **सर्वं त्यक्त्वा अभिनिष्क्रान्तः** प्रव्रजितः एकान्तं द्रव्यतो विजनमुद्यानादि, भावतश्च

**"एकोऽहं नास्ति मे कश्चिन्न चाहमपि कस्यचित् ।**
**न तं पश्यामि यस्याहं नासौ दृश्योऽस्ति यो मम" ॥१॥**

इति भावयन् 'एक एवाहम्' इत्यन्तो निश्चय **एकान्तस्तमधिष्ठितः** आश्रितः ॥४॥

तदा तत्र यदभूत, तदाह—

**कोलाहलगब्भूअं आसी मिहिलाइ पव्वयंतंमि ।**
**तइया रायरिसिंमि नमिंमि अभिनिक्खमंतंमि ॥५॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—कोलाहलो** हा तात ! मातरित्यादिविलपिताक्रन्दितादिकलकलः स एव भूतो जातो यस्मिस्तत् **कोलाहलकभूतमासीद**भून्**मिथिलायां** 'सर्वं गृहारामादीति गम्यम्' क्व सति **प्रव्रजति** व्रतमाददाने **तदा** काले राज्यावस्थायामृषिरिव ऋषिर्भावारिषड्वर्गजयात् तथाऽऽह—

**"कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा ।**
**षड्वर्गमुत्सृजेदेनं यः सदा स सुखी भवेत्"** ॥१॥

**राजर्षिस्तस्मिन् नमौ** राज्य**भिनिष्क्रामति** गृहात् कषायादिभ्यो वा निर्गच्छति सतीति ॥५॥

पुनर्दयदभूत्, तदाह—

**अब्भुट्ठियं रायरिसिं पव्वज्जाट्ठाणमुत्तमं ।**
**सक्को माहणरूवेण इमं वयणमब्बवी ॥६॥**

**व्याख्या—अभ्युत्थित**मभ्युद्यतं **राजर्षिं** प्रव्रज्यैव स्थानमाश्रयो ज्ञानादिगुणानां **प्रव्रज्यास्थानमुत्तमं** 'तत्प्रतीति शेषः' । **शक्र** इन्द्रो **ब्राह्मणरूपेणा**गत्येति योज्यम् । तदाशयं परीक्षितुकाम **इदं** वक्ष्यमाणं **वचनमब्रवीदु**क्तवान् ॥६॥

तदेवाह—

**किं नु भो ! अज्ज मिहिलाए कोलाहलगसंकुला ।**
**सुव्वंति दारुणा सद्दा पासाएसु गिहेसु य ॥७॥**

**व्याख्या—'किमिति** प्रश्ने, **नु** वितर्के, **भो** इत्यामन्त्रणे' **अद्य मिथिलायां कोलाहलकेन सङ्कुला** व्याकुलाः **श्रूयन्ते दारुणा** हृदयोद्वेजकाः **शब्दा** विलपितादयः **प्रासादेषु** देव-नृपभवनेषु **गृहेषु** तदन्येषु **च**शब्दात् त्रिक-चतुष्कादिषु चेति ॥७॥

ततश्च—

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमी रायरिसी देविंदं इणमब्बवी ॥८॥**

**व्याख्या—एतं** पूर्वोक्त**मर्थं निशम्य** श्रुत्वा **हेतुः** पञ्चावयवरूपः, **कारणं** चान्यथाऽनुपपत्तिमात्रं **ताभ्यां चोदितः** प्रेरितस्तथाहि-अनुचितमिदं भवतोऽभिनिष्क्रमणम्, आक्रन्दादिदारुणशब्दहेतुत्वात्, यद् यदाक्रन्दादिदारुणशब्दहेतु, तद् तद् धर्मार्थिनोऽनुचितं यथा प्राणिव्यपरोपणादि, तथा चेदम्, तस्मादनुचितमेवेति पञ्चावयवो हेतुः । आक्रन्दादिशब्दहेतुत्वं भवदभिनिष्क्रमणानुचितत्वं विनाऽनुपपन्नमिति कारणमनयोः पृथगुपादानं 'प्रतिपाद्यभेदतः साधनवैचित्र्यसूचनार्थम्' 'तओ' त्ति **ततः** प्रेरणाऽनन्तरं **नमी राजर्षिर्देवेन्द्रमिदमब्रवीदिति** ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किमुक्तवानित्याह—

**मिहिलाए चेइए वच्छे सीयच्छाए मणोरमे ।**
**पत्त-पुप्फ-फलोवेए बहूणं बहुगुणे सया ॥९॥**

**व्याख्या—मिथिलायां** पुरि **चैत्ये** उद्याने 'वच्छे'त्ति 'सूत्रत्वात् हिलोपे' **वृक्षैः शीतच्छाये मनोरमे** मनोरमाभिधाने **पत्र-पुष्प-फलोपेते बहूनां** प्रक्रमात् खगादीनां **बहुगुणे** फलादिभिरुपकारिणि **सदा** ॥९॥

तत्र किमित्याह—

**वाएण हीरमाणंमि चेइयंमि मणोरमे ।**
**दुहिया असरणा अत्ता एए कंदंति भो ! खगा ॥१०॥**

**व्याख्या—वातेन ह्रियमाणे** इतस्ततः क्षिप्यमाणो वातश्च तदा शक्रेणैव कृत इति सम्प्रदायः । चितिरिहेष्टिकादिचयस्तत्र साधुरयोग्यश्चित्यः स्वार्थेऽणि **चैत्यस्तस्मिन्** । कोऽर्थोऽधोबद्धपीठके, उपरि चोच्छ्रितपताके **मनोरमे** मनोऽभिरतिहेतौ 'वृक्षे इति शेषः' । **दुःखिता अशरणा** अत **एवार्ताः** पीडिता **एते** प्रत्यक्षाः **क्रन्दन्ति भोः ! खगाः** पक्षिणः । इह च यत् स्वजनाक्रन्दनं तत् खगाक्रन्दनप्रायम्, आत्मा च वृक्षकल्पो नियतकालावस्थितेस्ततः स्वस्वगतिगामितया द्रुमाश्रितखगोपमा एवामी स्वजनादयः । यदुक्तम्—

**"यद्वद् द्रुमे महति पक्षिगणा विचित्राः,**
**कृत्वाश्रयं हि निशि यान्ति पुनः प्रभाते ।**
**तद्वज्जगत्यसकृदेककुटुम्बजीवाः;**
**सर्वे समेत्य पुनरेव दिशो भजन्ति ॥१॥**

ततश्चाक्रन्दादिशब्दानामभिनिष्क्रमणहेतुत्वमसिद्धम्, स्वप्रयोजनहेतुकत्वात् तेषाम् । सर्वे हि सीदमानाः स्वार्थमेव रुदन्तीति भवदुक्ते हेतु—कारणे असिद्धे एवेति भावः ॥१०॥

ततश्च—

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥११॥**

**व्याख्या—एतमर्थं निशम्य** हेतु-कारणाभ्यां पूर्वोक्ताभ्यामनुपपत्तिपुरस्सराभ्यां चोदितोऽसिद्धोऽयं भवदुक्तो हेतुः कारणं चेत्यनुपपत्त्या प्रेरितो **हेतु—कारणचोदितस्ततो नमिं राजर्षिं देवेन्द्र इदमब्रवीदिति** ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किं तदित्याह—

**एस अग्गी य वाऊ य एयं डज्झइ मंदिरं ।**
**भयवं अंतेउरंतेणं कीस णं नावपेक्खह ? ॥१२॥**

**व्याख्या—एष** प्रत्यक्षोऽग्निश्च **वायुश्च** तथैतद् **दह्यते** । अर्थाद् वातेरिताग्निनैव **मन्दिरं** गृहं 'भवत्सम्बन्धीति शेषः' । **भगवन्** ! 'अंतेउरंतेणं' ति **अन्तःपुराभिमुखं** 'कीस'त्ति **कस्मात्** 'णमलङ्कारे' **नावप्रेक्षसे** नावलोकसे ? ॥१२॥

ततश्च—

**एयमट्ठं निसामित्ता हेऊकारणचोइओ ।**
**तओ नमी रायरिसी देविंदं इणमब्बवी ॥१३॥**

स्पष्टा, नवरं **नमिर्देवेन्द्रमिदमब्रवी**दिति ॥१३॥

किमित्याह—

**सुहं वसामो जीवामो जेसिं मो नत्थि किंचणं ।**
**मिहिलाए डज्झमाणीए न मे डज्झइ किंचणं ॥१४॥**

**व्याख्या—सुखं** यथा स्यादेवं **वसाम**स्तिष्ठामो **जीवामः** प्राणान् धारयामो **येषां** 'मो' इत्य**स्माकं नास्ति किञ्चन** वस्तुजातम् । यतः—

"एकोऽहं नैव मे कश्चित् स्वः परो वाऽपि विद्यते ।
यदेको जायते जन्तुर्म्रियते चैक एव हि" ॥१॥

इति न किञ्चिदन्तःपुरादि मत्सत्कम्, अतो **मिथिलायां दह्यमानायां न मे दह्यते किञ्चित्** स्वल्पमपि, स्वकर्मफलभुजो हि जन्तव इति । ततोऽनेन प्रागुक्तहेतोरसिद्धत्वं तत्त्वतो ज्ञानादिव्यतिरिक्तस्य सर्वस्याप्यस्वकीयत्वादिति भावः ॥१४॥

तदेव भावयति—

**चत्तपुत्तकलत्तस्स निव्वावारस्स भिक्खुणो ।**
**पियं न विज्जए किंचि अप्पियं पि न विज्जए ॥१५॥**

**व्याख्या—त्यक्तपुत्रकलत्रस्य निर्व्यापारस्य** मुक्तकृष्यादिक्रियस्य **भिक्षोः प्रियमिष्टं न विद्यते किञ्चिदप्रियमनिष्टमपि न विद्यते** । एतेनाकिञ्चनत्वं समर्थितम् ॥१५॥

एवं कथं वसनादीत्याह—

**बहुं खु मुणिणो भद्दं अणगारस्स भिक्खुणो ।**
**सव्वओ विप्पमुक्कस्स एगंतमणुपस्सओ ॥१६॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—'खुरेवार्थे' **बह्वेव भद्रं** कल्याण**मनगारस्य सर्वतो** बाह्यादान्तरात् स्वजनात् पराद् वा **विप्रमुक्तस्य** । एक एवाहमित्यन्तो निश्चय **एकान्तस्तमनुपश्यतः** पर्यालोचयत इति ॥१६॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥१७॥**

प्राग्वत् ॥१७॥ तदाह—

**पागारं कारइत्ताणं गोपुरट्टालगाणि य ।**
**उच्छूलगसयग्घीओ तओ गच्छसि खत्तिया ! ॥१८॥**

**व्याख्या—प्राकारं** कोट्टं **कारयित्वा गोपुराणि** तद्द्वाराणि 'कपाटार्गलाद्युपलक्षणं' **अट्टालकानि** कोट्टकोष्ठकोपर्यायोधनस्थानानि 'उच्छूलग'त्ति **खातिका** 'सयग्घीओ' त्ति **शतघ्न्यो** यन्त्रविशेषरूपाः । **ततः** सर्वं स्वस्थीकृत्य **गच्छसी**त्यत्र तिङ्व्यत्ययाद् गच्छ **क्षत्रिय !** इति ॥१८॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमी रायरिसी देविंदं इणमब्बवी ॥१९॥**

उक्तार्था ॥१९॥ तथा—

**सद्धं नगरं किच्चा तव-संवरमग्गलं ।**
**खंतिं निउणपागारं तिगुत्तं दुप्पधंसगं ॥२०॥**

**व्याख्या—श्रद्धां** तत्त्वरूचिरूपां सर्वगुणाधारतया **नगरं कृत्वा**ऽनेनोपशम-संवेगादीनि गोपुराणि कृत्वेत्युपलक्ष्यते । **तपः** षड्विधं बाह्यं तत्प्रधानः **संवर** आस्रवरोधरूपस्तं मिथ्यात्वादिदुष्टनिवारकत्वा**दर्गलं** कपाटं च कृत्वा तथा **क्षान्तिं निपुणं** रिपुरक्षाक्षमं **प्राकारं** कृत्वा तिसृभिरट्टालकादिस्थानीयाभिर्मनोगुप्त्यादिभिर्गुप्तं **त्रिगुप्तं दुष्प्रधर्षं** दुरभिभवनीयम् ॥२०॥

इत्थं प्रकारयित्वेति यदुक्तम्, तत्प्रत्युक्तप्राकारादिष्ववश्यं योद्धव्यम्, तच्च प्रहरणादिषु वैरिषु च सत्सु सम्भवीत्यत आह—

**धणुं परक्कमं किच्चा जीवं च इरियं सदा ।**
**धिइं च केयणं किच्चा सच्चेण पलिमंथए ॥२१॥**

**व्याख्या—धनुः पराक्रमं** जीववीर्यलक्षणं **कृत्वा जीवां च** प्रत्यञ्चां **चेर्यास**-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**मितिमु**पलक्षणाच्छेषसमितीश्च कृत्वेति योज्यम् । **सदा धृतिं** धर्माभिरतिरूपां **केतनं** शृङ्गमय-धनुर्मध्यकाष्ठमयमुष्ट्यात्मकं **कृत्वा** तच्च स्नायुस्थानीयेन **सत्येन** मनःसत्यादिना 'पलि-मंथए' त्ति **बध्नीयात्** ॥२१॥

ततः किमित्याह—

**तवनारायजुत्तेणं भेत्तूणं कम्मकंचुयं ।**
**मुणी विगयसंगामो भवाओ परिमुच्चई ॥२२॥**

**व्याख्या—तपः** षड्विधमान्तरं तदेव **नाराचो** लोहमयो बाणस्त**द्युक्तेना**र्थाद् धनुषा **भित्त्वा** विदार्य **कर्मकञ्चुकं** कर्मकञ्चुकग्रहणेन प्रबद्धकर्मकञ्चुकवानात्मैवोद्धतो वैरीत्युक्तं स्याद् वक्ष्यति च—"[१]**अप्पा मित्तममित्तं वा सुप्पट्ठिय दुप्पट्ठिय**" त्ति । **मुनिः** कर्मभेदे जेयस्य स्वात्मनो जितत्वात् तदितरजेयस्य चाभावाद् **विगतसङ्ग्रामो भवात्** स्वकर्मकृत-जन्मादिसङ्कटात् **परिमुच्यते** ॥२२॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥२३॥**

प्राग्वत् ॥३३॥

**पासाए कारइत्ताणं वद्धमाणगिहाणि य ।**
**वालग्गपोइयाओ य तओ गच्छसि खत्तिया ! ॥२४॥**

**व्याख्या—प्रासादा**नुक्तरूपान् **कारयित्वा वर्धमानगृहाणि च** नानावास्तुशास्त्रोक्तानि । 'वालग्गपोइयाओ' त्ति देशीभाषया **वलभीश्च** कारयित्वा **ततो गच्छ क्षत्रिय !** इति ॥२४॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमी रायरिसी देविंदं इणमब्बवी ॥२५॥**

पूर्ववत् ॥२५॥

**संसयं खलु सो कुणई जो मग्गे कुणई घरं ।**
**जत्थेव गंतुमिच्छिज्जा तत्थ कुव्विज्ज सासयं ॥२६॥**

**व्याख्या—**संशय इदमित्थं नवेत्युभयकोट्यवलम्बी प्रत्ययस्तम् । 'खलुरेवार्थे' **संशयमेव स कुरुते** यथा—मम कदाचिद् वाञ्छितपदे न गमनं भवत्यपीति **यो मार्गे कुरुते गृहम्** । तत्र गमननिश्चये तत्करणायोगात् । अहं तु न संशयितः । सम्यक्त्वादिषु

---

१. आत्मा मित्रममित्रं वा सुप्रस्थितो दुष्प्रस्थित इति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मोक्षावन्ध्यहेतुषु मम निश्चितत्वेन प्रवृत्तत्वात् । तर्हि क्व कर्तव्यमित्याह—**यत्रैव गन्तुमिच्छेत्, तत्रैव** जिगमिषितप्रदेशे **कुर्यात् स्वाश्रयं** स्ववेश्म जिगमिषितमुक्तिपदाश्रयविधाने प्रवृत्तत्वात् किमर्थमत्र प्रसादाविष्करणमिति भावः ॥२६॥ पुनः—

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥२७॥**

प्राग्वत् ॥२७॥

**आमोसे लोमहारे य गंठिभेए य तक्करे ।**
**नगरस्स खेमं काऊणं तओ गच्छसि खत्तिया ! ॥२८॥**

**व्याख्या**—आ समन्तान्मुष्णन्तीत्**यामोषास्तान् लोमहाराः** सर्वस्वापहारेण निस्त्रिंशतया प्राणघातकास्तान् **ग्रन्थिभेदा** घुर्घुरकादिना ग्रन्थिविदारका**स्तांस्तस्करांश्च** 'निगृह्येति गम्यम्' । **नगरस्य क्षेमं कृत्वा ततो** गच्छ **क्षत्रिय** ! इति ॥२८॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमी रायरिसी देविंदं इणमब्बवी ॥२९॥**

प्राग्वत् ॥२९॥

**असइं उ मणुस्सेहिं मिच्छा दंडो पउंजए ।**
**अकारिणोऽत्थ बज्झंति मुच्चई कारगो जणो ॥३०॥**

**व्याख्या**—'तुरेवार्थे' **असकृदेवा**नेकधा **मनुष्यैर्मिथ्या**ऽलीकोऽनपराधिष्वज्ञानाहङ्कारादिभिरपराधिष्विव **दण्डो** देशत्यागाङ्गच्छेदादिः **प्रयुज्यते** क्रियते । **अकारिण** आमोषाद्यकर्तारोऽत्र नृलोके **बध्यन्ते** निगडादिभिर्नियन्त्रयन्ते । **मुच्यते कारको**ऽर्थात् तेषामामोषादीनां प्रवर्तको **जन**स्तदनेनामोषकादीनां सम्यग् ज्ञातुमशक्यत्वान्निग्रह—क्षेमयोः कर्तुमशक्यत्वमुक्तमिति ॥३०॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥३१॥**

स्पष्टा ॥३१॥

**जे केइ पत्थिवा तुब्भं न नमंति नराहिवा ।**
**वसे ते ठावइत्ता णं तओ गच्छसि खत्तिया ! ॥३२॥**

**व्याख्या—ये केचित् पार्थिवा** भूपास्तुभ्यं **न नमन्ति** न प्रह्वीभवन्ति, भो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**नराधिप** ! **वशे** आत्मायत्तौ **तानन**मत्पार्थिवान् **स्थापयित्वा** निवेश्य **ततो गच्छे**ति ॥३२॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमी रायरिसी देविंदं इणमब्बवी ॥३३॥**

सुगमा ॥३३॥

**जो सहस्सं सहस्साणं संगामे दुज्जए जिणे ।**
**एगं जिणिज्ज अप्पाणं एस से परमो जओ ॥३४॥**

**व्याख्या—यः सहस्रं** दशशतात्मकं **सहस्राणां** दशलक्षीं प्रक्रमात् सुभटानां **सङ्ग्रामे दुर्जये जयेद**भिभवेत् । यदीति गम्यत्वा**देकं जये**दात्मानं स्वं 'दुराचारप्रवृत्तमिति शेषः' । **एष 'से' तस्य** जेतुः सुभटसहस्रजयात् **परमः** प्रकृष्टो **जय**स्तदनेनात्मन एव दुर्जयत्वमुक्तामिति ॥३४॥

तथा च—

**अप्पाणमेव जुज्झाहि किं ते जुज्झेण बज्झओ ? ।**
**अप्पणा चेव अप्पाणं जइत्ता सुहमेहए ॥३५॥**

**व्याख्या**—तृतीयार्थे द्वितीया । तत**श्चात्मनैव** सह **युध्यस्व** युद्धं कुरु । **किं** ? न किञ्चित् **'ते' तव युद्धेन बाह्यतो** बाह्यं पार्थिवादिकमाश्रित्यैवं **चात्मनैवात्मानं जित्वा सुख**मात्यन्तिकं मुक्तिसुखात्मक**मेधते** प्राप्नोति ॥३५॥

कथमेतदित्याह—

**पंचिंदियाणि कोहं माणं मायं तहेव लोहं च ।**
**दुज्जयं चेव अप्पाणं सव्वमप्पे जिए जियं ॥३६॥**

**व्याख्या—पञ्चेन्द्रियाणि क्रोधो मानो माया** तथैव **लोभश्च दुर्जयः** । **'चैव** पूरणे' अतति सततं गच्छति तानि तान्यध्यवसायस्थानानी**त्यात्मा** मनः 'सर्वत्र सूत्रत्वान्नपुंस्त्वम्' । **सर्वमि**न्द्रियाद्युपलक्षणान्मिथ्यात्वादि **चात्मनि** जीवे **जिते जित**मिति ॥३६॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥३७॥**

**व्याख्या**—स्पष्टा, नवरं रागद्वेषत्यागं निश्चित्य जैनधर्मस्थैर्यं परीक्षितु**मिन्द्रो नमिमब्रवीत्** ॥३७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**जइत्ता विउले जन्ने भोइत्ता समणमाहणे ।**
**दच्चा भुच्चा य इट्ठा य तओ गच्छसि खत्तिया ! ॥३८॥**

**व्याख्या—याजयित्वा विपुलान् यागान्, भोजयित्वा श्रमणब्राह्मणान्, दत्त्वा** द्विजादिभ्यो गवादीन्, **भुक्त्वा च** शब्दादिभोगान्, **इष्ट्वा च** स्वयं यज्ञान्, **ततो गच्छ क्षत्रिय !** इति ॥३८॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमी रायरिसी देविंदं इणमब्बवी ॥३९॥**

प्राग्वत् ॥३९॥

**जो सहस्सं सहस्साणं मासे मासे गवं दए ।**
**तस्सावि संजमो सेओ अदिंतस्स वि किंचणं ॥४०॥**

**व्याख्या—यः सहस्रं सहस्राणं** दशलक्षात्मकं **मासे मासे गवां दद्यात्, तस्यापी**दृशस्य दातुः **संयम** आश्रवादिविरतिरूपः **श्रेयान**तिप्रशस्यः । किम्भूतस्या**प्यददतोऽपि किञ्चना**ल्पमपि वस्तु गोदानं चेह यागाद्युपलक्षणमेवं संयमस्य प्रशस्यत्वं वदता गोदानादीनां सावद्यत्वमर्थादुक्तम् । अशनादीनां धर्मोपकरणानां च दानं निरवद्यत्वाद् धर्मायैव स्याद् यतः—

"अशनादीनि दानानि धर्मोपकरणानि च ।
साधुभ्यः साधुयोग्यानि देयानि विधिना बुधैः" ॥१॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥४१॥**

स्पष्टा, नवरं प्रव्रज्यादृढतां परीक्षितु**मिन्द्रो नमिमिदमब्रवीत्** ॥४१॥

**घोरासमं चइत्ताणं अन्नं पत्थेसि आसमं ।**
**इहेव पोसहरओ भवाहि मणुयाहिवा ! ॥४२॥**

**व्याख्या—घोरो** दुरनुचरो य **आश्रमो** गार्हस्थ्यम्, तस्याल्पसत्त्वैर्दुष्करत्वाद्, यदाह—

"गृहाश्रमसमो धर्मो न भूतो न भविष्यति ।
पालयन्ति नराः शूराः क्लीबाः पाखण्डमाश्रिताः" ॥१॥

तं **त्यक्त्वाऽन्यं प्रार्थयसे**ऽभिलष**स्याश्रमं** प्रव्रज्यालक्षणं तत् क्लीबसत्त्वानुचरित्वाद् भवादृशां नोचितम् । किं तर्हि ? इत्याह—**इहैव** गृहाश्रमे 'स्थित इति गम्यम्' ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**पौषधो**ऽष्टम्यादितिथिषु व्रतविशेषस्तत्र **रतो भव**अणुव्रताद्युपलक्षणम्, यदुक्तम्—

"सर्व्वेष्वपि तपोयोगः प्रशस्तः कालपर्वसु ।
अष्टम्यां पञ्चदश्यां च नियतं पौषधं वसेत्" ॥१॥

हे **मनुजाधिप** ! ॥४२॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमी रायरिसी देविंदं इणमब्बवी ॥४३॥**

प्राग्वत् ॥४३॥

**मासे मासे उ जो बालो कुसग्गेणं तु भुंजए ।**
**न सो सुक्खायधम्मस्स कलं अग्घइ सोलसिं ॥४४॥**

**व्याख्या—मासे मासे एव** 'तुरेवार्थे' न त्वेकस्मिन्नर्धमासादौ **यो बालो**ऽविवेकः **कुशाग्रेण** दर्भाग्रेणैव **भुङ्क्ते,** न तु करादिना । अयं भावो यत् कुशाग्रेऽवतिष्ठते, तदेवाभ्यवहरति, नाधिकम् । **न स** एवंविधकष्ठानुष्ठाय्यपि सुष्ठु शोभनो निरवद्यत्वादाख्यातोऽर्हदादिभिर्धर्मो यस्य स **स्वाख्यातधर्मस्तस्य** मुनेः **कलां** भाग**मर्घति षोडशीम्** । गृहाश्रमादयमेव श्रेयानिति भावः ॥४४॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥४५॥**

प्राग्वत् ॥४५॥ पुनरभिष्वङ्गं परीक्षितुमिन्द्रोऽब्रवीत्—

**हिरण्णं सुवण्णं मणिमुत्तं कंसं दूसं च वाहणं ।**
**कोसं वड्ढइत्ता णं तओ गच्छसि खत्तिया ! ॥४६॥**

**व्याख्या—हिरण्यं** घटितं हेम, **सुवर्णम**घटितम्, **मणयश्च**न्द्रकान्तेन्द्रनीलाद्याः, **मुक्ता** मुक्ताफलानि, **कांस्यं** कांस्यभाजनादि, **दूष्यं** वस्त्रम्, **वाहनम**श्वादि, **कोशं** भाण्डागारं च **वर्धयित्वा । ततो गच्छ क्षत्रिय !** इति ॥४६॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमी रायरिसी देविंदं इणमब्बवी ॥४७॥**

प्राग्वत् ॥४७॥

**सुवन्न-रूप्पस्स उ पव्वया भवे सिया हु केलाससमा असंखया ।**
**नरस्स लुद्धस्स न तेहि किंचि इच्छा हु आगाससमा अणंतिया ॥४८॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—सुवर्ण-रूप्यस्य पर्वताः** पर्वतप्रमाणा राशयो **भवेयुः स्यात्** कदाचित् 'हुरेवार्थे' **कैलाससमा** मेरुतुल्या **एवासङ्ख्यकाः** । **नरस्य लुब्धस्योप**लक्षणत्वात् स्त्रियाः पण्डकस्य वा । **न तैः** कैलाससमैः सुवर्णादिभिः **किञ्चिद**पि परितोषोत्पादनं क्रियते । कुत इत्याह—**इच्छा हुर्यस्मादाकाशसमा अनन्तिका** अन्तरहिता । यतः—

**"न सहस्राद् भवेत् तुष्टिर्न लक्षान्न च कोटिभिः ।**
**न राज्यान्न च देवत्वान्नेन्द्रत्वादपि देहिनाम्"** ॥१॥ ॥४८॥

**पुढवी साली जवा चेव हिरण्णं पसुभिस्सह ।**
**पडिपुन्नं नालमेगस्स इइ विज्जा तवं चरे ॥४९॥**

**व्याख्या—पृथ्वी** भूः, **शालयो यवाश्च** प्रतीताः, **च**शब्दः शेषधान्यसमुच्चये, **हिरण्यं** ताम्राद्युपलक्षणम् । **पशुभिरश्वादिभिः सह प्रतिपूर्णं** समस्तं **नैवालं** समर्थं प्रक्रमादिच्छापूर्तये । **एकस्य** 'जन्तोरिति' शेषः । **इत्येतत्** पूर्वोक्तं 'विज्ज'त्ति **विदित्वा तपो** द्वादशधा **चरेदासेवेत** । तत एव निःस्पृहतयेच्छापूर्तिसम्भवादिति भावः ॥४९॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥५०॥**

स्पष्टा, नवरं सत्सु विषयेषु पारलौकिकविषयाभिष्वङ्गं विवेचयितु**मिन्द्रो नमि-मब्रवीत्** ॥५०॥

**अच्छेरगमब्भुयए भोए चयसि पत्थिवा ! ।**
**असंते कामे पत्थेसि संकप्पेण विहन्नसि ॥५१॥**

**व्याख्या—आश्चर्यं** वर्तते यत् त्वमेवंविधोऽप्य**द्भुतका**नपूर्वान् **भोगांस्त्यजसि** हे **पार्थिव !** । तथा तत्त्यागा**दसतो**ऽविद्यमानान् **कामान् प्रार्थयसे** तदप्याश्चर्यम् । अथवा-ऽधिकस्तवात्र दोषः । **सङ्कल्पेनो**त्तरोत्तराप्राप्तभोगाभिलाषरूपेण विकल्पेन **विहन्यसे** विविधं बाध्यसे । एवंविधसङ्कल्पस्यापर्यवसितत्वात् । यः सद्विवेकः स प्राप्तान् कामानप्राप्त-काङ्क्षया न त्यजतीति भावः ॥५१॥

**एयमट्ठं निसामित्ता हेऊ-कारणचोइओ ।**
**तओ नमी रायरिसी देविंदं इणमब्बवी ॥५२॥**

प्रागवत् ॥५२॥ **नमिरिन्द्रमब्रवीत्**—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**सल्लं कामा विसं कामा कामा आसीविसोवमा ।**
**कामे पत्थेमाणा अकामा जंति दुग्गइं ॥५३॥**

**व्याख्या**—शरीरान्तःप्रविष्टमयःशल्यमिव **शल्यं कामाः**, बाधाविधायित्वात् । विषमिव **विषं** [कामाः] मुखमधुरायतिदारुणत्वात् । आश्यो दंष्ट्रास्तासु विषमस्येत्याशीविषः सर्पस्तदुपमाः **कामाः** । यथा ह्ययं स्फुरन्मणिफणामण्डितः शोभन इव दृश्यते, स्पृष्टश्च विनाशाय स्यात् तथैतेऽपि । किञ्च **कामान्** शब्दादीन् **प्रार्थयमाना** अप्य**कामा** इष्यमाणकामाप्राप्त्या **यान्ति दुर्गतिमि**ति ॥५३॥

कथमित्याह—

**अहे वयइ कोहेणं माणेणं अहमा गई ।**
**मायागइपडिग्घाओ लोहाओ दुहओ भयं ॥५४॥**

**व्याख्या**—**अधो** नरके **व्रजति क्रोधेन, मानेनाधमा गतिः, मायया गते**रर्थात् सुगतेः **प्रतिघातो** विनाशः, **लोभाद् द्विधा** ऐहिकं पारत्रिकं च **भयं** 'भवती'ति सर्वत्र योज्यम् । कामप्रार्थने ह्यवश्यम्भाविनः क्रोधादयस्ते चेदृशास्ततस्तत्प्रार्थने कथं न दुर्गतिः ? इति ॥५४॥

एवं क्षोभयितुमशक्त इन्द्रः किमकरोदित्याह—

**अवउज्झिऊण माहणरूवं विउव्विऊण इंदत्तं ।**
**वंदइ अभित्थुणंतो इमाहिं महुराहिं वग्गूहिं ॥५५॥**

**व्याख्या**—**अपोह्य** त्यक्त्वा **ब्राह्मणरूपं** 'विउव्विऊण'त्ति **विकृत्येन्द्रत्व**मुत्तरवैक्रियरूपं **वन्दतेऽभिष्टुवन्** स्तुतिं कुर्व**न्नाभि**र्वक्ष्यमाणाभि**र्मधुराभिर्वाग्भि**र्वाणीभिः ॥५५॥

स्तुतिमेवाह—

**अहो ! ते निज्जिओ कोहो अहो ! ते माणो पराजिओ ।**
**अहो ! ते निरक्किया माया अहो ! ते लोहो वसीकओ ॥५६॥**

**अहो ! ते अज्जवं साहू अहो ! ते साहु मद्दवं ।**
**अहो ! ते उत्तमा खंती ! अहो ते मुत्ति उत्तमा ॥५७॥**

**अनयोर्व्याख्या**—**अहो** ! इति विस्मये 'ते' **त्वये**ति सर्वत्र योज्यम् । **निर्जितः क्रोधो** यतस्त्वमनमत्पार्थिववशीकरणप्रेरणायामपि न क्षुब्धः । तथा **मानः पराजितो** यतस्त्वं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मन्दिरं दह्यते इत्याद्युक्तेऽपि मयि सति कथमिदमिति नाहङ्कृतिं कृतवान् । **अहो ! ते निराकृता माया,** यतस्त्वं पुररक्षाहेतुषु प्राकाराट्टालकादिषु मायाहेतुषु न मनो निहितवान् । **अहो ! ते लोभो वशीकृतः,** यतस्त्वं हिरण्यादि वर्धयित्वेत्युक्तेऽपीच्छाया आकाशसमत्वमेवोदाहृतवान्। अत **एवाहो** ! 'ते' **तवार्जवं साधु** शोभनम्, तथा **मार्दवम्, तथोत्तमा क्षान्तिः,** तथा **मुक्तिरुत्तमा** इत्यत्रानानुपूर्व्या अपि व्याख्याङ्गत्वाद् व्यत्ययनिर्देश इति गाथाद्वयार्थः ॥५६-५७॥

फलद्वारेण स्तुतिमाह—

**इहं सि उत्तमो भंते ! पेच्चा होहिसि उत्तमो ।**
**लोगुत्तमुत्तमं ठाणं सिद्धिं गच्छसि नीरओ ॥५८॥**

**व्याख्या—इहास्मिन्** जन्मन्य**सि** भवसि **उत्तम** उत्तमगुणोपेतत्वात् । हे **भदन्त** ! पूज्य ! **प्रेत्य** परभवे **भविष्यस्युत्तमः** । लोकस्योत्तममुपरिवर्ति **लोकोत्तममुत्तमं** देवलोकाद्यपेक्षया प्रधानं लोकोत्तमं **स्थानं** किं तत् ? **सिद्धिं** 'गच्छसि' त्ति सूत्रत्वाद् **गमिष्यसि नीरजा** निष्कर्मा ॥५८॥

उपसंहर्तुमाह—

**एवं अभित्थुणंतो रायरिसिं उत्तमाइ सद्धाए ।**
**पायाहिणं करिंतो पुणो पुणो वंदए सक्को ॥५९॥**

**व्याख्या—एवमभिष्टुवन् राजर्षिमुत्तमया श्रद्धया प्रदक्षिणां कुर्वन् पुनः पुनर्वन्दते शक्रः** ॥५९॥।

पुनर्यत् कृतवांस्तदाह—

**तो वंदिऊण पाए चक्कंकुसलक्खणे मुणिवरस्स ।**
**आगासेणुप्पईओ ललियचवलकुंडलकिरीडी ॥६०॥**

**व्याख्या—ततो वन्दित्वा पादौ चक्राङ्कुशलक्षणौ मुनिवरस्य नमेः** । **आकाशेनोत्पतितो** ललिते सविलासतया, चपले चञ्चलतया कुण्डले यस्य स चासौ किरीटी च मुकुटवान् **ललितचपलकुण्डलकिरीटी**ति ॥६०॥

एवं स्तूयमान स किमुत्कर्षं कृतवान् ? नेत्याह—

**नमी नमेइ अप्पाणं सक्खं सक्केण चोइओ ।**
**चइऊण गेहं वेदेही सामण्णे पज्जुवट्ठिओ ॥६१॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—नमिर्नमयति** स्वतत्त्वभावनया प्रह्वीकरोत्य**ात्मानं** न तूत्सेकं नयति । उक्तञ्च—

"[1]संतगुणकित्तणेण वि पुरिसा लज्जंति जे महासत्ता ।
इयरे पुण अलियपसंसणे वि हियए न मायन्ति" ॥१॥

किम्भूतः ? **साक्षाच्छक्रेण चोदितः** प्रेरितः । **त्यक्त्वा गेहं** 'वेदेहि'त्ति सूत्रत्वात् विदेहा नाम जनपदः सोऽस्यास्तीति **विदेही** विदेहदेशाधिपः **श्रामण्ये** चारित्रभावे **पर्युपस्थित** उद्यतोऽभूदिति शेषः ॥६१॥

किमयमेवैवंविध उतान्येऽपीत्याह—

**एवं करिंति संबुद्धा पंडिया पवियक्खणा ।**
**विणियट्टंति भोगेसु जहा से नमी रायरिसि ॥६२॥ त्ति बेमि ॥**

**व्याख्या—एवमि**ति यथा तेन **नमि**ना निश्चलत्वं कृतम्, तथाऽन्येऽपि **कुर्वन्ति** ये ईदृशा दृढसत्त्वभाजो भवन्ति । कीदृशाः ? **सम्बुद्धा** ज्ञातजीवादितत्त्वाः, **पण्डिता** मोक्षानुगामिधीमन्तः, **प्रविचक्षणाः** क्रियां प्रति प्रवीणाः । तथाविधाश्च किं विदधति ? **विनिवर्तन्ते** उपरमन्ति भोगेभ्यो **यथा स नमी राजर्षि**स्तेभ्यो निवृत्तः ॥ **इति ब्रवीमी**ति प्राग्वत् ॥६२॥ ग्रं० ८५६-२६॥

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां नवमं नमिप्रव्रज्याख्यमध्ययनं समाप्तम् ॥९॥**

• • •

---

१. सद्गुणकीर्तनेनापि पुरुषा लज्जन्ते ये महासत्त्वाः ।
इतरे पुनरलीकप्रशंसनेऽपि हृदये न मान्ति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# दशमं द्रुमपत्रीयमध्ययनम्

इहानन्तराध्ययने चरणं प्रति निष्कम्पत्वमुक्तम्, तच्चानुशासनादेव स्यादित्युपमया-ऽनुशासनाभिधायकस्यास्याध्ययनस्य प्रस्तावनार्थं **गौतमं** प्रति श्री**वीर** उपदिष्टवानित्यादौ **गौतम**वक्तव्यतोच्यते—

भूपालः **पृष्ठिचम्पा**यां **शालो** नाम विशालधीः ।
युवराजो **महाशाल**स्तयोर्भगनी **यशोमती** ॥१॥

सा च **काम्पिल्य**भूभर्तुः **पिठ**रस्य प्रियाऽभवत् ।
अन्यदा विहरंस्तत्र श्री**वीरः** समवासरत् ॥२॥

**शालाद्या** वन्दितुं जग्मुर्धर्मश्च दिदिशेऽर्हता ।
वर्णिता मनुजत्वादि-सामग्री दुर्लभा परम् ॥३॥

प्ररूपिताः प्रमादाद्याः कर्मबन्धैकहेतवः ।
उपदिष्टं महारम्भप्रमुखं श्वभ्रकारणम् ॥४॥

दर्शितं भवनैर्गुण्यं दुर्गतिश्च कषायिणाम् ।
सम्यक्चिद्-व्रत-दृष्टीनां ज्ञापिता मोक्षमार्गता ॥५॥

नृपः **शालो**ऽथ संविग्नः समाख्यात् सोदरं मुदा ।
साम्राज्यभारमादत्स्व यथाऽहं संयमं श्रये ॥६॥

**महाशालो**ऽप्यदः प्रोचे नाग्नेः को निर्यियासति ? ।
यूयमेव प्रमाणं मे तद् व्रतेऽपि गृहेष्विव ॥७॥

*महारम्भैकमूलेन महामोहैकहेतुना ।*
*विवेकप्रतिपक्षेण महाराज्येन मे कृतम् ॥८॥*

अथ **गागलिमा**ह्वाय **काम्पील्याद्** भगिनीसुतम् ।
राज्ये निवेश्य सभ्रातोपादत्त चरणं नृपः ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकादशाङ्गपारीणौ तावभूतां महामुनी ।
भुवं विहृत्य **वीरो**ऽपि **चम्पा**मनुययौ क्रमात् ॥१०॥

**पृष्टिचम्पा**मनुज्ञातौ श्री**वीरे**णाथ **गौतमम्** ।
तावयातां पुरस्कृत्य स्वस्रादिप्रतिबुद्धये ॥११॥

**पिठरा**द्यास्तदोद्यानमागत्य मुनिभूषितम् ।
नत्वा तान् गौतमीं वाचमित्यशृण्वन् सुधाविधाम् ॥१२॥

*"नानादुःखजलाकीर्णः प्रपञ्चोऽयं भवोदधेः ।*
*ये न त्वरन्ति निर्गन्तुमस्मात् तेषां क्व चेतना ? ॥१३॥*

*सुप्रापा एव हि प्रायो विभुत्वविभा भवे ।*
*धर्मसाधनसामग्री कृच्छ्रप्राप्यैव केवलम् ॥१४॥*

*सम्यगादृतधर्माणां तत्प्राप्तिः सफला भवेत् ।*
*निष्फलैवान्यथा सा स्यात् स्त्रीजन्मेव सुतं विना ॥१५॥*

*साम्राज्यमदिरोन्मत्ता आदाय निबिडं रजः ।*
*अधः पतन्ति तद्भारादम्बुधौ लोहपोतवत्" ॥१६॥*

इति व्याख्यानमाकर्ण्य प्रबोध्य जनकावपि ।
**गागलिर्गौतमाद्** दीक्षां तद्युक्तः समुपाददे ॥१७॥

**गागले**र्ज्येष्ठपुत्रस्तु तत्पुरेशस्ततोऽभवत् ।
**गौतमो**ऽप्यनु**चम्पं** तत्पञ्चयुक्तोऽचलद् गुरुः ॥१८॥

तदा **शाल-महाशाल**योरभूत् पथि गच्छतोः ।
तेषां प्रबोधसम्पत्तिशुभध्यानेन केवलम् ॥१९॥

प्रागस्मभ्यमदाय्याभ्यां प्राज्यं राज्यं ततो व्रतम् ।
द्विधाऽपि तदुपकारीत्यध्यायन् **पिठरा**दयः ॥२०॥

प्रापुश्च केवलज्ञानमेतैर्युक्तोऽथ **गौतमः** ।
गत्वा प्रदक्षिणीकृत्य **चम्पो**द्यानेऽनमज्जिनम् ॥२१॥

आह **वीर**मनत्वा तान् यातः केवलिसंसदम् ।
माऽऽशातयत सर्वज्ञं वन्दध्वमिति **गौतमः** ॥२२॥

अथो वाचमुवाचैवं जिनोऽमून् केवलस्पृशः ।
मा मा वन्दध्वमित्याख्योऽवज्ञा केवलिनां ह्यसौ ॥२३॥

ततस्तानतिसंविग्नो **गौतमो**ऽक्षमयत्तराम् ।
केवलं न ममाद्यपीति मनाग् विषसाद च ॥२४॥

इतश्च देवगीरासीदद्य व्याख्यदिदं जिनः ।
नरो**ऽष्टापद**यात्राकृत् तद्भवे मुक्तिमृच्छति ॥२५॥

तच्छ्रुत्वा **गौतमो**ऽपृच्छद् याम्यहं चैत्यवन्दनम् ।
आधातुं तत्र सर्वज्ञोऽन्वज्ञासीदमुं लघु ॥२६॥

तुष्टोऽथ **गौतमो**ऽचालीदितश्चैते तपस्विनः ।
**कौडिन्य-दत्त-सेवलाः** प्रत्येकं पञ्चभिः शतैः ॥२७॥

तापसानां परिवृता एक-द्वि-त्र्युपवासिनः ।
क्रमात् कन्दादिसेवालशुष्कसेवालपारणाः ॥२८॥

तपःशक्त्यैकक-द्वि-त्रिसोपानारोहशक्तयः ।
ते क्लिश्यन्ते स्म **कैलास**चूलिकामारुरुक्षवः ॥२९॥

आयान्तं **गौतमं** दृष्ट्वा यावद् दध्युरमी हृदि ।
चूलां गन्तुं कथं शक्तः स्थूल एष हि निस्तपाः ॥३०॥

क्षणाच्चारणलब्ध्याऽथ तावदुत्प्लुत्य गौतमः ।
निश्चित्य गौतमं मार्गं पश्यन्तस्तस्थुरुन्मुखाः ॥३२॥

सोऽप्यद्रिशिखरे **सिंहनिषद्ये** जिनवेश्मनि ।
चतुरोऽष्टौ दश द्वौ च ववन्दे विधिनाऽर्हतः ॥३३॥

**सम्भवा**द्यानपाच्यादिस्थितान् द्वाविंशतिजिनान् ।
नत्वा सृष्टिक्रमाद् यावत् पूर्वस्या**मृषभाजितौ** ॥३४॥

हर्षान्नुत्वा च सर्वार्हं सायं देवगृहाद् बहिः ।
दिशीशान्यामशोकद्रोरधोऽचित्तशिलास्थितः ॥३५॥

समित्राय समेताय नन्तुं **वैश्रवणाय** सः ।
तपःकृशान् मुनीन् बाढं वर्णयामास **गौतमः** ॥३६॥

गुरोरकृशमाकारं दृष्ट्वा श्रुत्वा च तां गिरम् ।
संशयाने **वैश्रवणे गौतमः** पुनरब्रवीत् ॥३७॥

व्यवहारे तपः श्रेष्ठं परिणामस्तु निश्चये ।
ज्ञातेन **पुण्डरीकस्य** ज्ञेयं तच्चाधुना शृणु ॥३८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आस्ते मध्य**विदेहे**षु नगरी **पुण्डरीकिणी** ।
**महापद्मो**ऽभवद् भूपस्तत्र **पद्मावती**पतिः ॥३९॥

**पुण्डरीक-कण्डरीकौ** द्वावभूतामदःसुतौ ।
आददे भूधरं **पुण्डरीके** न्यस्य व्रतं नृपः ॥४०॥

उत्पाद्य ज्ञानमत्युग्रच्छायं न्यायं च केवलम् ।
क्रमात् प्राप्तौ **महापद्म-पुण्डरीकौ** महोदयम् ॥४१॥

गुरूणां **नलिनीगुल्मो**पवनोपैयुषां गिरा ।
**पुण्डरीकः** प्रबुद्धः सन् संविग्नोऽभाषतानुजम् ॥४२॥

क्षमाद्वयं क्रमाद् भ्रातस्तातस्तावदपालयत् ।
आद्या त्वया मया चान्या ते पाल्येऽथ विभागतः ॥४३॥

**कण्डरीको**ऽभ्यधादाद्यां क्षमामाद्यः पितुः सुतः ।
त्वं पालय द्वितीयं तु द्वितीयः पालयाम्यहम् ॥४४॥

*व्रतमत्सरिणो वत्स ! विषया विषमूर्तयः ।*
*रक्षेः स्वानि हृषीकाणि मा चलानि मिलन्तु तैः ॥४५॥*

इत्युक्तेऽप्यनपक्रान्तं व्रतैकाध्यवसायतः ।
**पुण्डरीको**ऽनुजं दीक्षाग्रहणायान्वमन्यत ॥४६॥

स्वयं पुनः प्रजाः पातुं तस्थौ भावयतिर्गृहे ।
तपस्तनुकृशो जज्ञे **कण्डरीक**स्तु संयमी ॥४७॥

वसन्तसमयेऽन्येद्युर्मत्तो दन्तीव पादपम् ।
तच्चेतश्चालयामास चारित्रावरणोदयः ॥४८॥

अथैत्य **पुण्डरीकिण्यां पुण्डरीक**महीभुजे ।
उद्यानस्थोऽयमुद्यानपालेन स्वमजिज्ञपत् ॥४९॥

बद्ध्वोपकरणं वृक्षशाखायां भूतले स्वयम् ।
सचित्तेऽपि निविष्टोऽयं प्राप्तेनादर्शि भूभुजा ॥५०॥

एनं तथास्थमालोक्य ज्ञात्वा संयमतश्चलम् ।
**कण्डरीकं** करे लात्वा प्रोचिवान् सचिवान् नृपः ॥५१॥

प्रागप्ययं मयाऽवारि चारित्रग्रहणेऽनुजः ।
मुदे तदस्तु प्रव्रज्याराज्ययोर्व्यत्ययोऽद्य नौ ॥५२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्युदित्वाऽऽददे तस्माद् व्रतचिह्नानि पार्थिवः ।
तस्मै भोग्याखिलक्ष्माणि राज्यलक्ष्माणि दत्तवान् ॥५३॥

विजहार महाराजः स्वयमात्तव्रतस्ततः ।
**कण्डरीक**स्तु दुष्कीर्तिकीर्णकर्णोऽविशत् पुरीम् ॥५४॥

रङ्को मुक्तव्रत इति हसितः सेवकैरपि ।
गत्वाऽथौकस्तथाऽभङ्क्त सरसाहारमुल्बणम् ॥५५॥

यथाऽस्याजीर्णदुःस्थस्य गृद्धस्योज्जागरस्य च ।
प्रादुरासोदरे मृत्युसोदरेव विशूचिका ॥५६॥

लुठन् भुवि पतन् मूर्छन् वैद्यैरप्यकृतौषधः ।
नाञ्चितः सचिवैर्दासैरप्युदासैर्निरीक्षितः ॥५७॥

ततः क्रुद्धोऽयमध्यायद् यदि जीवामि यामिनीम् ।
तदेषामेष सर्वेषामायुर्निःशेषयाम्यहम् ॥५८॥

श्यामलेश्यामयध्यानादिति नक्तं विपद्य सः ।
प्रतिष्ठाम**प्रतिष्ठाने** सप्तमे नरकेऽभजत् ॥५९॥

जिनादिष्टं चिरादिष्टं धर्मं दिष्ट्याऽद्य लब्धवान् ।
गुरुसाक्षिकरोमीति **पुण्डरीक**स्त्वचिन्तयत् ॥६०॥

"विवन्दिषुर्गुरून् विश्वप्रथितः प्रस्थितः पथि ।
अष्टमस्य तपःपुष्टः कृतवान् पारणं मुनिः ॥६१॥

अन्नैर्वेलातिगैः शीतरूक्षैश्च व्यथितो मृदुः ।
भूचारश्चरणोद्गच्छदसृग् भूरिपरिश्रमः ॥६२॥

ग्रामे वसतिमभ्यर्थ्य तृणसंस्तरणे स्थितः ।
कदा गुरुपदाभ्यासं यास्यामीति विचिन्तयन्" ॥६३॥

साधिताराधनः शुद्धध्यानोऽयं मुनिशेखरः ।
विपद्य **सर्वार्थसिद्धिं पुण्डरीक**स्तु जग्मिवान् ॥६४॥

तत् श्रुत्वा **धनदो** पृष्टो येनास्य संशयः ।
मित्रं सामानिकश्चास्याधीयायाध्ययनं तु तत् ॥६५॥

तत्त्वतश्चाप सम्यक्त्वं सोऽथ **तुम्बवनास्पदे** ।
**सौनन्देयः** श्रुतधरो **वज्र**स्वामी भविष्यति ॥६६॥

Jain Education International 2010_02    For Private & Personal Use Only    www.jainelibrary.org

**गौतमो**ऽपि प्रगे प्रत्यवरोहंस्तापसैः श्रितः ।
गुरुत्वेनानुजग्राह दीक्षादानेन तानथ ॥६७॥

प्रतिष्ठध्वं जगन्नाथस्त्रिलोकीगौरवास्पदम् ।
वन्द्यतेऽदः समाकर्ण्य विस्मितास्ते तमूचिरे ॥६८॥

निष्कलङ्कैर्गुणैर्यो हि भवद्भ्योऽप्यतिरिच्यते ।
स कोऽस्तीति ततोऽकार्षीद् **गौतमो वीर**वर्णनम् ॥६९॥

*"सर्वज्ञः सर्वदर्शी स विश्वातिक्रान्तरूपवान् ।*
*किङ्करीयन्नरामर्त्यनागविद्याधरेश्वरः ॥७०॥*

*रत्नसिंहासनासीनः सर्वातिशयभासुरः ।*
*सुरेश्वरधृतच्छत्रवीज्यमानप्रकीर्णकः ॥७१॥*

*स्वर्ण-दुर्वर्ण-रत्नोरुत्रिवप्रान्तश्चतुर्मुखः ।*
*योगातिशयसम्प्राप्तपरमर्द्धिर्महामुनिः ॥७२॥*

*द्विगव्यूतानुगामिन्या वाण्या सत्तत्त्वमादिशन् ।*
*वीरो विजयते चम्पापुर्यां विश्वैकवल्लभः ॥७३॥*

*यद्वन्दनेन यद्वाक्यश्रवणेनैव लीयते ।*
*परात्मनि मनः साम्यं विश्वे तस्य भजेत कः ?" ॥७४॥* पञ्चभिः कुलकम्

अस्माकं वः स च गुरुः श्रुत्वेत्येते परां मुदम् ।
आप्य सम्यक्त्व-चारित्रदाढ्र्यभाजोऽभवंस्तराम् ॥७५॥

देवताऽऽनीतलिङ्गास्तेऽनुजग्मु**र्गौतमं** प्रभुः ।
पप्रच्छ भैक्षसमये का पिपारयिषाऽस्ति वः ? ॥७६॥

पायसेनेति तैरुक्ते गुरुरेष पतद्ग्रहम् ।
भृत्वा कुतश्चित् कौटम्बिगृहात् तेन त्वराऽऽनयत् ॥७७॥

तानानुपूर्व्याऽवस्थाप्य ससर्पिर्गुडपायसम् ।
आकण्ठं भोजयामास स्वाम्यक्षीणमहानसः ॥७८॥

तदा सेवालवर्गस्य कवलीकुर्वतस्तराम् ।
परमान्नं मनस्यासीत् परमोऽयं शुभाशयः ॥७९॥

अहो ! जाग्रति पुण्यानि विशिष्टविशदानि नः ।
यदनेन समर्थेन गुरुणाऽभूत् समागमः ॥८०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अनुत्तरगुणाम्भोधेः सौमनस्यादमुष्य च ।
भवोत्तारैकसामग्री प्रव्रज्याऽप्याऽऽपि दुर्लभा ॥८१॥

वन्दिष्यते **महावीर**स्त्रिविश्वैकसुरद्रुमः ।
तत् क्लेशबीजं मोहारिर्जित एव सुदुर्जयः ॥८२॥

अदो विशुद्धध्यानाग्निशोधितात्ममलास्तदा ।
कवलान् केवलत्वेन **सेवालाः** पर्यणामयन् ॥८३॥

घ्रातेष्वथाखिलेष्वेषु गुरुः शेषं तदाहरत् ।
प्रातिष्ठन्त च सर्वेऽपि सयूथेशद्विपा इव ॥८४॥

दूरतोऽप्यातपत्रादिप्रातिहार्यप्रवीक्षणात् ।
सङ्केतितमिवायासीद् **दत्त**वर्गेऽपि केवलम् ॥८५॥

अथ **कौडिन्य**वर्गेऽपि जिनवाक्यामृतश्रुतेः ।
अपूर्वप्रणिधिप्राप्त्योत्पेदे तद् विश्वदीपकम् ॥८६॥

नेत्र-खेष्विन्दुसङ्ख्यैस्तैर्मुनिभिर्गणभृद् वृतः ।
दत्तप्रदक्षिणोऽर्हन्तं **चम्पायां** क्रमतोऽनमत् ॥८७॥

अनुकेवलिसंसत् तान् व्रजतो **गौतमो**ऽवदत् ।
अनत्वाऽर्हन्तमज्ञा भोः ! माऽन्यतो व्रजत द्रुतम् ॥८८॥

अथ **वीरो**ऽवदन्माऽवज्ञासीः केवलगानमून् ।
**गौतमो**ऽपि ततो मिथ्या दुष्कृतं प्रयतो ददौ ॥८९॥

न मे केवलसंवित्तिरिति दूनं गणाधिपम् ।
तच्छिरोन्यस्तहस्ताब्जः प्रावोचज्जगदीश्वरः ॥९०॥

"चतुर्ष्वपि कटेषूच्चैर्भोः ! कम्बलकटोपमः ।
स्नेहो मयि प्रशस्तोऽस्ति विनीतस्य स्थिरस्तव ॥९१॥

ममासि चिरसंसृष्टश्चिरात् परिचितोऽपि हि ।
तादृशोऽपि स्खलयति स यथाख्यातसंयमम् ॥९२॥

तमृते केवलं न स्यात् तत् प्रशस्तोऽप्यसौ मतः ।
अप्रशस्तस्य तस्यैव निवारकतया सताम् ॥९३॥

तन्निवृत्त्योज्ज्वलध्यानप्राप्तेरपरं तत्क्षयात् ।
केवलं तच्च नः सिद्धौ वीतरागस्य ते ध्रुवम् ॥९४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अन्ते तुल्यौ भविष्यतावस्तत् प्रमादं परित्यजेः ।
आदिदेश प्रभुर्वीर इदमध्ययनं तदा'' ॥९५॥ **पञ्चभिः कुलकम्**

तत् सूत्रं चेदम्—

**दुमपत्तए पंडुयए जहा निवडइ राइगणाण अच्चए ।**
**एवं मणुयाण जीवियं समयं गोयम ! मा पमायए ॥१॥**

**व्याख्या**—द्रुमस्य वृक्षस्य पत्रं तदेव तथावस्थाप्राप्त्यानुकम्प्यं **द्रुमपत्रकं पाण्डुरकं** कालपरिणत्या श्वेतं **यथा निपतति** शिथिलबन्धनत्वाद् भ्रश्यति । प्रक्रमाद् द्रुमादेव **रात्रिगणानां** दिनगणाविनाभावित्वाद् रात्रिन्दिवससमूहानामत्ययेऽ**तिक्रमे, एवं मनुजानां** नृणामुपलक्षणाच्छेषजीवानां **जीवितमायुः** कतिचिद् रात्रिगणात्यये यथास्थित्याध्यवसानाद्युपक्रमैर्वा भ्रश्यत्यतोऽपेर्गम्यत्वात् **समयम**प्यतिसूक्ष्मकालमप्यास्तामावलिकादि भो **गौतम ! मा प्रमादीः** प्रमादं मा कृथाः । शेषशिष्योपलक्षणं **गौतम**ग्रहणम् । इह पाण्डुरकपदेन यौवनस्याप्यनित्यत्वमाक्षिप्तम् । यदाह—

**''[1]परियट्टिअलावण्णं चलंतसंधिं मुअंतबिंटागं ।**
**पत्तं च वसणप्पत्तं कालप्पत्तं भणइ गाहं ॥१॥**

**जह तुब्भे तह अम्हे तुब्भे वि य होहिआ जहा अम्हे ।**
**अप्पाहेइ पडंतं पंडुयपत्तं किसलयाणं'' ॥२॥**

ननु किमेवं किशलयानां पत्राणां चोल्लापः सम्भवतीत्यत आह—

**''[2]न वि अत्थि न वि य होही उल्लावो किसल-पंडुपत्ताणं ।**
**उवमा खलु एस कया भवियजणविबोहणट्ठाए'' ॥३॥**

यथेह पाण्डुपत्रेण विवर्णच्छायतया शुक्लेन किशलयानि नवोत्पन्नपत्राणि स्निग्धादिगुणैर्गर्वं वहमानान्यनुशिष्यन्ते, तथान्योऽपि यौवनगर्वितोऽनुशासनीयस्तथा चोवाच **वाचकः**—

**''परिभवसि किमिति लोकं जरया परिजर्जरीकृतशरीरम् ।**
**एवं त्वमपि भविष्यसि यौवनगर्वं किमुद्वहसि ?'' ॥१॥**

---

१. परिवर्तितलावण्यं चलत्सन्धि मुञ्चद्वृन्तकम् ।
पत्रं च व्यसनप्राप्तं कालप्राप्तं भणति गाथाम् ॥१॥
यथा यूयं तथा वयं यूयमपि च भविष्यथ यथा वयम् ।
सन्दिशति पतत् पाण्डुपत्रं किसलयानाम् ॥२॥

२. नाप्यस्ति नापि च भविष्यत्युल्लापः किसलय-पाण्डुपत्राणाम् ।
उपमा खल्वेषा कृता भव्यजनविबोधनार्थम् ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदेवं जीवित–यौवनयोरनित्यत्वमिति भावः ॥१॥

पुनरायुषोऽनित्यत्वमाह—

**कुसग्गे जह उसबिंदुए थोवं चिट्ठइ लंबमाणए ।**
**एवं मणुयाण जीवियं समयं गोयम ! मा पमायए ॥२॥**

**व्याख्या—कुशो** दर्भस्त**स्याग्रं** प्रान्तस्त**स्मिन् यथाऽवश्यायबिन्दुः** स्त्यानोदबिन्दुः **स्तोकम**ल्पकालं **तिष्ठ**त्यास्ते **लम्बमानक एवं मनुजानां** जीवितमतः **समयम**पि **गौतम ! मा प्रमादीः** ॥२॥

अमुमेवार्थमुपसंहर्तुमाह—

**इइ इत्तरियंमि आउए जीवियए बहुपच्चवायए ।**
**विहुणाहि रयं पुरे कडं समयं गोयम ! मा पमायए ॥३॥**

**व्याख्या—इती**त्युक्तन्याये**नेत्वरे** स्वल्पकालभाविन्यायुषि **जीवितके**ऽर्थात् सोपक्रमायुषि **बहवः प्रत्यपाया** उपघातहेतवोऽध्यवसानादयो यस्मिंस्तत् तथा **तस्मिन्** एवं दृष्टान्तद्वयेनायुषोऽनित्यतां मत्वा **विधुनीहि** जीवात् पृथक् कुरु **रजः** कर्म **पुरा कृतं** पूर्वविहितं **समयमि**त्यादि प्राग्वत् ॥३॥

स्यात्, पुनर्नरत्वावाप्तावुद्यंस्याम इत्याह—

**दुल्लहे खलु माणुसे भवे चिरकालेण वि सव्वपाणिणं ।**
**गाढा य विवाग कम्मुणो समयं गोयम ! मा पमायए ॥४॥**

**व्याख्या—दुर्लभः खलु**रकृतसुकृतानामिति विशेषद्योतको **मानुषो भवश्चिरकालेनापि** बहुकालेनाप्यास्तामल्पकालेन **सर्वप्राणिनाम्** । किमित्यत आह–**गाढा** नाशयितुमशक्यतया दृढाश्च इति यतो **विपाका** उदयाः **कर्मणां** मनुजगतिविघातिप्रकृतिरूपाणामतः **समयम**पीत्यादि प्राग्वत् ॥४॥

कथं पुनस्तद् दुर्लभमिति सर्वजीवानां कायस्थितिमाह—

**पुढविक्कायमइगओ उक्कोसं जीवो उ संवसे ।**
**कालं संखाईयं समयं गोयम ! मा पमायए ॥५॥**
**आउक्कायमइगओ उक्कोसं जीवो उ संवसे ।**
**कालं संखाईयं समयं गोयम ! मा पमायए ॥६॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तेउक्कायमइगओ उक्कोसं जीवो उ संवसे ।**
**कालं संखाईयं समयं गोयम ! मा पमायए ॥७॥**

**वाउक्कायमइगओ उक्कोसं जीवो उ संवसे ।**
**कालं संखाईयं समयं गोयम ! मा पमायए ॥८॥**

**व्याख्या**—पृथ्वी कठिनरूपा सैव कायोऽङ्गं **पृथ्वीकायस्तम**तिशयेन मृत्वा मृत्वा तदुत्पत्तिलक्षणेन गतः प्राप्तो**ऽतिगतः** । **उत्कर्षतो जीवः** 'तुः पूरणे' **संवसेत्** तद्रूपतयैवावतिष्ठेत् **कालं सङ्ख्यातीतम**सङ्ख्योत्सर्पिण्यवसर्पिणीमानमतः **समयमपि गौतम ! मा प्रमादीः** ॥५॥ आउक्कायमइगओ० ॥६॥ तेउक्काय० ॥७॥ वाउक्काय० ॥८॥ एतास्त्रिस्रोऽपि गाथाः पृथ्वीकायवदवसेयाः ॥

**वणस्सइकायमइगओ उक्कोसं जीवो उ संवसे ।**
**कालमणंतंदुरंतं समयं गोयम ! मा पमायए ॥९॥**

स्पष्टा, नवरं **कालमन्तमि**त्यनन्तकायिकापेक्षमनन्तोत्सर्पिण्यवसर्पिणीप्रमाणं प्रत्येकवनस्पतीनां कायस्थितेरसङ्ख्यात्वात् । तथा दुष्टोऽन्तोऽस्येति **दुरन्तस्तमि**दमपि साधारणापेक्षयैव ते ह्यत्यल्पबोधतया तदुद्वृत्ता अपि प्रायो न विशिष्टं नरादिभवं लभन्ते । यदागमः—

"[१]**असंखोस्सप्पिणिओसप्पिणीओ एगिंदियाण उ चउण्हं ।**
**ता चेव उ अणंता वणस्सइए उ बोधव्वा**" ॥१॥

**समयमि**त्यादि प्राग्वत् ॥९॥

**बेइंदियकायमइगओ उक्कोसं जीवो उ संवसे ।**
**कालं संखिज्जसन्नियं समयं गोयम ! मा पमायए ॥१०॥**

**व्याख्या—द्वीन्द्रियाः** कृम्यादयस्त**मतिगतः कालं सङ्ख्यातसंज्ञितं** सङ्ख्यातवर्षसहस्रात्मकमतः **समयमि**त्यादि पूर्ववत्, शेषं स्पष्टम् ॥१०॥

**तेइंदियकायमइगओ उक्कोसं जीवो उ संवसे ।**
**कालं संखिज्जसन्नियं समयं गोयम ! मा पमायए ॥११॥**

---

१. असङ्ख्योत्सर्पिण्यवसर्पिण्य एकेन्द्रियाणां तु चतुर्णाम् ।
ताश्चैव त्वनन्ता वनस्पतेस्तु बोधव्याः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**चउरिंदियकायमइगओ उक्कोसं जीवो उ संवसे ।**
**कालं संखिज्जसन्नियं समयं गोयम ! मा पमायए ॥१२॥**

एते अपि गाथे पूर्ववद् भावनीये ॥११-१२॥

**पंचिंदियकायमइगओ उक्कोसं जीवो उ संवसे ।**
**सत्तट्ठभवग्गहणे समयं गोयम ! मा पमायए ॥१३॥**

**व्याख्या—पञ्चेन्द्रिया** मनुष्यत्वस्य दुर्लभत्वेन प्रक्रान्तत्वाद् देवनारकयोश्चोत्तरत्रोक्तत्वात् तिर्यञ्च एवात्र गृह्यन्ते । **तत्कायमतिगत**स्तत्कायोत्पन्न **उत्कर्षतः सप्ताष्टभवग्रहणान्यतः समयमि**त्यादि स्पष्टम् ॥१३॥

**देवे नेरइये अइगओ उक्कोसं जीवो उ संवसे ।**
**इक्किक्कभवग्गहणे समयं गोयम ! मा पमायए ॥१४॥**

**व्याख्या—देवान् नैरयिकांश्चातिगत उत्कर्षतो जीवस्तु संवसेदेकैकभवग्रहणम्**। ततः परमवश्यं नरेषु तिर्यक्षु चोत्पादात् । अतः **समयमि**त्यादि प्राग्वदिति ॥१४॥

उक्तार्थमुपसंहर्तुमाह—

**एवं भवसंसारे संसरइ सुहासुहेहिं कम्मेहिं ।**
**जीवो पमायबहुलो समयं गोयम ! मा पमायए ॥१५॥**

**व्याख्या—एवमुक्त**प्रकारेण पृथ्व्यादिकायस्थितिलक्षणेन प्रकारेण भवा एव तिर्यगादिजन्मात्मकाः संस्रियमाणत्वात् संसारो **भवसंसारस्तस्मिन् संसरति** पर्यटति **शुभाशुभैः कर्मभिः** पृथ्व्यादिभवहेतुभि**र्जीवः प्रमादैः** पञ्चभिरष्टभिर्वा **बहुलो** व्याप्तोऽतः **समयमि**त्यादि स्पष्टम् ॥१५॥

एवं मनुजत्वावाप्तावप्युत्तरोत्तरगुणावाप्तिर्दुर्लभैवेत्याह—

**लद्धूण वि माणुसत्तणं आयरियत्तं पुणरावि दुल्लभं ।**
**बहवे दसुया मिलक्खुया समयं गोयम ! मा पमायए ॥१६॥**

**व्याख्या—लब्ध्वाऽपि मानुषत्वम**तिदुर्लभमेव कथञ्चि**दार्यत्वं** मगधाद्यार्यदेशोत्पत्तिलक्षणम् । **पुनरप्या**कारोऽत्रालाक्षणिकः । दुर्लभं कुत इत्याह—यतो **बहवो दस्यवश्चौराः** 'मिलक्खुय'त्ति **म्लेच्छा** अव्यक्तवाचस्ते च शक—यवनादिदेशोद्भवा येषु मनुजत्वमवाप्यापि जन्तवो धर्माधर्मभक्ष्यादिव्यवहाराबाह्यास्तिर्यक्प्राया एवेति शेषं व्याख्यातम् ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**लद्धूण वि आयरियत्तणं अहीणपंचिंदियया हु दुल्लहा ।**
**विगलिंदियया हु दीसई समयं गोयम ! मा पमायए ॥१७॥**

**व्याख्या—लब्ध्वाप्यार्यत्वमहीनपञ्चेन्द्रियता** 'हुरेवार्थे' **दुर्लभैव** इहैव हेतुमाह—'विगलि'त्ति विकलानि रोगादिभिरुपहतानि इन्द्रियाणि एषां तद्भावो विकलेन्द्रियता । 'हुर्बाहुल्ये' ततश्च यतो **बाहुल्येन विकलेन्द्रियता दृश्यते** । ततो दुर्लभाहीनपञ्चेन्द्रियता शेषं स्पष्टम् ॥१७॥

**अहीणपंचिंदियत्तं पि से लहे उत्तमधम्मसुई हु दुल्लहा ।**
**कुतित्थिनिसेवए जणे समयं गोयम ! मा पमायए ॥१८॥**

**व्याख्या—अहीनपञ्चेन्द्रियत्वमप्यतिदुर्लभम्** । **स** इति जन्तुः कथञ्चिल्**लभेत** तथा-**प्युत्तमधर्मस्य श्रुतिः** श्रवणरूपा । 'हुर्निश्चये' **दुर्लभैव** । यतः **कुतीर्थिनां** शाक्यादीनां **निषेवकः** पर्युपासको **जनस्तेषां** हि यशःसत्काराद्यर्थित्वेन प्राणिप्रियकामभोगाद्युपदेशित्वेन च सुकरैव सेवा तत्तीर्थकृतामपीदृशत्वात् । उक्तञ्च—

**"सत्कारयशोलाभार्थिभिश्च मूढैरिहान्यतीर्थकरैः ।**
**अवसादितं जगदिदं प्रियाण्यपथ्यान्युपदिशद्भिः"** ॥१॥

तत्सेविनां कुतो धर्मश्रुतिरिति शेषं प्राग्वद् व्याख्येयम् ॥१८॥

**लद्धूण वि उत्तमं सुइं सद्दहणा पुणरावि दुल्लभा ।**
**मिच्छत्तनिसेवए जणे समयं गोयम ! मा पमायए ॥१९॥**

**व्याख्या—लब्ध्वाऽप्युत्तमां** धर्म**श्रुतिं श्रद्धानं** तत्त्वरुचिरूपं **पुनरपि दुर्लभं** यथो **मिथ्यात्वमतत्त्वे** तत्त्वप्रत्ययरूपं **तन्निषेवको जनो**ऽनादिभवाभ्यस्ततया गुरुकर्मतया च तत्रैव प्रायः प्रवृत्तेरिति **समयं०** प्राग्वत् ॥१९॥

**धम्मं पि हु सद्दहंतया दुल्लहया काएण फासया ।**
**इह कामगुणेसु मुच्छिया समयं गोयम ! मा पमायए ॥२०॥**

**व्याख्या—धर्मं** सर्वज्ञोक्तमपि भिन्नक्रमतो 'हुरलङ्कारे' **श्रद्दधतोऽपि** कर्तुमभि-लषन्तोऽपि **दुर्लभकाः कायेनो**पलक्षणान्मनसा वाचा च **स्पर्शकाः** कर्तारो यतः **इह** जगति **कामगुणेषु** शब्दादिषु **मूर्छिता** गृद्धा 'जीवा' इति शेषः । प्रायः प्राणिनां ह्यपथ्येष्वेव विषयेष्वभिष्वङ्गः । यतः—

**"प्रायेण हि यदपथ्यं तदेव चातुरजनप्रियं भवति ।**
**विषयातुरस्य जगतोर्यथाऽनुकूलाः प्रिया विषयाः"** ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अतो दुर्लभामिमां सामग्रीमवाप्य **समयमपि गौतम ! मा प्रमादी**रिति ॥२०॥

पुनरप्रमादोपदेशमाह—

**परिजूरइ ते सरीरयं केसा पंडुरया हवंति ते ।**
**से सोयबले य हायई समयं गोयम ! मा पमायए ॥२१॥**

**व्याख्या—परिजीर्यति** सर्वप्रकारां वयोहानिमनुभवति 'ते' **तव** शरीरमेव जरादिभिरभिभूयमानत्वादनुकम्पनीयमिति **शरीरकं** यतः **केशाः पाण्डुरका भवन्ति** पूर्वं मनोहारिणोऽतिकृष्णाः सन्तः शुक्लीभूता इत्यर्थस्ते **तव** । यथा 'से' इति **तत्** यत् पूर्वमासीच्छ्रोत्रयोः कर्णयोर्बलं दूरादिशब्दश्रवणसामर्थ्यं **श्रोत्रबलं 'चः** समुच्चये' **हीयते** जरातः स्वयमपैत्यतः **समयमित्यादि** स्पष्टम् ॥२१॥

**परिजूरइ ते सरीरयं केसा पंडुरया हवंति ते ।**
**से चक्खुबले य हायई समयं गोयम ! मा पमायए ॥२२॥**

**परिजूरइ ते सरीरयं केसा पंडुरया हवंति ते ।**
**से घाणबले य हायई समयं गोयम ! मा पमायए ॥२३॥**

**परिजूरइ ते सरीरयं केसा पंडुरया हवंति ते ।**
**से जिब्भबले य हायई समयं गोयम ! मा पमायए ॥२४॥**

**परिजूरइ ते सरीरयं केसा पंडुरया हवंति ते ।**
**से फासबले य हायई समयं गोयम ! मा पमायए ॥२५॥**

**व्याख्या**—चतस्रोऽप्येता गाथाः श्रोत्रेन्द्रियवत् स्वेन्द्रियाभिलापेन व्याख्येयाः । पूर्वमत्र श्रोत्रोपादानं तद्भावे शेषेन्द्रियाणामवश्यं भावात् प्रधानत्वाच्चेति ॥२२-२३-२४-२५॥

**परिजूरइ ते सरीरयं केसा पंडुरया हवंति ते ।**
**से सव्वबले य हायई समयं गोयम ! मा पमायए ॥२६॥**

**व्याख्या—सर्वबलं** कर-चरणाद्यवयवानां स्वस्वव्यापारसामर्थ्यमिति शेषं सुगमम् ॥२६॥

जरातोऽशक्तिरुक्ता, रोगतस्तामाह—

**अरई गंडं विसूइया आयंका विविहा फुसंति ते ।**
**विहडइ विद्धंसइ ते सरीरयं समयं गोयम ! मा पमायए ॥२७॥**

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

**व्याख्या—अरति**र्वातादिजन्यश्चित्तोद्वेगो **गण्डं** गडु**र्विसूचिका** अजीर्णविशेष:, **आतङ्का:** सद्योघातिरोगा **विविधा** नानाप्रकारा: **स्पृशन्ति** 'ते' **तव** शरीरकमिति गम्यम् । ततश्च **विपतति** विशेषेण बलोपचयादपैति **विध्वंसति** जीवमुक्तं चाध: पतति 'ते' **तव** शरीरकमत: **समयं** प्राग्वत् । यद्यपि केशपाण्डुरतादि गौतमे न सम्भवति, तथापि तन्निश्रयाऽशेषशिष्यबोधनार्थत्वाददोष इति ॥२७॥

अप्रमादकर्तव्यतामाह—

**वोच्छिंद सिणेहमप्पणो कुमुयं सारइयं व पाणियं ।**
**से सव्वसिणेहवज्जिए समयं गोयम ! मा पमायए ॥२८॥**

**व्याख्या—विशेषेणो**त्प्राबल्येन **छिन्धि** अपनय **स्नेहमात्मन: कुमुदमिव** चन्द्रविकास्युत्पलमिव, **शारदं** शरत्कालभवं **पानीयं**, यथा तदादौ जलमग्नमपि जलमपहाय वर्तते, तथा त्वमपि चिरसंसृष्टं मद्विषयं स्नेहमपनयापनीय च 'से' इत्य**थ सर्वस्नेहवर्जित:** सन् **समयं०** शारदपदोपादानेनैतज्जलस्येव स्नेहस्याप्यतिमनोहरत्वं ख्यापितमिति ॥२८॥

किञ्च—

**चिच्चा ण धणं च भारियं पव्वइओ हि सि अणगारियं ।**
**मा वंतं पुणो वि आइए समयं गोयम ! मा पमायए ॥२९॥**

**व्याख्या—त्यक्त्वा** परित्यज्य **'णेत्यलङ्कारे' धनं** चतुष्पदादि **भार्यां च प्रव्रजित:** प्रतिपन्नो **हिर्यस्मादसीति** सूत्रत्वादकारलोपादसि त्वं अनगाराणामिद**मानगारिकम**नुष्ठानमतो **मा वान्तमुद्गीर्णमापिब** किन्तु **समयमि**त्यादि पूर्ववत् ॥२९॥

कथं वान्ताऽऽपानं न स्यादित्याह—

**अवउज्झिय मित्त-बंधवं विउलं चेव धणोहसंचयं ।**
**मा तं बिइयं गवेसए समयं गोयम ! मा पमायए ॥३०॥**

**व्याख्या—अपोह्य** त्यक्त्वा मित्राणि च बान्धवांश्च समाहारे **मित्रबान्धवं विपुलं 'चैवे**ति समुच्चयपूरणे' धनस्य हेमादेर्द्रव्यस्यौघ: समूहस्तस्य सञ्चयो राशीकरणं **धनौघसञ्चयस्तं** च **मा तन्मि**त्रादिकं **द्वितीयं** 'पुनर्ग्रहणार्थमिति गम्यम्' **गवेषय** मा भूस्तदभिष्वङ्गवान् । त्यक्तं हि वान्तोपमं तदभिष्वङ्गश्च वान्तापानप्राय इति भाव: । किन्तु **समयमपी**त्यादि प्राग्वत् ॥३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दर्शनशुद्धिमाह—

**न हु जिणे अज्ज दीसई बहुमए दीसई मग्गदेसिए ।**
**संपइ नेयाउए पहे समयं गोयम ! मा पमायए ॥३१॥**

**व्याख्या—नैव जिनोऽद्यास्मिन्** काले **दृश्यते** यद्यपीति गम्यते । तथापि 'बहुमए'त्ति **बहुमतः** पन्थाः स च द्रव्यतो नगरादिमार्गो भावतस्तु ज्ञानादिरत्नत्रयात्मको मुक्तिमार्ग इह तु भावमार्गेणाधिकारः । **दृश्यते** उपलभ्यते 'मग्गदेसिय' त्ति भावप्रधान-त्वान्निर्देशस्य मार्गत्वेनार्थान्मुक्तेर्देशितो जिनैः कथितो **मार्गदेशितो** न चैवंविधोऽय-मतीन्द्रियार्थदर्शिनं जिनं विना स्यादित्यसन्दिग्धचेतसो भाविनो भव्या न प्रमादं करिष्यन्तीत्यतः **सम्प्रति** सत्यपि मयीति भावः **नैयायिके** निश्चितमुक्त्याख्यलाभप्रयोजने **पथि** केवलानुत्पत्तिसंशयविधानेन **गौतम ! मा प्रमादीः** ॥३१॥

पुनरुपदिशन्नाह—

**अवसोहिय कंटयापहं उत्तिण्णो सि पहं महालयं ।**
**गच्छसि मग्गं विसोहिया समयं गोयम ! मा पमायए ॥३२॥**

**व्याख्या—अवशोध्य** परिहृत्याकारोऽलाक्षणिकः कण्टकानां द्रव्यतो बुब्बूल-कण्टकादीनां, भावतस्तु चरकादिकुश्रुतीनां पन्था मार्गः **कण्टकपथस्तम्** । ततश्चावतीर्णोऽस्यनुप्रविष्टोऽसि पन्थानं 'महालयं' ति **महान्तं** भावमार्गमर्हदाद्याश्रितसम्यग्दर्शनादिरूपम् । अथ च **गच्छसि मार्गं** न पुनरवस्थित एवासि सम्यग्दर्शनाद्यनुपालनेन मुक्तिमार्गगमन-प्रवृत्तत्वाद् भवतः कथं ? **विशोध्य** निश्चित्य तदेवं प्रवृत्तः सन् **मा प्रमादीः** ॥३२॥

मार्गप्रतिपत्तावपि कस्यचिदनुतापः स्यात्, तन्निराकुर्वन्नाह—

**अबले जह भारवाहए मा मग्गे विसमे वगाहिया ।**
**पच्छा पच्छाणुतावए समयं गोयम ! मा पमायए ॥३३॥**

**व्याख्या—अबलो** देहसामर्थ्यविकलो **यथा भारवाहको**ऽबलभारवाहक इवेत्यर्थः । **मा मार्गं विषमं** मन्दसत्त्वैर्दुस्तर**मवगाह्य** प्रविश्य त्यक्ताङ्गीकृतभारः । **पश्चादनन्तरं पश्चात्तापकृद्** भूरिति शेषः । को भावो ? यथा कश्चिद् देशान्तरात् सुवर्णाद्युपार्ज्य गृहमागच्छन्नतिभयाद् वस्त्वन्तर्हितं तद्धेमाद्यानयन् क्वचिदुपलाद्याकुले पथि स्खलन्नहो ! भारेणाक्रान्तोऽहमिति तत् त्यक्त्वा स्वगृहमागतो निःस्वतयाऽनुतप्यते किं मया मन्दभाग्येन तत् त्यक्तमित्येवं प्रमादपरतया त्यक्तसंयमभारस्तथा त्वं मा भूः, किन्तु **समयमित्यादि** पूर्ववत् ॥३३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथोत्साहार्थमाह—

**तिन्नो हु सि अण्णवं महं किं पुण चिट्ठसि तीरमागओ ।**
**अभितुर पारं गमित्तए समयं गोयम ! मा पमायए ॥३४॥**

**व्याख्या—तीर्ण एव** 'हुरेवार्थे' **ऽसि** त्वमर्णवमिव**ार्णवं** महान्तम् । **किं पुनस्तिष्ठसि ? तीरमागतः** पारं प्राप्तः ? । भवः कर्म वा भावार्णवस्त्वया द्विविधोऽप्युत्तीर्णप्राय एवेति नौदासीन्यं तवोचितमित्याशयः । किन्तु 'अभितुर'त्ति **अभ्या**भिमुख्येन **त्वरस्व** शीघ्रो भव **पारम**र्थान्मुक्तिपदं 'गमित्तए' त्ति **गन्तुं समयमि**त्यादि प्राग्वत् ॥३४॥

अप्रमादस्य किं फलमित्याह—

**अकलेवरसेणिमुस्सिया सिद्धिं गोयम ! लोयं गच्छसि ।**
**खेमं च सिवं अणुत्तरं समयं गोयम ! मा पमायए ॥३५॥**

**व्याख्या—अकडेवराः** सिद्धास्तेषां **श्रेणिः** शुभपरिणामरूपा क्षपकश्रेणिरित्यर्थः । **उच्छ्रित्यो**त्तरोत्तरसंयमस्थानावाप्त्योच्छ्रितामिव कृत्वा **सिद्धि**नामानं **लोकं गौतम ! गच्छसि** गमिष्यसि । **क्षेमं च** परचक्राद्युपद्रवरहितं **शिवं** सर्वदुरितोपशमे**नानुत्तरं** सर्वोत्कृष्टमतः **समयम**पि **गौतम ! मा प्रमादीः** ॥३५॥

निगमयन्नुपदेशसर्वस्वमाह—

**बुद्धे परिनिव्वुडे चरे गामगए नगरे व संजए ।**
**संतिमग्गं च वूहए समयं गोयम ! मा पमायए ॥३६॥**

**व्याख्या—बुद्धो** ज्ञाततत्त्वः **परिनिर्वृतः** कषायाग्निशमेन शीतीभूत**श्चरे**रासेवस्व संयममिति शेषः । किम्भूतो ? **ग्रामगतो नगरे वो**पलक्षणादरण्यादिषु वा स्थितः । सर्वस्मिन्ननभिष्वङ्गवानिति भावः । **संयतः** साधुः **शान्तिरु**पशमः **सैव** मुक्तिहेतुतया **मार्गस्तं बृंहये**र्भव्याङ्गिप्ररूपणया वृद्धिं नयेस्ततः **समयमपि गौतम ! मा प्रमादी**रिति ॥३६॥

इत्यमर्हदुक्तं श्रुत्वा गौतमो यदकार्षीत्, तदाह—

**बुद्धस्स निसम्म भासियं सुकहितमट्ठपओवसोहियं ।**
**रागं दोसं च छिंदिया सिद्धिगइं गए गोयमे ॥३७॥ त्ति बेमि ॥**

**व्याख्या—बुद्धस्य** प्रक्रमाच्छ्री**वीरस्य निशम्या**कर्ण्य **भाषितमु**क्तं **सुष्ठू**-पमादिप्रकारेण **कथितम**त **एवार्थप्रधानैः पदैरुपशोभितम् । रागं द्वेषं च च्छित्त्वा सिद्धिगतिं गतो गौतम इन्द्रभूति**र्भगवत्प्रथमगणधर **इति ब्रवीमी**ति पूर्ववत् ।।३७।। ग्रन्थाग्रम् ।।२४५-४।।

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां दशमं द्रुमपत्रीयमध्ययनं समाप्तम् ।।१०।।**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# एकादशं बहुश्रुतपूजाख्यमध्ययनम्

अथ बहुश्रुतपूजाख्यमेकादशमारभ्यते—इह प्रागध्ययने अप्रमादार्थमनुशासनमुक्तम्, तच्च विवेकवतः । स च बहुश्रुतपूजातः स्यादिति बहुश्रुतपूजासूचकस्यास्याध्ययनस्यादि-सूत्रमाह—

**संजोगा विप्पमुक्कस्स अणगारस्स भिक्खुणो ।**
**आयारं पाउकरिस्सामि आणुपुव्विं सुणेह मे ॥१॥**

**व्याख्या—संयोगाद् विप्रमुक्तस्यानगारस्य भिक्षोराचारमु**चितक्रियाविनयरूपं प्रक्रमाद् बहुश्रुतपूजात्मकं **प्रादुःकरिष्याम्यानुपूर्व्या शृणुत** 'मे' **मम** 'कथयत इति शेषः' ॥१॥

बहुश्रुतस्वरूपपरिज्ञानं तद्विपर्ययज्ञानेन स्यादतः पूर्वं तत्स्वरूपमाह—

**जे यावि होइ निव्विज्जे थद्धे लुद्धे अणिग्गहे ।**
**अभिक्खणं उल्लवई अविणीए अबहुस्सुए ॥२॥**

**व्याख्या—यः** कश्चिच्चापिशब्दावुत्तरत्र योक्ष्येते । **भवति निर्विद्यः** शास्त्रावबोध-रहितः । सविद्योऽपि यः **स्तब्धोऽ**हङ्कारी **लुब्धो** रसादिगृद्धिमान् । **अनिग्रहोऽ**र्थादिन्द्रि-याणामस्येत्यनिग्रहः । **अभीक्ष्णं** पुनः पुनरुत् प्राबल्येनासम्बद्धत्वादिना लपति **वक्त्युल्ल-पति । अविनीत**श्च सो**ऽबहुश्रुत** उच्यते । सविद्यस्याप्यबहुश्रुतत्वं बाहुश्रुत्यफलाभावादिति भावः । एतद्विपरीतोऽर्थाद् बहुश्रुत इति ॥२॥

अबहुश्रुतत्वहेतूनाह—

**अहं पंचहिं ठाणेहिं जेहिं सिक्खा न लब्भई ।**
**थंभा कोहा पमाएणं रोगेणालस्सएण य ॥३॥**

**व्याख्या—'अथेत्युपन्यासे' पञ्चभिः स्थानैः** प्रकारैर्यैः **शिक्षा** ग्रहणासेवनात्मिका **न लभ्यते** तैरबहुश्रुतत्वमवाप्यते इति शेषः । कैरित्याह—**स्तम्भान्**मानात्, **क्रोधात्, प्रमादेन** मद्यादिना, **रोगेन** कुष्ठादिना, **आलस्येना**नुत्यासहरूपेण चेति ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बहुश्रुतत्वहेतूनाह—

**अह अट्ठहिं ठाणेहिं सिक्खासीलि त्ति वुच्चई ।**
**अहस्सिरे सया दंते न य मम्ममुदाहरे ॥४॥**

**नासीले न विसीले न सिया अइलोलुए ।**
**अकोहणे सच्चरए सिक्खासीले त्ति वुच्चई ॥५॥**

**अनयोर्व्याख्या—अथाष्टभिः स्थानैः** शिक्षां शीलयत्यभ्यस्यतीति **शिक्षाशील** इत्युच्यतेऽर्हदादिभिरिति गम्यम् । तान्येवाह—'अहस्सिरे'त्ति **अहसनशीलः** सहेतुकमहेतुकं वा न हसति । **सदा दान्त** इन्द्रियनोइन्द्रियदमवान् । न च **मर्म** कुत्सितजात्याद्युदाहरेदुद्घट्टयेत् । **नाशीलो** न सर्वथा शीलविकलो **न विशीलो** न विरूपाचारो **न स्यादतिलोलुपो** रसलम्पटोऽ**क्रोधनः** क्षमी । **सत्यरतो**ऽवितथभाषी **शिक्षाशील इत्युच्यते** । स चेदृशो बहुश्रुत एवेति भाव इति गाथाद्वयार्थः ॥४-५॥

अथाबहुश्रुतत्वहेत्वविनीतस्वरूपमाह—

**अह चउदसहिं ठाणेहिं वट्टमाणे उ संजए ।**
**अविणीए वुच्चई सो उ निव्वाणं च न गच्छइ ॥६॥**

**अभिक्खणं कोही हवइ पबंधं च पकुव्वई ।**
**मित्तिज्जमाणो वमइ सुयं लद्धूण मज्जई ॥७॥**

**अवि पावपरिक्खेवी अवि मित्तेसु कुप्पई ।**
**सुप्पियस्सावि मित्तस्स रहे भासइ पावगं ॥८॥**

**पइन्नवाई दुहिले थद्धे लुद्धे अणिग्गहे ।**
**असंविभागी अवियत्ते अविणीए त्ति वुच्चई ॥९॥**

**आसां व्याख्या—अथ चतुर्दशसु स्थानेषु** 'सप्तम्यर्थे तृतीया' **वर्तमानस्तु संयतोऽविनीत उच्यते** । **स** त्वविनीतो **निर्वाणं** मोक्षं **च**शब्दादिहैव ज्ञानादींश्च **न गच्छति** न प्राप्नोति । स्थानान्येवाह—**अभीक्ष्णं** पुनः पुनः **क्रोधी भवति, प्रबन्धं च** कोपस्यैवाविच्छेदात्मकं **प्रकुरुते** कुपितः सन् मृदुवाग्भिरपि न शाम्यतीत्यर्थः, 'मित्तिज्जमाणो'त्ति **मित्रीय्यमाणोऽपि** मित्रं ममायमस्त्वितीष्यमाणोऽपि **वमति** त्यजति मित्रीयितारं मैत्र्यं वा प्रत्युपकारभीरुतया कृतघ्नतया वेति, 'अपेर्गम्यत्वात्' **श्रुतमपि लब्ध्वा माद्यति** । '**अपिः** सम्भावनायां' सम्भाव्यत एतद् यथाऽसौ पापैः कथञ्चित् समित्यादिषु स्खलितरूपैः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परिक्षिपति तिरस्कुरुत इत्येवंशीलः **पापपरिक्षेपी** 'आचार्यादीनामिति गम्यम्' । **मित्रेभ्यो-ऽप्यास्तामन्येभ्यः कुप्यति** । तथा **सुप्रियस्यापि** वल्लभस्यापि **मित्रस्य रहस्येकान्ते भाषते पापकम**ग्रतः प्रियं वक्ति, पृष्टस्तु दोषमिति भावः ।. तथा **प्रकीर्णवादी** तत्त्वविचारेऽपि यत्किञ्चिदसम्बद्धभाषीत्यर्थः । 'दुहिल'त्ति **द्रोग्धा** मित्रस्यापि, द्रोहकर्ता, **स्तब्धो लुब्धोऽनिग्रहश्च** प्राग्वत् । **असंविभागी** नान्यैः सह संविभज्य भुङ्क्ते । 'अवियत्त'त्ति **अप्रीतिकरः** सर्वेषामप्रीत्युत्पादकः । एवंविधदोषवा**नविनीत इत्युच्यत** इति गाथा-चतुष्कार्थः ॥६-७-८-९॥

बहुश्रुतहेतुविनीतस्थानान्याह—

**अह पन्नरसहिं ठाणेहिं सुविणीए त्ति वुच्चई ।**
**नीयावित्ती अचवले अमाई अकुतूहले ॥१०॥**

**अप्पं च अहिक्खिवई पबंधं च न कुव्वई ।**
**मित्तिज्जमाणो भयई सुयं लद्धुं न मज्झई ॥११॥**

**न य पावपरिक्खेवी न य मित्तेसु कुप्पई ।**
**अप्पियस्सावि मित्तस्स रहे कल्लाण भासई ॥१२॥**

**कलहडमरवज्जए बुद्धे अभिजाइए ।**
**हिरिमं पडिसंलीणो सुविणीए त्ति वुच्चई ॥१३॥**

**आसां व्याख्या—अथ पञ्चदशभिः स्थानैः सुविनीत इत्युच्यते** । तान्येवाह—**नीचवर्ती** गुरुषु नमनशीलः, यदाह—

**"[1]नीयं सिज्जं गइं ठाणं नीयं च आसणाणि य ।**
**नीयं च पाए वंदिज्जा नीयं कुज्जा य अंजलिं" ॥१॥**

**अचपलो** नारब्धकार्यं प्रत्यस्थिरः । **अमायी** गुरुष्ववञ्चकः **अकुतूहलो** नेन्द्र-जालाद्य-वलोकनपरः । 'अल्पशब्दोऽभावार्थे, चोऽवधारणे' ततो**ऽल्पमेवाधिक्षिपति** तिरस्कुरुते नैवं कञ्चनाधिक्षिपतीत्यर्थः । **प्रबन्धं च** प्रागुक्तं **न करोति** । **मित्रीय्यमाणो भजते** मित्रीयितारमुपकुरुते, प्रत्युपकाराक्षमश्च कृतघ्नो न स्यादित्यर्थः । **श्रुतं लब्ध्वा न माद्यति** मददोषावबोधाद् दर्पं न करोति । **न च पापपरिक्षेपी** न च नैव समित्यादिक्रियासु स्खलितान् गुरून् परिक्षिपति तिरस्कुरुत

---

१. नीचां शय्यां गतिं स्थानं नीचं चासनानि च ।
नीचं च पादौ वन्देत नीचं कुर्याच्चाञ्जलिम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्यर्थः । **न च मित्रेभ्यः कुप्यति** कृतज्ञतया कथञ्चितया कथञ्चिदपराधेऽपीति । **अप्रियस्यापि मित्रस्य रहसि कल्याणं भाषते** को भावो ? मित्रत्वेनाङ्गीकृतस्यापराधशतेष्वेकमपि तत्सुकृतं स्मरन् रहस्यपि न दोषं वक्ति । यदाह—

**"एकसुकृतेन दुष्कृतशतानि ये नाशयन्ति ते धन्याः ।**
**न त्वेकदोषजनितो येषां कोपः स तु कृतघ्न" ॥१॥**

**कलहश्च** वाग्विग्रहो **डमरं** च पाणिघातादिस्**तद्वर्जको बुद्धो** बुद्धिमानेतस्य सर्वत्रानुगमनान्नोक्तसङ्ख्याविरोधः । अभिजातिं कुलीनतां गच्छति प्रतिज्ञानिर्वाहादिनेत्य**भिजातिगः** । **ह्रीमान**कार्यमाचरन् लज्जते । **प्रतिसंलीनो** गुरुपार्श्वेऽन्यत्र वा कार्यं विना नेतस्ततश्चेष्टते स **सुविनीत इत्युच्यते** । इति गाथाचतुष्टयार्थः ॥१०-११-१२-१३॥

स च कीदृक् स्यादित्याह—

**वसे गुरुकुले निच्चं जोगवं उवहाणवं ।**
**पियंकरे पियंवाई से सिक्खं लद्धुमरिहई ॥१४॥**

**व्याख्या—वसे**दासीत **गुरुकुले नित्यं** सदा गुर्वाज्ञायामेव तिष्ठेत् । **योगो**ऽर्थाद् धर्मव्यापारस्**तद्वान्** । **उपधानम**ङ्गानङ्गादावाचाम्लादितपोविशेषस्**तद्वान्** । **प्रियङ्करः** केनचिदपकृतोऽपि तत्प्रियमेव चेष्टते मम कर्मणोऽयं दोष इति भावयन् । यतः—

**"अपकारिणि कोपश्चेत् कोपे कोपः कथं न ते ? ।**
**धर्मार्थकाममोक्षाणां प्रसह्य परिपन्थिनि" ॥१॥**

तथा **प्रियवादी** कदाचित् केनचिदप्रियमुक्तोऽपि प्रियमेव वदति । यदाह—

**"[1]सिक्खह पियाइं वुत्तुं सव्वो तूसइ पियं भणंताणं ।**
**किं कोइलाहिं दिन्नं किं व हियं कस्स काएहिं" ॥१॥**

**स** एवं गुणवान् **शिक्षां** शास्त्रार्थग्रहणात्मिकां **लब्धुं** प्राप्तु**मर्हति** योग्यो भवत्येतद्विपरीतस्त्वविनीतः शिक्षां लब्धुं नार्हतीत्यर्थादुक्तं स्यात् । ततश्च यः शिक्षां लभते स बहुश्रुत इति भावः ॥१४॥

बहुश्रुतप्रतिपत्तिरूपमाचारं स्तवद्वारेणाह—

**जहा संखंमि पयं निहितं दुहओ वि विरायई ।**
**एवं बहुस्सुए भिक्खू धम्मो कित्ती तहा सुयं ॥१५॥**

---

१. शिक्षध्वं पिक्या वृत्तं सर्वस्तुष्यति प्रियं भणताम् ।
किं कोकिलाभिर्दत्तं किं वा हृतं कस्य काकैः ? ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—यथा सङ्खे पयो** दुग्धं **निहितं** न्यस्तं 'दुहओ वि'त्ति **द्विधाऽपि** स्वगुणाश्रयगुणलक्षणेन प्रकारद्वयेनापि **विराजते** कालुष्याम्लतापरिश्रवाभावात् । **एवं बहुश्रुते भिक्षौ धर्मो** यतिधर्मः **कीर्तिस्तथा श्रुतं** विराजत इति सम्बन्धः । तत्र तानि हि न मालिन्यमन्यथाभावं हानिं वा प्राप्नुवन्ति ॥१५॥

पुनर्बहुश्रुतस्तवमाह—

**जहा से कंबोआणं आइन्ने कंथए सिया ।**
**आसे जवेण पवरे एवं हवइ बहुस्सुए ॥१६॥**

**व्याख्या—यथा स काम्बोजानां** कम्बोजदेशोद्भवानां प्रक्रमादश्वानां मध्ये **आकीर्णः** शीलादिगुणैर्व्याप्तः **कन्थकः** प्रधानः **स्यादश्वो** यः किल दृषत्खण्डभृतकुतुपनिपातशब्दान्न संत्रस्यति । **जवेन** वेगेन **प्रवरः** । **एवमित्येतादृशो भवति बहुश्रुतः** । जैनव्रतिनो हि काम्बोजा इवाश्वेषु जाति—जवादिगुणैरन्यधार्मिकापेक्षया श्रुत—शीलादिभिर्वरा एव । बहुश्रुतस्तथा-कीर्णकन्थकाश्ववत् तेष्वपि प्रवर इत्यर्थः ॥१६॥

किञ्च—

**जहाइन्नसमारूढो सूरे दढपरक्कमे ।**
**उभओ नंदिघोसेणं एवं हवइ बहुस्सुए ॥१७॥**

**व्याख्या—यथा आकीर्णं** जात्यादिगुणवदश्वं **समारूढः शूरो दृढपराक्रमो** गाढवीर्यः । 'उभयो'त्ति **उभयतो** वामतो दक्षिणतश्च यद्वाग्रतः पृष्ठतश्च **नान्दीघोषेण** द्वादशतूर्यध्वनिरूपेणाथवा **नान्दी** 'जीयास्त्वम्' इत्याद्याशीर्वचनानि **तद्घोषेण** बन्दिकोलाहलात्मकेन उपलक्षितो 'विभ्राजत इति शेषः' । **एवं भवति बहुश्रुतः** । को भावो ? यथैवंविधः शूरो न केनचिदभिभूयते न चान्यस्तदाश्रितोऽपि, तथायमपि जिनप्रवचनाश्वाश्रितः परवादिदर्शने चात्रस्तस्तद्विजयं च प्रति समर्थः । उभयतो दिन-रजन्योः स्वाध्यायघोषरूपेण स्वपरपक्षयोर्वा चिरं जीवत्वसौ यो बहुश्रुतत्वेन प्रवचनोद्दीपक इत्याद्याशीरूपेण वा नान्दीघोषेणोपलक्षितः । परतीर्थ्यैर्मिथ्यादृग्भिर्नाभिभवितुं शक्यो न चान्योऽप्येतदाश्रित इति । अत्र श्री**भद्रबाहु**स्वामिदृष्टान्तस्तथाहि—

सुप्रतिष्ठे **प्रतिष्ठान**पुरे श्रीमदाधिष्ठिते ।
धिषणाधिषणप्रख्यौ प्रथितौ दक्षिणापथे ॥१॥

**भद्रबाहु-वराहौ** द्वावासीतां वाडवौ वरौ ।
कुमारौ लघुकर्माणौ निःस्वतत्वेन निराश्रयौ ॥२॥ **युग्गम्**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**यशोभद्र**गुरोस्तत्र तौ चतुर्दशपूर्विणः ।
सम्बुद्धौ देशनां श्रुत्वा प्रव्रजतुरादरात् ॥३॥

**भद्रबाहु**रभूद् भद्रः स चतुर्दशपूर्ववित् ।
क्रमात् सूरिपदं प्राप षट्त्रिंशद्गुणसंयुतः ॥४॥

आवश्यकादिसिद्धान्तनिर्युक्तिदशकं व्यधात् ।
दशादीनां च सूत्राणि स्वनाम्ना संहितां च सः ॥५॥

पृथिव्यां विहरन् भव्याम्भोरुहोल्लासभास्करः ।
युगप्रधानागमेत्याख्यातो भुवि स पप्रथे ॥६॥

**वराह**स्तु मुनिः सूरिपदं प्रार्थयतेतराम् ।
**भद्रबाहु**रिति प्राह वत्स ! स्वच्छमते ! शृणु ॥७॥

यद्यप्यशेषविद्यानां पारदृश्वाऽसि ते परम् ।
अहंयवे ददत् तच्च पापीयान् स्यां श्रुतं विदन् ॥८॥

यदाह—

**"[१]वूढो गणहरसद्दो गोयममाईहिं धीरपुरिसेहिं ।
जो तं ठवइ अपत्ते जाणंतो सो महापावो"** ॥१॥

ततो व्रतं स तत्याज पुनर्भूदेववेषभृत् ।
मिथ्यादृष्टिरभूद् बाढं द्विषन् जैनेन्द्रशासनम् ॥९॥

व्रताधीतश्रुताभ्यासाज्ज्योतिःशास्त्रविशारदः ।
संहितादीनि शास्त्राणि नूत्नान्यरचयत् स तु ॥१०॥

लग्नाभ्यासे सदा लीन आस्ते स नगराद् बहिः ।
शिलातले लिखित्वा तदन्यदा गृहमागमत् ॥११॥

अस्वपीन्निशि सोऽस्मार्षीत् तदमृष्टं समुत्थितः ।
तत्र गत्वोपविष्टं च पञ्चास्यं दृष्टवान् किल ॥१२॥

ततः साहसमालम्ब्य तत्कुक्षेः पाणिना बलात् ।
स लग्नं मृष्टवान् यावत् तावत् सिंहोऽर्यमाऽभवत् ॥१३॥

---

१. व्यूढो गणधरशब्दो गौतमादिभिर्धीरपुरुषैः ।
यस्तं स्थापयत्यपात्रे जानन् स महापापः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अवादीद् वत्स ! सूर्योऽहं लग्नभक्तिवशात् तव ।
तुष्टो वरं वृणीष्वेह याचसे यद् ददामि तत् ॥१४॥

**वराहः** प्राञ्जलिः प्राह प्रसन्नोऽसि यदि प्रभो ! ।
कृत्वा मां स्वविमानस्थं ज्योतिश्चक्रं हि दर्शय ॥१५॥

ततः स स्वविमानस्थस्तेनाभ्रे भ्रामितश्चिरम् ।
तत्सङ्क्रमितपीयूषतृप्तः क्षुत्-तृड्विवर्जितः ॥१६॥

स ज्योतिश्चारवेत्तृत्वगर्वितः पृथिवीं भ्रमन् ।
अहं **वराहमिहिर** इति ख्यापयति स्वकम् ॥१७॥

लोके पूजां परां प्राप **जितशत्रुनृ**पेण सः ।
तद्गुणावर्जितेनोच्चैः पुरोधाः स्थापितः पुरे ॥१८॥

यतः—

**"गौरवाय गुणा एव न तु ज्ञातेयडम्बरः ।**
**वानेयं गृह्यते पुष्पमङ्गजस्त्यज्यते मलः" ॥१॥**

अथो **वराहमिहिरो** निनिन्देति मूनीश्वरान् ।
न हि किञ्चिद् विदन्त्येते कुचेला बालिशा इति ॥१९॥

श्रुत्वैतद् भूपमानादिदर्पसर्पगरुत्मतः ।
**भद्रबाहुगुरून्** श्राद्धा आह्वयामासिरे लघु ॥२०॥

ते भदन्ताः क्रमात् तत्र प्राप्ताः भक्त्या ववन्दिरे ।
सत्प्रवेशमहःपूर्वमहम्पूर्वकयाऽऽस्तिकैः ॥२१॥

तैः सुधादेश्यया वाण्या पौराः सन्तोषिताः समे ।
स्वकं कृतार्थयामासु**र्वराहो** मम्मिलवान् परम् ॥२२॥

इतश्च नन्दनो जज्ञे **वराहस्य** गृहेऽन्यदा ।
स तु स्वस्वव्ययेनालं व्यधात् तज्जननोत्सवम् ॥२३॥

प्रभूतैः प्राभृतैर्लोकाः पूजयामासुरुच्चकैः ।
स चावग् मत्सुतो वर्षशतायुरिति संसदि ॥२४॥

बन्धुः स **भद्रबाहुर्मे** पुत्रजन्मोत्सवेऽपि हि ।
नागादिति बहिर्भूता व्यवहारात् सिताम्बराः ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्तञ्च गुरवे श्राद्धैरेकदा गम्यतां प्रभो ! ।
तद्गृहं मा वृधत् कोपस्तस्य वृद्धिरनर्थदा ॥२६॥

**भद्रबाहु**रथ प्राह सप्तमेऽह्नि तदङ्गजः ।
रात्रौ बिडालिकाघातात् स परासुर्भविष्यति ॥२७॥

ततस्तद्वेश्म गन्तव्यं तस्य शोकापनुत्तये ।
श्राद्धैरवाचि पित्रोचे तस्य चायुः समाः शतम् ॥२८॥

श्रीमद्भिरेवमादिष्टं ततो गुरुरदोऽवदत् ।
ज्ञानं प्रत्ययसारं हि विश्रुतं वित्थ भोः ! इह ॥२९॥

सप्तमेऽह्नि ततो रात्रौ धात्रीस्तन्यं पिबन् भृशम् ।
बालो द्वारार्गलापातात् प्राप्तवान् प्रेतमन्दिरम् ॥३०॥

रोदं रोदं **वराह**स्तु सतन्त्रो व्यलपत् तदा ।
जनोऽमिलन् महीशाद्यो हा ! किं जातमिति ब्रुवन् ॥३१॥

सूरिः शोकापनोदाय **वराह**सदनं गतः ।
शुचाक्रान्तोऽपि सोऽभ्युत्थानासनाद्युचितं व्यधात् ॥३२॥

विप्रोऽवादीद् भवज्ज्ञानं मिमिले भगवन् ! पुनः ।
बिडाल्या इत्यलीकं तत् सोऽर्गलातोऽनशद् यतः ॥३३॥

गुरुराहार्गलाग्रे सा लोहय्मयस्ति रेखया ।
अप्युष्णतां भजेदिन्दुर्नास्मद्विदितमन्यथा ॥३४॥

तथाभूतां तु तां दृष्ट्वा **वराहः** प्राह नो तथा ।
खेदः पुत्रवियोगान्मे वचोविघटनाद् यथा ॥३५॥

किं च वाङ्मयसम्बद्धपुस्तकप्रत्ययेन यत् ।
मया प्राकाशि तज्ज्ञानं व्यलीकास्तेऽभवन्मम ॥३६॥

अतोऽम्भसात् करिष्यामि तानथो गुरुरभ्यधात् ।
मैवं कृथा हि नो दोषस्तेषां स हि धियस्तव ॥३७॥

सर्वज्ञोदितमेवैते भाषन्ते प्रत्ययावहम् ।
एवं स नोदितस्तस्थौ वीक्षापन्नश्च्युतेषुवत् ॥३८॥

राज्ञोक्तं मा स्म शोचीस्त्वं भवस्थितिरियं यतः ।
तावद् धर्मवतैकेन सचिवेन निवेदितम् ॥३९॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

प्रभो ! श्रीभद्रबाह्वाख्यैः सूरिभिर्गुणभूरिभिः ।
एतत्पुत्रस्य सप्ताहमात्रमायुः प्रभाषितम् ॥४०॥

भूपः प्राह गुरोर्वाचा सङ्गता यदभूदहो ! ।
बहुश्रुतत्वमेवात्र गुरुर्गौरवमर्हति ॥४१॥

आल्पश्रुत्यं तु विप्रस्य यद्वचो नामिलत् पुनः ।
एवमुक्ते पराभूतः सोऽनिन्दि निखिलैर्जनैः ॥४२॥

ततो नृपः सपौरस्तु स्तावं स्तावं गुरुर्मुदा ।
पूजं पूजं दर्शनादि श्राद्धधर्मं प्रपेदिवान् ॥४३॥

**वराह**स्तापसीं दीक्षां लात्वा लोकापमानतः ।
कृत्वा चाज्ञानकष्टानि मिथ्यादृग् वव्यन्तरोऽभवत् ॥४४॥

स द्विषन्नार्हतं धर्मं कुप्यन्नप्यार्हतान् मुनीन् ।
नालम्भूष्णुरुपद्रोतुं रोगैः श्राद्धानपीडयत् ॥४५॥

गुरून् विज्ञपयामास श्रीसङ्घोऽथ कृताञ्जलिः ।
श्रीमत्सु सत्सु प्राणाय्यास्तेनार्द्यन्ते यदास्तिकाः ॥४६॥

नूनं तदेवमापन्नं भषणैर्भक्ष्यते भृशम् ।
गजारूढः प्रभोस्तच्चोपेक्षितुं ते न साम्प्रतम् ॥४७॥

ततस्ते प्राहुराचार्या मा भैष्टोपासकास्तथा ।
उद्यंस्यामो यथा वोऽपकर्तुं स्यात् कोऽपि न प्रभुः ॥४८॥

वराहो व्यन्तरीभूतः स साधून् प्रति न क्षमः ।
भवद्भ्यः पूर्वविद्वेषाद् दुध्रुक्षति सुदुष्टधीः ॥४९॥

तैरुद्दध्रेऽथ पूर्वेभ्यः उपसर्गहरस्तवः ।
तत्स्मृतेस्तत्कृतापायात् सङ्घे शान्तिरजायत ॥५०॥

एवं बहुश्रुतत्वे यतितव्यं यत्नतः सदा यतिभिः ।
यस्मात् सम्यग् ज्ञानं मानं परिपोस्फुरीति यशः ॥५१॥

पुनर्बहुश्रुतस्तुतिमाह—

**जहा करेणुपरिकिण्णे कुंजरे सट्ठिहायणे ।**
**बलवंते अप्पडिहए एवं हवइ बहुस्सुए ॥१८॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—यथा करेणुपरिकीर्णो** हस्तिनीपरिवृतः **कुञ्जरो** हस्ती **षष्टिहायनः** षष्टिवर्षप्रमाणस्तस्य तावत्कालं यावद्बलोपचयादत एव **बलवान्** सन्न**प्रतिहतो** नान्यैर्मत्तैरपि गजैः पराभूयत इत्यर्थः । **एवं भवति बहुश्रुतो**ऽयमपि करेणुभिरिवौत्पत्तिक्यादिबुद्धिभिर्विविधाभिर्विद्याभिर्वावृतः षष्टिहायनतयाऽतिस्थिरमतिरत एव बलवत्त्वेनाप्रतिहतो दर्शनोपहन्तृभिर्न प्रतिहन्तुं शक्यः स्यात् ॥१८॥

किञ्च—

**जहा से तिक्खसिंगे जायक्खंधे विरायई ।**
**वसहे जूहाहिवई एवं हवइ बहुस्सुए ॥१९॥**

**व्याख्या—यथा स तीक्ष्णशृङ्गो** जात उपचितीभूतः स्कन्धोऽस्येति **जातस्कन्धो विराजते वृषभो** यूथस्य गोसमूहस्याधिपति**र्यूथाधिपतिः** सन् । **एवं भवति बहुश्रुतः** । सोऽपि परपक्षभेत्तृतया तीक्ष्णाभ्यां स्वशास्त्र-परशास्त्राभ्यां शृङ्गाभ्यामिवोपलक्षितो गच्छादिगुरुकार्यधौरेयतया जातस्कन्ध इव यूथस्य साध्वादिवृन्दस्याधिपतिः सूरिपदं प्राप्तः सन् विराजते ॥१९॥

अन्यच्च—

**जहा से तिक्खदाढे उदग्गे दुप्पधंसगे ।**
**सीहे मिगाण पवरे एवं हवइ बहुस्सुए ॥२०॥**

**व्याख्या—यथा स तीक्ष्णदंष्ट्र उदग्र** उत्कटोऽत एव **दुःप्रधर्षको**ऽन्यैर्दुरभिभवनीयः **सिंहो मृगाणामारण्यजन्तूनां प्रवरः । एवं भवति बहुश्रुतः** । अयमपि परपक्षभेत्तृतया तीक्ष्णदंष्ट्रासमैर्नैगमादिनयैः प्रतिभादिगुणोदग्रतया च दुरभिभवो मृगाणामिवान्यतीर्थ्यानां प्रवर इति ॥२०॥

तथा—

**जहा से वासुदेवे संख-चक्क-गयाधरे ।**
**अप्पडिहयबले जोहे एवं हवइ बहुस्सुए ॥२१॥**

**व्याख्या—यथा स वासुदेवः शङ्ख-चक्र-गदाधरोऽप्रतिहतबलो**ऽस्खलितसामर्थ्यो **योधः** सुभट **एवं भवति बहुश्रुतः** । सोऽपि हि स्वाभाविकप्रतिभाप्रागल्भ्यवान् शङ्खादिभिरिव ज्ञानादिभिरुपेतो योध इव कर्मशत्रुं प्रतीति ॥२१॥

**जहा से चाउरंते चक्कवट्टी महिड्ढिए ।**
**चउदसरयणाहिवई एवं हवइ बहुस्सुए ॥२२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—यथा** स चतुर्भिर्गजाश्व-रथ-पदातिरूपैरन्तः शत्रुविनाशात्मकोऽस्येति **चातुरन्तश्चक्रवर्ती** । **महर्द्धिको** दिव्यानुकारिलक्ष्मीक**श्चतुर्दशरत्नाधिपतिः** । **एवं भवति बहुश्रुतः** । सोऽपि चतुर्भिर्दानादिधर्मैरन्तः कर्मारिविनाशोऽस्येति चातुरन्तः । ऋद्धयश्चामर्षौषध्यादयः पुलाकलब्ध्यादयश्च महत्योऽस्य सन्तीति महर्द्धिकः । चतुर्दशरत्नाभानां चतुर्दशपूर्वाणां प्रभुः ॥२२॥

तथा—

**जहा से सहस्सक्खे वज्जपाणी पुरंदरे ।**
**सक्के देवाहिवई एवं हवइ बहुस्सुए ॥२३॥**

**व्याख्या—यथा स सहस्राक्षः** पञ्चशतानां मन्त्रिदेवानामक्ष्णां सहस्रस्येन्द्रोपयोगितत्वात् सहस्रनयनः, वज्रमायुधं पाणावस्येति **वज्रपाणिः** । लोकोक्त्या च पूर्दारणात् **पुरन्दरः । शक्रो देवाधिपतिः** । **एवं भवति बहुश्रुतः** । अयमपि श्रुतज्ञानेन सर्वातिशयरत्ननिधानतुल्येनाक्षिसहस्रेणेव जानाति । वज्रस्य रेखालक्षणस्य पाणौ सम्भवाद् वज्रपाणिः । पूः शरीरं विकृष्टतपसा दारयतीति पुरन्दरः । देवानामपि पूज्यत्वात् तत्पतिरपीति ॥२३॥

**जहा से तिमिरविद्धंसे उत्तिट्ठंते दिवायरे ।**
**जलंते इव तेएणं एवं हवइ बहुस्सुए ॥२४॥**

**व्याख्या—यथा स तिमिरविध्वंसो**ऽन्धकारापहन्ता **उत्तिष्ठन्**नुद्गच्छन् **दिवाकरः** सूर्यो **ज्वलन्निव तेजसा** । **एवं भवति बहुश्रुतो**ऽयमपि ह्यज्ञानतिमिरध्वंसः, विशुद्धाध्यवसायतः संयमस्थानेषूत्तिष्ठन्नुत्सर्पन् तपस्तेजसा ज्वलन्निव भवतीति ॥२४॥

**जहा से उडुवई चंदे नक्खत्तपरिवारिए ।**
**पडिपुन्ने पुन्नमासिए एवं हवइ बहुस्सुए ॥२५॥**

**व्याख्या—यथा स उडुपतिर्न**क्षत्रप्रभुश्चन्द्रो **नक्षत्रै**रुपलक्षणाद् ग्रहैस्ताराभिश्च **परिवारितः** । **प्रतिपूर्णः** सर्वकलोपेतः कदा ? **पूर्णिमास्याम्** । **एवं भवति बहुश्रुतो**ऽयमप्युडुसमानां साधूनां पतिस्तत्परिवारितश्च ज्ञानादिकलोपेतत्वेन प्रतिपूर्णः स्यादिति ॥२५॥

**जहा से सामाइयाणं कोट्ठागारे सुरक्खिए ।**
**नाणाधन्नपडिपुन्ने एवं हवइ बहुस्सुए ॥२६॥**

**व्याख्या—यथा स** इति प्रसिद्धः **सामाजिकानां** लोकसमूहानां **कोष्ठागारो** धान्याश्रयः **सुष्ठु** दस्यु—मूषकादिभ्यः प्राहरिकादिव्यापारादिना **रक्षितः** । **नाना**-शालि—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मुद्गादिधान्यैः **प्रतिपूर्णः** । **एवं भवति बहुश्रुतः** । सोऽपि सामाजिकानामिव गच्छ-वासिमुनीनां प्रवचनाधारतया सुरक्षितः । यतः—"[1]**जेण कुलं आयत्तं तं पुरिसं आयरेण रक्खेह**" इत्यादि । धान्यैरिवाङ्गोपाङ्गादिश्रुतभेदैः प्रतिपूर्णः स्यादिति ॥२६॥

तथा—

**जहा सा दुमाण पवरा जंबू नाम सुदंसणा ।**
**अणाढियस्स देवस्स एवं हवइ बहुस्सुए ॥२७॥**

**व्याख्या—यथा सा द्रुमाणां** मध्ये **प्रवरा जम्बूर्नाम्ना सुदर्शना** सुदर्शनेत्यपराभिधाना । यथेयममृतोपमफला देवाद्याश्रया च, तथा नान्यः कश्चिद् द्रुमोऽस्ति । द्रुमत्वं फलव्यवहारश्चा-स्यास्तदाकारतयैव, वस्तुतः पार्थिवत्वात्, वज्र—वैडूर्यादिमयमूलत्वक् चास्याः । कस्य ? **अनादृतस्य देवस्य** जम्बूद्वीपपतेर्व्यन्तरस्याश्रयभूता । **एवमि**त्यादि प्राग्वत् । सोऽपि ह्यमृतोपम-फलकल्पश्रुतोपेतो देवाद्यभिगम्यः । शेषद्रुमाभसाधुप्रवर इति ॥२७॥

**जहा सा नईण पवरा सलिला सागरंगमा ।**
**सीया नीलवंतप्पवहा एवं हवइ बहुस्सुए ॥२८॥**

**व्याख्या—यथा सा नदीनां प्रवरा** सलिलं जलमस्यामिति 'अर्श आदित्वादचि' **सलिला** नदी **सागरङ्गमा** समुद्रयायिनी **शीता**नाम्नी नीलवान् मेरोरुत्तरस्यां दिशि वर्षधरपर्वतस्ततः प्रवहतीति **नीलवत्प्रवहा** । **एवं भवति बहुश्रुतः** । सोऽपि सरित्समानानामन्यमुनीनां प्रधानो जलकल्पश्रुतज्ञानान्वितः । सागरोपममुक्तिगामी । तदुक्तानुष्ठानप्रवृत्तत्वात् नीलवत्तुल्योच्चोच्चतर-कुलोत्पन्न इति ॥२८॥

**जहा से नगाण पवरे सुमहं मंदरे गिरी ।**
**नाणोसहिपज्जलिए एवं हवइ बहुस्सुए ॥२९॥**

**व्याख्या—यथा स नगानां प्रवरः सुमहा**नतिशयेन गुरु**र्मन्दरो गिरि**र्मेरुर्ना-नौषधिभिर्विशिष्टमाहात्म्ययवनस्पतिभिः प्रज्वलितो दीप्तो **नानौषधिप्रज्वलितः । एवं भवति बहुश्रुतः** । सोऽपि श्रुतमाहात्म्येन, अतिस्थिरत्वेन शेषगिरिकल्पापरसाधूनां प्रवरो नानौषधिभिरिवामर्षौषध्यादिलब्धिभिस्तमस्यपि प्रकाशकः ॥२९॥

**जहा से सयंभूरमणे उदही अक्खओदए ।**
**नाणारयणपडिपुन्ने एवं हवइ बहुस्सुए ॥३०॥**

---

१. येन कुलमायत्तं तं पुरुषमादरेण रक्षत ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—यथा स स्वयम्भूरमण उदधिः** समुद्रोऽ**क्षयोदको**ऽविनाशिजलः । **नानारत्नै**र्मरकतादिभिः **प्रतिपूर्णो** भृतः । **एवं भवति बहुश्रुतः** । सोऽपि ह्यक्षयसम्यग्-ज्ञानोदको नानातिशयरत्नवांश्च स्यादिति ॥३०॥

बहुश्रुतमाहात्म्यमाह—

**समुद्दगंभीरसमा दुरासया अचक्किया केणइ दुप्पधंसिया ।**
**सुयस्स पुन्ना विउलस्स ताइणो खवित्तु कम्मं गइमुत्तमं गया ॥३१॥**

**व्याख्या—समुद्रस्य गाम्भीर्येणा**लब्धमध्यात्मकेन **समाः** । आर्षत्वाद् गाम्भीर्येण समुद्रसमा इत्यर्थः । दुःखेनाश्रीयन्तेऽभिभवबुद्ध्या जेतुं सम्भाव्यन्ते केनापीति **दुराश्रया** अत **एवाचकिता** अत्रसिता परप्रवादिना दुःखेन प्रधर्ष्यन्ते पराभूयन्ते **केनचिद**पीति **दुःप्रधर्षकाः** । के ईदृशाः ? इत्याह—'सुब्व्यत्ययात्' **श्रुतेन पूर्णा** विपुलेनाङ्गानङ्गादिभेदतो **विस्तीर्णेन त्रायिणो** रक्षका एवंविधा बहुश्रुता एव । एषामेव विशेषतः फलमाह—**क्षपयित्वा कर्म** ज्ञानावरणादि **गतिमुत्तमां** मुक्तिरूपां **गताः** प्राप्ता उपलक्षणाद् गच्छन्ति गमिष्यन्ति च । इहैकवचनप्रक्रमेऽपि बहुत्वनिर्देशः पूज्यताख्यापनार्थं व्याप्तिदर्शनार्थं वेति ॥३१॥

इत्थं बहुश्रुतपूजामुक्त्वा शिष्योपदेशमाह—

**तम्हा सुयमहिट्ठिज्जा उत्तमट्ठगवेसए ।**
**जेणप्पाणं परं चेव सिद्धिं संपाउणिज्जासि ॥३२॥ त्ति बेमि ॥**

**व्याख्या**—यस्मादमी बहुश्रुता मुक्तिगामिन**स्तस्माच्छ्रुतमधितिष्ठेद**ध्ययन–श्रवण–चिन्तनादिभिराश्रयेत् । उत्तमार्थो मोक्षस्तं गवेषयतीत्यु**त्तमार्थगवेषकः** । **येन** श्रुता-श्रयणे**नात्मानं परं च** 'एवोऽवधारणार्थोऽग्रे योज्यते' **सिद्धिं सम्प्रापयेदेवेति ब्रवीमि** पूर्ववत् ॥३२॥ ग्रं० २०६ अ० १६॥

**इति श्रीकमलसंयमोपाध्यायविरतिचायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां एकादशं बहुश्रुतपूजाख्यमध्ययनं समाप्तम् ॥११॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# द्वादशं हरिकेशीयमध्ययनम्

इहानन्तराध्ययने बहुश्रुतपूजोक्ता, तेनापि तपसि यत्नः कार्यः तत्समृद्धिवर्णन-सम्बन्धेनायातस्यास्य द्वादशाध्ययनस्य प्रस्तावनार्थं **हरिकेश**चरितमत्रोच्यते । तथाहि—

**सुपार्श्व-पार्श्व**योः स्तूपमाहात्म्येन पवित्रिता ।
पुण्याढ्यपौरसम्पूर्णा समस्ति **मथुरा**पुरी ॥१॥

यकां सिसेविषुरिव स्वकालुष्यापनुत्तये ।
**कालिन्दी** नामुचत् पार्श्वं तीर्थसेवा ह्यभीष्टकृत् ॥२॥ **युग्मम्**

शङ्खोज्ज्वलयशास्तत्र **शङ्ख**नामा नृपोऽजनि ।
त्रिवर्गसारजैनेन्द्रधर्मानुष्ठानतत्परः ॥३॥

तत्रान्यदा चतुर्ज्ञानिश्री**गुणन्धर**सूरयः ।
सतन्त्रस्य नृपस्याग्रे प्रचक्रुर्देशनामिति ॥४॥

*"शृङ्गारादिरसैराढ्ये राग-द्वेषोरुतुम्बके ।*
*गाढगर्दभिलाकारचतुर्गतिविराजिते ॥५॥*

*कषायप्रबलाश्रान्तबलीवर्दसमायुते ।*
*सारथीभूतमिथ्यात्व-प्रमादायामयोत्रके ॥६॥*

*आयुःपरम्पराबद्धघटीचक्रसमाकुले ।*
*मोहसीरपतिप्रष्ठहास्यादिबहुकर्षके ॥७॥*

*विचित्रजन्मसन्तानगुरुकेदारशोभिते ।*
*सदोप्तकर्मबीजौघे मृत्युपानान्तिकाश्रिते ॥८॥*

*भीमे भवारघट्टेऽस्मिन्नजस्रं कालकुल्यया ।*
*इतश्चेतश्च नोह्यन्ते जलवज्जन्तवो ह्यमी ॥९॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं विज्ञाय भो भव्याः ! सर्वसौख्यैककारणे ।
सर्वक्लेशहरे जैनधर्मे यत्नो विधीयताम्'' ॥१०॥

सकर्ण एवमाकर्ण्य भूपः संविग्नमानसः ।
निर्विण्णकामभोगः सन् प्राव्रजद् गुरुसन्निधौ ॥११॥

शिक्षाद्वयसुनिष्णातोऽधीती सर्वश्रुतेऽभवत् ।
गीतार्थो विहरन् मह्यां **हस्तिनापुर**माप सः ॥१२॥

सोऽन्येद्युस्तत्र भिक्षाऽर्थं भ्रमन्नेकाध्वधुर्यगात् ।
स किल ज्वलदङ्गारसदृग् लङ्घनदुःशकः ॥१३॥

अज्ञात्वा यो विशेत् तत्र स उत्फन्दन् विनश्यति ।
लोके ख्यातं च तन्नाम वह्निमार्गोऽयमुच्चकैः ॥१४॥

ततः स साधुरासन्नगवाक्षस्थं पुरोधसम् ।
किमनेनाध्वना यामीत्यपृच्छत् **सोम**नामकम् ॥१५॥

दन्दह्यमानमेनं तु यान्तं हुतवहाध्वना ।
प्रेक्षिष्ये ह्युल्ललन्तं स ध्यात्वेत्यूचेऽत्र भोः ! व्रज ॥१६॥

तत्र प्रविष्टः **शङ्ख**र्षिरीर्यासमित आदृतः ।
पुरोहितोऽपि प्रसादारूढोऽतिस्थिरमानसम् ॥१७॥

शनैः शनैराक्रमन्तं मुनिं प्रेक्ष्य सविस्मयः ।
तत्र गत्वा तमध्वानं हिमस्पर्शं व्यलोकयत् ॥१८॥ **युग्मम्**

ततोऽचिन्तयदित्येष धिग् मयाऽहो ! दुरात्मना ।
अनुष्ठितं पापकर्माशुभसङ्कल्पतोऽत्र हि ॥१९॥

एतत्तपःप्रभावान्मार्गश्चैषोऽग्नितुल्यरूपोऽपि ।
जातस्तुषारसदृशस्पर्शस्तपसो हि किमसाध्यम् ? ॥२०॥

नत्वा मुनिं पुरोधा भावेनावेदयत् स्वदुश्चरितम् ।
संसारे मोहोदयवशगत्वं देशितं मुनिना ॥२१॥

सम्यग्दर्शनमूलोऽनगारधर्मः सविस्तरं प्रोक्तः ।
स हि **सोमदेव**विप्रः संवेगाददे दीक्षाम् ॥२२॥

स गुरोर्गृहीतशिक्षः श्रामण्यमपालयन्निरतिचारम् ।
परमग्रजन्मजत्वाद् गौरवजात्यादिमदलिप्तः ॥२३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भावयति न हृद्येवं शुभाशुभाशेषकर्मपरिणामाः ।
परिवर्तन्ते हि भवे नानायोनिष्वखिलजीवाः ॥२४॥

यतः—

**"[1]सुरो वि कुक्कुरो होइ रंको राया वि जायए ।**
**दिओ वि होइ मायंगो संसारे कम्मदोसओ"** ॥१॥

*'गुणैरेवोत्तमत्वं प्राप्यते न जात्या'* इति, उक्तं हि—

**"गुणैरुत्तमतां याति न तु जातिप्रभावतः ।**
**क्षीरोदधेः समुत्पन्नः कालकूटः किमुत्तमः ?"** ॥१॥

एवं जातिमदादिग्रस्तो मृत्वा स ताविषं प्राप ।
च्युत्वा ततश्च **गङ्गा**तीरे **बलकोट्ट**नाम्नस्तु ॥२५॥

**हरिकेश**पते**र्गौरी**भार्याकुक्षौ वराङ्गजत्वेन ।
मधुकुसुमितचूततरुस्वप्नेक्षासूचितो जज्ञे ॥२६॥

काले साऽसूत सुतं **बल** इति नाम प्रतिष्ठितं तस्य ।
क्रमशः प्रवर्धमानो विषवृक्ष इवातिदुःखकरः ॥२७॥

जातिमदाद्यवलेपान्मातङ्गकुलोद्भवः कुरूपश्च ।
हसनीयः स्वजनानां सर्वजनोद्वेजकः सोऽभूत् ॥२८॥

मधूत्सवेऽन्यदा प्राप्ते नृत्यं कुर्वत्सु बन्धुषु ।
बालैः स भण्डनं कुर्वन् सर्वैर्दूरीकृतस्तः ॥२९॥

पार्श्वस्थ एव तान् पश्यन् क्रीडतो हर्षपूरितान् ।
तावदागाद् विषधरः श्वपचैः स हतः फणी ॥३०॥

ततस्तदैव तत्रागाच्छान्तो जलभुजङ्गमः ।
तैरदुष्टोऽयमिति स प्रमुक्तो व्यचरन् महीम् ॥३१॥

तद्वृत्तं प्रेक्ष्य सोऽध्यासीज्जीवाः कष्टं स्वदोषतः ।
लभेयुर्यज्जना घ्नन्ति सविषाहिं न निर्विषम् ॥३२॥

---

१. सुरोऽपि कुर्कुरो भवति रङ्को राजाऽपि जायते ।
द्विजोऽपि भवति मातङ्गः संसारे कर्मदोषतः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यतः—

"[१]**नियगुण-दोसेहिंतो संपय-विवयाउ हुंति पुरिसाणं ।**
**ता उज्झिऊण दोसे गुणे पयासेह भो भव्वा !"** ॥१॥

एवं स भावयन् जातजातिस्मृतिरथ स्मरन् ।
स्वर्गसौख्यानि रौद्रत्वं मदादीनां च चिन्तयन् ॥३३॥

संवग्निः साधुपादान्ते प्रव्रज्यामग्रहीद् बलः ।
तप्यमानस्तपस्तीव्रं **काशीं** च विहरन् ययौ ॥३४॥

तत्रास्थात् **तिन्दुको**द्याने सिषेवे तत्र सादरम् ।
तं गण्डी **तिन्दुको** यक्षस्तद्गुणावर्जितो यतिम् ॥३५॥

अन्यदान्येन यक्षेणागत्य पृष्टः स **तिन्दुकः** ।
किं त्वं न दृश्यशे ! सोऽवक् सेवे एनमृषिं सदा ॥३६॥

यक्षो **बल**मुनिं दृष्ट्वा स हृष्ट**स्तिन्दुकं** जगौ ।
तपस्व्येष वनेऽवात्सीद् यस्य धन्यः स पुण्यवान् ॥३७॥

मित्र ! केऽपि मदुद्याने मुनयः सन्ति तानपि ।
वन्दामहे गतौ तत्र दृष्टास्ते तु प्रमादिनः ॥३८॥

ततो **बल**र्षावेकस्मिन् जातौ यक्षावुभावपि ।
रक्तौ भक्तौ तमेवास्थात् सेवमानस्तु **तिन्दुकः** ॥३९॥

इतश्च—

**भद्रा**ऽभिधाऽन्यदा हर्षात् पुत्री **कोशलि**भूपतेः ।
पूजोपकरणं लात्वा सखीभिः परिवारिता ॥४०॥

तद् यक्षवेश्म सा गत्वा यक्षार्चामर्चितुं प्रगे ।
प्रदक्षिणां प्रकुर्वन्ती ददर्श मलिनाङ्गकम् ॥४१॥

तपःशोषितसर्वाङ्गं जीर्णदुर्गन्धवाससम् ।
थूत्कृत्वास्यं मोटयित्वा तं महर्षिं निनिन्द च ॥४२॥ **युग्मम्**

ततो रुष्टेन यक्षेणाधिष्ठिता सा विडम्बिता ।
नीता चेटीभिरुत्पाट्य कथञ्चन पितुर्गृहे ॥४३॥

---

१. निजगुण-दोषेभ्यः सम्पद्-विपदौ भवतः पुरुषाणाम् ।
तत उज्झित्वा दोषान् गुणान् प्रकाशयत भो भव्याः ! ॥१॥

राज्ञा च तां तथाभूतां सुतां दृष्ट्वा विषादिना ।
भौतिका मान्त्रिकास्तत्र समाहूता अनेकशः ॥४४॥

तैर्वैद्यैश्च चतुर्भेदाः सोद्यमैर्विहिताः क्रियाः ।
परं विशेषो नो जातो यन्त्र-मन्त्राद्युपायकैः ॥४५॥

बीजा इवोषरक्ष्मोप्तास्तेऽभूवन् निष्फलक्रियाः ।
ततो यक्षस्तदङ्गस्थः प्रोचेऽनिन्द्यनया मुनिः ॥४६॥

यद्येनां तस्य भो दत्थ तदा मुञ्चामि नान्यथा ।
एषा जीवत्विति क्ष्मापः स्वीचक्रे तद्वचोऽञ्जसा ॥४७॥

ततः सज्जशरीरा सा सर्वालङ्कारभूषिता ।
मुनेः समीपं सम्प्राप्तोद्वाहोपकरणान्विता ॥४८॥

साऽथ व्यजिज्ञपन्नत्वा तमृषिं ससखीजना ।
स्वयंवराया मे हस्तं गृहाण स्वकरेण भोः ! ॥४९॥

तपस्वी प्राह हे भद्रे ! सृतं सङ्कथयाऽनया ।
नरकद्वारपद्धत्या विबुधैरतिनिन्द्यया ॥५०॥

*सिद्धिसुखबद्धरागा अशुचिषु युवतिषु कथं नु रज्यन्ते ? ।*
*ग्रैवेयकदेवा इव परमार्थज्ञा महामुनयः ॥५१॥*

जातामर्षेण ततो यक्षेणाच्छाद्य तत्र यतिरूपम् ।
वैक्रियनानारूपैर्विडम्बिता सा भृशं रात्रौ ॥५२॥

प्रातः सा स्वप्नमिव सुमन्यमानाऽपि दुर्मनस्कतया ।
स्वजनानुगम्यमाना गता सखेदा पितृसकाशम् ॥५३॥

तदा भूपालमाह स्म **रुद्रदेवः** पुरोहितः ।
भद्रोपलब्धवृत्तान्तो वेद-स्मृति-पुराणवित् ॥५४॥

भोः स्वामिन् ! ऋषिपत्न्येषा त्यक्ता तेन महात्मना ।
कार्या विप्रस्य पत्नीति राज्ञा तस्यैव सा ददे ॥५५॥

एवं पुरोधसस्तस्य कान्तया कान्तया तया ।
भुञ्जानस्य सदा भोगान् कियान् कालोऽगमत् सुखम् ॥५६॥

अथो पुराद् बहिस्तेन **रुद्रदेव**पुरोधसा ।
यज्ञं च यजता सैव यज्ञपत्नी कृता प्रिया ॥५७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

देशान्तरात् तदाहूता विप्रा द्वि-त्र्यादिवेदिनः ।
अहम्पूर्विकयाऽनेके सम्प्राप्तास्तत्र सोन्मुदः ॥५८॥

इतश्च—

**हरिकेशबल**महर्षिस्तदा स मासोपवासपारणके ।
यज्ञगृहे भिक्षाऽर्थं समितः प्रविवेश गुप्तिधरः ॥५९॥

शेषकथानकं सूत्रेणैवाह—

**सोवागकुलसंभूओ गुणुत्तरधरो मुणी ।**
**हरिएसबलो नाम आसी भिक्खू जिइंदिओ ॥१॥**

**व्याख्या—श्वपाककुलसम्भूत**श्चाण्डालकुलोत्पन्नो गुणोत्तरान् प्रधानान् ज्ञानादीन् धारयतीति **गुणोत्तरधरो मुनिः हरिकेशः** श्वपाकतया प्रसिद्धो **बलो नाम आसीद**भूत् । भिनत्ति क्षुधमष्टविधं कर्मेति **भिक्षु**रत एव **जितेन्द्रियः** ॥१॥

तथा—

**इरि-एसण-भासाए-उच्चार-समिईसु य ।**
**जओ आयाण-निक्खेवे संजओ सुसमाहिओ ॥२॥**

**व्याख्या**—'भासाए' त्ति 'एकारस्यालाक्षणिकत्वात्' **ईर्या-एषणा-भाषोच्चार-समितिषु यतो** यत्नवान् । तथा **आदानं** ग्रहणं **निक्षेपः** स्थापनं पीठ-फलकादेस्तत्समितौ च 'यत इति योज्यम्' । स च कीदृग् ? **संयतः** संयमवान् **सुसमाहितः** सुष्ठु समाधि-मानिति ॥२॥

तथा—

**मणगुत्तो वयगुत्तो कायगुत्तो जिइंदिओ ।**
**भिक्खट्ठा बंभइज्जंमि जन्नवाडमुवट्ठिओ ॥३॥**

**व्याख्या—मनोगुप्तो** नियन्त्रितमनाः । **वाग्गुप्तो** रुद्धासद्वाक् । **कायगुप्तो**-ऽसदङ्गक्रियाविकलो **जितेन्द्रियः** । 'पुनरेतद्ग्रहणमतिशयख्यापनार्थम्' । **भिक्षार्थं** 'बंभइज्जंमि' त्ति ब्राह्मणानामिज्या यजनं यस्मिन् स **ब्रह्मेज्यस्तस्मिन् यज्ञवाटे** 'द्वितीया सप्तम्यर्थे' **उपस्थितः** प्राप्तः ॥३॥

**तं पासिऊणमिज्जंतं तवेण परिसोसियं ।**
**पंतोवहिं-उवगरणं उवहसंति अणारिया ॥४॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—तं बलनामानं** 'पासिऊणं' ति **दृष्ट्वा** 'इज्जंतं' ति **आयान्तं तपसा** षष्ठादिरूपेण **परिशोषितं** समन्तात् कृशीभूतम् । प्रान्तो जीर्णमलिनत्वादिभिरसार उपधि-र्वर्षाकल्पादिरौघिक उपकरणं च दण्डकाद्यौपग्रहिकं यस्य स **प्रान्तोपध्युपकरणस्तमुपह-सन्त्यनार्या** अशिष्टा म्लेच्छा वा ॥४॥

कथमित्याह—

**जाईमयपडिथद्धा हिंसगा अजिइंदिया ।**
**अबंभचारिणो बाला इमं वयणमब्बवी ॥५॥**

**व्याख्या—जातिमदो** जातिदर्पो यदुत 'ब्राह्मणा वयमिति' तेन **प्रतिस्तब्धा हिंसका** जीवहिंसाकारिणः, **अजितेन्द्रिया अब्रह्मचारिणो**ऽत एव **बाला** अज्ञा **इदं वचनं** वक्ष्यमाणं 'वचनव्यत्ययात्' **अब्रुवन्नु**क्तवन्त इति ॥५॥

किं तदित्याह—

**कयरे आगच्छइ दित्तरूवे काले विकराले फोक्कनासे ? ।**
**ओमचेलए पंसुपिसायभूए संकरदूसं परिहरिय कंठे ॥६॥**

**व्याख्या—कतर आगच्छति दीप्तरूपो**ऽतिबीभत्सत्वेन दुर्दर्शः, **कालो** वर्णतो **विकरालो** दन्तुरत्वादिना रौद्रः देश्यत्वात् फोक्काऽग्रे स्थूलोन्नता नासाऽस्येति **फोक्कनासः** । **अवमचेलको**ऽसारवस्त्रो जीर्णत्वादिना **पांशुना** रजसा पिशाचवद् भूतो जातः **पिशाचभूतो** निष्परिकर्मत्वेन रजोलिप्ताङ्ग इत्यर्थः । सङ्कर उत्कुरुडिका तत्र दूष्यं वस्त्रं **सङ्करदूष्यं** यदतिनिकृष्टं निरुपयोगितया लोकैरुत्सृष्टं स्यात् तत् **परिधृत्य** निक्षिप्य **कण्ठे** । स हि स्वोपधिं गृहीत्वैव भ्राम्यतीत्येवमुक्त इति ॥६॥

अथासन्नागतं चैनं ते किमूचुरित्याह—

**कयरे तुमं इय अदंसणिज्जे काए व आसा इहमागओ सि ? ।**
**ओमचेलगा ! पंसुपिसायभूया ! गच्छ खलाहि किमिहं ठिओ सि ? ॥७॥**

**व्याख्या—कतरस्त्वमित्येवमदर्शनीयो** द्रष्टुमयोग्यः । **कया वाऽऽशया** वाञ्छया **इह** यज्ञपाटके 'मोऽलाक्षणिकः' **आगतोऽसि** ? । **अवमचेलकः पांशुपिशाचभूतः** प्राग्वत् । पुनरेतद्ग्रहणमत्यन्ताधिक्षेपदानार्थं **गच्छ** 'खलाहि' त्ति देश्यत्वाद् **अपसरास्म-द्दृष्टिपथात् किमिह स्थितोऽसी**ति ॥७॥

एवमधिक्षिप्ते मुनावुपशमिततया किञ्चिदजल्पति तद्भक्तो गण्डी यक्षो यदचेष्टत तदाह—

**जक्खो तहिं तिंदुयरुक्खवासी अणुकंपओ तस्स महामुणिस्स ।**
**पच्छायइत्ता नियगं सरीरं इमाइं वयणाइं उदाहरित्था ॥८॥**

**व्याख्या—यक्षस्तस्मिन्** 'अवसरे इति गम्यम्' । **तिन्दुकवृक्षवासी** अनुरूपं कम्पते चेष्टते इत्य**नुकम्पको**ऽनुरूपक्रियाप्रवृत्तिः । कस्य ? **तस्य महामुनेर्हरिकेशबल**स्य प्रच्छाद्य प्रकर्षेणावृत्य **निजकमा**त्मीयं **शरीरं** को भावः ? तद्देह एवानुप्रविश्य स्वयमनुपलक्ष्यः सन्नि**मानि वचनानि** 'उदाहरित्थ' त्ति **उदाहृतवानु**क्तवान् ॥८॥

तान्येवाह—

**समणो अहं संजओ बंभयारी विरओ धण-पयण-परिग्गहाओ ।**
**परप्पवित्तस्स उ भिक्खकाले अन्नस्स अट्ठा इहमागओ म्हि ॥९॥**

**व्याख्या—श्रमणोहं संयतो**ऽसद्व्यापारनिवृत्तो **ब्रह्मचारी विरत** उपरतो **धन-पचन-परिग्रहात्** 'समाहारादेकत्वम्' । तत्र धनं चतुष्पदादि, पचनमाहारपाकः, परिग्रहो द्रव्यादिमूर्च्छा । अत एव **परप्रवृत्तस्य** परार्थनिष्पन्नस्य 'न तु मदर्थं साधितस्येति भावः' । **भिक्षाकालेऽन्नस्यार्थाय** भोजनार्थ**मिह** यज्ञपाटके **आगतोऽस्मी**ति ॥९॥

पुनः साधुः प्राह—

**वियरिज्जइ खज्जइ भोज्जई य अन्नं पभूतं भवयाणमेयं ।**
**जाणाहि मे जायणजीविणु त्ति सेसावसेसं लहऊ तवस्सी ॥१०॥**

**व्याख्या—वितीर्यते** दीयते दीनार्थिभ्यः, **खाद्यते** खण्ड-खाद्यादि, **भुज्यते च** भक्त-सूपाद्य**न्नं प्रभूतं भवतां** सम्ब**न्ध्येतत्** प्रत्यक्षम् । तथा **जानीतावगच्छत** 'मे' त्ति **मां** 'जायणजीविणु' त्ति **याचनेन जीवनशीलमित्ये**वं स्वरूपमतो मह्यमपि ददध्वमिति भावः । ततः **सेषावशेषमु**द्धरितस्याप्युद्धरितं भोज्यं **लभतां तपस्वी** यतिरिति ॥१०॥

एवं यक्षेणोक्ते विप्राः प्राहुः—

**उवक्खडं भोयण माहणाणं अत्तट्ठियं सिद्धमिहेगपक्खं ।**
**न ऊ वयं एरिसमन्न-पाणं दाहामु तुब्भं किमिहं ठिओ सि ? ॥११॥**

**व्याख्या—उपस्कृतं** लवणादिसंस्कृतं **भोजनं माहनानां** ब्राह्मणानां आत्मार्थे भव**मात्मार्थिकं** ब्राह्मणैरप्यात्मनैवभोज्यं नान्यस्मै देयं यतः **सिद्धं** निष्पन्न**मिह** यज्ञपाटके एको ब्राह्मणः पक्षोऽस्य **तदेकपक्षम्** । को भावः ? यदत्रोपस्क्रियते तद् ब्राह्मण-व्यतिरिक्ताय न दीयते, विशेषतस्तु शूद्राय । यदुक्तम्—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविःकृतम् ।
न चास्योपदिशेद् धर्मं न चास्य व्रतमादिशेत्" ॥१॥

अतो **न तु** नैव **वयमीदृशमन्न–पानं दास्यामस्तुभ्यम्, किमिह स्थितोऽसी**ति ? ॥११॥

यक्षः प्राह—

**थलेसु बीयाइं ववंति कासया तहेव निन्नेसु य आससाए ।**
**एयाए सद्धाइ दलाहि मज्झं आराहए पुन्नमिणं खु खेत्तं ॥१२॥**

**व्याख्या—स्थलेषू**च्चभूभागेषु **बीजानि** मुद्गादीनि **वपन्ति** रोपयन्ति **कर्षकाः** कृषीवलास्**तथैव निम्नेषु** नीचभूभागेषु 'आससाए'त्ति **आशंसया**तिवृष्टौ स्थलेषु फलावाप्तिरल्पायां च तस्यां निम्नेष्वित्येवंरूपया । 'एयाइ'त्ति **एतया** कर्षकाशंसा-तुल्य**श्रद्धया** वाञ्छया 'दलाहि'त्ति **ददध्वं मह्यम्** । कोऽभिप्रायः ? यद्यपि भवतामात्मनि निम्नोपमबुद्धिर्मयि तु स्थलताधीस्तथापि मह्यमपि दातुमुचितम् । अथ स्यादेवं दत्तेऽपि न फलावाप्तिरित्याह—**आराधयेदेव** साधयेदेव 'खुरेवार्थे' **पुण्यं** शुभ**मिदं** मल्लक्षणं **क्षेत्रं** दानस्थानं पुण्यप्ररोहहेतुत्वादिति ॥१२॥

यक्षोक्तौ ते पुनराहुः—

**खित्ताणि अम्हं विइयाणि लोए जहिं पकिन्ना विरुहंति पुन्ना ।**
**जे माहणा जाइ-विज्जोववेया ताइं तु खेत्ताइं सुपेसलाइं ॥१३॥**

**व्याख्या—क्षेत्राणि** दानक्षेत्राणि **अस्माकं विदितानि** ज्ञातानि 'वर्तन्ते इति गम्यम्'। **लोके** 'जहिं' ति वचनव्यत्ययाद् **येषु** क्षेत्रेषु **प्रकीर्णानि** दत्तान्यशनादीनि **विरोहन्ति** जन्मान्तरोपस्थानतः प्रादुर्भवन्ति **पूर्णानि** सर्वाणि । स्यादेतदहमपि तन्मध्यवर्त्येव स्यामित्याशङ्क्याह—**ये ब्राह्मणा जाति**श्च ब्राह्मणरूपा, **विद्या** चतुर्दशविद्यास्थानात्मिका **ताभ्यामुपेताः** सहितास्**तान्येव क्षेत्राणि सुपेशलानि** शोभनानि, न तु भवादृशानि शूद्रजातीयानि वेदविद्याबहिष्कृतत्वाद् । उक्तञ्च—

**"सममश्रोत्रिये दानं द्विगुणं ब्राह्मणब्रुवे ।**
**सहस्रगुणमाचार्ये अनन्तं वेदपारगे" ॥१॥** ॥१३॥

यक्षोऽवदत्—

**कोहो य माणो य वहो य जेहिं मोसं अदत्तं च परिग्गहं च ।**
**ते माहणा जाइ-विज्जाविहीणा ताइं तु खेत्ताइं सुपावयाइं ॥१४॥**

**व्याख्या—क्रोधश्च मानश्च** 'चशब्दान्माया-लोभौ च' **वधश्च येषामिति**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ब्राह्मणानाम्। **मृषा** अलीकम**दत्तं च** 'चशब्दान्मैथुनम्' **परिग्रहश्च** द्विपद-चतुष्पदादीनाम् 'अस्तीति सर्वत्र योज्यम्' । **ते** क्रोधाद्युपेता यूयं **ब्राह्मणा जाति-विद्याविहीनाः**, क्रिया-कर्मविभागेन हि चातुर्वर्ण्यव्यवस्था । यत उक्तम्—

**"एकवर्णमिदं सर्वं पूर्वमासीद् युधिष्ठिर ! ।**
**क्रिया-कर्मविभागेन चातुर्वर्ण्यं व्यवस्थितम् ॥१॥**
**ब्राह्मणो ब्रह्मचर्येण यथा शिल्पेन शिल्पिकः ।**
**अन्यथा नाममात्रं स्यादिन्द्रगोपककीटवत्" ॥२॥**

न चैवंविधक्रिया ब्रह्मचर्यात्मिका कोपाद्युपेतेषु तत्त्वतः सम्भवत्यतो न तावज्जातिसम्भवः, विद्याप्यहिंसादिप्रपञ्चकशास्त्रात्मिका न सम्भवति भवत्सु अज्ञानसूचकेषु हिंसोपदेष्टृषु तेषु प्रवृत्तत्वात् । ततः 'ताइं तु' त्ति 'तुरवधारणे' **तानि** भवद्भिदितानि ब्राह्मणलक्षणानि **क्षेत्राणि सुपापकान्येव,** न तु सुपेशलानि क्रोधाद्युपेतत्वेन पापहेतुत्वादिति ॥१४॥

वेदवेत्तृत्वेन वयमेव ब्राह्मणा इत्यत्राह—

**तुब्भे त्थ भो भारहरा गिराणं अट्ठं न याणाह अहिज्ज वेए ।**
**उच्चावयाइं मुणिणो चरंति ताइं तु खेत्ताइं सुपेसलाइं ॥१५॥**

**व्याख्या—यूयमत्र** लोके **भोः** ! **भारधरा** भारमात्रवाहकाः । कासां ? **गिरां** प्रक्रमाद् वेदसम्बन्धिनीनां वाचां यतोऽ**र्थम**भिधेयं **न जानीथ** । 'अहिज्ज' त्ति 'अपेर्गम्यत्वात्' **अधीत्यापि वेदान्** आत्मा रे ज्ञातव्या मन्तव्यो निदिध्यासितव्य इत्यादीन् । एषां यद्यर्थवेत्तारः स्युस्तर्हि यागादीन् न कुर्वीरन् । ततस्तत्त्वतो वेदविद्याविदोऽपि भवन्तो न भवन्ति । तत् कथं जातिविद्यासम्पन्नत्वेन क्षेत्रभूताः स्युः ? । तर्हि कानि क्षेत्राणि ? इत्याह—**उच्चावचान्यु**त्तमाधमानि 'गृहाणीति गम्यम्' **मुनयश्चरन्ति** भिक्षार्थं ये, न तु भवन्त इव स्वयं पचनाद्यारम्भप्रवृत्तयः । ततस्तत्त्वतस्त एव वेदार्थं विदन्ति, तत्र भैक्ष्यवृत्तेरेव समर्थितत्वाद् यदाहु**र्वेदान्तवादिनः**—

**"चरेन्माधुकरीं वृत्तिमपि म्लेच्छकुलादपि ।**
**एकान्नं नैव भुञ्जीत बृहस्पतिसमादपि" ॥१॥**

ततस्**तान्येव** मुनिलक्षणानि **क्षेत्राणि सुपेशलानी**ति ॥१५॥

छात्राः प्राहुः—

**अज्झावयाणं पडिकूलभासी पभाससे किं नु सगासे अम्हं ? ।**
**अवि एयं विणस्सउ अन्न-पाणं न य णं दाहामु तुमं नियंठा ! ॥१६॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—अध्यापकानामु**पाध्यायानां **प्रतिकूलभाषी** विरूपवादी सन् **प्रभाषसे** प्रकर्षेण ब्रूषे '**किमि**ति क्षेपे, **नु**रित्यक्षमायां' धिग् भवन्तं न वयं क्षमामहे । यदीत्थं त्वं ब्रूषे **सकाशे** समीपे**ऽस्माकम्** । **अप्येतद्** दृश्यमानं **विनश्यत्वन्न-पानं न च** नैव '**णं** वाक्यालङ्कारे' 'दाहामु' त्ति **दास्यामस्तव** हे **निर्ग्रन्थ** ! गुरुप्रत्यनीकत्वाद्, अन्यथा त्वनुकम्पया किञ्चिद् दद्यामोऽपीति भावः ॥१६॥

यक्षोऽवदत्—

**समिईहिं मज्झं सुसमाहियस्स गुत्तीहिं गुत्तस्स जिइंदियस्स ।**
**जइ मे न दाहित्थ अहेसणिज्जं किमज्ज जन्नाण लभित्थ लाभं ? ॥१७॥**

**व्याख्या—समितिभि**रीर्यादिभि**र्मह्यं सुसमाहिताय** सुष्ठुसमाधिमते **गुप्तिभिर्गुप्ताय** जितेन्द्रियाय 'चतुर्थ्यर्थे षष्ठी' । **यदि मे न दासस्थ 'अथे**त्यानन्तर्ये' **एषणीयमे**षणा-शुद्धमन्नादि **किं** ? 'न किञ्चिदित्यर्थः' **अद्ये**दानीमारब्ध**यज्ञानां लप्स्यथ लाभं** पुण्य-प्राप्तिरूपम् । पात्रदानादेव हि तत्प्राप्तिरन्यत्र दीयमानस्य हानिरेव । यतः—

"दधि-मधु-घृतान्यपात्रे क्षिप्तानि यथाऽऽशु नाशमुपयान्ति ।
एवमपात्रे दत्तानि केवलं नाशमुपयान्ति" ॥१॥ इति ॥१७॥

अध्यापकः प्राह—

**के इत्थ खत्ता उवजोइया वा अज्झावया वा ? सह खंडिएहिं ।**
**एयं खु दंडेण फलेण हंता कंठंमि घित्तूण खलेज्ज जो णं ॥१८॥**

**व्याख्या—केऽत्रास्मिन्** स्थाने **क्षत्राः** क्षत्रियाः, 'उवजोइय' त्ति **उपज्योतिषो**-ऽग्निसमीपवर्तिनो महानसिका **अध्यापकाः** पाठकाः **सह खण्डिकै**श्छात्रैर्युक्ता **एतं** श्रमणकं **दण्डेन** वंशादिना **फलेन** बिल्वादिना **हत्वा कण्ठे गृहीत्वा** च 'खलेज्ज' त्ति **स्खलयेयु**र्निष्काशयेयुः । 'जो' त्ति वचनव्यत्ययाद् **ये** समर्थाः । '**णम**लङ्कारे' । 'केऽपि सन्ति, ये एनं स्खलयेयुरिति वाक्यार्थः' ॥१८॥

अथ यदभूत्, तदाह—

**अज्झावयाणं वयणं सुणित्ता उद्धाइया तत्थ बहू कुमारा ।**
**दंडेहिं वेत्तेहिं कसेहिं चेव समागया तं इसिं तालयंति ॥१९॥**

**व्याख्या—अध्यापकानां वचनं श्रुत्वोद्धाविता** वेगेन प्रसृतास्**तत्र**, यत्र मुनिरस्ति। **बहवः कुमारा**स्तरुणच्छात्राः 'अहो ! क्रीडनकमागतम्' इति रभसतो

**दण्डै**र्वंशरूपै**र्वेत्रै**र्जलवंशात्मकैः, **कशै**र्वध्रविकारै**श्चैव समागता** मिलिता**स्तमृषिं ताडयन्ति** घ्नन्तीति ॥१९॥

तदा च—

**रण्णो तहिं कोसलियस्स धूया भद्द त्ति नामेण अणिंदियंगी ।**
**तं पासिया संजय हम्ममाणं कुद्धे कुमारे परिनिव्ववेइ ॥२०॥**

**व्याख्या—राज्ञस्तत्र** यज्ञपाटे **कोशलायां** भवः **कौशलिकस्तस्य** 'धूय' त्ति **दुहिता भद्रेति नाम्नाऽनिन्दिताङ्गी** प्रशस्यदेहा **तं हरिकेशबलं दृष्ट्वा संयतं** हिंसाद्युपरतं **हन्यमानं** दण्डादिभिः **क्रुद्धान् कुमारान् परिनिर्वापयत्यु**पशामयतीति ॥२०॥

सा च तस्य महर्षेर्माहात्म्यं निःस्पृहतां चाह—

**देवाभिओगेण निओइएणं दिन्ना मु रन्ना मणसा न झाया ।**
**नरिंद-देविंदभिवंदिएणं जेणामि वंता इसिणा स एसो ॥२१॥**

**व्याख्या—देवाभियोगेन** व्यन्तरस्य बलात्कारेण **नियोजितेन** व्यापारितेन न तु अप्रियत्वादिकारणेन 'दिन्ना मु' त्ति **दत्ताऽस्मि** अहं **राज्ञा** प्रक्रमात् **कौशलिकेन** । तथापि **मनसा** 'अपेर्गम्यत्वात्' चित्तेनापि **न ध्याता** नाभिलषिता प्रक्रमादेतेनर्षिणा **नरेन्द्रदेवेन्द्रा-भिवन्दितेन येनास्म्यहं वान्ता** त्यक्ता **ऋषिणा स एष** युष्माभिर्यः कदर्थयितुमारब्धस्ततो नैवमुचित इति भावः ॥२१॥

पुनस्तमेवार्थं समर्थयितुमाह—

**एसो हु सो उग्गतवो महप्पा जिइंदिओ संजओ बंभयारी ।**
**जो मे तया नेच्छई दिज्जमाणिं पिउणा सयं कोसलिएण रण्णा ॥२२॥**

**व्याख्या—एष एव स उग्रतपा महात्मा जितेन्द्रियः संयतो ब्रह्मचारी** प्राग्वत् । स इति कः ?, **यो** 'मे' त्ति **मां तदा नेच्छति** नाभिलषति **दीयमानां** केन ? **पित्रा** जनकेन **स्वयं,** न त्वन्यप्रेरणादिना तेनापि कीदृशेन **कोशलिकेन राज्ञा,** न तु सामान्य-जनेनेत्यनेन विभूतावपि निःस्पृहतोक्ता ॥२२॥

पुनस्तन्माहात्म्यमाह—

**महाजसो एस महाणुभागो घोरव्वओ घोरपरक्कमो अ ।**
**मा एयं हीलह अहीलणिज्जं मा सव्वे तेएण भे निद्दहिज्जा ॥२३॥**

**व्याख्या—महायशा** गुरुकीर्तिरेष मुनि**र्महानुभागो**ऽचिन्त्यशक्ति**र्घोरव्रतो** धृत-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दुर्धरमहाव्रतो **घोरपराक्रमश्च** कषायादिजयं प्रति रौद्रसामर्थ्योऽतो **मा एनं** मुनिं **हीलयताव-गणयताहीलनीयं** नावज्ञातुमुचितम् । किमित्यत आह—**मा सर्वांस्तेजसा** तपोमाहात्म्येन 'भे' **भवतो निधाक्षीद्** भस्मसात् कार्षीत् । अयं हि कदाचिद् रुष्येद् भस्मसात् कुर्यादेवेति भावः ॥२३॥

अथैतस्या वचो मा भून्मृषेति यक्षो यत् कृतवांस्तदाह—

**एयाइं तीसे वयणाइं सुच्चा पत्तीइ भद्दाइ सुभासियाइं ।**
**इसिस्स वेयावडियट्ठयाए जक्खा कुमारे विणिवारयंति ॥२४॥**

**ते घोररूवा ठिय अंतलिक्खे असुरा तहिं तं जणं तालयंति ।**
**ते भिन्नदेहे रुहिरं वमंते पासित्तु भद्दा इणमाहु भुज्जो ॥२५॥**

**अनयोर्व्याख्या—एतानि** पूर्वोक्तानि **तस्या वचनानि श्रुत्वा पत्न्याः सोमदेव-**पुरोहितस्य **भद्रायाः सुभाषितानि** सूक्तानि **ऋषेस्तस्यैव** 'वेयावडियट्ठाए' त्ति **वैया-वृत्त्यार्थं** इह वैयावृत्यमेतत्प्रत्यनीकनिवारणलक्षणं कार्यं तदर्थं **यक्षाः** 'इह तत्परिकरस्य बहुत्वाद् बहुवचनम्' । **कुमारांस्तानेव विनिवारयन्ति** विशेषेण निराकुर्वन्ति ॥ तथा **ते** यक्षा **घोररूपा** रौद्राकाराः 'ठिय' त्ति **स्थिता अन्तरिक्षे** आकाशे **असुरा** असुरभावा-न्वितास्**तस्मिन्** यज्ञपाटे **तं** साधूपसर्गकारिणं **जनं** छात्रादिकं **ताडयन्ति** घ्नन्ति । ततस्**तान्** कुमारान् **भिन्नदेहान्** यक्षप्रहारैर्विदारिताङ्गान् **रुधिरं वमतः** 'पासित्तु' त्ति **दृष्ट्वा भद्रा** सैव **इदं** वक्ष्यमाणं 'आहु' त्ति वचनव्यत्ययादाह ब्रूते **भूयः** पुनरिति गाथाद्वयार्थः ॥२४-२५॥

किं तदित्याह—

**गिरिं नहेहिं खणह अयं दंतेहिं खायह ।**
**जायतेयं पाएहिं हणह जे भिक्खुं अवमन्नह ॥२६॥**

**आसीविसो उग्गतवो महेसी घोरव्वओ घोरपरक्कमो य ।**
**अगणिं व पक्खंद पयंगसेणा जे भिक्खुयं भत्तकाले वहेह ॥२७॥**

**सीसेण एयं सरणं उवेह समागया सव्वजणेण तुम्हे ।**
**जइ इच्छह जीवियं वा धणं वा लोगं पि एसो कुविओ डहिज्जा ॥२८॥**

**आसां व्याख्या—गिरिं** पर्वतं **नखैः खनथेव** 'अत्र तत्खननक्रियाऽसम्भवादि-वार्थो गम्यः' । **अयो** लोहं **दन्तैः खादथेव** । **जाततेजसमग्निं पादैर्हन्थेव** । ताडयथेव । **ये** यूयं **'भिक्खुं'** प्रस्तावादेनं 'अवमन्नह'त्ति **अवमन्यध्वे** अवधीरयथ । अनर्थफलो हि

भिक्ष्वपमान इति भावः ॥ कथमित्याह—आशीषु दंष्ट्रासु विषमस्येत्या**शीविषः** आशीविष-लब्धिमान् शापानुग्रहसमर्थ इत्यर्थः । यतोऽय**मुग्रतपा महर्षिर्घोरव्रत घोरपराक्रमश्च** प्राग्वत्। अतोऽ**ग्निं 'वा इवार्थं' प्रस्कन्दथे**वाक्रमथेव । केव ? **पतङ्गसेनेव** शलभसन्ततिरिव 'उपमार्थस्यात्रापि गम्यत्वात्' यथा ह्यसौ पतङ्गसेनाग्नौ पतन्त्याशुघातमाप्नोत्येवं भवन्तोऽपीति भावः । **ये** यूयमनुकम्प्यं **भिक्षुकं भक्तकाले** भोजनावसरे यत्र दीनादिभ्योऽप्यवश्यं दीयते तत्र दत्वा 'वहेह' त्ति **व्यध्यथ** ताडयथ । यथा गिरिनखखनने प्रत्युत कर्तुरिव नखभङ्गवैलक्ष्यादिकमुपपदद्यते, तथा एतत्ताडने भवतामेनानर्था इत्यर्थ इति । कृत्योपदेशमाह—**शीर्षेण** मस्तकेनैनं मुनिं **शरणमुपेता**भ्युपगच्छत । को भावः ? शिरसा प्रणामपूर्वकमयमेवास्माकं शरणमिति प्रतिपद्यध्वम् । **समागता** मिलिताः **सर्वजनेन** सह **यूयं यदीच्छता**भिलषत **जीवितं धनं वा** । नास्मिन् कुपिते जीवितादिरक्षाक्षम-मन्यच्छरणमस्ति । किमित्यत आह—**लोकमप्येष कुपितो दहेद्** भस्मसात् कुर्याद् । यदाह वाचकः—'**कल्पान्तोग्रानलवत् प्रज्वलनं तेजसैकतस्तेषाम्**' । **लौकिका** अप्याहुः—

**"न तद्दूरं यदश्वेषु यच्चाग्नौ यच्च मारुते ।**
**विषे च रुधिरे प्राप्ते साधौ च कृतनिश्चये"** ॥१॥

इति गाथात्रयार्थः ॥२६-२७-२८॥

अथ तत्पतिर्यदचेष्टत, तदाह—

**अवहेडियपिट्ठिसउत्तमंगे पसारियाबाहुअकम्मचिट्ठे ।**
**निब्भेरियच्छे रुहिरं वमंते उड्ढमुहे निग्गयजीहनित्ते ॥२९॥**

**ते पासिया खंडिय कट्ठभूए विमणो विसन्नो अह माहणो सो ।**
**ईसिं पसाएइ सभारियाओ हीलं च निंदं च खमाह भंते ! ॥३०॥**

**अनयोर्व्याख्या**—अवहेठितान्यधोनामितानि पृष्टं यावत् सन्ति शोभनान्युत्तमाङ्गानि येषां ते **अवहेठितपृष्टसदुत्तमाङ्गास्तान्** प्रसारिता बाहवो यैस्ते तथा न विद्यते कर्मणामग्नि-समित्प्रक्षेपणादीनां चेष्टा येषां ते तथा ततो द्वन्द्वो **प्रसारितबाह्यकर्मचेष्टास्तान्** 'निब्भेरिय'त्ति देश्यत्वात् **प्रसारितान्यक्षीणि** लोचनानि येषां ते तथा **तान्** । तथा **रुधिरं वमतः**, **तथोर्ध्वमुखान् निर्गतजिह्वा—नेत्रान्** ॥ **तान् दृष्ट्वा** 'सुब्लोपात्' **खण्डिकान्** छात्रान् **काष्ठभूतान**तिनिश्चेष्टान् **विमना विषण्णो** [**अथे**ति दर्शनान्तरं] **ब्राह्मणः स सोमदेवः ऋषिं** हरिकेशबलं **प्रसादयति सभार्यो भद्रा**पत्नीयुक् कथमित्याह—**हीलां** चावज्ञां **निन्दां** च दोषोद्घट्टनं 'खमाह' त्ति **क्षमस्व** सहस्व भदन्त ! इति गाथाद्वयार्थः ॥२९-३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पुनः प्रसादयन्नाह—

**बालेहिं मूढेहिं अयाणएहिं जं हीलिया तस्स खमाह भंते ! ।**
**महप्पसाया इसिणो हवंति न हु मुणी कोवपरा हवंति ॥३१॥**

**व्याख्या—बालैः** शिशुभि**र्मूढैः** कषायमोहनीयवशगै**रज्ञै**र्हिताहितविवेकविकलै**र्यद्धीलिताः** । 'तस्स' त्ति सूत्रत्वात् **तत् क्षमध्वं भवन्तः** । यतोऽमी ईदृशा अतो न द्वेष्याः, किन्त्वनुकम्पनीया एव । यदुक्तम्—

**"आत्मद्रुहममर्यादं मूढमुज्झितसत्पथम् ।**
**सुतरामनुकम्पेत नरकार्चिष्मदिन्धनम् " ॥१॥**

किञ्च **महाप्रसादा ऋषयो भवन्ति** । 'न हु' त्ति **न पुनर्मुनयः कोपपरा भवन्तीति** ॥३१॥

मुनिराह—

**पुव्विं च इन्हिं च अणागयं च मणप्पओसो न मे अत्थि कोइ ।**
**जक्खा हु वेयावडियं करिंति तम्हा हु एए निहया कुमारा ॥३२॥**

**व्याख्या—पूर्वं** प्रा**गिदानीं वा**ऽधुनाऽ**नागते च** भविष्यत्काले **मनःप्रद्वेषो न** 'मे' **मम अस्ती**त्युपलक्षणाद् आसीद् भविष्यति च **कोऽपी**त्यल्पोऽपि । **यक्षा** देवविशेषा 'हु'**र्यस्माद् वैयावृत्यं** प्रत्यनीकप्रतिघातरूपं **कुर्वन्ति** तस्मात् 'हुरेवार्थे' **तस्मादेव** हेतो**रेते निहता**स्ताडिताः **कुमारा** न तु मम प्रद्वेषहेतुनेति भावः ॥३२॥

ततोऽध्यापकाद्या इदमाहुः—

**अत्थं च धम्मं च वियाणमाणा तुब्भे न वि कुप्पह भूइपन्ना ।**
**तुब्भं तु पाए सरणं उवेमो समागया सव्वजणेण अम्हे ॥३३॥**

**व्याख्या—अर्थं च** शास्त्राणामेव **धर्मं च** क्षान्त्यादि **विजानन्तो**ऽवबुध्यमाना **यूयं नैव कुप्यथ** क्रोधं कुरुथ । भूतिर्मङ्गलं रक्षा वृद्धिर्वा ततः सर्वमङ्गलोत्तमत्वप्राणिरक्षकत्वादिना तथाभूता प्रज्ञा बुद्धिर्येषामिति **भूतिप्रज्ञाः** । अतश्च 'तुब्भं तु' त्ति **युष्माकमेव पादौ शरणमुपेमो**पगच्छामः **समागता** मिलिताः **सर्वजनेन** सह **वयमिति** ॥३३॥

किञ्च—

**अच्चेमु ते महाभागा ! न ते किंचि न अच्चिमो ? ।**
**भुंजाहि सालिमं कूरं नाणावंजणसंजुयं ॥३४॥**

**व्याख्या—अर्चयामः** पूजयामः 'ते' त्ति सुप्व्यत्ययात् **त्वां** भो **महाभागा-**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चिन्त्यशक्ते ! न ?, 'ते' **तव किञ्चिच्चरणरेण्वादिकमपि नार्चयामः** ? अपि तु सर्वमर्चयामः । तथा **भुङ्क्ष्व** 'इतो गृहीत्वा इति गम्यम्' । 'सालिमं' ति **शालिमयं कूरं नानाव्यञ्जनै**र्दध्यादिभिः **संयुतम्** ॥३४॥

अन्यच्च—

**इमं च मे अत्थि पभूयमन्नं तं भुंजसू अम्ह अणुग्गहट्ठा ।**
**बाढं ति पडिच्छइ भत्तपाणं मासस्स उ पारणए महप्पा ॥३५॥**

**व्याख्या—इदं च** प्रत्यक्षोपलभ्यमानं 'मे' **ममास्ति प्रभूतमन्नं** खण्ड-खाद्यादि, **तद् भुङ्क्ष्वास्मदनुग्रहार्थम्** । एवं च तेनोक्ते मुनिराह—'बाढं' **एवं कुर्म इत्येवं** 'ब्रुवाण' इति शेषः' **प्रतीच्छति** द्रव्यादितः शुद्धमिति गृह्णाति **भक्तपानम्** । 'मासस्स उ' त्ति 'अन्त इत्यध्याहारात्' **मासस्यान्ते** पर्यन्ते **पारणके महात्मे**ति ॥३५॥

तत्र यदभूत, तदाह—

**तहियं गंधोदयपुप्फवासं दिव्वा तहिं वसुहारा य वुट्ठा ।**
**पहयाओ दुंदुहीओ सुरेहिं आगासे अहो ! दाणं च घुट्ठं ॥३६॥**

**व्याख्या—तस्मिन्** मुनौ भक्तादि गृह्णति यज्ञवाटे वा गन्धप्रधानमुदकं **गन्धोदकं** तच्च **पुष्पाणि** च **तेषां वर्षं** वर्षणं सुरैरिति योगात् 'कृतमिति गम्यते' । **दिव्याऽ**तिश्रेष्ठा **तत्रैव वसु** द्रव्यं **तस्य धारा वृष्टे**ति पातिता 'सुरैरिति योज्यम्' । तथा **प्रहता**स्ताडिता **दुन्दुभय** देवतोद्यानि **सुरै**र्देवैः । **आकाशे अहो** ! इति विस्मयकृदिदं **दानं च** सुदत्तमिति **घुष्टं** संशब्दितमिति ॥३६॥

विस्मितास्ते ब्राह्मणा इदमाहुः—

**सक्खं खु दीसइ तवोविसेसो न दीसई जाइविसेस कोई ।**
**सोवागपुत्तं हरिएससाहुं जस्सेरिसा इड्ढि महाणुभागा ॥३७॥**

**व्याख्या—साक्षात्** प्रत्यक्षं '**खु**र्निश्चये' **दृश्यते** तपसः षष्ठाष्टमादेर्विशेषो माहात्म्यं **तपोविशेषो न** नैव **दृश्यते जातिविशेषो** जातिमाहात्म्यलक्षणः **कोऽपी**त्यल्पोऽपि । किमित्यत आह—यतोऽसौ **श्वपाकपुत्र**श्चाण्डालसुतो हरिकेशबलश्चासौ साधुश्च **हरिकेशसाधु**र्यस्येदृशी दृश्यमाना **ऋद्धि**र्देवसन्निधानरूपा सम्पत् **महानुभागा** सातिशयमाहात्म्येति ॥३७॥

मुनिरुपशान्तांस्तानिदमाह—

**किं माहणा ! जोइसमारभंता उदएण सोहिं बहिया विमग्गहा ।**
**जं मग्गहा बाहिरियं विसोहिं न तं सुदिट्ठं कुसला वयंति ॥३८॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—'**किमि**ति क्षेपे' न युक्तमिदं य**न्माहना** ब्राह्मणा **ज्योतिरग्निं समारभमाणाः** प्रस्तावाद् यागं कुर्वन्त **उदकेन शुद्धिं** निर्मलतां 'बहिय' त्ति **बाह्यां विमार्गयथा**न्वेषयथ । किमित्येवमत आह—**यद्** यूयं **मार्गयथ बाह्यहेतुकां विशुद्धिं न तत् सुदृष्टं** सुष्ठु प्रेक्षितं **कुशलास्त**त्त्वविचारनिपुणा **वदन्ति** प्रतिपादयन्तीति ॥३८॥

यथा चैतन्न सुदृष्टं स्यात्, तथा स्वत एवाह—

**कुसं च जूवं तण-कट्ठमग्गिं सायं च पायं उदगं फुसंता ।**
**पाणाइं भूयाइं विहेडयंता भुज्जो वि मंदा पकरेह पावं ॥३९॥**

**व्याख्या**—**कुशं** दर्भं यूपं प्रतीतं **तृणं** वीरणादि **काष्ठं** समिदादिक**मग्निं** 'सर्वत्र प्रतिगृह्णन्त इति शेषः' । **सायं** सन्ध्यायां **प्रातः** प्रभाते **उदकं स्पृशन्तः** आचमनादिषु । 'पाणाइं' ति प्राणयोगात् **प्राणिनो** द्वीन्द्रियादीन् **भूतांस्त**रून् । यतः—

"**प्राणा द्वि-त्रि-चतुः प्रोक्ताः भूतास्तु तरवः स्मृताः ।**
**जीवाः पञ्चेन्द्रिया प्रोक्ताः शेषाः सत्त्वाः प्रकीर्तिताः**" ॥१॥

उपलक्षणात् पृथिव्यादीन् 'विहेडयंत' त्ति **विहेटयन्तो** विनाशयन्तो **भूयोऽपि** न केवलं पूर्वं किन्तु शुद्धिकालेऽपि जलानलादिजीवोपमर्दतो मन्दा जडाः **प्रकुरुथ** प्रकर्षेणोपचिनुथ यूयं **पापम**शुभं कर्म । अयं भावः—कर्ममलापचयस्वरूपा तात्त्विकी शुद्धिर्याग-स्नाने च भूतोपमर्दहेतुत्वेन कर्ममलोपचयनिबन्धने एवातः कथं तद्धेतुशुद्धिमार्गणं सुदृष्टं भवेदित्युक्तं च—

"**शौचमाध्यात्मिकं त्यक्त्वा भावशुद्ध्यात्मकं शुभम् ।**
**जलादिशौचं यत्रेदं मूढविस्मापनं हि तत्**" ॥१॥ ॥३९॥

अथ ते विप्राः साशङ्का यागप्रश्नमाहुः—

**कहं चरे भिक्खु ! वयं जयामो पावाइं कम्माइं पणुल्लयामो ? ।**
**अक्खाहि णो संजय ! जक्खपूइया ! कहं सुजट्ठं कुसला वयंति ? ॥४०॥**

**व्याख्या**—**कथं** 'चरे' त्ति वचनव्यत्यया**च्चरेम** यागार्थं प्रवर्तेमहि । **हे भिक्षो ! वयं यजामो** यागं कुर्मः 'कथमिति योगः' । **पापान्य**शुभ**कर्माण्य**विद्यारूपाणि 'पणुल्लयामो' त्ति **प्रणुदामः** प्रेरयामो 'येनेति' गम्यम् । **आख्याहि** कथय **नो**ऽस्माकं **संयत** ! पापस्थानोपरत ! **यक्षपूजित** ! । को भावः ? यो ह्यस्मद्विदितः कर्मप्रणोदनोपायत्वेन यागः स युष्माभिर्दूषित इति भवन्त एवापरं यागमुपदिशन्तु । **कथं स्विष्टं** शोभनं **यजनं कुशला वदन्ति** प्रतिपादयन्ति ॥४०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मुनिराह—

**छज्जीवकाए असमारभंता मोसं अदत्तं च असेवमाणा ।**
**परिग्गहं इत्थीओ माण-मायं एयं परिन्नाय चरंति दंता ॥४१॥**

**व्याख्या—षड्जीवकायनसमारभमाणा** अनुपमर्दयन्ती **मृषामदत्तं च असेवमानाः परिग्रहं** मूर्छां **स्त्रियो मानं मायाम् । एतत्** परिग्रहादि **परिज्ञाय** ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च प्रत्याख्याय **चरन्ति** यागे प्रवर्तन्ते **दान्ता** इन्द्रियादिदमेन 'यतय इति गम्यम्' । अतो भवद्भिरप्येवं चरितव्यमिति भावः ॥४१॥

आद्यप्रश्नस्योत्तरमुक्त्वा शेषप्रश्नस्योत्तरमाह—

**सुसंवुडा पंचहिं संवरेहिं इह जीवियं अणवकंखमाणा ।**
**वोसट्ठकाए सुइचत्तदेहा महाजयं जयइ जन्नसिट्ठं ॥४२॥**

**व्याख्या—सुसंवृत्ताः** सुष्ठु स्थगिताश्रवद्वाराः **पञ्चभिः संवरैः** प्राणातिपात-विरत्यादिव्रतै**रिह** नरभवे परत्र च **जीवितं** प्रस्तावादसंयमजीवित**मनवकाङ्क्षन्तो**ऽनिच्छन्तोऽत एव **व्युत्सृष्टकायाः** विशेषण परीषहादिसहिष्णुतया त्यक्तकायाः **शुचयो**ऽकलुषव्रताः सन्तो निष्प्रतिकर्मतया **त्यक्तदेहाः** । महान् जयः कर्मारीणां यत्र यज्ञे त**न्महाजयमि**ति क्रियाविशेषणं 'जयइ'त्ति वचनस्य व्यत्ययाद् **यजन्ते** 'यतय इति गम्यम्' । एवं भवन्तोऽपि यजतामिति भावः । 'जन्नसिट्ठं' ति प्राकृतत्वात् **श्रेष्ठयज्ञं** श्रेष्ठवचनेन चैतद् यजनमेव स्विष्टं कुशला वदन्ति । एष एव च कर्मप्रणोदनोपाय इत्युक्तं स्यादिति ॥४२॥

अथ ते श्रेष्ठयज्ञस्योपकरणानि विधिं च तं पप्रच्छुः—

**के ते जोई के व ते जोइठाणं का ते सूया किं ते कारिसंगं ? ।**
**एहा य ते कयरा संति भिक्खू ! कयरेण होमेण हुणासि जोइं ॥४३॥**

**व्याख्या—के** इति किंरूपं 'ते' **तव ज्योतिरग्निः, किं वा ते ज्योतिःस्थानं, काः स्त्रुचो** घृतादिप्रक्षेपिका दर्व्यः ? **किं वा करीषाङ्गम**ग्न्युद्दीपकं येनासौ सन्धुक्ष्यते ? । **एधाश्चे**न्धनानि 'कयरा' इति **कतराः** का याभिरग्निः प्रज्वाल्यते । 'संति' त्ति 'चस्य गम्यत्वात्' **शान्तिश्च** दुरितोपशमहेतुरध्ययनपद्धतिः 'कतरेति योज्यम्' ? । **हे भिक्षो ! कतरेण होमेन** हवनविधिना **जुहोष्या**हुतिभिः प्रीणयसि **ज्योति**रग्निमिति ? ॥४३॥

मुनिरुत्तरयति—

**तवो जोई जीवो जोइठाणं जोगा सुया सरीरं कारिसंगं ।**
**कम्मं एहा संजमजोग संती होमं हुणामि इसिणं पसत्थं ॥४४॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—तपो** बाह्याभ्यन्तरभेदभिन्नं **ज्योतिरग्निर्भावेन्धनकर्मदाहकत्वात्** । **जीवो ज्योतिःस्थानं** तपोज्योतिषस्तदाश्रयत्वात् । **योगा** मनोवाक्कायाः **स्त्रुचस्तैर्हि** शुभव्यापाराः स्नेहस्थानीयास्तपोऽग्नेर्ज्वलनहेतवस्तत्र संस्थाप्यन्ते । **शरीरं करीषाङ्गं** तेनैव हि तपोज्योतिरुद्दीप्यते तद्भावभावित्वात् तस्य । **कर्मोक्तरूपमेधा** इन्धनं तस्यैव तपसा भस्मीभावनयनात्। **संयमयोगाः** संयमव्यापाराः **शान्तिः** सर्वप्राणिविघ्नापहारित्वात् तेषाम् । 'होमं' ति विभक्तिव्यत्ययात् **होमेन जुहोमि** 'तपोज्योतिरिरिति गम्यते' । **ऋषीणां** सम्बन्धिना **प्रशस्तेन** जीवोपघातरहितत्वेन सद्भिः श्लाघितेन सम्यक्चारित्रेणेति भावः ॥४४॥

अथ ते यज्ञस्वरूपमवधार्य स्नानस्वरूपं पिपृच्छव इदमाहुः—

**के ते हरए के य ते संतितित्थे कहिंसि न्हाओ व रयं जहासि ? ।**
**आयक्ख णो संजय ! जक्खपूइया ! इच्छामु नाउं भवओ सगासे ॥४५॥**

**व्याख्या—कस्ते तव ह्रदो** द्रहः ?, 'के य ते संतितित्थे' त्ति **किं च** 'ते' **तव** शान्त्यै पापोपशमनाय तीर्थं पुण्यक्षेत्रं **शान्तितीर्थम्** ? । 'कहिंसि न्हाओ व रयं' ति वाशब्दस्य भिन्नक्रमत्वात् **कस्मिन् वा स्नातः** शुचिभूतो **रजः** कर्म **जहासि** त्यजसि त्वम् ? । **आचक्ष्व** व्यक्तं वद **नोऽ**स्माकं **संयत ! यक्षपूजित** ! । **इच्छामोऽ**भिलषामो **ज्ञातुं भवतः सकाशे** समीपे इति ॥४५॥

मुनिराह—

**धम्मे हरए बंभे संतितित्थे अणाविले अत्तपसन्नलेसे ।**
**जहिंसि न्हाओ विमलो विसुद्धो सुसीईभूओ पजहामि दोसं ॥४६॥**

**व्याख्या—धर्मो**ऽहिंसादिरूपो **ह्रदः** कर्मरजोऽपहन्तृत्वात् । **ब्रह्म** ब्रह्मचर्यं **शान्तितीर्थं** तदासेवनाद् राग-द्वेषोन्मूलनाच्च पापमलसम्भवाभाव इति शान्तितीर्थं किम्भूतम् ? **अनाविलं** मिथ्यात्वादिभिरकलुषम् । आत्मनो जीवस्य प्रसन्ना मनागप्यकलुषा पीताद्यन्यतरा लेश्या यस्मिंस्त**दात्मप्रसन्नलेश्यं तस्मिन्** । 'जहिंसि न्हाओ' त्ति **यस्मिन् स्नातो**ऽतिशुद्धिभवनाद् **विमलो** भावमलरहितोऽत एव **विशुद्धो** निष्कलङ्कः **सुशीतीभूतो** रागाद्युपतापाभावेन सुष्ठु शैत्यं प्राप्तः **प्रजहामि** प्रकर्षेण त्यजामि **दोषं** कर्मेति ॥४६॥

निगमयितुमाह—

**एयं सिणाणं कुसलेहि दिट्ठं महासिणाणं इसिणं पसत्थं ।**
**जहिंसि न्हाया विमला विसुद्धा महारिसी उत्तमं ट्ठाणं पत्त ॥४७॥ त्ति बेमि ॥**

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

**व्याख्या—एतत्** पूर्वोक्तं **स्नानं** रजोऽपहन्तृ **कुशलैर्दृष्टमि**दमेव च **महास्नानं** न तु युष्मत्प्रतीतत्वस्यैव सर्वमलापहारित्वादत एव **ऋषीणां प्रशस्तं** प्रशंसास्पदम्, न तु जलस्नानवत् सदोषतया निन्द्यम् । 'जहिंसि' त्ति सुब्व्यत्ययाद् **येना**नन्तरोक्तेन स्नानेन **स्नाता विमला विशुद्धा महर्षय उत्तमं स्थानं** मुक्तिलक्षणं **प्राप्ता** गता इति । एवं च प्रशान्तेषु द्विजेषु यक्षेण प्रगुणीकृतेषु छात्रेषु धर्मदेशनया तान् प्रबोध्य मुनिः पृथ्व्यां विहृतवान् **इति ब्रवीमी**ति प्राग्वत् ।।४७।। ग्रन्थाग्रम्-३४१-२०।।

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां द्वादशं हरिकेशीयमध्ययनं समाप्तम् ।।१२।।**

●●●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# त्रयोदशं चित्र-संभूतीयमध्ययनम्

अथेह प्रागध्ययने श्रुतवत् तपस्यपि यत्नः कार्य इत्युक्तम् । तच्च महापायहेतु-निदानपरिहारेणेव शुद्धं स्याद्, एतच्च **चित्रसम्भूतो**दाहरणेन दर्श्यत इति सम्बन्धेनायातमिदं त्रयोदशमध्ययनमत्र तावत् तद्दृष्टान्तः पूर्वमुच्यते । तथाहि—

पुरमस्तीह **साकेतं** सङ्केतमिव सम्पदाम् ।
**चन्द्रावतंसक**स्तत्र **चन्द्रोज्ज्वलयशा** नृपः ॥१॥

**मुनिचन्द्र**श्च तत्पुत्रो निर्विण्णविषयस्पृहः ।
गुरोः **सागरचन्द्र**स्य पार्श्वे व्रतमुपाददे ॥२॥

अन्यदोग्रं तपस्यन् स विहरन् गुरुभिः समम् ।
ग्रामं प्रविष्टो भिक्षाऽर्थं सार्थभ्रष्टोऽभवद् भ्रमन् ॥३॥

अटव्यां पतितस्तृष्णा-क्षुधाक्लान्तः स संयतः ।
चतुर्भिर्गोपतनयैः प्रत्यचार्यशनादिभिः ॥४॥ **युग्मम्**

धर्मं श्रुत्वा मुनेः पार्श्वाच्चत्वारोऽपि व्रतं ललुः ।
मललिप्तं मुनिं दृष्ट्वा तेषूभौ च जुगुप्सकौ ॥५॥

द्वौ चाजुगुप्सकौ जातौ सम्यक्त्वप्रतिपालनात् ।
तपोधनानुकम्पातश्चत्वारोऽपि दिवं ययुः ॥६॥ **युग्मम्**

तत्राजुगुप्सकौ ता**विषुकार**पुरे ततश्च्युतौ ।
विप्रौ जाताविषुकारीयाध्ययने वक्ष्यामि तच्चरितम् ॥७॥

जुगुप्सकौ ततो विप्र**शाण्डिल्याद्** युग्मिनौ सुतौ ।
दास्यां **दशपुरे**ऽभूतां **यशोमत्यां** दिवश्च्युतौ ॥८॥

क्रमेण यौवनं प्राप्तौ क्षेत्ररक्षाकृतेऽन्यदा ।
न्यग्रोधाधः प्रसुप्तौ तौ रजन्यामटवीं गतौ ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एको दष्टो भुजङ्गेन निर्गत्य वटकोटरात् ।
द्वितीयस्तमहिं द्रष्टुं दष्टस्तेनाहिना भ्रमन् ॥१०॥

ततो द्वावपि जज्ञाते मृतौ **कालिञ्जरे** नगे ।
**हरिण्यां** यमलत्वेन मृगौ प्राक्प्रीतियोगतः ॥११॥

नैकट्येन चरन्तौ तौ व्याधेनैकेषुणा हतौ ।
ततो **गङ्गा**तटे हंसावभूतां हंसिकोदरात् ॥१२॥

सममेव भ्रमन्तौ तौ बद्ध्वा पाशिकयैकया ।
मारितौ गलमामोट्य धीवरेण कुधीयुजा ॥१३॥

ततः **सुरसरित्तीरे काश्यां** तौ समजायताम् ।
श्वपचेड्**भूतदिन्न**स्य समृद्धस्य गृहे सुतौ ॥१४॥

पित्रा नाम तयोर्दत्तं **चित्रः सम्भूतक**स्तथा ।
वर्धमानौ क्रमाज्जातौ तौ कलाग्रहणोचितौ ॥१५॥

**काश्यां** तदा नृपो जज्ञे **शङ्ख**नामा पराक्रमी ।
**नमुचिः** सचिवस्तस्य राज्यकार्यकरः सुधीः ॥१६॥

दत्तस्तत्रान्यदा राज्ञा **नमुचिः** सचिवो द्विजः ।
तन्मातङ्गाय बध्योऽयं यतः शुद्धान्तधर्षकः ॥१७॥

तेनोचे यदि मत्पुत्रौ विद्यां पाठयसे तदा ।
मुञ्चामि नान्यथा मेऽत्र राज्ञामाज्ञा हि दुस्त्यजा ॥१८॥

स्वीकृत्य तद्वचो मन्त्री पाठयामास तत्सुतौ ।
सङ्गीतकादिशास्त्राणि तद्गृहान्तर्वसन् सदा ॥१९॥

तयोर्मातुः करात् तत्र भोजनाद्यपि सोऽकरोत् ।
किं कुर्याज्जीवितव्यार्थी न ह्यनाचारमप्यहो ! ॥२०॥

क्रमात् तौ वेणु-वीणादिविद्यानां पारदृश्वकौ ।
जातौ मोहोदयान्मन्त्री तयोर्जज्ञभ्यते प्रसूम् ॥२१॥

मातङ्गस्तस्य जारत्वं ज्ञात्वैच्छत् तं विनाशितुम् ।
तौ च विद्यागुरुरिति नाशयामासतुस्तकम् ॥२२॥

मुष्टिं बद्ध्वा ततो नष्टौ **हस्तिनागपुरं** गतः ।
मन्त्रित्वेऽस्थापि **नमुचिः सनत्कुमार**चक्रिणा ॥२३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इतश्च **चित्र-सम्भूतौ** गान्धर्व्यादिकलावरौ ।
जनैस्तच्छ्रवणासक्तैः सह गीतानि गायतः ॥२४॥

सदा तावबजानन्तौ स्पृश्यास्पृश्यविभागताम् ।
राज्ञा पुरप्रवेशादौ धर्षयित्वा निषेधितौ ॥२५॥

पौरेषु मिलितेषूच्चैरन्येद्युः कौमुदीक्षणे ।
प्रवृत्तौ मधुरं गातुं रञ्जितानेकनागरौ ॥२६॥

त्रिवेद्यादिद्विजैर्दृष्टौ स्पृशन्तौ जनतां शुभाम् ।
काष्ठ-लेष्ट्वादिभिः सर्वैस्तावत्यर्थं कदर्थितौ ॥२७॥

एवं तौ हन्यमानौ द्राक् पुरादुद्यानमीयतुः ।
खिद्यमानौ दुर्मनस्कौ दध्यिवांसाविति स्फुटम् ॥२८॥

रूप-तारुण्य-लावण्यं कला-कुशलतादि च ।
धिगस्त्वस्माकमखिलं मातङ्गकुलसम्भवात् ॥२९॥

अनुक्त्वा स्वजनादीनां प्रस्थितौ दक्षिणापथम् ।
विरक्तचित्तौ यामिन्यां मुमूर्षाकृतनिश्चयौ ॥३०॥

दूरदेशान्तरं प्राप्तौ शैलमेकमपश्यताम् ।
तमारुहन्तावेकस्मिन् शिलापट्टे तपस्विनम् ॥३१॥

तपःकृशीकृतस्वाङ्गं ध्यानसंलीनमानसम् ।
प्रलम्बितभुजद्वन्द्वं मुनिमेकं ददर्शतुः ॥३२॥ **युग्मम्**

ततश्चावन्दिषातां तं हर्षोत्कर्षवशंवदौ ।
तेनाप्याभाषितौ धर्मलाभाशीःपूर्वकं तकौ ॥३३॥

भोः ! युवां कुत आयातौ वदतं वदतांवरौ ! ।
गिरौ पिपतिषां ब्रूतस्तौ प्राग्वृत्तोक्तिपूर्वकम् ॥३४॥

ततो महर्षिणाऽभाणि न युक्तं युवयोरिदम् ।
ही ! कातरोचितं कर्म ज्ञातकर्मस्वरूपयोः ॥३५॥

कुर्वाथां भोः ! युवां जैनं धर्मं सुगतिहेतुकम् ।
दुःखौघबीजभूतोरुकर्मेन्धनदवानलम् ॥३६॥

निःशङ्कं स्वीकृतं ताभ्यां तस्यर्षेस्तद्वचोऽञ्जसा ।
आतुरैरिव वैद्यस्य रोगार्तैर्भिषजादिकम् ॥३७॥

Jain Education International 2010_02                    For Private & Personal Use Only                    www.jainelibrary.org

तौ व्यजिज्ञपतां साधो ! देहि स्वव्रतमावयोः ।
प्रसद्य मा विलम्बेथामिति साधुरथावदत् ॥३८॥

ततो वैराग्यमापन्नौ गुरोर्जगृहतुर्व्रतम् ।
विकृष्टतपसा लब्धतेजोलेश्यादिलब्धिकौ ॥३९॥

क्रमेण विहरन्तौ तौ **हस्तिनागपुरं** गतौ ।
उद्याने प्रासुकस्थाने स्थितौ सद्ध्यानतत्परौ ॥४०॥

प्रविष्टं पुरि भिक्षाऽर्थं मासक्षपणपारणे ।
**नमुचिः** सचिवोऽपश्यत् **सम्भूत**यतिमेकदा ॥४१॥

मदीयं हि दुराचारमयं प्रकटयिष्यति ।
इति दुश्चिन्तया कोपाद् भृत्यैस्तं निरभर्त्सयत् ॥४२॥

धिग् मुण्ड ! श्वपच ! त्वं भोः ! पुरान्तः किं प्रविक्षसि ? ।
एवं निष्ठुरवाग् दुष्टो ग्रावादिभिरघातयत् ॥४३॥

क्रोधाध्मातस्ततश्चासौ समस्तजनदाहिकाम् ।
तेजोलेश्यां दुःप्रसह्यां मां मोक्तुमुपचक्रमे ॥४४॥

तदा तन्मुखनिर्गच्छद्धूमधूम्रे नभस्तले ।
**सनत्कुमार**चक्र्याह **सम्भूत**र्षे ! कृताञ्जलिः ॥४५॥

भोस्तपस्विन् ? क्षमस्वेहास्मादृशैर्मन्ददृष्टिभिः ।
अनार्यैरपराद्धं यत् तपस्तेजश्च संहर ॥४६॥

अस्मज्जीवितदानेन प्रसीद न पुनस्तथा ।
करिष्यामः स **सम्भूतो** यावन्नैव प्रसीदति ॥४७॥

तावत् तद्वृत्तमाकर्ण्य **चित्रर्षि**र्धूमदर्शनात् ।
उपाशीशमदागत्य तदन्ते तं श्रुतोक्तिभिः ॥४८॥

"भोः **सम्भूत**यते ! कोपानलं स्रागुपशामय ।
**महर्षयो भवन्त्येव प्रशमामृतपूरिताः ॥४९॥**

*अपराधिन्यपि क्रोधावकाशं न ददत्यहो ! ।*
*सन्तो यतो दुरन्तोऽयं क्रोधोऽनर्थखनिः खलु ॥५०॥*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यतः—

**"[1]कोहो पीई पणासेइ कोहो दुग्गइवड्ढणो ।
परियावकरो कोहो अप्पाणस्स य परस्स य" ॥१॥**

एवं चोपशमवरैः सर्वज्ञोपज्ञवाग्जलैः स मुनिः ।
विध्यापितकोपाग्निः संवेगं चाससाद दमी" ॥५१॥

ततः पुराद् विनिर्गत्योद्यानमापतुरादृतौ ।
संयतौ **चित्र-सम्भूतौ** वैराग्याद्धुतचेतसौ ॥५२॥

क्रुद्धेन चक्रिणा बद्ध्वा **नमुचिः** साधुसन्निधौ ।
नीतः कृपाऽऽर्द्रचेतोभ्यां तदा ताभ्यां स मोचितः ॥५३॥

ततः क्रोधं हि धिगिति ध्यात्वा तौ शुद्धभावनौ ।
स्वीचक्राते त्वनशनं विधायाराधनां मुदा ॥५४॥

ततो भक्तिप्रहृष्टास्यश्चक्री सान्तःपुरोऽगमत् ।
तदुद्यानं तयोः पादाववन्दत महाऽऽदरात् ॥५५॥

तदा स्त्रीरत्नमृदुलालकस्पर्शादभूद् यतिः ।
सम्भूतो भ्रष्टसद्ध्यानस्तद्भोगस्पृहयालुकः ॥५६॥

यावन्निदानं **सम्भूतो** विधातुमुपचक्रमे ।
तावच्चाचिन्तय**च्चित्रो**ऽहो ! मोहस्य विजृम्भितम् ॥५७॥

***इन्द्रियाणां च दौर्दान्त्यं विषयाणां दुरन्तता ।
अहो ! भोगपिपासाया दुर्जयत्वमतृप्तता ॥५८॥***

***तपोऽतिशययुक्तोऽपि ज्ञातार्हद्वचनोऽपि यत् ।
अयं युवतिबालाग्रस्पर्शादित्यध्यवस्यति ॥५९॥*** त्रिभिःकुलकम्

ततश्चित्र उपाक्रंस्त तं प्रबोधयितुं मुनिः ।
भो भोः ! उपरमैतस्मादशुभाध्यवसायतः ॥६०॥

यतः—

**"असाराः कामभोगा भोः ! भवभ्रमणहेतवः ।
आपातमधुराश्चान्ते ते किम्पाकफलोपमाः" ॥१॥**

---

१. क्रोधः प्रीतिं प्रणाशयति क्रोधो दुर्गतिवर्धनः ।
परितापकरः क्रोधः आत्मनश्च परस्य च ॥१॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

किञ्च—

*भोगहेतुवपुर्मानुष्यकं तदखिलं किल ।*
*विस्त्रं चाशुचि बुद्धानां स्यात् कथं रागहेतु तत् ? ॥६१॥*

यदागमः—

"[1]सुक्कसोणियसंभूयं असुईरसविवड्डियं ।
तय-रत्त-मंस-मेय-ट्ठि-मिज्ज-सुक्क-विणिम्मियं ॥१॥

नवेगारससोएहिं गलंतमसुईरसं ।
अमेज्झकोत्थलो देहं छविमेत्तमणोहरं ॥२॥

आढयं रुहिरस्सेत्थ वसाए अद्धआढयं ।
कुडवो पित्त-सिंभाणं सुक्कस्स य तदद्धयं ॥३॥

सिरासयाइं सत्तेव नव ण्हारुसया भवे ।
न सरीरंमि एयंमि सुइत्तं किंपि विज्जए ॥४॥

मणुण्णाणसणाईणि वरं वत्थं विलेवणं ।
विणस्सए सरीरेण वरं सयणमासणं ॥५॥

एयारिसे सरीरंमि सव्वरोगाण आलए ।
सुणिच्छियागमो होउं मा मुज्झ मुणिपुंगव !" ॥६॥

एवमाद्यनुशिष्टोऽपि स तु न प्रत्यबूबुधत् ।
मोहोत्कटतया घोरं निदानं चक्रिवानिति ॥६२॥

---

१. शुक्र-शोणितसम्भूतमशुचिरसविवर्धितम् ।
त्वक्-रक्त-मास-मेदास्थि-मज्जा-शुक्र-विनिर्मितम् ॥१॥

नवैकादशस्रोतोभिर्गलदशुचिरसम् ।
अमेध्यकुशूलो देहश्छविमात्रमनोहरः ॥२॥

आढकं रुधिरस्यात्र वसाया अर्धाढकम् ।
कुतुपः पित्त-श्लेष्मणोः शुक्रस्य च तदर्धकम् ॥३॥

सिराशतानि सप्तैव नव स्नायुशतानि भवेयुः ।
न शरीरे एतस्मिन् शुचित्वं किमपि विद्यते ॥४॥

मनोज्ञान्यशनादीनि वरं वस्त्रं विलेपनम् ।
विनश्यति शरीरेण वरं शयनमासनम् ॥५॥

एतादृशे शरीरे सर्वरोगाणामालये ।
सुनिश्चितागमो भूत्वा मा मुह्य मुनिपुङ्गव ! ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एतत्तपःप्रभावेन लभेऽहं प्रेत्य चक्रिताम् ।
लीलाविलासिललनाभोगं चोत्तमजातिताम् ॥६३॥

इति कृत्वा निदानं स **सम्भूतो** व्रतपालनात् ।
विमाने **पद्मगुल्माख्ये सौधर्मे** त्रिदशोऽजनि ॥६४॥

**चित्र**जीवोऽपि तत्रैव देवोऽभूद् दिव्यसौख्यभुक् ।
ततः **पुरिमताले**ऽभूदिभ्यपुत्रो महाधनी ॥६५॥

दिवश्च्युतोऽथ **सम्भूत**जीवः **काम्पील्य**पत्तने ।
**ब्रह्मराज**महाराज्ञी**चुलनी**नन्दनोऽभवत् ॥६६॥

चतुर्दशमहास्वप्नज्ञातचक्रेशसम्पदः ।
नाम व्यधात् पिता तस्य **ब्रह्मदत्त** इति स्फुटम् ॥६७॥

चत्वारः सुहृदोऽभीष्टा **ब्रह्मराज**स्य भूभृतः ।
**कटकः काशि**देशेशः करेणुर्गजपूःपतिः ॥६८॥

**कोशला**धिपति**र्दीर्घश्चम्पेशः पुष्पचूलकः** ।
प्राय एकत्र तिष्ठन्ति पञ्चैते स्नेहला मिथः ॥६९॥ **युग्मम्**

अन्यदा **ब्रह्मराट्** व्याधिबाधितो द्वादशाब्दकम् ।
उत्सङ्गे **कटकादीनां ब्रह्मदत्तं** मुमोच सः ॥७०॥

तानूचे च वयस्या भोः ! भवद्भिः प्रतिवत्सरम् ।
बाल्ये लालयितव्योऽसौ स्थित्वा चैकैकशः क्रमात् ॥७१॥

इत्यादि राज्यचिन्तां स कृत्वा कालगतो नृपः ।
मित्रैश्च प्रेतकृत्यानि विधाय **कटका**दिभिः ॥७२॥

सर्वैरालोचितं यावदेष स्याद् राज्यधूःक्षमः ।
तावत् स्थातव्यमेकेन राज्यरक्षाकृतेऽत्र भोः ! ॥७३॥

ते तत्र **दीर्घ**राजं तु मुक्त्वा स्वं राज्यमैयरुः ।
**दीर्घः** सर्वं सकोशादि तद्राज्यं हस्तसाद् व्यधात् ॥७४॥

मोहोदयादिन्द्रियाणां दुर्निवारतया तथा ।
निन्द्यत्वं **ब्रह्म**भूपस्य मित्रत्वं चावमन्य सः ॥७५॥

**चुलन्या** सह भुञ्जानः सदा वैषयिकं सुखम् ।
निःशङ्कः स्वेच्छयाऽभुङ्क्त **ब्रह्म**राज्यं नृपाधमः ॥७६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इतश्च **ब्रह्म**राजस्य द्वितीयं हृदयं सुधीः ।
तद्वृत्तं ज्ञातवान् सर्वं **धनु**र्मन्त्री यथास्थितम् ॥७७॥

स चित्ते चिन्तयामास यो ह्येवमनुतिष्ठति ।
अकार्यं स किमु **ब्रह्मदत्त**स्योदयमिच्छति ? ॥७८॥

अथैकान्ते **वरधनोः** सुतस्य तदवेदयत् ।
सोऽपि सप्रत्ययं प्रीत्या **ब्रह्मदत्त**मजिज्ञपत् ॥७९॥

दौःशील्यभाजनं नार्यः किं पुनर्या निरङ्कुशाः ? ।
स इत्यालम्ब्य धीरत्वं प्रस्तावं प्रत्यपालयत् ॥८०॥

तथापि—

दुश्चरितमसहमानो मातुः कुमरस्तु दर्शयित्वाऽलम् ।
काकान्यभृतासङ्गं निहन्ति तन्मिथुनकं रोषात् ॥८१॥

योऽन्यश्चैवं कर्ता तस्यैवं निग्रहं विधाताऽहम् ।
तस्य ज्ञापनहेतोरित्येवं वावदीति पुनः ॥८२॥

पुनरन्यदिने कुमरो भद्रकरिण्या समं गजम् ।
लग्नं लात्वाऽन्तःपुरमध्ये तथैव निघ्नन् समाख्याति ॥८३॥

ततो **दीर्घेण** तं मत्वा भणिता **चुलनी**प्रिया ।
काकोऽहं कोकिला त्वं च ज्ञापयत्येष राजसूः ॥८४॥

तयोक्तमेष बालत्वाद् यद्वा तद्वा लपत्यलम् ।
तेनोक्तमेवमेवेति मदुक्तं नान्यथा भवेत् ॥८५॥

पुनः स प्राह वध्योऽयमावयोरतिविघ्नकृत् ।
स्वाधीने मयि कल्याणि ! भविष्यन्त्यपरे सुताः ॥८६॥

ततो रतिस्नेहवशादचिन्त्यं चेतसाऽपि हि ।
तया रागार्त्तया दुष्टमकार्यं तदुरीकृतम् ॥८७॥

उक्तञ्च—

**"[१]मारइ पियभत्तारं हणइ सुयं तह पणासए अत्थं ।**
**नियगेहं पि पलीवइ नारी रागाउरा पावा"** ॥१॥

---

१. मारयति प्रियभर्तारं हन्ति सुतं तथा प्रणाशयत्यर्थम् ।
निजगेहमपि प्रदीपयति नारी रागातुरा पापा ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चुलन्युवाच यद्येवं तेनोपायेन मार्यते ।
येन लोकापवादोऽत्र न स्यात् स हि सुदुस्सहः ॥८८॥
**दीर्घः** प्राह तथैवेह करिष्ये मा विषीद भोः ! ।
ततः स कुमरोद्वाहसामग्रीं कर्तुमुद्यतः ॥८९॥
तदा चैकस्य भूपस्य **दीर्घ**राजवृता सुता ।
सा तु प्रच्छन्नदूतेन वारिता **धनु**मन्त्रिणा ॥९०॥
अथासन्ने मुहूर्ते स कुमारस्तेन चालितः ।
बहुतन्त्रो विवाहार्थं चतुरङ्गचमूवृतः ॥९१॥
तदा च **दीर्घ**भूपालोऽनेकस्तम्भप्रतिष्ठितम् ।
दुर्निर्गम-प्रवेशं तु जतुगेहं व्यधापयत् ॥९२॥
इतश्च **धनु**मन्त्रीशश्चतुर्धीर्दीर्घदर्शिकः ।
**ब्रह्मदत्त**हिताकाङ्क्षी **दीर्घ**भूपं व्यजिज्ञपत् ॥९३॥
राजन् ! वयं जराक्रान्ताः किमन्योथ कर्म्मणा ? ।
प्राप्यानुज्ञां तावकीनां धर्मं कुर्मः किलोचितम् ॥९४॥
कैतवेनावदद् **दीर्घ**स्त्वद्वियोगः सुदुःसहः ।
इहैव स्वेच्छया मन्त्रिन् ! धर्मं दानादिकं कुरु ॥९५॥
राज्ञोक्तमुररीकृत्य प्रेष्यैः स **धनु**धीसखः ।
महत् **त्रिपथगा**तीरे सत्रागारममण्डयत् ॥९६॥
तस्मिंश्चतुर्विधाहारमनेकान् पान्थमुख्यकान् ।
सदा स भोजयामास मान-सन्मानपूर्वकम् ॥९७॥
प्रतीतैः पुरुषैः सत्रागारादाजतुमन्दिरम् ।
गव्यूतिद्वितयोन्मानां स सुरङ्गामचीखनत् ॥९८॥
इतश्च **ब्रह्मदत्तो**ऽपि सुहृद्वर**धनू**ल्बणः ।
परिणीय कनीमन्यां **काम्पील्य**पुरमासदत् ॥९९॥
**दीर्घराट्** कपटप्रेम्णा प्रवेश्य पुरमुत्सवैः ।
कुमारं सवधूकं चास्थापयज्जतुवेश्मनि ॥१००॥
निशि सुष्वाप कुमरो जजागार सुहृत् पुनः ।
मध्यरात्रेऽथ सम्प्राप्ते स्वस्वस्थानगते जने ॥१०१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जतुनो वासभवने **चुलुन्यैव** प्रदीपिते ।
स्वयं समन्ततस्तत्र हाहारव उदच्छलत् ॥१०२॥ **युग्मम्**

प्रबुद्धो **ब्रह्मदत्त**स्तु मूढहृद् ज्वलदोकसि ।
किं कर्तव्यमिति प्रोच्चैर्मित्रं **वरधनुं** जगौ ॥१०३॥

तदाऽवादीद् **वरधनुर्धनु**ज्ञापितकूणके ।
मित्र ! पार्ष्णिप्रहारेण सुरङ्गाऽऽस्यं प्रकाशय ॥१०४॥

**ब्रह्मदत्तो**ऽवदन्मित्रोत्थापय क्षितिपात्मजाम् ।
मन्त्रिसूराह मत्पित्रा सा दूतास्येन वारिता ॥१०५॥

वर्त्तते काचिदन्यैषा ह्यस्यां रागं तु मा कृथाः ।
तेन द्वारं सुरङ्गाया लत्तयोद्घाटितं ततः ॥१०६॥

तद्द्वारेण विनिर्गत्य तौ सत्रागारमीयतुः ।
तत्र प्राग् **धनु**मन्त्रीशधृतजात्यतुरङ्गमौ ॥१०७॥

मन्त्र्यादिष्टौ समारुह्य ततः सद्य पलायितौ ।
पञ्चाशद्योजनीं प्राप्तौ **कोट्ट**ग्रामं क्रमाद् गतौ ॥१०८॥ **युग्मम्**

स्थित्वोद्याने **वरधनुः** क्षुरिणाऽवापयच्छिरः ।
कुमारस्य स्वयं सद्यः परावर्त्तितवेषभृत् ॥१०९॥

काषायिकानि वासांसि कुमार पर्यधापयत् ।
सश्रीवत्सं च तद्वक्षः पट्टेनाच्छादयत् स तु ॥११०॥

ततो व्रजन्तौ ग्रामान्तर्द्विजेनैकेन वीक्षितौ ।
स्वमन्दिरे समाकार्य भोजितौ स्नानपूर्वकम् ॥१११॥

पट्टाच्छादितवक्षा यो भोक्ष्यतेऽत्र वयस्ययुक् ।
त्वत्पुत्र्या स वरो भावी नैमित्तिकवाक्यतः ॥११२॥

तेन **बन्धुमती**पुत्रीं **ब्रह्मदत्तो** विवाहितः ।
कियत् कालं स्थितौ तत्रान्येद्युर्मन्त्रिसुतोऽवदत् ॥११३॥

दूरं गन्तव्यमिति भोः ! कुमारः ससुहृज्जवात् ।
ततो **बन्धुमती**कान्तां सम्बोध्य प्रस्थितस्ततः ॥११४॥

इत्यादिका **ब्रह्मदत्त**हिण्डिराश्चर्यभूता पूर्वटीकातोऽवसेया ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं महीं भ्रमन् **दीर्घराज**भीत्या वयस्ययुक् ।
अनेकाः कन्यकाः कान्ताः स्थाने स्थाने विवाहयन् ॥११५॥

कुर्वन् परोपकारं च कुतुकान्यवलोकयन् ।
**वाराणस्याः** सदुद्यानं **ब्रह्मदत्तः** समासदत् ॥११६॥ युग्मम्

पार्श्वे **कटकराजस्य** सुहृद् **वरधनु**र्गतः ।
हृष्टस्तु सोऽभ्यगाद् **ब्रह्मदत्तं** सबलवाहनः ॥११७॥

पट्टेभस्कन्धमारोह्य **कटकः** कुमरं मुदा ।
नीतवान् स्वगृहं भूपः प्रवेशोत्सवपूर्वकम् ॥११८॥

ससत्कारं स तत्रैनं स्वपुत्रीं **कटकावतीम्** ।
गजाश्वकोशसंयुक्तां प्रशस्तेऽह्नि व्यवाहयत् ॥११९॥

**ब्रह्मदत्त**स्तया साकं निःशङ्कोऽनुभवन् भृशम् ।
सुखं वैषयिकं तत्रात्यवाहयदनेहसम् ॥१२०॥

अन्यदा **कटकः** प्राह कुमाराश्रय धीरताम् ।
विमुक्तपुरुषाकारैः स्थेयं कियदनेहसम् ॥१२१॥

ततो दूतैः समाहूताः सर्वेऽप्यागुर्महीक्षितः ।
**पुष्पचूला**दयोऽनेके ससैन्या **धनु**रप्यगात् ॥१२२॥

ततस्तैरभिषिच्योच्चैः सुधी**र्वरधनु**र्बली ।
सेनापतित्वे प्राजिध्ये योद्धुं **दीर्घ**महीभुजा ॥१२३॥

**दीर्घो**ऽपि निजकं दूतं **कटका**दिनृपान् प्रति ।
प्राहिणोद् वावदूकं तं ते सर्वे निरभर्त्सयन् ॥१२४॥

स्वयं तु ते **ब्रह्मदत्तं** पुरस्कृत्य प्रतस्थिरे ।
चतुरङ्गचमूपेताः प्रापुः **काम्पील्य**पत्तनम् ॥१२५॥

तैर्निरुद्धेऽभितो द्रङ्गे **दीर्घ**राट् निरगात् पुरात् ।
किञ्चित् साहसमालम्ब्य सम्मुखं स्वकसैन्ययुक् ॥१२६॥

उभयोः सैन्ययोर्युद्धे जायमाने तदा मिथः ।
कुन्ताकुन्ति खड्गाखड्गि भग्नं **दीर्घ**बलं क्षणात् ॥१२७॥

ततः पौरुषमाकृष्य योद्धुं **दीर्घो**ऽचलत् स्वयम् ।
**ब्रह्मदत्तो**ऽपि तं प्रेक्ष्य ज्वलत्कोपानलो भृशम् ॥१२८॥

Jain Education International 2010_02    For Private & Personal Use Only    www.jainelibrary.org

तत्सम्मुखं प्रतस्थे स लग्नमायोधनं द्वयोः ।
चक्ररत्नं तदोत्पन्नं **ब्रह्मदत्तो** मुमोच तत् ॥१२९॥ **युग्मम्**

प्रापितो दीर्घनिद्रां स **दीर्घ**स्तेनाचिरादपि ।
तत्कबन्धं क्षणं नृत्यन् साक्षात् श्वभ्रमदर्शयत् ॥१३०॥

सुरैर्जयजयारावपूर्वं कलकलध्वनिः ।
चक्रे नभसि गन्धर्वैः पुष्पवृष्टिः कृता तदा ॥१३१॥

जयत्यसौ चक्रवर्ती द्वादशो **ब्रह्मदत्त**राट् ।
एवमुद्घोषयामास व्योम्नि विद्याधरैः सुरैः ॥१३२॥

इतश्च—

धिग् दुःशीलाचाराचरणधःश्वभ्रपातकृतनियमाम् ।
धिग् मां जनतानिन्द्यां विहितोभयवंशमालिन्याम् ॥१३३॥

इति पश्चात्तापवती दीक्षां लात्वा प्रवर्तिनीपार्श्वे ।
**चुलनी** शिवमाप्तवती स्वं निन्दन्ती तपस्तप्त्वा ॥१३४॥ **युग्मम्**

ततोऽभिनन्द्यमानः स सुरैर्नीराज्यमानकः ।
वधूभिः सधवाभिर्द्राक् प्रविवेश स्वमन्दिरम् ॥१३५॥

सामन्तप्रमुखैश्चक्रे चक्रिराज्याभिषेचनम् ।
प्रसाधितं च षट्खण्डभरतं तेन चक्रिणा ॥१३६॥

स्त्रीरत्नं **पुष्पवत्याद्यं** तदाऽन्तःपुरमागतम् ।
प्रादुरासन् यथायोगं शेषरत्नान्यपि क्रमात् ॥१३७॥

नवापि निधयस्तत्र समीयुश्चक्रिणोऽन्तिके ।
चक्रित्वमेवं भुञ्जानः सुखमास्ते स सर्वदा ॥१३८॥

अन्यदा च महद् दाम मन्दारस्यौपढौकितम् ।
देवेन प्रेक्ष्य चक्री स प्राग्भवां जातिमस्मरत् ॥१३९॥

आ ! ज्ञातं **पद्मगुल्मा**ख्ये विमाने दृष्टवानहम् ।
ईदृग्दामसुखाभोगभोगं तत्रानुभूतवान् ॥१४०॥

पुनश्चक्री स स्मार सर्वं प्राग्भवपञ्चकम् ।
ततश्च पाठयामास पौरान् श्लोकार्धमित्यसौ ॥१४१॥

**'आस्स्व दासौ मृगौ हंसौ मातङ्गावमरौ तथा'** । इति

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पूरयेदेतदर्धं यस्तस्य राज्यार्धमर्पयेत् ।
चक्रीत्युद्घोषयामास मन्त्रिराट् सकले पुरे ॥१४२॥

इतश्च—

**सम्भूत**प्राग्भवभ्राता **चित्र**जीवो महेभ्यभूः ।
जातजातिस्मृतिर्बुद्धो गुरोः पार्श्वे व्रतं ललौ ॥१४३॥

क्रमेण विहरन् सोऽथ **काम्पील्य**पुरमागमत् ।
तस्थौ **मनोरमो**द्याने कायोत्सर्गेण शुद्धधीः ॥१४४॥

तत्रारघट्टिकेनोच्चैः पठ्यमानं मुहुर्मुहुः ।
श्रुत्वा स श्लोकपूर्वार्धं पश्चिमार्धमदोऽवदत् ॥१४५॥

'**एषा नौ षष्ठिका जातिरन्योन्याभ्यां वियुक्तयोः**' । इति
तदर्धं कण्ठसात् कृत्वा मुष्टिं बद्ध्वाऽरघट्टिकः ।
पुरस्ताच्चक्रिणोऽभाणीत् पूर्णं श्लोकं प्रहृष्टहृत् ॥१४६॥

ततः प्राच्यभवस्नेहाच्चक्री मूर्च्छां गतस्तदा ।
सभ्यैः स हन्तुमारब्धो यष्टि-मुष्ट्यादिभिर्भृशम् ॥१४७॥

चक्री चन्दनसेकाद्यैरुपायैर्लब्धचेतनः ।
कृपया हन्यमानं तं सद्यस्तेभ्यो व्यमोचयत् ॥१४८॥

भूपः पप्रच्छ भो भद्र ! श्लोकः किं पूरितस्त्वया ? ।
सोऽवोचन्न मयाऽपूरि मुनिना पूरितस्त्वयम् ॥१४९॥

राजाऽऽह स मुनिः क्वास्ते मदारामेऽस्ति सोऽब्रवीत् ।
निश्चिक्ये चक्रिणा चित्ते सोऽयं प्राग्भवसोदरः ॥१५०॥

ततो हृष्टमनाश्चक्री सतन्त्रः स्नेहभक्तिमान् ।
उद्याने तमृषिं नत्वोपाविशत् तत्पुरो मुदा ॥१५१॥

मुनिनाऽपि तमुद्दिश्य प्रारब्धा धर्मदेशना—

**"[1]जहा-असारो एस संसारो सरीरं भंगुरं तहा ।**
**जीवियं सरयब्भाभं तडिज्जोइ व्व जोव्वणं ॥१॥**

---

१. यथाऽसार एष संसारः शरीरं भङ्गुरं तथा ।
जीवितं शरदभ्राभं तडिज्ज्योतिरिव यौवनम् ॥१॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

**किंपागफलसरिच्छाभोगा विसया य संझरागसमा ।**
**दब्भग्गोदयबिंदु व्व चंचला होइ तह लच्छी ॥२॥**

**सुलहं दुक्खं सुक्खं च दुल्लहं मच्चू अवारियप्पसरो ।**
**मिच्छत्ताविरयाई हेऊ तह कम्मबंधस्स ॥३॥**

**सुक्खाइसयनिहाणो सलाहणिज्जो य मुक्खमग्गो य ।**
**ता मोहं छंड्डित्ता भव्वा ! धम्मंमि उज्जमह" ॥४॥**

संसत् सर्वाऽपि तां श्रुत्वा जाता संवेगभाविता ।
पूर्वदुष्कृतयोगेन ब्रह्मदत्तो न भावितः ॥१५२॥

चक्र्यूचे स्वकसङ्गमसौख्येनामोदितो यथा हि मुने ! ।
मोदयतु तथेह भवानस्मान् राज्योररीकरणात् ॥१५३॥

सममेव करिष्यावश्चरणाचरोद्यमेन तदनु तपः ।
एतद् विफलं तपसो यद् राज्यप्राज्यसुखभोगः ॥१५४॥

"मुनिराख्यद् युक्तमिदं भवतामुपकारकरणनिरतानाम् ।
परमवनिपते ? मनुजावस्थेयं दुर्लभैव भवे ॥१५५॥

*सततं पातुकमायुर्धर्ममतिश्चञ्चला पुनः प्रायः ।*
*विषया विपाककटवस्तद्रक्तानां ध्रुवो नरकः ॥१५६॥*

*दुर्लभमेवं मुक्तेर्बीजं च विशेषतो विरतिरत्नम् ।*
*तत् कुगतिहेतु राज्यं विदुषां हर्षप्रदं तु कथम् ? ॥१५७॥*

तत् त्यज कदाशयममुं स्मर दुःखं प्राग्भव चराप्तपथम् ।
सफलीकुरुष्व मानवजन्मार्हद्वाक्सुधां च पिब" ॥१५८॥

भूपो जगाद भगवन्नुपनतसुखहानिरपरसुखवाञ्छा ।
मौर्ख्यस्य लक्षणं तन्मैवं चादिश कुरु मदुक्तम् ॥१५९॥

---

किम्पाकफलसदृशा भोगा विषयाश्च सन्ध्यारागसमाः ।
दर्भाग्रोदकबिन्दुरिव चञ्चला भवति तथा लक्ष्मीः ॥२॥

सुलभं दुःखं सुखं च दुर्लभं मृत्युरवारितप्रसरः ।
मिथ्यात्वाविरत्यादिर्हेतुस्तथा कर्मबन्धस्य ॥३॥

सुखातिशयनिधानः श्लाघनीयश्च मोक्षमार्गश्च ।
ततो मोहं मुक्त्वा भव्याः ! धर्मे उद्यच्छथ ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पुनः पुनः स चोक्तोऽपि यदा न प्रतिबुध्यते ।
आ ! ज्ञातं विस्फुरत्यस्य निदानं प्राकृतं किल ॥१६०॥

अतोऽर्हदुक्तिमन्त्राणामसाध्यः कालदष्टवत् ।
असाविति गतः साधुः काले शिवमवाप च ॥१६१॥

चक्र्यपि स्वगृहं प्राप्तोऽनुभवद् राज्यसम्पदम् ।
किञ्चित् कालं व्यतीयाय यथेच्छं सपरिच्छदः ॥१६२॥

द्विजातिनाऽन्यदैकेनायाचि भूपः स्वभोजनम् ।
राज्ञोक्तं मामकं भोज्यं त्वं भोक्तुं न क्षमः खलु ॥१६३॥

यतो हि मां विनाऽन्यस्य तन्नैव सहते क्वचित् ।
ततोऽञ्जसा द्विजेनोचे राज्यलक्ष्मीं धिगस्तु ते ॥१६४॥

यदन्नमात्रदानेऽपि भूभर्तुर्मन्त्रणं महत् ।
राज्ञाऽप्यसूयया सोऽथ भोजितः सपरिच्छदः ॥१६५॥

रात्रौ परिणमत्यन्ने स विप्रः सकुटुम्बकः ।
उन्मत्तोऽभून्महाकामवेदनानष्टचेतनः ॥१६६॥

सर्वपरिजनस्तस्याकार्यं कर्तुं प्रवृत्तवान् ।
मिथो मातृ-स्नुषा-भग्नी-पुत्रिकाद्यनपेक्षया ॥१६७॥

प्रातः परिणते चान्ने लज्जितो दध्यिवान् द्विजः ।
कथं नु वैरिणेवाहं भूपेनेत्थं विडम्बितः ? ॥१६८॥

ततो दध्यौ स भूदेवो मद्विवक्षितकार्यकृत् ।
ऋजुर्योग्योऽयमेवेति तं दानाद्यैरुपाचरत् ॥१७०॥

स्वाशयः कथितस्तेन तस्यैकान्तेऽधिकादरात् ।
तेनापि प्रतिपन्नं तच्चक्रवर्त्यक्षिपातनम् ॥१७१॥

अन्येद्युश्चक्रिणो गेहाद् यातो गोलिकयैकया ।
तेन कुड्यान्तरस्थेन सममुत्पाटिते दृशौ ॥१७२॥

तद्वृत्तान्तं ततो ज्ञात्वा राज्ञा चोत्पन्नमन्युना ।
सपुत्र-बान्धवः सोऽथापराधी घातितोऽञ्जसा ॥१७३॥

चक्रवर्ती ततः प्राह मन्त्रिणश्चातिरोषणः ।
घातं घातं द्विजान् दुष्टान् सापराधान् तदक्षिभिः ॥१७४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्थालं प्रपूरितं नित्यं भोः ! ढौकयत मत्पुरः ।
स्वहस्तमर्दनेनैषां येनाहं स्यां सुखास्पदम् ॥१७५॥ **युग्मम्**

सङ्क्लिष्टतीव्रकर्मोदयपरवशचक्रिणः पुरः सततम् ।
शाखोटकफलपूर्णो मन्त्रिभिरुपढौक्यते स्थालः ॥१७६॥

सोऽपि द्विजाक्षिबुद्ध्या प्रमर्दयंस्तानि निजकहस्तेन ।
स्वं सुखितं मन्वानो दिवसानतिवाहयामास ॥१७७॥

सप्तशतानि समानां किञ्चाभ्यधिकानि तानि षोडशभिः ।
आयुः प्रपाल्य नवरं नित्याविरतो महामूढः ॥१७८॥

परिवर्धमानरौद्राध्यवसायो नारकोऽभवन्मृत्वा ।
सप्तमनरकपृथिव्यां त्र्यधिकत्रिंशज्जलध्यायुः ॥१७९॥ **युग्मम्**

साम्प्रतं सूत्रमनुस्त्रियते—

**जाईपराजिओ खलु कासि नियाणं तु हत्थिणपुरंमि ।**
**चुलणीइ बंभदत्तो उववण्णो पउमगुम्माओ ॥१॥**

**व्याख्या**—जात्या चाण्डालरूपया यद्वा **जातिभि**र्दासादिनीचस्थानोत्पत्तिभिरुपर्युपरि-जाताभिः **पराजितः** पराभूतः । '**खलु**र्निश्चये' 'कासि'त्ति **अकार्षीन्निदानं** चक्रिपद-प्रार्थनारूपं **हस्तिनागपुरे, ततश्चुलन्यां ब्रह्मदत्त उत्पन्नः । पद्मगुल्मा**न्नलिनीगुल्मविमानात् 'च्युत्वा' इति शेषः । इत्यक्षरार्थः, भावार्थः कथानकादवसेयस्तच्च कथितम् ॥१॥

**चुलन्यां ब्रह्मदत्त** उत्पन्न इत्युक्तम्, स च क्वेत्याह—

**कंपिल्ले संभूओ चित्तो पुण जाओ पुरिमतालंमि ।**
**सिट्ठिकुलंमि विसाले धम्मं सोऊण पव्वईओ ॥२॥**

**व्याख्या—काम्पील्ये** इति **पाञ्चालदेश**भूषणे **काम्पील्य**नाम्नि नगरे **सम्भूतः** पूर्व-जन्मनामा । **चित्रः** पुनः **सम्भूत**प्राग्जन्मभ्राता **जातः पुरिमताले** पुरे, क्व ? **श्रेष्ठिकुले विशाले** पुत्र-पौत्रादिभिर्विस्तीर्णे । प्राप्तवयाश्च तथाविधाचार्यपार्श्वे **धर्मं** यतिरूपं **श्रुत्वा प्रव्रजित** इति ॥२॥

ततः किमित्याह—

**कंपिल्लंमि य नयरे समागया दो वि चित्त-संभूया ।**
**सुह-दुक्खफलविवागं कहिंति ते एक्कमेक्कस्सं ॥३॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—काम्पील्ये च नगरे ब्रह्मदत्तोत्पत्तिस्थाने समागतौ** मिलितौ **द्वावपि चित्र-सम्भूतौ** प्राग्भवनामानौ **चित्र**जीवयति-**ब्रह्मदत्ता**वित्यर्थः । **सुख-दुःखफलविपाकं** सुकृतदुष्कृतकर्मानुभवरूपं 'कहिंति' त्ति **कथयतः** 'स्म' इति शेषः [तौ] **'एक्कमेक्कस्स'** त्ति एकैकस्य परस्परमित्यर्थः । यथास्वमनुभूतसुखदुःखफलविपाकं कथयामासतुरिति भावः । ततश्च वर्णिता निजसमृद्धिश्चक्रवर्तिना, प्ररूपितस्तद्विपाकदर्शनतस्तत्परित्यागश्चित्रयतिनेति ॥३॥

**चक्कवट्टी महिड्ढीओ बंभदत्तो महायसो ।**
**भायरं बहुमाणेण इमं वयणमब्बवी ॥४॥**

**व्याख्या—चक्रवर्ती महर्द्धिको ब्रह्मदत्तो महायशा भ्रातरं** प्राग्भवसोदरं **बहुमानेन** मानसप्रतिबन्धेने**दं** वक्ष्यमाणं **वचनमब्रवी**दुक्तवान् ॥४॥

तदेवाह—

**आसिमो भायरा दो वि अन्नमन्नवसाणुगा ।**
**अन्नमन्नमणूरत्ता अण्णमण्णहिएसिणो ॥५॥**

**व्याख्या**—'आसिमो' त्ति **अभूवावां भ्रातरौ द्वाव**प्यन्योन्यं परस्परं 'वसाणुग' त्ति वशमनुगच्छत इत्**यन्योन्यवशानुगौ** । तथा**ऽन्योन्यमनुरक्ता**वतीवस्नेहलौ । तथा**ऽन्योन्यं हितैषिणौ** शुभाभिलाषिणौ । त्रिरन्योन्यग्रहणं तुल्यचित्तताख्यापनार्थम् । मकारा अला-क्षणिकाः ॥५॥

केषु पुनर्भवेष्वित्थमावामभूवेत्याह—

**दासा दसन्ने आसि मिया कालिंजरे नगे ।**
**हंसा मयंगतीराए चंडाला कासिभूमिए ॥६॥**
**देवा य देवलोगंमि आसि अम्हे महिड्ढिया ।**
**इमा णो छट्ठिया जाई अण्णमण्णेण जा विणा ॥७॥**

**अनयोर्व्याख्या—दासौ दशार्णे** देशे 'आसि' त्ति **अभूव** । **मृगौ कालिञ्जरे नगे** पर्वते । **हंसौ मृतगङ्गातीरे** । कीदृशी मृतगङ्गा ? उच्यते—

**"गङ्गा विशति पाथोधिं वर्षे वर्षेऽपराध्वना ।**
**वाहस्तत्र चिरात् त्यक्तो मृतगङ्गेति कथ्यते" ॥१॥**

**चाण्डालौ काशीभूम्यां** काशीदेशे । **देवौ च देवलोके** सौधर्मनाम्नि **अभूव** 'अम्हे' त्ति **आवां महर्द्धिकौ,** न तु किल्बिषिकौ । 'इमा णो' त्ति **इयमावयोः षष्ठिका जातिः** ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कीदृशी येत्याह—'अण्णमण्णेण' त्ति **अन्योन्येन** परस्परेण या षष्ठी जातिर्विना कोऽर्थः ? परस्परसाहित्यरहिता वियुक्तयोर्यकेति भाव इति गाथाद्वयार्थः ॥६-७॥

मुनिराह—

**कम्मा नियाणपगडा तुमे राय ! विचिंतिया ।**
**तेसिं फलविवागेण विप्पओगमुवागया ॥८॥**

**व्याख्या—कर्माणि** ज्ञानावरणादीनि, नितरां दीयन्ते खण्डयन्ते तपःप्रभृतीन्यनेनेति निदानं साभिष्वङ्गप्रार्थनारूपं तेन प्रकर्षेण कृतानि **निदानप्रकृतानि** निदानवशनिबद्धानीत्यर्थः **त्वया राजन् ! विचिन्तितानी**ति तद्धेतुभूतार्त्तध्यानतः कर्माण्यपि तथोच्यन्ते । **तेषामे**वंविधकर्मणां **फलविपाकेन** शुभाशुभजनकत्वलक्षणेन **विप्रयोगं** विरह**मुपागतौ** प्राप्तौ । को भावः ? यत् तदा त्वयास्मन्निवारितेनापि निदानं कृतं, तत्फलमेतद् यदावयोर्वियोग इति ॥८॥

पुनश्चक्री प्रश्नयितुमाह—

**सच्चसोयप्पगडा कम्मा मए पुरा कडा ।**
**ते अज्ज परिभुंजामो किं नु चित्ते वि से तहा ? ॥९॥**

**व्याख्या—सत्यं** प्रतीतं **शौचं** चामायमनुष्ठानं ताभ्यां **प्रकटानि** ख्यातानि **कर्माणि** शुभानुष्ठानानि **मया पुरा कृतानि** 'यानीति गम्यते' **तान्यद्या**स्मिन्नहनि 'शेषतद्भवकालोपलक्षणम्' 'परिभुंजामो' त्ति **परिभुञ्जे** तद्विपाकोपनतस्त्रीरत्नादिपरिभोगद्वारेण वेदये 'यथेति गम्यते' । '**किमितिप्रश्ने, नुर्वितर्के' चित्रोऽपि** कोऽर्थो भवानपि । 'से' इति **तानि तथा परिभुङ्क्ते** ? काक्वा नैव भुङ्क्ते भिक्षुकत्वाद् भवतः । किमिति मयैव सहोपार्जितानि शुभकर्माणि विफलानि जातानीत्याशयः ॥९॥

मुनिराह—

**सव्वं सुचिन्नं सफलं नराणं कडाण कम्माण न मोक्खु अत्थि ।**
**अत्थेहिं कामेहिं य उत्तमेहिं आया ममं पुन्नफलोववेए ॥१०॥**
**जाणाहि संभूय ! महाणुभागं महड्ढियं पुण्णफलोववेयं ।**
**चित्तं पि जाणाहि तहेव रायं ! इड्ढी जुई तस्स वि य प्पभूया ॥११॥**

**अनयोर्व्याख्या—सर्वं सुचीर्णं** शोभनमनुष्ठितं 'तपःप्रभृतीति गम्यम्' **सफलं नराणा**मुपलक्षणत्वादशेषजीवानाम् । यतः **कृतेभ्यो**ऽर्थादवश्यवेद्येभ्यः **कर्मभ्यो न मोक्षोऽस्ति** । तानि हि ददत्येव निजफलमवश्यमिति भावः । **अर्थै**र्द्रव्यैः **कामैश्च** शब्दादिभि**रुत्तमैरु**पलक्षितः **सन्नात्मा मम पुण्यफलोपेतश्च**क्रित्वावाप्त्या शुभकर्मफलान्वित इति यथा त्वं **जानासि हे**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**सम्भूत ! महानुभागं महर्द्धिकम**त एव **पुण्यफलोपेतं चित्रमपि जानीहि तथैव हे राजन् !** किमित्यत आह—**ऋद्धिः** सम्पत्, **द्युतिर्दीप्तिस्तस्यापि** चित्रस्य ममापीति भावश्चेति यस्मात् **प्रभूता** बह्वी । गृहस्थभावे त्वद्वन्ममाप्येवंविधत्वादिति भाव इति गाथाद्वयार्थः ॥१०-११॥

यद्येवं तत् किं प्रव्रजित इत्याह—

**महत्थरूवा वयणप्पभूया गाहाणुगीया नरसंघमज्झे ।**
**जं भिक्खुणो सीलगुणोववेया इहज्जयंते समणो म्हि जाओ ॥१२॥**

**व्याख्या—महार्थरूपा** अनन्तद्रव्यपर्यायात्मकतया बह्वर्थस्वरूपा 'वयणप्पभूय' त्ति **वचनेनाप्रभूता** स्तोकाक्षरेत्यर्थः । **गाथाऽर्थाद्** धर्मार्थाभिधायिनी सूत्रपद्धतिः । **अन्विति** तीर्थकृद्-गणधरादिभ्यः पश्चाद् **गीता** प्रतिपादिता 'स्थविरैरिति शेषः' क्व ? **नरसङ्घमध्ये** । **यां** गाथां 'श्रुत्वेति शेषः' **भिक्षवः शीलगुणोपेता इह** प्रवचने **यतन्ते** यत्नवन्तो भवन्ति । तामेव 'श्रुत्वेति गम्यम्' **श्रमणोऽस्म्यहं जातो** न तु दुःखदग्ध इति भावः ॥१२॥

चक्री स्वसमृद्ध्या मुनिं निमन्त्रयितुमाह—

**उच्चोदए महु कक्के य बंभे पवेइया आवसहा य रम्मा ।**
**इमं गिहं चित्तधणप्पभूयं पसाहि पंचालगुणोववेयं ॥१३॥**

**व्याख्या—उच्चोदयो मधुः कर्कश्च**शब्दान्मध्यो **ब्रह्मा** च पञ्च प्रासादाः **प्रवेदिता** मम वर्धकिपुरःसरैः सुरैरुपनीता **आवसथाश्च** शेषभवनप्रकाराः **रम्या** रमणीयाः । एते तु यत्र चक्रिणे रोचन्ते तत्रैव स्युरिति वृद्धाः । **किञ्चेदं गृहं** प्रासादरूपं प्रभूतं चित्रमनेकप्रकारं धनं यस्मिंस्तत् **प्रभूतचित्रधनं** 'प्रभूतशब्दस्य परनिपातः प्राकृतत्वात्' **प्रसाधि** पालय । **पञ्चालो** देशस्तस्मिन् **गुणा** इन्द्रियोपकारिणो रूपादयस्**तैरुपेतम्** । कोऽर्थः ? पञ्चालेषु यानि विशिष्टवस्तूनि, तेषां सर्वेषां तत्र सद्भावात् । तदा च **पञ्चाल**देशस्यैवातिसमृद्धत्वात् तद्ग्रहणमन्यथा **भरत**गतोत्तमवस्तु तद्गेहे तदाऽऽसीदिति ॥१३॥

किञ्च—

**नट्टेहिं गीएहिं य वाइएहिं नारीजणाइं परिवारयंतो ।**
**भुंजाहि भोगाइं इमाइं भिक्खू ! मम रोयई पव्वज्जा हु दुक्खं ॥१४॥**

**व्याख्या—नाट्यै**र्द्वात्रिंशत्पात्रोपलक्षितै**र्गीतै**र्ग्रामस्वरादिरूपै**र्वादित्रै**र्मृदङ्गादिभि**र्नारीजनान् परिवारयन् भुङ्क्ष्व भोगानिमान् हे भिक्षो !** 'इह यद् गजाश्वाद्यनपेक्ष्य स्त्र्यभिधानं तत् तस्य स्त्रीलुब्धत्वात् तदाक्षेपकत्वम्' **मह्यं रोचते, प्रव्रज्या** 'हुरेवार्थे' **दुःखमेव** न मनागपि सुखमिति भावः ॥१४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततो मुनिः किं कृतवानित्याह—

**तं पुव्वनेहेण कयाणुरागं नराहिवं कामगुणेसु गिद्धं ।**
**धम्मंसिओ तस्स हियाणुपेही चित्तो इमं वयणमुदाहरित्था ॥१५॥**

**व्याख्या—तं ब्रह्मदत्तं पूर्वस्नेहेन कृतानुरागं** नराधिपं **कामगुणेषु** शब्दादिषु **गृद्धं धर्माश्रितो** धर्मे स्थितस्**तस्य** चक्रिणो **हितानुप्रेक्षी** हितकाङ्क्षी **चित्रमुनिरिदं वचनमुदाहृतवान्** ॥१५॥

तदेवाह—

**सव्वं विलवियं गीयं सव्वं नट्टं विडंबिणा ।**
**सव्वे आभरणा भारा सव्वे कामा दुहावहा ॥१६॥**

**बालाभिरामेसु दुहावहेसु न तं सुहं कामगुणेसु रायं ! ।**
**विरत्तकामाण तवोहणाणं जं भिक्खुणं सीलगुणे रयाणं ॥१७॥**

**अनयोर्व्याख्या—सर्वं विलपितं** विलापप्रायं निरर्थकतया **गीतं** मद्यपगीतवत् । **सर्वं नाट्यं विडम्बना**प्रायं यक्षाधिष्ठितपीतमद्याद्यङ्गविक्षेपवत् । **सर्वाण्या**भरणानि **भारा**स्तत्त्वतो साररूपत्वात् तेषाम् । तथाहि—

भार्या प्रणयवत्यासीत् श्रेष्ठिनः कस्यचित् पुरा ।
अन्यदाऽऽनाय्यत श्वश्र्वा शिलापुत्रस्तयान्तरात् ॥१॥

अतिभारतया नेतुं न शक्नोमीति साऽवदत् ।
तच्च शुश्राव तद्भर्ताऽलीकं बद्धोत्तरं वचः ॥२॥

शिक्षणीया मयैषेति ध्यात्वा काञ्चनपत्रकैः ।
शिलापुत्रं मठाप्यास्यै प्रादाद् दुःसहवीवधम् ॥३॥

सा कण्ठाभरणीचक्रे तं हर्षापूर्णमानसा ।
तं वृत्तं स्मारिता भर्त्रान्यदा वैलक्ष्यमाप च ॥४॥

एवमाभरणानां तत्त्वतो भारता । तथा **सर्वे कामाः** शब्दादयो **दुःखावहा** मृगादीनामिवायतौ दुःखहेतुत्वाच्चेति । तथा **बालानामज्ञानामभिरामेषु** चित्ताभिरतिहेतुषु **दुःखावहेषु न तत् सुखं कामगुणेषु** मनोज्ञशब्दादिषु 'सेव्यमानेष्विति शेषः' राजन् ! **विरक्तकामानां** विषयपराङ्मुखानां **तपोधनानां, यत्** 'सुखमिति योज्यम्' **भिक्षूणां शीलगुणे रक्तानामिति** गाथाद्वयार्थः ॥१६-१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

धर्मोपदेशमाह–

**नरिंद ! जाई अहमा नराणं सोवागजाइं दुहओ गयाणं ।**
**जहिं वयं सव्वजणस्स वेसा वसीय सोवागनिवेसणेसु ॥१८॥**

**व्याख्या–भो नरेन्द्र** चक्रवर्तिन् ! **जातिरधमा नराणां** मध्ये **श्वपाकजातिर्द्वयोरपि गतयोः** प्राप्तयोरासीद् । यदावां श्वपाकावुत्पन्नौ तदा सर्वजननिन्द्या जातिरासीदिति भावः । **यस्यां वयं** 'प्राकृतत्वाद् बहुत्वम्' **सर्वजनस्य द्वेष्यावप्रीतिकरौ** 'वसीय'त्ति **अवसाव** उचितौ **श्वपाकनिवेशनेषु** चाण्डालगृहेषु ॥१८॥

**तीसे य जाईइ उ पावियाए वुच्छा मु सोवागनिवेसणेसु ।**
**सव्वस्स लोगस्स दुगंछणिज्जा इहं तु कम्माइं पुराकडाइं ॥१९॥**

**व्याख्या–तस्यां च जातौ 'तुर्विशेषणे' पापिकायां** कुत्सितायां पापहेतुत्वेन वा पापिकायां 'वुच्छ'त्ति **उषितौ** 'मु' इत्यावां **श्वपाकनिवेशनेषु सर्वस्य लोकस्य जुगुप्सनीयौ, इहास्मिन्** जन्मनि **तुः** पुनः **कर्माणि** शुभानुष्ठानानि **पुराकृतानि** पूर्वजन्मोपार्जितानि विशिष्टजात्यादि-निबन्धनानीति शेषः ॥१९॥

यतश्चैवमतः–

**सो दाणिसिं राय महाणुभागो महिड्ढिओ पुन्नफलोववेओ ।**
**चइत्तु भोगाइं असासयाइं आदाणहेउं अभिनिक्खमाहि ॥२०॥**

**व्याख्या–स** इति यः पुरा सम्भूतनामाऽनगार आसीत् 'दाणिसिं' ति देशी-भाषयेदानीं **राजा महानुभागो महर्धिकः पुण्यफलोपपेत**श्च स त्वं दृष्टधर्मफलत्वे**नाभि-निष्क्रामे**तिसम्बन्धः । पुराकृतकर्मविजृम्भितत्वादेवंविधसमृद्ध्यवाप्तिरिति भावोऽतो**ऽभि-निष्क्राम** । किं कृत्वेत्याह**–त्यक्त्वा**ऽपहाय **भोगानशाश्वतान्,** आदीयते विवेकिभिर्गृह्यते इत्या**दान**श्चारित्रधर्मस्त**द्धेतोरभिनिष्क्रामा**भिमुख्येन प्रव्रज, न गृहस्थत्वे सर्वविरतिचारित्र-सम्भव इति भावः ॥२०॥

एवमकरणे को दोष इत्याह–

**इह जीविए राय ! असासयंमि धणियं तु पुन्नाइ अकुव्वमाणो ।**
**सो सोयई मच्चुमुहोवणीए धम्मं अकाऊण परंमि लोए ॥२१॥**

**व्याख्या–इहास्मिन् जीविते** मनुष्यसम्बन्धिनि भो **राजन्** ! **अशाश्वते**ऽस्थिरे 'धणियं तु' त्ति **अतिशयेनैव** न तु ध्वजपटप्रान्तवच्चञ्चलतामात्रेण **पुण्यान्य**कुर्वाणः **स**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**शोचते** दुःखार्तः सन् पश्चात्तापं कुरुते । **मृत्युमु**खोपनीतस्तथाविधकर्मभिर्मरणगोचर**मुप-ढौकितः** सन् **धर्मं** शुभानुष्ठान**मकृत्वा परस्मिंल्लोके** जन्मान्तररूपे 'गत इति शेषः' **शशिनृपतिवत्** । किं न मया तदा धर्मोऽनुष्ठित इति खिद्यत इत्यर्थः ॥२१॥

मृत्युमुखोपनीतस्य स्वजनादयस्त्राणाय भविष्यन्तीत्याशङ्क्याह—

**जहेह सीहो व मियं गहाय मच्चू नरं नेइ हु अंतकाले ।**
**न तस्स माया व पिया व भाया कालंमि तम्मिंसहरा भवंति ॥२२॥**

**व्याख्या—यथेह** लोके **सिंहो** व्याघ्रादिर्वा **मृगं गृहीत्वा** तं नयतीति सम्बन्धः । एवं **मृत्युर्नरं नयति 'हुर्निश्चये'** । क**दान्तकाले** जीवितव्यावसाने । **न तस्य** मृत्युना नीयमानस्य **माता वा पति वा भ्राता वा काले [तस्मिन्]** जीवितान्तरूपे । अंशं जीवितभागं धारयन्ति मृत्युना नीयमानं रक्षन्ती**त्यंशधराः** स्वजीवितांशदानतः । यदुक्तम्—

**"न पिता भ्रातरः पुत्रा न भार्या न च बान्धवाः ।**
**न शक्ता मरणात् त्रातुं मग्नाः संसारसागरे"** ॥१॥ ॥२२॥

तर्हि ते दुःखात् त्रस्यन्त इत्याह—

**न तस्स दुक्खं विभयंति नाइओ न मित्तवग्गा न सुया न बंधवा ।**
**इक्को सयं पच्चणुहोइ दुक्खं कत्तारमेवं अणुजाइ कम्मं ॥२३॥**

**व्याख्या—न तस्य** मृत्यूपनीतस्य **दुःखं** शारीरं मानसं वा **विभजन्ति** विभागेन गृह्णन्ति **ज्ञातयो** दूरस्था स्वजनाः, **न मित्रवर्गाः, न सुताः, न बन्धवा** निकटस्वजनाः । किन्त्वे**को-ऽद्वितीयः स्वयं प्रत्यनुभवति दुःखं । कर्तारमेवानु**यात्यनुगच्छति **कर्मे**ति ॥२३॥

अशरणभावनामुक्त्वैकत्वभावनामाह—

**चिच्चा दुपयं चउप्पयं च खित्तं गिहं धण-धन्नं च सव्वं ।**
**कम्मप्पबीओ अवसो पयाइ परं भवं सुंदर पावगं वा ॥२४॥**

**व्याख्या—त्यक्त्वा द्विपदं** भार्यादि, **चतुष्पदं च** गजादि, **क्षेत्रमि**क्षुक्षेत्रादि, **गृहं** धवलगृहादि, **धनं धान्यं** च प्रतीतम्, चशब्दाद् वस्त्रादि, **सर्वं** कर्मैवात्मनो द्वितीयमस्येति **कर्मात्मद्वितीयोऽवशो**ऽतन्त्रस्वः **प्रयाति** प्राप्नोति **परं भव**मन्यजन्म **सुन्दरं** बिन्दुलोपात् स्वर्गादि, **पापकं वा** नरकादि स्वकर्मनुरूपमिति भावः ॥२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्यक्तजीवस्य देहस्य स्वरूपमाह—

**तं इक्कगं तुच्छसरीरगं से चिईगयं दहिओ पावगेणं ।**
**भज्जा य पुत्तो वि य नायओ य दायारमन्नं अणुसंकमंति ॥२५॥**

**व्याख्या—तद्** यत् तेन जीवेन त्यक्त**मेककं** तद् द्वितीयस्य जन्तोरन्यत्र सङ्क्रमणात् **तुच्छम**सारं **शरीरकं** कुत्सितत्वात् । **'से' तस्य** भवान्तरगतस्य सम्बन्धि **चितिगतं** चितां प्राप्तं दग्ध्वा **पावके**नाग्निना **भार्या च पुत्रोऽपि च ज्ञातयश्च दातारं** वाञ्छितवस्तुसम्पादयितार-**मन्यमनुसङ्क्रामन्त्यु**पसर्पन्ति । ते हि तद् बहिर्निष्कास्य भस्मसात् कृत्वा आक्रन्द्य च स्वार्थतत्परतयान्यमनुवर्तन्ते तद्वार्तामपि न पृच्छन्तीति भावः ॥२५॥

किञ्च—

**उवणिज्जई जीवियमप्पमायं वन्नं जरा हरइ नरस्स रायं ! ।**
**पंचालराया वयणं सुणाहि मा कासि कम्माइं महालयाइं ॥२६॥**

**व्याख्या—उपनीयते** ढौक्यते प्रक्रमान्मृत्यवे कर्मभिः **जीवितमायुरप्रमादं** प्रमादं विनावीचिमरणतो निरन्तरमित्यर्थः । सत्यपि च जीविते **वर्णं** सुस्निग्धच्छायारूपं **जरा हरति नरस्य राजन्** ! चक्रिन्नतः **पञ्चालराजन्** ! पञ्चालदेशस्वामिन् ! **वचनं शृणु** । किं तन्मा **कार्षीः कर्माण्य**सदारम्भरूपाणि 'महालयाइं' ति **अतिशयेन महान्ति** पञ्चेन्द्रियवधमांस-भक्षणादीनि ॥२६॥

नृपः प्राह—

**अहं पि जाणामि जहेह साहू जं मे तुमं साहसि वक्कमेयं ।**
**भोगा इमे संगकरा भवंति जे दुज्जया अज्जो अम्हारिसेहिं ॥२७॥**

**व्याख्या—अहमपि जानामि** 'तथेति शेषः' **यथा इहा**स्मिन् जगति **साधो ! यन्मे मम त्वं साधयसि** कथयसि **वाक्यमेतद्** यत् पूर्वं भवतोक्तम् । तत् किं विषयान् न परित्यजसि ? अत आह—**भोगाः** शब्दादय **इमे** प्रत्यक्षाः **सङ्गकराः** प्रतिबन्धोत्पादका **भवन्ति** ये 'यत्-तदोर्नित्याभिसम्बन्धात्' ते **दुर्जया** जेतुमभिभवितुं दुःशक्या भो **आर्य** ! **अस्मादृशै**र्गुरुकर्मभिरिति ॥२७॥

किञ्च—

**हत्थिणपुरंमि चित्ता ! दट्ठूणं नरवइं महिड्ढियं ।**
**काम-भोगेसु गिद्धेणं नियाणमसुहं कडं ॥२८॥**

**व्याख्या—हस्तिनागपुरे हे चित्र** ! चित्राभिधानमुने ! **दृष्ट्वा नरपतिं सनत्कुमारं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चतुर्थं चक्रिणं **महर्द्धिकं काम-भोगेषु गृद्धेना**काङ्क्षावता 'मयेति योज्यम्' **निदानं** प्रेत्यभोगाशंसात्मक**मशुभम**शुभानुबन्धि **कृत**मिति ॥२८॥

तत् प्रतिक्रान्तं भविष्यतीत्यत आह—

**तस्स मे अप्पडिक्कंतस्स इमं एयारिसं फलं ।**
**जाणमाणो वि जं धम्मं कामभोगेसु मुच्छिओ ॥२९॥**

**व्याख्या**—सुब्व्यत्ययेन **तस्मान्निदा**नान्मे **ममाप्रतिक्रान्तस्या**प्रतिनिवृत्तस्ये**दमेतादृशं** वक्ष्यमाण**फलं** कार्यम् । यत् कीदृगित्याह—**जानन्नपि यद**हं **धर्मं** श्रुतधर्मादिकं **कामभोगेषु मूर्च्छितो** गृद्धः । तदेतत् कामभोगेषु मूर्च्छनं मम निदानकर्मणः फलमिति ॥२९॥

निदानफलं दृष्टान्तेनाह—

**नागो जहा पंकजलावसन्नो दट्ठुं थलं नाभिसमेइ तीरं ।**
**एवं वयं कामगुणेसु गिद्धा न भिक्खुणो मग्गमणुव्वयामो ॥३०॥**

**व्याख्या—नागो** हस्ती **यथा** पङ्कप्रधानं जलं **पङ्कजलं तत्रावसन्नो** निमग्नः सन् **दृष्ट्वा स्थलं न नैवाभिसमेति** प्राप्नोति **तीरं** पार**मेवं वयं कामगुणेषु गृद्धा** मूर्च्छिता **न भिक्षोः** साधो**र्मार्गं** सदाचारलक्षण**मनुव्रजामो**ऽनुसराम इति । पङ्कजलोपमकामभोग-परतन्त्रतया वयमपि गजवत् स्थलमिव मुनिमार्गमवगच्छन्तोऽपि नानुगन्तुं शक्नुम इति भावः ॥३०॥

मुनिः पुनरनित्यतां दर्शयन्नाह—

**अच्चेइ कालो तूरंति राईओ न यावि भोगा पुरिसाण निच्चा ।**
**उविच्च भोगा पुरिसं चयंति दुमं जहा खीणफलं व पक्खी ॥३१॥**

**व्याख्या—अत्येत्य**तिक्रामति **कालो** यथायुष्ककालो यत**स्त्वरन्ते** शीघ्रं गच्छन्ति **रात्रयो** दिनोपलक्षणमिदम् । ततोऽनेन जीवितव्यस्यानित्यत्वमुक्तम् । यत उक्तम्—

**"क्षण-याम-दिवस-मासच्छलेन गच्छन्ति जीवितदलानि ।**
**इति विद्वानसि कथमिह गच्छसि निद्रावशं रात्रौ ?"** ॥१॥

**न चापि भोगाः पुरुषाणां नित्याः** । न केवलं जीवितं न नित्यं किन्तु भोगा अपीत्यर्थः । यत **उपेत्य** स्वप्रवृत्त्या न तु पुरुषाभिप्रायेण **भोगाः पुरुषं त्यजन्ति** । कं क इव ? इत्याह—**द्रुमं** वृक्षं **क्षीणफलं यथा पक्षी,** फलोपमानि हि पुण्यानि ततस्तदपगमे क्षीणफलं वृक्षमिव पक्षिणो भोगा मुञ्चन्तीति ॥३१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यत एवमतः—

**जइ तं सि भोए चइउं असत्तो अज्जाइ कम्माइ करेइ रायं ! ।**
**धम्मे ठिओ सव्वपयाणुकंपी तो होहिसि देवो इओ विउव्वी ॥३२॥**

**व्याख्या—यदि** तावद**सि त्वं भोगांस्त्यक्तुमशक्तो**ऽसमर्थ एवमनित्यत्वे भोग-त्यागेन भिक्षुमार्गानुसरणे ह्युचितेऽप्येवं यदि कर्तुं न शक्त इत्याशयस्ततः किम् ? इत्याह—**आर्याणि** विशिष्टजनोचितानि **कर्माण्य**नुष्ठानानि **कुरु राजन्** ! **धर्मे** प्रक्रमाद् गृहस्थधर्मे सम्यक्त्वादिरूपे **स्थितः** सन् **सर्वप्रजानुकम्पी** सर्वप्राणिदयापरः । ततः किं फलम् ? इत्याह—'तो' त्ति **तत** आर्यकर्मकरणाद् **भविष्यसि देवो** वैमानिक **इत** इत्यस्मान्मनुष्य-भवादनन्तरं 'विउव्वी' त्ति **वैक्रियशरीरवान्** । सम्यक्त्वदेशविरतिरूपस्य गृहस्थधर्मस्यापि देवलोकफलत्वेनोक्तत्वादिति भावः ॥३२॥

पुनर्मुनिर्देशविरतिमप्यनङ्गीकुर्वाणं नृपं प्राह—

**न तुज्झ भोगे चइऊण बुद्धी गिद्धो सि आरंभ-परिग्गहेसु ।**
**मोहं कओ इत्तिउ विप्पलावो गच्छामि रायं ! आमंतिओ सि ॥३३॥**

**व्याख्या—'नेति** प्रतिषेधे' **तव भोगान्** शब्दादीनुपलक्षणादनार्यकर्माणि वा 'चइऊण' त्ति **त्यक्तुं बुद्धिः,** किन्तु **गृद्धो** मूर्च्छितो**ऽसि** भवसि केषु ? **आरम्भ-परिग्रहेषु** सावद्यद्विपदादिस्वीकारेषु च । 'मोहं' ति **मोघं** निष्फलं यथा स्यादेवं **कृत एतावान् विप्रलापो** विविधव्यर्थवचनोपन्यासात्मकः । सम्प्रति **गच्छामि राजन्** ! **आमन्त्रितोऽसि** 'धातूनामनेकार्थत्वात्' पृष्टोऽसि । एवमनेकधा जीवितानित्यत्वादिदर्शनेनाप्यबुध्यमानस्य तवाविनेयत्वादुपेक्षैव श्रेयस्करी । उक्तं हि—

> **"मैत्रीं प्रमोदं कारुण्यं माध्यस्थं च नियोजयेत् ।**
> **सत्त्वे गुणाधिके क्लिश्यमानके वाऽविनीतके"** ॥१॥ ॥३३॥

इत्थमुक्त्वा गते मुनौ ब्रह्मदत्तस्य यदभूत् तदाह—

**पंचालराया वि य बंभदत्तो साहुस्स तस्सा वयणं अकाउं ।**
**अणुत्तरे भुंजिय काम-भोए अणुत्तरे सो नरए पविट्ठो ॥३४॥**

**व्याख्या—'अपिः** पुनरर्थश्चः पूरणे' ततः **पञ्चालराजः पुनर्ब्रह्मदत्तः साधोस्तस्य** चित्रजीवस्य **वचनं** हितोपदेशरूप**मकृत्वाऽनुत्तरान्** सर्वोत्तमान् **भुक्त्वा भोगाननुत्तरे** स्थित्यादिभिः सर्वनरकमुख्येऽप्रतिष्ठाने **स ब्रह्मदत्तो नरके प्रविष्टः** समुत्पन्नस्तदनेन निदानस्य नरकावसानफलमुक्तमिति ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रसङ्गतश्चित्रवक्तव्यतामाह—

**चित्तो वि कामेहि विरत्तकामो उदग्गचारित्ततवो महेसी ।**
**अणुत्तरं संजम पालइत्ता अणुत्तरं सिद्धिगइं गओ ॥३५॥ त्ति बेमि ॥**

**व्याख्या—चित्रः** पुनः **कामेभ्यो**ऽभिलषणीयशब्दादिभ्यो विरक्तः पराङ्मुखीभूतः कामोऽभिलाषोऽस्येति **विरक्तकामः** । उदग्रं प्रधानं चारित्रं सर्वविरतिरूपं, तपश्च द्वादशविधं यस्य स **उदग्रचारित्रतपाः महर्षिरनुत्तरं संयमं** सप्तदशभेदं **पालयित्वानुत्तरां** सर्वलोकोपरिवर्तिनीं **सिद्धिगतिं** मुक्तिनाम्नीं गतिं **गतः** प्राप्त **इति** परिसमाप्तौ **ब्रवीमीति** प्राग्वत् ॥३५॥ ग्रं० ३८९-६॥

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां त्रयोदशं चित्र-संभूतीयमध्ययनं समाप्तम् ॥१३॥**

● ● ●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# चतुर्दशमिषुकारीयाध्ययनम्

इह पूर्वाध्ययने निदानदोष उक्तोऽत्र तु प्रसङ्गतो निर्निदानतागुणो वाच्य इत्यनेन सम्बन्धेनायातस्य चतुर्दशस्येषुकारीयाध्ययनस्य प्रस्तावनार्थं पूर्वमिषुकारवक्तव्यता ताव-दुच्यते। तथाहि—

चतुर्वयस्यमध्यस्थौ प्रागुक्तौ गोपदारकौ ।
यौ तदा प्राप्तसम्यक्त्वौ साधोर्भक्त्यनुभावतः ॥१॥

मृत्वोत्पन्नौ सुरौ नाके बान्धवौ तौ ततश्च्युतौ ।
**क्षितिप्रतिष्ठि**ते द्रङ्गे जाताविभ्यगृहे सुतौ ॥२॥ **युग्मम्**

तत्रान्येषां महेभ्यानां चत्वारश्चतुराः सुताः ।
प्रीतास्तयोः सुहृत्त्वेन समानवयसोऽभवन् ॥३॥

ते षडप्यद्भुतान् भोगान् भुञ्जानाः स्नेहला मिथः ।
सकर्णा धर्ममाकर्ण्य प्राव्रजन् गुरुसन्निधौ ॥४॥

प्रतिपाल्य चिरं दीक्षां तपस्तप्त्वा यथाविधि ।
कृत्वा चानशनं तेऽन्तेऽकार्षुः कालं समाधिना ॥५॥

ततः **सौधर्म**कल्पे ते भेजुः षडपि देवताम् ।
विमाने **पद्मगुल्माख्ये** चतुःपल्योपमायुषः ॥६॥

इतश्च गोपवर्जा ये चत्वारो निर्जरास्तके ।
च्युत्वाऽभवन् **कुरुक्षेत्र इषुकार**पुरे क्रमात् ॥७॥

एको **राजेषुकारो**ऽभूद् देवस्तस्य प्रियाऽपरः ।
**पद्मावती** तृतीयस्तु **भृगू** राज्ञः पुरोहितः ॥८॥

संजज्ञे निर्जरस्तुर्यो जाया तस्य पुरोघसः ।
**यशा**भिधाना **वाशिष्ठ**गोत्री च द्विजपुत्रिका ॥९॥ **युग्मम्**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततो **भृगु**रपत्यार्थमनेकैरुपयाचितैः ।
देवानाराधयत्युच्चैः पृच्छन् नैमित्तिकांस्तथा ॥१०॥

इतश्च **गोप**देवौ तौ विज्ञायावधिनेति वै ।
**भृगोः** पुरोहितस्यावां भविष्यावः सुतौ यथा ॥११॥

ततस्तौ साधुरूपेण **भृगु**पार्श्वे सुरौ गतौ ।
**भृगुणा** वन्दितौ साधू सभार्येण पुरोधसा ॥१२॥

तद्धर्मदेशनां श्रुत्वा पुरोधा भृगुरादरात् ।
श्राद्धधर्मं ससम्यक्त्वं जग्राह गृहिणीसखः ॥१३॥

सदारो **भृगु**रप्राक्षीद् भगवन् ! सन्ततिः कदा ? ।
भवित्री नो मुनिः प्राह द्वौ पुत्रौ वो भविष्यतः ॥१४॥

तयोर्बालकयोरेव संवेगात् प्रव्रजिष्यतोः ।
विघ्नो युवाभ्यां नो कार्यो धर्मविघ्नो ह्यनर्थदः ॥१५॥

तौ च प्राप्तव्रतौ भव्यान् बहून् सम्बोधयिष्यतः ।
एवमुक्त्वा सुरावन्तर्धाय स्वर्गं समीयतुः ॥१६॥

तत्र दिव्यसुखं भुक्त्वा तौ गीर्वाणौ ततश्च्युतौ ।
कुक्षौ पुरोधोभार्यायाः पुत्रत्वेनावतेरतुः ॥१७॥

ततः पुरोहितः साकं कलत्रेण पुरा क्वचित् ।
प्रत्यन्तग्राममागत्य तस्थिवान् सपरिच्छदः ॥१८॥

तत्र प्रसूता तज्जाया जातौ द्वौ दारकौ ततः ।
पाल्यमानौ लाल्यमानौ वर्धमानौ यथासुखम् ॥१९॥

कुर्वाणौ च कलाभ्यासं कलाचार्यस्य सन्निधौ ।
व्युद्ग्राहितौ पितृभ्यां तौ मेमौ प्रव्रजतामिति ॥२०॥

यथैते भिक्षुका बालान् हत्वाऽश्नन्ति पलं ततः ।
युवां मा श्लिष्यतामेतान् कदाप्यात्महितैषिणौ ॥२१॥

अन्येद्युस्तौ बहिर्ग्रामाद् रममाणौ विनिर्गतौ ।
इतश्च केचिदाजग्मुर्मुनयो मार्गमाश्रिताः ॥२२॥

ततस्तौ बालकौ साधून् दर्शं दर्शं भयद्रुतौ ।
पलाय्यारूढवन्तौ द्राग् महान्तं वटपादपम् ॥२३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ते साधवस्ततो ग्रामाद् भक्ताद्यानीय तस्य हि ।
वटस्याधः क्षणं स्थित्वा भोक्तुं लग्नाः समाहिताः ॥२४॥

तौ दारकौ वटारूढौ पश्यतः प्राशन्तो मुनीन् ।
स्वाभाविकं भक्त-पानं मांसं नैवात्र किञ्चन् ॥२५॥

ध्यात्वेतीदृशि रूपाणि दृष्टपूर्वाणि कुत्रचित् ।
जातिं सस्मरतुः पूर्वामीहापोहेन तौ निजाम् ॥२६॥

साधून् नन्तुं समुत्तीर्णौ वटात् तौ विस्मयोत्सुकौ ।
धर्ममाकर्ण्य साधुभ्य उपतातं समागतौ ॥२७॥

ताभ्यां सम्बोधितौ माता-पितरौ धर्मसूक्तिभिः ।
सम्बुद्धा श्रुततद्वार्ता राज्ञी च **कमलावती** ॥२८॥

तया च बोधितो भूपः ते षडप्येकचेतसः ।
भवभ्रमभयोद्विग्नाः संवेगावेगभाविताः ॥२९॥

तत्साधुसविधे शुद्धा जगृहुर्व्रतमुत्तमम् ।
तपःशोषितसर्वाङ्गाः सिद्धान्ताभ्यासलालसाः ॥३०॥

सर्वेऽपि ते शुभध्याना हत्वा दुष्कर्मसन्ततिम् ।
केवलज्ञानमुत्पाद्य सम्प्रापुः परमं पदम् ॥३१॥

इह प्रसङ्गतोऽभिहितोऽयमर्थः । अथैतदनुगतं सूत्रं व्याख्यायते—

**देवा भवित्ताण पुरे भवंमि केई चुया एगविमाणवासी ।**
**पुरे पुराणे इसुयारनामे खाए समिद्धे सुरलोयरम्मे ॥१॥**

**व्याख्या—देवा भूत्वोत्पद्य** 'पूरे भवंमि' त्ति **पूर्वे भवे केचिदि**ति प्रागुक्ता **गोप**-जीववयस्याश्च्युताः । किम्भूताः ? 'एग'त्ति एकस्मिन् विमाने **नलिनीगुल्म**नाम्नि वसनन्तीत्येवंशीला **एकविमानवासिनः** । क्व च्युताः ? इत्याह—**पुरे** नगरे पुराणे चिरन्तने **इषुकारनाम्नि ख्याते** प्रसिद्धे **समृद्धे** ऋद्धिमत्यत एव **सुरलोकरम्ये** देवलोकवद् रमणीये ॥१॥

ते च किं सर्वथोपभुक्तभोगफलकर्माण एव ततश्च्युताः ?, उत अन्यथेत्याह—

**सकम्मसेसेण पुराकएणं कुलेसुदग्गेसु य ते पसूया ।**
**निव्विन्नसंसारभया जहाय जिणिंदमग्गं सरणं पवन्ना ॥२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—स्वं** निजं **कर्म** पुण्यप्रकृतिरूपं **तस्य शेषेणो**द्धरितेन **पुराकृतेन** पूर्वोपार्जितेन **कुलेषूदग्रेषू**च्चेषु **च ते** इति ये देवा भूत्वा च्युताः षडपि **प्रसूता** उत्पन्नाः । **निर्विण्णा** उद्विग्नाः **संसारभयात्** 'जहाय' त्ति **परित्यज्य** 'भोगादीनिति गम्यते' । **जिनेन्द्रमार्गम**र्हदुक्तं मुक्तिपथं **शरणम**पायरक्षाक्षमं **प्रपन्ना** अभ्युपगता इति ॥२॥

कश्च किंरूपो जिनेन्द्रमार्गं शरणं प्रपन्न इत्याह—

**पुमत्तमागम्म कुमार दो वि पुरोहिओ तस्स जसा य पत्ती ।**
**विसालकित्ती य तहोसुयारो रायत्थ देवी कमलावई य ॥३॥**

**व्याख्या—पुंस्त्वमागम्य** प्राप्य **कुमारा**वकृतपाणिग्रहणौ **द्वावपि** पुरोहितपुत्रौ, **पुरोहित**स्तृतीय**स्तस्य यशा च** नाम्नी **पत्नी** चतुर्थः, **विशालकीर्तिश्च** विस्तीर्णयशाश्च **तथेषुकारो** नाम **राजा** पञ्चमः । **अत्रास्मिन्** भवे **देवी** पट्टराज्ञी प्रक्रमात् तस्यैव राज्ञः **कमलावती च** नाम्ना षष्ठ इति ॥३॥

यथैतेषु कुमारयोर्जिनेन्द्रमार्गप्रतिपत्तिर्जाता तथाह—

**जाई-जरा-मच्चु-भयाभिभूया बहिंविहाराभिनिविट्ठचित्ता ।**
**संसारचक्कस्स विमुक्खणट्ठा दट्ठूण ते कामगुणे विरत्ता ॥४॥**
**पियपुत्तगा दुन्न वि माहणस्स सकम्मसीलस्स पुरोहियस्स ।**
**सरित्तु पोराणिय तत्थ जाइं तहा सुचिन्नं तव संजमं च ॥५॥**

**अनयोर्व्याख्या—जाति-जरा-मृत्यु-भयाभिभूतौ** बाधितौ बहिः संसाराद् विहारः स्थानं **बहिर्विहारो**ऽर्थान्मोक्षस्**तत्राभिनिविष्टं चित्तं ययोस्तौ** तथा । संसार एव चक्रं भ्रमणलक्षणत्वात् **संसारचक्रं तस्य विमोक्षणार्थं** त्यागनिमित्तं 'दट्ठूण' त्ति **दृष्ट्वा** 'साधूनिति शेषः' । 'ते' त्ति **तौ** कुमारौ सुब्व्यत्ययात् **कामगुणेषु विरक्तौ** पराङ्मुखी-भूतौ ॥ प्रियौ वल्लभौ पुत्रकौ **प्रियपुत्रकौ द्वावपि** नैक एवेत्यपेरर्थो 'माहणस्स' त्ति **ब्राह्मणस्य स्वकर्मशीलस्य** यजन—याजनादिकर्मनिरतस्य **पुरोहितस्य** 'सरित्तु' त्ति **स्मृत्वा** 'पोराणिय' त्ति **पौराणिकां** चिरन्तनीं **तत्र** पुरे **जातिं** जन्म **तथा सुचीर्णं** सुष्ठु यथा स्यात् तथा चरितं **तपः** 'सूत्रत्वाद् बिन्दुलोपः' **संयमं च** पुराऽनुभूतमेतद्द्वयमपि स्मृत्वेति गाथाद्वयार्थः ॥४-५॥

तौ ततः किमकार्ष्टामित्याह—

**ते काम-भोगेसु असज्जमाणा माणुस्सएसुं जे यावि दिव्वा ।**
**मोक्खाभिकंखी अभिजायसद्धा तातं उवागम्म इमं उदाहु ॥६॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**–**तौ** पुरोहितपुत्रौ **काम-भोगेषु** 'असज्जमाण'त्ति **असजन्तौ** सङ्गम-कुर्वन्तौ **मानुष्यकेषु** मनुष्यसम्बन्धिषु **ये चापि दिव्या** देवसम्बन्धिनः काम-भोगास्तेषु च **मोक्षाभिकाङ्क्षिणावभिजातश्रद्धावु**त्पन्नतत्त्वरुची 'तातं' **पितरमुपागम्येदं** वक्ष्यमाणं 'उदाहु'त्ति **उदाहरताम्** ॥६॥

यदुक्तवन्तौ तदाह–

**असासयं दट्ठु इमं विहारं बहुअंतरायं न य दीहमाउं ।**
**तम्हा गिहंसि न रइं लभामो आमंतयामो चरिस्सामु मोणं ॥७॥**

**व्याख्या**–**अशाश्वतम**नित्यं **दृष्ट्वेमं** प्रत्यक्षं **विहारं** मनुष्यत्वेनावस्थानम् । यतो **बह्वन्तरायं** बहुरोगादिविघ्नमत एव **न च दीर्घमायुः** सम्प्रति पल्योपमायुष्कताया अप्यभावात् । **तस्माद् गृहे न रतिं लभावहे** प्राप्नुवोऽत**श्चामन्त्रयावहे** पृच्छाव आवां यथा **चरिष्यावो मौनं** मुनिभावं संयममिति ॥७॥

एवं ताभ्यामुक्ते भृगुर्यत्कृतवांस्तदाह–

**अह तायगो तत्थ मुणीण तेसिं तवस्स वाघायकरं वयासी ।**
**इमं वयं वेयविऊ वयंति जहा न होही असुयाण लोगो ॥८॥**

**व्याख्या**–**अथा**नन्तरं तायते सन्तानं पालयति सर्वापद्भ्य इति तातः स एव **तातकस्तत्रा**वसरे **मुन्यो**र्भावतः प्रतिपन्नमुनिभावयो**स्तयोः** पुत्रयो**स्तपसः** 'उपलक्षणादशेष-धर्मानुष्ठानस्य च' **व्याघातकरं** बाधाकरं 'वचनमिति शेषः' । 'वयासी' त्ति **अवादीद्** । यदवादीत् तदाह–**इमां वाचं वेदविदो वदन्ति** 'यथा न भवत्य**सुताना**मपुत्राणां **लोकः** परलोकस्तं विना पिण्डप्रदानाद्यभावे गत्याद्यभावात्' । तथा चाहुः–

**"अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च ।**
**गृहधर्ममनुष्ठाय तेन स्वर्गं गमिष्यसि" ॥१॥ ॥८॥**

यत एवं तस्मात्–

**अहिज्ज वेए परिविस्स विप्पे पुत्ते परिठप्प गिहंसि जाया ।**
**भुच्चा ण भोगे सह इत्थियाहिं आरन्नया होह मुणी पसत्था ॥९॥**

**व्याख्या**–**अधीत्य** पठित्वा **वेदान्, परिवेष्य** भोजयित्वा **विप्रान्** । तथा पुत्रान् **प्रतिष्ठाप्य** कलत्रग्रहणादिना गृहस्थधर्मे निवेश्य तान् कीदृशः ? **गृहे जातान्** न तु गृहीत-मुखमान्यादीन् । तथा **भुक्त्वा 'णेत्यलङ्कारे' भोगान्** शब्दादीन् **सह स्त्रीभिस्तत आरण्य**-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**कावार**ण्यकव्रतधारिणौ 'होइ'त्ति **भव** युवां **मुनी** तपस्विनौ **प्रशस्तौ** श्लाध्याविति ॥९॥

ततस्तौ यदकार्ष्टां तदाह—

**सोअग्गिणा आयगुणिंधणेणं मोहानिलपज्जलणाहिएणं ।**
**संतत्तभावं परितप्पमाणं लालप्पमाणं बहुहा बहुं च ॥१०॥**
**पुरोहियं तं कमसोऽणुणंतं निमंतयंतं च सुए धणेणं ।**
**जहक्कमं कामगुणेहिं चेव कुमारगा ते पसमिक्ख वक्कं ॥११॥**

**अनयोर्व्याख्या**—इष्टवियोगजनितं मनोदुःखं शोकः स चाग्निरिव **शोकाग्निस्तेनात्मनो गुणा** अनादिकालसहचरितत्वेन रागादयस्ते इन्धनमिवे**न्धनमु**द्दीपकतया यस्य स तथा **तेन** । मोहोऽज्ञानं सोऽनिल इव वायुरिव **मोहानिल**स्तस्मादधिकं नगरदाहादिभ्योऽप्यर्गलं प्रज्वलनं प्रकर्षेण दीपनमस्ये**त्यधिकप्रज्वलनं** प्राकृतत्वादधिकशब्दस्य परनिपातः सन्तप्तोऽनिर्वृतत्वेन भावोऽन्तःकरणमस्येति **सन्तप्तभावस्तम**त एव **परितप्यमानं** दह्यमानं शोकाच्छरीरे दाहस्याप्युत्पत्तेः **लालप्यमानम**तिशयेन दीनवचांसि लपन्तं **बहुधा**ऽनेकप्रकारं **बहु च** प्रभूतं च यथा स्यादिति ॥ एवं **पुरोहितं तं क्रमेणानुनयन्तं** स्वाभिप्रायेण प्रज्ञापयन्तं **निमन्त्रयन्तं च सुतौ धनेन यथाक्रमं कामगुणैश्च** शब्दादिभिः **कुमारकौ तौ प्रसमीक्ष्य** प्रकर्षेणाज्ञानाच्छादितमतिमालोच्य **वाक्यं** 'वक्ष्यमाणमुक्तवन्ताविति गम्यते' इति गाथाद्वयार्थः ॥१०-११॥

तदेवाह—

**वेया अहीया न हवंति ताणं भुत्ता दिया निंति तमंतमे णं ।**
**जाया य पुत्ता न हवंति ताणं को नाम ते अणुमन्निज्ज एयं ? ॥१२॥**

**व्याख्या—वेदा** ऋग्वेदादयोऽ**धीताः** पठिता **न भवन्ति त्राणं** शरणम् । तदध्ययनमात्रतो दुर्गतिपातरक्षाऽसिद्धेः । उक्तं हि—

**"शिल्पमध्ययनं नाम वृत्तं ब्राह्मणलक्षणम् ।**
**वृत्तस्थं ब्राह्मणं प्राहुर्नेतरान् वेदजीवकान्"** ॥१॥

'भुत्त'त्ति अन्तर्भूतेनार्थ[तणिगर्थ०]त्वाद् **भोजिता द्विजा** ब्राह्मणा **नयन्ति** प्रापयन्ति **तमसो**ऽपि यत् **तमस्तस्मिन्न**तिरौद्र रौरवादिनरके **'णम**लङ्कारे' ते हि भोजिताः कुमार्गप्ररूपणपशुवधाद्यसद्व्यापारे प्रवर्तन्तेऽतस्तद्भोजनस्य नरकहेतुत्वमिति । तथा **जाताश्च पुत्रा न भवन्ति त्राणं** 'नरकादिकुगतौ पततामिति गम्यम्' । यदुक्तं तैरेव—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"यदि पुत्राद् भवेत् स्वर्गो दानधर्मो न विद्यते ।
मुषितस्तत्र लोकोऽयं दानधर्मो निरर्थकः ॥१॥
बहुपुत्रा दुली गोधा ताम्रचूडस्तथैव च ।
तेषां च प्रथमं स्वर्गः पश्चाल्लोको गमिष्यति" ॥२॥

ततः **को नाम** ? न कश्चिदित्यर्थो यस्ते **तवानुमन्येत** शोभन**मिदमि**त्यनुजानीयात् 'सविवेकः' इति गम्यमेतद्वेदाध्ययनादित्रयमिति ॥१२॥

चतुर्थोत्तरमाह—

**खणमित्तसोक्खा बहुकालदुक्खा पगामदुक्खा अनिकामसोक्खा ।**
**संसारमुक्खस्स विपक्खभूया खाणी अणत्थाण उ कामभोगा ॥१३॥**

**व्याख्या—क्षणमात्रं सौख्यं** येषु **ते** तथा, **बहुकालं** नरकादिषु **दुःखं** शारीरादि येभ्य**स्ते** तथा । तथा **प्रकाममतिशयेन** दुःखं येभ्य**स्ते** तथा, **अनिकामसौख्या** अप्रकृष्टसुखाः संसारान्मोक्षो वियोगो यस्मात् **संसारमोक्षो** मुक्तिरित्यर्थ**स्तस्य विपक्षभूता**-स्तत्प्रतिबन्धकतया प्रतिकूलाः । यतः **खानि**राकरो**ऽनर्थानामै**हिक-प्रेत्यदुःखरूपाणां '**तु**रेवार्थे' के ? इत्याह**—कामभोगा** उक्तरूपाः ॥१३॥

अनर्थखानित्वमेव स्पष्टयितुमाह—

**परिव्वयंते अनियत्तकामे अहो य राउ परितप्पमाणे ।**
**अन्नप्पमत्ते धणमेसमाणे पप्पोति मच्चुं पुरिसे जरं च ॥१४॥**
**इमं च मे अत्थि इमं च नत्थि इमं च मे किच्च इमं अकिच्चं ।**
**तं एवमेवं लालप्पमाणं हरा हरंति त्ति कहं पमाए ॥१५॥**

**अनयोर्व्याख्या—परिव्रजन्** विषयसुखार्थमितस्ततो भ्राम्य**न्ननिवृत्तकामो**ऽनुपरतेच्छः सन् 'अहो य राउ'त्ति आर्षत्वा**दह्नि रात्रौ च परितप्यमान**स्तत्प्राप्त्यर्थं समन्ताच्चिन्ताग्निना दह्यमानः । 'अन्नप्पमत्ते'त्ति **अन्येषां** स्वजनादीनामर्थे **प्रमत्त**स्तत्कृत्यासक्तचेता **धनमेषयन्** विविधोपायैर्गवेषयमाणः । 'पप्पोति'त्ति **प्राप्नोति मृत्युं पुरुषो जरां च** वयोहानिरूपाम् ॥ किञ्च **इदं च मेऽस्ति** धान्यादि, **इदं च मे नास्ति** हेमादि । **इदं च मे कृत्यं** गृहादि, **इदं चाकृत्यमा**रब्धमपि वाणिज्यादि कर्तुं नोचितम् । **तं** पुरुष**मेवमेव** वृथैव **लालप्य-मान**मत्यर्थं वदन्तं हरन्त्यपनयन्तयायुरिति **हरा** दिन-रजन्यादयो व्याधिविशेषा वा **हरन्ति** जन्मान्तरं नयन्**तीत्य**स्माद् हेतोः **कथं प्रमादः** प्रक्रमाद् 'धर्मे कर्तुमुचितः' इति शेष इति गाथाद्वयार्थः ॥१४-१५॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

अथ धनादिभिस्तौ लोभयितुं पुरोहितः प्राह—

**धणं पभूयं सह इत्थियाहिं सयणा तहा कामगुणा पगामा ।**
**तवं कए तप्पइ जस्स लोगो तं सव्व साहीणमिहेव तुब्भं ॥१६॥**

**व्याख्या—धनं** द्रव्यं **प्रभूतं** प्रचुरं **सह स्त्रीभिः स्वजनाः** पितृव्यादयस्**तथा कामगुणाः** शब्दादयः **प्रकामा** अतिशायिनः । **तपः** कष्टानुष्ठानं **कृते** निमित्तं यस्य धनादेस्**तप्यते**ऽनुतिष्ठति **लोकः तत् सर्वं स्वाधीनमायत्तमिहैवा**स्मिन्नेव गृहे 'तुब्भं'ति सूत्रत्वाद् **युवयो**रिति ॥१६॥

तावाहतुः—

**धणेण किं धम्मधुराहिगारे सयणेण वा कामगुणेहिं चेव ? ।**
**समणा भविस्सामु गुणोहधारी बहिंविहारा अभिगम्म भिक्खं ॥१७॥**

**व्याख्या—धनेन किं धर्मधुराऽधिकारे स्वजनेन वा कामगुणैश्च** ? ततः **श्रमणौ** तपस्विनौ **भविष्यावो** गुणौघं सम्यग्दर्शनादिगुणसमूहं धारयत इत्येवंशीलौ **गुणौघधारिणौ** बहिर्ग्रामादिभ्यो बहिर्वर्तित्वाद् द्रव्यतो भावतश्च क्वचिदप्रतिबद्धत्वाद् विहारो ययोस्तौ **बहिर्विहारौ । अभिगम्याश्रित्य भिक्षां** शुद्धाहारयन्ताविति भावः ॥१७॥

धर्ममूलस्यात्मनोऽस्तित्वाभावं भृगुराह—

**जहा य अग्गी अरणी असंतो खीरे घयं तिल्लमहा तिलेसु ।**
**एमेव जाया सरीरंमि सत्ता संमुच्छई नासइ नावचिट्ठे ॥१८॥**

**व्याख्या**—'चोऽवधारणे' **यथैवाग्निररणितो**ऽग्निमन्थनकाष्ठा**दसन्न**विद्यमान एवं **संमूर्च्छति** । तथा **क्षीरे घृतं, तैलमथ तिलेषु । एवमेव हे जातौ** पुत्रौ ! **शरीरे सत्त्वाः** प्राणिनः **संमूर्च्छन्ति** पूर्वमसन्त एवोत्पद्यन्ते शरीराकारपरिमितभूतसमूहादौ यतस्तथा चाहुस्ते—पृथिव्यापस्तेजो वायुरिति तत्त्वानि, एतेभ्यश्चैतन्यं मद्याङ्गेभ्यो मदशक्तिवत् । 'नासइ'त्ति **नश्यन्त्य**भ्रपटलवत् प्रलयं यान्ति । 'नावचिट्ठे'त्ति **न** पुन**रवतिष्ठन्ते** शरीरनाशे तन्नाशादिति ॥१८॥

कुमारावाहतुः—

**नो इंदियग्गिज्झो अमुत्तभावा अमुत्तभावा वि य होइ निच्चो ।**
**अज्झत्थहेउं नियस्सबंधो संसारहेउं च वयंति बंधं ॥१९॥**

**व्याख्या—'नो** निषेधे' **इन्द्रियैः** श्रोत्रादिभि**र्ग्राह्यः** संवेद्य इन्द्रियग्राह्यः प्रक्रमात्

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सत्त्वः, कुतोऽ**मूर्तभावा**दिन्द्रियग्राह्यरूपाद्यभावात् । **अमूर्तभावादपि च भवति नित्यः** । तथाहि—यद् द्रव्यत्वे सत्यमूर्तं तन्नित्यं यथा व्योम । न चैवममूर्तत्वादेव तस्य बन्धासम्भवः । यतः '**अज्झत्थ**'त्ति अध्यात्मशब्दे**नात्मस्थ**मिथ्यात्वादयस्ततस्त**द्धेतु**स्तत्कारणको **नियतो** निश्चितोऽस्य **सम्बन्धः** कर्मसंश्लेषः, यथा ह्यमूर्तस्यापि व्योम्नोमूर्तै घटादिभिः सम्बन्धः । एवमममूर्तस्याप्यस्य मूर्तैः कर्मभिरसौ न विरुद्ध्यते । तथा चोक्तम्—

**"अरूपं हि यथाकाशं रूपिद्रव्यादिभाजनम् ।**
**तथा ह्यरूपी जीवोऽपि रूपिकर्मादिभाजनम्" ॥१॥**

तथा **संसार**श्चतुर्गतिभ्रमणरूपस्त**द्धेतुं** तत्कारणं **वदन्ति बन्धं** कर्मबन्धम्, एतेन निष्क्रियत्वमपि निराकृतमिति ॥१९॥

यत एवमस्त्यात्मा नित्योऽत एव च भवान्तरयायी तस्य च बन्धो बन्धस्य च मोक्ष इत्यतः—

**जहा वयं धम्ममयाणमाणा पावं पुरा कम्ममकासि मोहा ।**
**ओरुज्झमाणा परिरक्खियंता तं नेव भुज्जो वि समायरामो ॥२०॥**

**व्याख्या—यथा वयं धर्मं** सम्यक्त्वाद्य**जानानाः पापं** पापहेतुं **पुरा** पूर्वं **कर्मा**कार्ष्म कृतवन्तो **मोहा**दज्ञानाद**वरुध्यमाना** गृहान्निर्गममलभमानाः **परिरक्ष्यमाणा** भृत्यैः परिपाल्यमानास्**तत्** पापकर्म **नैव भूयोऽपि** पुनरपि **समाचरामो** यथावद् विदितवस्तुत्वादिति । अत्र द्वित्वे बहुत्वमस्मत्प्रयोगाददुष्टम् ॥२०॥

किञ्च—

**अब्भाहयंमि लोगंमि सव्वओ परिवारिए ।**
**अमोहाहिं पडंतीहिं गिहंसि न रइं लभे ॥२१॥**

**व्याख्या—अभ्याहते** आभिमुख्येन पीडिते **लोके** सर्वतः **सर्वासु** दिक्षु **परिवारिते** परिवेष्टिते । **अमोघाभि**रवन्ध्यप्रहरणोपमाभिः **पतन्तीभि**रागच्छन्तीभि**र्गृहवासे न रति**मासक्तिं '**लभे**'त्ति **लभावहे**, यथा हि वागुरावेष्टितो मृगोऽमोघैः प्रहरणैर्व्याधेनाभ्याहतो न रतिं लभते एवमावामपीति ॥२१॥

भृगुराह—

**केण अब्भाहओ लोओ केण वा परिवारिओ ? ।**
**का वा अमोहा वुत्ता जाया चिंतावरो हुमि ॥२२॥**

**व्याख्या—केन** व्याधतुल्येना**भ्याहतो लोकः ? केन वा** वागुरारूपेण **परि-**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**वारितः ? का वा अमोघप्रहरणोपमा** अभ्याहतिक्रियां प्रति करणत**योक्ता** ? । **हे जातौ** पुत्रौ ! **चिन्तापरो** 'हुमि'त्ति **भवामि** । ततो निवेद्यतामयमर्थ इति भावः ॥२२॥

तावाहतुः—

**मच्चुणाऽब्भाहओ लोओ जराए परिवारिओ ।**
**अमोहा रयणी वुत्ता एवं ताय ! वियाणह ॥२३॥**

**व्याख्या—मृत्युना** कृतान्तेना**भ्याहतो लोक**स्तस्य सर्वत्राप्रतिहतप्रसरत्वात् । यदुक्तम्—

**"[1]तित्थयरा गणहारी सुरवइणो चक्कि-केसवा रामा ।**
**संहरिया हयविहिणा सेसेसु जिएसु का गणणा ?"** ॥१॥

**जरया परिवारित**स्तस्या एव तदभिघातापादनपटीयस्त्वात् । **अमोघाश्च रजन्य उक्ताः** 'उपलक्षणत्वाद् दिवसाश्च' तत्पतने ह्यवश्यं जनस्याभिघातः । **एवं तात ! विजानीत** ॥२३॥

किञ्च—

**जा जा वच्चइ रयणी न सा पडिनियत्तई ।**
**अहम्मं कुणमाणस्स अहला जंति राईओ ॥२४॥**

**व्याख्या—या या** 'वच्चइ' त्ति **व्रजति रजनी** रात्रिः 'उपलक्षणाद् दिनं च' **न सा प्रतिनिवर्तते** न पुनरागच्छति । ताश्चा**धर्मं कुर्वतो** 'जन्तोरिति गम्यम्' **अफला यान्ति रात्रयो**ऽधर्मनिबन्धनं च गृहस्थतेत्यनित्यस्यायुषो ह्यधर्मकरणेन निष्फलत्वाद् गार्हस्थ्यत्याग एव श्रेयानिति भावः ॥२४॥

एवं व्यतिरेकतः प्रव्रज्याप्रतिपत्तिहेतुमुक्त्वा तमेवान्वयवमुखेनाह—

**जा जा वच्चइ रयणी न सा पडिनियत्तई ।**
**धम्मं च कुणमाणस्स सहला जंति राईओ ॥२५॥**

**व्याख्या**—प्राग्वन्नवरं 'धम्मं च'त्ति 'च पुनरर्थे' **धर्मं पुनः कुर्वतः सफला रात्रयो** धर्मफलत्वान्नृजन्मनो न च व्रतं विना धर्मोऽतो व्रतं प्रतिपत्स्यावहे इति भावः ॥२५॥

तद्वचनाप्तसम्यक्त्वो भृगुराह—

**एगओ संवसित्ताणं दुहओ सम्मत्तसंजुया ।**
**पच्छा जाया ! गमिस्सामो भिक्खमाणा कुले कुले ॥२६॥**

---

१. तीर्थकरा गणधारिणः सुरपतयश्चक्रि-केशवा रामाः ।
संहृता हतविधिना शेषाणां जीवानां का गणना ? ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—एकत** एकस्मिन् स्थाने **समुष्य** सहैवोषित्वा । 'दुह'त्ति द्वयं च द्वयं च **द्वये** आवां युवां च **सम्यक्त्वेन संयुताः** उपलक्षणाद् देशविरत्या च 'युक्ताः' **पश्चाद्** वृद्धत्वे **हे जातौ** पुत्रौ ! **गमिष्यामो** वयं 'ग्रामादिषु मासकल्पादिक्रमेणेति शेषः' अर्थात् प्रव्रज्य **भिक्षमाणा** याचमानाः 'पिण्डादिकमिति गम्यम्' **कुले कुले** गृहे गृहे अज्ञातोञ्छवृत्त्येत्यर्थः ॥२६॥

कुमारावाहतुः—

**जस्सत्थि मच्चुणा सक्खं जस्स चत्थि पलायणं ।**
**जो जाणइ न मरिस्सामि सो हु कंखे सुए सिया ॥२७॥**

**अज्जेव धम्मं पडिवज्जयामो जहिं पवन्ना न पुणब्भवामो ।**
**अणागयं नेव य अत्थि किंची सद्धाखमं नो विणइत्तु रागं ॥२८॥**

**अनयोर्व्याख्या—यस्यास्ति मृत्युना सख्यं** मित्रत्वं, **यस्य चाऽस्ति पलायनं** नाशनं 'मृत्योः सकाशादिति प्रक्रमः' । **यो जानाति** यथाऽहं **न मरिष्यामि** । 'सो हु कंखे'त्ति 'हुरेवार्थे' **स एव काङ्क्षति** प्रार्थयते 'सुए सिय'त्ति **श्व** आगामिनि दिने **स्याद्** 'इदमिति गम्यते' ॥ अतोऽ**द्यैव धर्मं** यतिधर्मं **प्रतिपद्यामहे**ऽङ्गीकुर्महे । 'जहिं'त्ति आर्षत्वाद् **यं** धर्मं **प्रपन्ना** आश्रिताः । 'न पुणब्भवामो'त्ति **न पुनर्भविष्यामो** न पुनर्जन्म प्राप्स्यामस्तद्धेतुभूतकर्मापगमात् । जरा-मरणाद्युपलक्षणमिदम् । किं **चानागतम**प्राप्तं **नैव चास्ति किञ्चिद**भीष्टमपि विषयसुखाद्यनादौ संसारे सर्वस्याप्यनन्तशः प्राप्तपूर्वत्वात् । ततो न तदर्थं गृहावस्थानं युक्तमिति भावः । उक्तञ्च—

**"काऽसौ गतिर्जगति या शतशो न जाता ?**
**क्षेत्रं किमत्र न हि यच्छतशोऽवगाढम् ।**
**सा सम्पदत्र न हि या शतशो न भुक्ता;**
**प्रायोऽखिलात्मभिरशेषसुतादियोगाः"** ॥१॥

अतः **श्रद्धा**ऽभिलाष**स्तया** 'हेतुभूतयेति गम्यते' **क्षमं** युक्तं 'श्रेयः कर्तुमिति शेषः' । **नो**ऽस्माकं **विनीया**पसार्य **रागं** स्वजनाभिष्वङ्गलक्षणम् । तत्त्वतो हि कः कस्य स्वजनोऽन्यो वेति । उक्तं चागमे—"[1]**अयं णं भंते ! जीवे एगमेगस्स जीवस्स माइत्ताए भाइत्ताए पुत्तत्ताए धूयत्ताए सुण्हत्ताए भज्जताए उववण्णपुव्वे ? हंता गोयमा ! असतिं अदुवा अणंतखुत्तो त्ति"** । इति गाथाद्वयार्थः ॥२७-२८॥

---

१. अयं भदन्त ! जीव एकैकस्य जीवस्य मातृतया भ्रातृतया पुत्रतया दुहितृतया स्नुषातया भार्यातया उपपन्नपूर्वः ? । हन्त गौतम ! असकृद् अथवानन्तकृत्व इति ।

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

ततो भृगुर्व्रतेच्छुर्ब्राह्मणीमाह–

**पहीणपुत्तस्स हु नत्थि वासो वासिट्ठि ! भिक्खायरियाइ कालो ।**
**साहाहि रुक्खो लहए समाहिं छिन्नाहिं साहाहिं तमेव खाणुं ॥२९॥**

**पंखाविहूणो व जहेह पक्खी भिच्चविहीणु व्व रणे नरिंदो ।**
**विवन्नसारो वणिउ व्व पोए पहीणपुत्तो मि तहा अहं पि ॥३०॥**

**अनयोर्व्याख्या**–प्रहीणौ भ्रष्टौ पुत्रौ यस्मात् स **प्रहीणपुत्रस्तस्य** पुत्राभ्यां प्रहीणस्य त्यक्तस्य मम 'गृहे' इति गम्यम् **नास्ति वासो**ऽवस्थानं **हे वासिष्ठि** ! वाशिष्ठगोत्रोद्भवे ! **भिक्षाचर्याया** उपलक्षणाद् 'व्रतग्रहणस्य' **कालः** प्रस्तावो 'वर्तते इति शेषः' यतः **शाखाभिर्वृक्षो लभते समाधिं** स्वास्थ्यं **छिन्नाभिः शाखाभिस्तमेव** वृक्षं 'खाणुं' ति **स्थाणुं** कीलकं जनो व्यपदिशतीत्युपस्कारः । यथा हि तास्तस्य शोभा–संरक्षणादिना समाधिहेतवस्तथा ममाप्येतौ सुतावतस्तद्विरहितोऽहमपि स्थाणुकल्प एवेति किं ममैवं-विधस्य गृहवासेनेति भावः ॥ किञ्च **पक्षाभ्यां विहिनो** रहितो वा **यथेह** लोके **पक्षी** पलायितुमशक्तो मार्जारादिभिरभिभूयते । यथा **भृत्यविहीनो वा रणे नरेन्द्रो** राजा शत्रुभिः पराजीयते । **विपन्नसारो** विनष्टहेमरत्नादिसारो **वणिग् वा पोते** प्रवहणे 'भिन्ने इति गम्यते' तीरमप्राप्नुवन् जलधिमध्ये एव विषिदति । **पुत्रप्रहीणोऽस्मि तथाऽहमपि** वाशब्दाद् दृष्टान्तान्तरसूचकाः । पक्षभृत्यार्थसारभूताभ्यां पुत्राभ्यां रहितोऽहमप्येवंविध एवेति गाथाद्वयार्थः ॥२९-३०॥

वाशिष्ठ्याह–

**सुसंभिया कामगुणा इमे ते संपिडिया अग्गरसप्पभूया ।**
**भुंजामु ता कामगुणे पगामं पच्छा गमिस्सामु पहाणमग्गं ॥३१॥**

**व्याख्या–सुम्भृताः** सुष्ठु अतिशयेन संस्कृताः **कामगुणा इमे** स्वगृहवर्तिनः प्रत्यक्षास्ते **तव** । तथा **सम्पिण्डिताः** पुञ्जीकृताः 'अग्गरस' त्ति **अग्र्याः** प्रधाना **रसाश्च** मधुरादयः **प्रभूताः** प्रचुराः । यस्मात् स्वाधीनाः सन्ति । 'भुंजामु' त्ति **भुञ्जीमहि** 'ता' **तस्मात् कामगुणान**ुक्तरूपान् **प्रकामम**तिशयेन ततो भुक्तभोगाः पश्चाद् वृद्धावस्थायां **गमिष्यामः** प्रतिपत्स्यामहे **प्रधानमार्गं** प्रव्रज्यारूपं मुक्तिपथमिति ॥३१॥

भृगुराह–

**भुत्ता रसा भोइ जहाइ णो वओ न जीवियट्ठा पयहामि भोए ।**
**लाभं अलाभं च सुहं च दुक्खं संविक्खमाणो चरिसामि मोणं ॥३२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—भुक्ताः** सेविता **रसा** मधुरादयः 'शेषकामगुणापलक्षणम्' 'भोइ' त्ति **हे भवति** ! वासिष्ठि ! **जहाति** त्यजति नो**ऽस्मान् वयो**ऽभिमतक्रियाकरणक्षमम् 'उपलक्षणत्वाज्जीवितं च' ततो यावन्नैतत् त्यजति तावत् प्रव्रजाम इत्याशयः । तत् किं ? वयःस्थैर्याद्यर्थं दीक्षाङ्गीकार इत्याशङ्क्याह—न **जीवितम**संयमजीवितमुपलक्षणाद् 'वयश्च' **तदर्थं प्रजहामि** त्यजामि **भोगान्** शब्दादीन् । किन्तु **लाभम**भीष्टवस्त्ववाप्तिरूप**मलाभं च** तदभावरूपम् । **सुखम**भिलषितविषयभोगजम्, **दुःखं च** तद्बाधात्मकं 'संविक्खमाणो' त्ति समतया **समीक्षमाणः** पश्यन् । 'उपलक्षणाज्जीवित-मरणादीनां च समतामेव भावयंश्च' **चरिष्याम्या**सेविष्ये **मौनं** मुनिभावम् । मुक्त्यर्थमेव मम दीक्षाप्रतिपत्तिरिति भावः ॥३२॥

वाशिष्ठ्याह—

**मा हू तुमं सोयरियाण संभरे जुन्नो व हंसो पडिसुत्तगामी ।**
**भुंजाहि भोगाइं मए समाणं दुक्खं खु भिक्खायरिया विहारो ॥३३॥**

**व्याख्या—'मा** इति निषेधे, हुरिति वाक्यालङ्कारे' 'तुमं' ति **त्वं सौदर्याणामे**कोदरोत्पन्नानाम् 'उपलक्षणत्वाच्छेषस्वजनानां भोगानां च' 'संभरे' त्ति **अस्मार्षीः** ? क इव 'जुन्नो व हंसो' ? त्ति **जीर्णो** जरामुपगतो **हंस इव प्रतिस्त्रोतोगामी** सन् । को भावो यथाऽसौ नदीस्त्रोतसि प्रतिकूलं गमनमारभ्यापि तत्राशक्तः पुनरनुस्त्रोत एवानुधावति, एवं त्वमपि संयमभारं वोढुमक्षमः पुनः सोदरादीन् भोगांश्च स्मरिष्यसि । ततो **भुङ्क्ष्व भोगान् मया समानं** सह । **दुःखं** दुःखहेतुरेव **भिक्षाचर्या विहारो** ग्रामादिष्वप्रतिबद्धत्वेनोपलक्षणाच्छिरोलोचादीति ॥३३॥

पुनर्भृगुराह—

**जहा य भोई तणुयं भुयंगो निम्मोइणिं हिच्च पलेइ मुत्ते ।**
**एमेए जाया पयहंति भोए ते हं कहं नाणुगमिस्समिक्को ॥३४॥**
**छिंदित्तु जालं अबलं व रोहिया मच्छा जहा कामगुणे पहाय ।**
**धोरेयसीला तवसा उदारा धीरा हु भिक्खायरियं चरंति ॥३५॥**

**अनयेर्व्याख्या—यथा च** 'भोई' त्ति **हे भवति** ! तनुः शरीरं तत्र जातां **तनुजां** भुजङ्गः सर्पो **निर्मोचनीं** निर्मोकं **हित्वा पर्येति** समन्ताद् गच्छति । 'मुत्तो' त्ति **मुक्तो** निरपेक्षतयाऽभिष्वङ्गरहितः । 'एमेए' त्ति **एवमेतौ जातौ** पुत्रौ 'पयहंति' त्ति **प्रजहीत**स्त्यजतो **भोगान्** । ततस्तौ भोगांस्त्यजन्तावहं **कथं नानुगमिष्यामि** ? प्रव्रज्याग्रहणेन

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नानुसरिष्याम्येकोऽद्वितीयो यदि तावदनयोः कुमारयोरभुक्तभोगयोरपीयान् विवेकस्तत् किमिति भुक्तोभोगोऽप्यहमेतान् न त्यक्ष्यामि ? । किं वा ममासहायस्य गृहवासेनेति भावः ॥ तथा **च्छित्वा** पुच्छादिना **जालमबलमिव** जीर्णत्वादिनाऽसारमिव 'बलीयोऽपीति गम्यम्' । **रोहिता** रोहितजातीया **मत्स्या यथा** 'चरन्तीति सम्बन्धः' । 'यत्-तदोर्नित्यसम्बन्धात् तथेति गम्यम्' । ततस्तथा जालप्रायान् **कामगुणान् प्रहाय** परित्यज्य । धुरि वहन्तीति धौरेयास्तेषामिव शीलमुत्क्षिप्तभारनिर्वाहलक्षणं स्वभावो येषां ते **धौरेय-शीलाः तपसोदाराः** प्रधाना **धीराः** सत्ववन्तो 'हुः' **यस्माद् भिक्षाचर्यां चरन्त्या**सेवन्ते व्रतग्रहणेनातोऽहमपीत्थं व्रतमेव ग्रहीष्ये इति भावः । इति गाथाद्वयार्थः ॥३४-३५॥

इत्थं प्रबुद्धा ब्राह्मण्याह—

**नहेव कुंचा समइक्कमंता तयाणि जालाणि दलित्तु हंसा ।**
**पलिंति पुत्ता य पई य मज्झं ते हं कहं नाणुगमिस्समिक्का ? ॥३६॥**

**व्याख्या—नभसीवा**काश इव **क्रौञ्चाः** पक्षिविशेषाः **समतिक्रामन्त**स्तांस्तान् देशानुल्लङ्घयन्त**स्ततानि** विस्तीर्णानि **जालानि** बन्धनविशेषाणि **दलयित्वा** खण्डशः कृत्वा 'चस्य गम्यमानत्वाद्' **हंसाश्च** 'पलिंति' त्ति **परियन्ति** समन्ताद् गच्छन्ति । **पुत्रौ** च **पतिश्च मम** सम्बन्धिनः संवेगादेतज्जालोपमविषयाभिष्वङ्गं भित्त्वा नभःसदृक्षे निरुपलेपतया संयमाध्वनि तानि तानि संयमस्थानान्यतिक्रामन्त्यत**स्तानहं कथं नानुगमिष्याम्ये**का सती ? स्त्रीणां हि भर्ता वा पुत्रो वा गतिरिति भावः ॥३६॥

इत्थं चतुर्णामप्येकवाक्यतया प्रव्रज्याप्रतिपत्तौ यदभूत् तदाह—

**पुरोहियं तं ससुयं सदारं सोच्चाऽभिनिक्खम्म पहाय भोए ।**
**कुडुंबसारं विउलुत्तमं तं रायं अभिक्खं समुवाय देवी ॥३७॥**

**व्याख्या—पुरोहितं तं** भृगुनामानं **ससुतं सदारं श्रुत्वाऽभिनिष्क्रम्य** गृहान्निर्गत्य **प्रहाय** प्रकर्षेण त्यक्त्वा **भोगान्** शब्दादीन् 'प्रव्रजितमिति गम्यते' । **कुटुम्बसारं** धन-धान्यादि विपुलं च विस्तीर्णतया उत्तमं च प्रधानतया **विपुलोत्तमं तद**दिति यत् पुरोहितेन त्यक्तं 'गृह्णन्तमिति शेषः' । 'रायं' तं **राजानम**भीक्ष्णं पुनः पुनः **समुवाच** सम्यगुक्तवती **देवी कमलावती** ॥३७॥

किमुक्तवतीत्याह—

**वंतासी पुरिसो रायं ! न सो होइ पसंसिओ ।**
**माहणेण परिच्चत्तं धणं आयउमिच्छसि ॥३८॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**सव्वं जगं जइ तुहं सव्वं वा वि धणं भवे ।**
**सव्वं पि ते अपज्जत्तं नेव ताणाय तं तव ॥३९॥**

**मरिहिसि रायं ! जया तया वा मणोरमे कामगुणे पहाय ।**
**इक्को हु धम्मो नरदेव ताणं न विज्जई अन्नमिहेह किंचि ॥४०॥**

**आसां व्याख्या**–वान्तमुद्गीर्णमशितुं भोक्तुं शीलस्येति **वान्ताशी पुरुषः** 'य इति गम्यम्' । **हे राजन् ! न स भवति प्रशंसितः** श्लाघितस्तथा त्वमपीति शेषः । कथमहं वान्ताशीत्याह–**ब्राह्मणेन परित्यक्तं धनमादातुं** गृहीतु**मिच्छसि** । त्यक्तधनं हि गृहीतोज्झितत्वाद् वान्तमिव तदादित्सोस्तव वान्ताशित्वादश्लाघ्यत्वाच्चैतन्नोचितमिति भावः ॥ किञ्च **सर्वं जगद् यदि तव, सर्वं वाऽपि धनं** हेमादि **भवेद्** 'यदि तवेतीहापि योज्यम्' । तदा **सर्वमपि** 'ते' **तवापर्याप्तम**समर्थं 'इच्छापूरणं प्रतीति शेषः' आकाशस्येव तस्या अपर्यवसितत्वात् । तथा **नैव** त्राणाय जरा–मरणाद्यपनोदाय **तत्सर्वं** जगद्धनं वा **तवेति** ॥ अन्यथा **मरिष्यसि राजन्** ! **यदा [ तदा ] वा** यस्मिंस्तस्मिन् वा काले जातस्य हि ध्रुवं मृत्युरिति । उक्तं हि–

**"कश्चित् सखे ! त्वया दृष्टः श्रुतः सम्भावितोऽथवा ? ।**
**क्षितौ वा यदि वा स्वर्गे यो जातो न मरिष्यति"** ॥१॥

किं कृत्वा ? इत्याह–**मनोरमान्** चित्ताह्लादकान् **कामगुणान् प्रहाय** प्रकर्षेण त्यक्त्वा त्वमेकाक्येव मरिष्यसि न किञ्चिदन्यत् त्वया सह यास्यतीत्याशयः । तथा 'एक्को हु' त्ति 'हुरेवार्थे' **एक एव धर्मः** सम्यग्दर्शनादिरूपो भो **नरदेव** भूपते ! **त्राणं** शरणमापत्परिरक्षणक्षमं । **न विद्यते** नास्त्यन्यद् धर्मादपर**मिह**लोके **इहे**त्यस्मिन् मृत्यौ **किञ्चि**दिति स्वजनं धनादिकं त्राणमिति ततो धर्म एवानुष्ठेय इति भाव इति गाथात्रयार्थः ॥३८–३९–४०॥

यतो धर्माद् ऋते नान्यत् त्राणमत आह–

**नाहं रमे पक्खिणि पंजरे वा संताणछिन्ना चरिस्सामि मोणं ।**
**अकिंचणा उज्जुकडा निरामिसा परिग्गहारंभनियत्तदोसा ॥४१॥**

**दवग्गिणा जहा रण्णे डज्झमाणेसु जंतुसु ।**
**अन्ने सत्ता पमोयंति रागद्दोसवसं गया ॥४२॥**

**अनयोर्व्याख्या–नाहं रमे** नाहं रतिमवाप्नोमि **पक्षिणीव** सारिकादिरिव **पञ्जरे** । को भावो ? यथासौ दुःखोत्पादिनि पञ्जरे न रतिं लभते । एवमहमपि जरा–मरणाद्युपद्रवविद्रुते भवपञ्जरे इति अत**श्छिन्नसन्ताना** विनाशितस्नेहसन्ततिः सती 'छिन्नशब्दस्य

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परनिपातः सूत्रत्वात्' **चरिष्याम्यासेविष्ये मौनं** मुनिभाव**मकिञ्चनो** न विद्यते किञ्चन द्रव्यतो हेमादि, भावतः कषायादिरूपमस्या इति कृत्वा । ऋजु मायारहितं कृतमस्या इति **ऋजुकृता** । निष्क्रान्ता आमिषाद् गृद्धिहेतोर्विषयादे**र्निरामिषा** । परिग्रहारम्भयोर्दोषा अभिष्वङ्ग—निस्त्रिंशतादयस्तेभ्यो निवृत्ता **परिग्रहारम्भदोषनिवृत्ता** 'प्राकृतत्वात् तस्य प्राग् निपातः' ॥ अपरं च **दवाग्निना** दावानलेन **यथारण्ये दह्यमानेषु** भस्मसात् क्रियमाणेषु **जन्तुष्वन्ये सत्त्वाः** प्राणिनोऽविवेकिनः **प्रमोदन्ते** प्रकर्षेण हृष्यन्ति । किम्भूताः ? **राग-द्वेषयोर्वशं** आयत्ततां **गताः** प्राप्ताः ॥४१-४२॥

दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह—

**एवमेव वयं मूढा काम-भोगेसु मुच्छिया ।**
**डज्झमाणं न बुज्झामो राग-द्दोसग्गिणा जगं ॥४३॥**

**व्याख्या—एवमेव वयं** 'मूढ'त्ति **मूढानि** मोहवशगानि **काम-भोगेषु** 'मुच्छिय'त्ति **मूर्च्छितानि** गृद्धानि **दह्यमानं न बुध्यामहे राग-द्वेषावग्निस्तेन** किं तज्**जगत्** प्राणिवर्गं । यो हि सविवेको रागादिमांश्च न स्यात्, स दवाग्निना दह्यमानानन्यजन्तूनवलोक्यात्म-रक्षणोपायतत्पर एव स्यान्न तु प्रमादवशगः सन् प्रमोदते, यस्त्वत्यन्तमज्ञो रागादिमांश्च स तु हृष्यन्न तदुपशमोपाये प्रवर्तते । ततो वयमपि भोगापरित्यागादेवंविधान्येवेति भावः ॥४३॥

ये तु नैवंविधास्ते किं कुर्वन्तीत्याह—

**भोगे भुच्चा वमित्ता य लहुभूयविहारिणो ।**
**आमोयमाणा गच्छंति दिया कामकमा इव ॥४४॥**

**व्याख्या—भोगान्** शब्दादीन् **भुक्त्वा** पुनरुत्तरकालं **वान्त्वा चाप**हाय लघुर्वात-स्तद्वद् भूतमेषां ते लघुभूतास्तदुपमाः सन्तो विहरन्तीत्येवंशीला **लघुभूतविहारिणो**ऽप्रति-बद्धविहारिण इत्यर्थः । **आ** समन्ता**न्मोदमाना**स्तथाविधानुष्ठानेन हृष्यन्तो **गच्छन्ति** 'विवक्षितं स्थानमिति शेषः' । 'दिया कामकमा इव' त्ति इवस्य भिन्नक्रमत्वाद् **द्विजा इव** पक्षिण इव कामोऽभिलाषस्तेन क्रामन्तीति **कामक्रमाः** । यथा द्विजाः स्वेच्छया यत्र यत्र रोचते, तत्र तत्रामोदमाना भ्राम्यन्त्येवमेतेऽप्यभिष्वङ्गाभावाद् यत्र यत्र संयमनिर्वाहस्तत्र तत्र यान्तीत्याशयः ॥४४॥

पुनर्बहिरास्थां निराकुर्वन्त्याह—

**इमे य बद्धा फंदंति मम हत्थज्जमागया ।**
**वयं च सत्ता कामेसु भविस्सामो जहा इमे ॥४५॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–इमे च** प्रत्यक्षाः शब्दादयो **बद्धा** नियन्त्रिता अनेकोपायै रक्षिताः **स्पन्दन्ते**ऽस्थिरधर्मतया । कीदृशास्ते ? **ममो**पलक्षणात् 'तव च' **हस्तं हे आर्य ! आगताः** प्राप्ताः स्ववशा इत्यर्थः । **वयं** पुनः **सक्तान्य**भिष्वङ्गवन्ति **कामेष्वे**वंविधेष्वपि चामीष्व-भिष्वङ्गो मोहविलसितमिति भावः । अतो **भविष्यामो यथेमे** पुरोहितादयः । यथाऽमी-भिश्चञ्चलत्वमवलोक्यैते त्यक्तास्तथा वयमपि त्यक्ष्याम इति भावः ॥४५॥

किमित्यमी सुखहेतवोऽपि त्यज्यन्ते ? इत्याह–

**सामिसं कुललं दिस्सा बज्झमाणं निरामिसं ।**
**आमिसं सव्वमुज्झित्ता विहरिस्सामो निरामिसा ॥४६॥**

**व्याख्या**–प्रक्रमात् **सामिषं** मांसोपेतं 'कुललं' **गृध्रं शकुनिकां** वा **दृष्ट्वा बध्यमानं** पीड्यमानं 'पक्ष्यन्तरैरिति गम्यम्' । **निरामिषमा**मिषविरहितं पुनरन्यथाभूतं अबध्यमानं 'दृष्ट्वेति गम्यते' । **आमिषम**भिष्वङ्गहेतुं धनधान्यादि **सर्वमुज्झित्वा** त्यक्त्वा **विहरिष्याम्य**प्रतिबद्धविहारितया **चरिष्यामि निरामिषा** त्यक्ताभिष्वङ्गहेतुः ॥४६॥

पुनरुपदेष्टुमाह–

**गिद्धोवमे य नच्चा णं कामे संसारवड्ढणे ।**
**उरगो सुवण्णपासि व्व संकमाणो तणुं चरे ॥४७॥**

**व्याख्या–गृध्रोपमान्** 'चः समुच्चये' **ज्ञात्वा** '**णं** वाक्यालङ्कारे' प्रक्रमाद् विषयामिषवतो लोकान् **कामांश्चसंसारवर्धनान्** संसारवृद्धिहेतून् ज्ञात्वेति योगः । किमित्याह–'उरगो' 'सुवण्णपासि व्व'त्ति आर्षत्वादिवशब्दोऽत्र भिन्नक्रमः । **उरग इव** सर्प इव **सौपर्णेयपार्श्वे** गरुडसमीपे **शङ्कमानो** भयत्रस्तस्तन्विति स्तोकं मन्दं यतनया **चरेः** क्रियासु प्रवर्तस्व । अयमाशयो यथा सौपर्णेयोपमैर्विषयैर्न बाध्यसे तथा संयममा-सेवस्व ॥४७॥

ततश्च किमित्याह–

**नागु व्व बंधणं छित्ता अप्पणो वसहिं वए ।**
**एयं पत्थं महाराय ! उसुयारि त्ति मे सुयं ॥४८॥**

**व्याख्या–नाग इव** गज इव **बन्धनं छित्त्वाऽऽत्मनो वसतिं व्रजति** । अयमभिप्रायो यथा नागो वरत्राण्डुकादि बन्धनं **छित्त्वा** द्विधा कृ**त्वात्मनो वसतिं** विन्ध्याटवीं **व्रजत्येवं** भवानपि कर्मबन्धनं निहत्यात्मनः शुद्धजीवस्य वसतिं मुक्तिं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्रजेरित्येवमुपदिश्य निगमयितुमाह—**एतद्** यन्मयोक्तं **पथ्यं** हितं **महाराजेषुकार** नामन् ! जानीहि । एतच्च न मया स्वमनीषिकयैवोच्यते, किन्त्वि**ति** एतन्**मया श्रुतम**वधारितं 'साधुभ्यः' इति गम्यमिति गाथार्थः ॥४८॥

एवं तद्वचनेन प्रतिबुद्धो भूपः, ततश्च यत् तौ चक्रतुस्तदाह—

**चइत्ता विउलं रज्जं काम-भोगे य दुज्जए ।**
**निव्विसया निरामिसा निन्नेहा निपरिग्गहा ॥४९॥**

**सम्मं धम्मं वियाणित्ता चिच्चा कामगुणे वरे ।**
**तवं पगिज्झऽहक्खायं घोरं घोरपरक्कमा ॥५०॥**

**अनयोर्व्याख्या**—त्यक्त्वा **विपुलं** विस्तीर्णं **राज्यं कामभोगांश्च दुस्त्यजान्** दुष्परिहार्यान् **निर्विषयौ** शब्दादिविषयरहितावत एव **निरामिषौ** मुक्तधनाद्यभिष्वङ्गौ **निःस्नेहौ** निष्प्रतिबन्धौ **निष्परिग्रहौ** क्वचिदप्यकृताङ्गीकारौ ॥ **सम्यग्धर्मं** श्रुतचारित्रात्मकं **विज्ञाय** 'चिच्चा' त्ति **त्यक्त्वा कामगुणान्** शब्दादीन् **वरान्** प्रधानान् **तपो**ऽनशनादि **प्रगृह्याभ्युपगम्य यथाख्यातं** येन प्रकारेणार्हदादिभिः कथितं **घोरं** दुरनुचरं **घोरः** कर्मरिपुं प्रति रौद्रः **पराक्रमो** धर्मानुष्ठानविषयसामर्थ्यात्मको **ययोस्तौ** । तथा देवीनृपौ तथैव 'कृतवन्ताविति शेषः' इति गाथाद्वयार्थः ॥४९-५०॥

अथ सर्वोपसंहारमाह—

**एवं ते कमसो बुद्धा सव्वे धम्मपरायणा ।**
**जंम-मच्चु-भउव्विग्गा दुक्खस्संतगवेसिणो ॥५१॥**

**सासणे विगयमोहाणं पुव्विं भावणभाविया ।**
**अचिरेणेव कालेणं दुक्खस्संतमुवागया ॥५२॥**

**अनयोर्व्याख्या—एवम**मुना प्रकारेण **तानि** पूर्वोक्तानि षडपि **क्रमशो बुद्धानि** । तथाहि—साधुदर्शनात् कुमारकौ **भृगुपुत्रौ** प्रतिबुद्धौ । तद्वचनात् तत्पितरौ । तदवलोकनात् **कमलावती** राज्ञी । ततोऽपि **राजेषुकार** इति । किम्भूतानि सर्वाणि ? **धर्मपरायणानि** धर्मैकनिष्ठानि **जन्म-मृत्यु-भयेभ्य उद्विग्नानि** त्रस्तानि । **दुःखस्यान्तः** पर्यन्तस्**तद्गवेषकाणि** ॥ पुनस्तद्वक्तव्यतामाह—**शासने** दर्शने **विगतमोहानामर्ह**तां **पूर्वमि**त्यन्यजन्मनि भावनयाभ्यासरूपया भावितानि वासितानि **भावनाभावितान्यत एवाचिरेणैव** स्वल्पनैव **कालेन दुःखस्यान्तं** मोक्ष**मुपागतानि** प्राप्तानि । सर्वत्र प्राकृतत्वात् पुल्लिङ्गतेति ॥५१-५२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मन्दमतिस्मरणायाध्ययनार्थमुपसंहर्तुमाह—

**राया सह देवीए माहणो य पुरोहिओ ।**
**माहणी दारगा चेव सव्वे ते परिनिव्वुडा ॥५३॥ त्ति बेमि ॥**

**व्याख्या—राजेषुकारः सह देव्या कमलावत्या । ब्राह्मणश्च पुरोहितो** भृगुनामा । **ब्राह्मणी** तत्पत्नी **यशाऽभिधाना । दारकौ** तत्पुत्रौ **चैवेति सर्वाणि तानि परिनिर्वृतानि** कर्माग्न्युपशमतः शीतीभूतानि मुक्तिं गतानीति यावदिति ॥ **इति ब्रवीमीति** प्राग्वत् ॥५३॥ ग्रं० ३५४ अ० १० ॥

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां चतुर्दशमिषुकारीयाध्ययनं समाप्तम् ॥१४॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# पञ्चदशं सभिक्ष्वध्ययनम्

इहानन्तराध्ययने निर्निदानता गुण उक्तः, स च मुख्यतो भिक्षोरेवातस्तद्-गुणानेवोपदिशन्नाह–

**मोणं चरिस्सामि समिच्च धम्मं सहिए उज्जुकडे नियाणछिन्ने ।**
**संथवं जहिज्ज अकामकामे अन्नायएसी परिव्वए स भिक्खू ॥१॥**

**व्याख्या**–मुनेः कर्म **मौनं** तच्च श्रामण्यं 'चरिस्सामि'त्ति **चरिष्याम्या**सेविष्ये 'इत्यभिप्रायेणेत्युपस्कारः' । 'समिच्च' त्ति **समेत्य** प्राप्य **धर्मं** श्रुतचारित्रभेदं दीक्षा-मित्यर्थः । **सहितः** सम्यक्त्वादिभिरन्यसाधुभिर्वा न त्वेकाकी तस्य श्रुते निषिद्धत्वाद् उक्तं हि–

"[१]एगागियस्स दोसा इत्थी साणे तहेव पडिणीए ।
भिक्खविसोहिमहव्वय तम्हा सेविज्ज दोगमणं" ॥१॥

**ऋजुकृतो**ऽशठनुष्ठानः । **छिन्नं निदानं** विषयाभिष्वङ्गरूपं येन **स** तथा । छिन्नस्य परनिपातः प्राकृतत्वात् । **संस्तवं** पूर्वसंस्तुतैर्मात्रादिभिः, पश्चात्संस्तुतैः श्वश्वादिभिः परिचयं **जह्यात्** त्यजेत् । अकामो मोक्षस्तत्र सर्वाभिलाषनिवृत्तेस्तं कामयतेऽभिलषती**त्यकाम-कामः** । अज्ञातस्तपस्वितादिगुणैरेषयते ग्रासादिकं गवेषयते इत्येवंशीलो**ऽज्ञातैषी परिव्रजेद**-नियतविहारितया विहरेद् य एवंविधः **स भिक्षुः** । अनेन सिंहतया निष्क्रम्य सिंहतया विहरणं भिक्षुत्वहेतूक्तमिति ॥१॥

सिंहतया विहरणमेवाह–

**रागोवरयं चरिज्ज लाढे विरए वेयवियायरक्खिए ।**
**पन्ने अभिभूय सव्वदंसी जे कम्हिचि न मुच्छिए स भिक्खू ॥२॥**

---

१. एकाकिनो दोषा स्त्री श्वानः तथैव प्रत्यनीकः ।
भिक्षाविशुद्धि-महाव्रतं तस्मात्सेवेत द्विगमनम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—रागोऽभिष्वङ्ग उपरतो निवृत्तो यस्मिंस्तद्**रागोपरतं** यथा स्यादेवं **चरेद्** विहरेत् क्तान्तस्य परनिपातः प्राग्वत् । **लाढः** सदनुष्ठानतया प्रधानः । **विरतो**ऽसंयमान्निवृत्तः । वेद्यते तत्त्वमनेनेति वेदः सिद्धान्तस्तस्य वेदनं वित् तयाऽऽत्मा रक्षितो दुर्गतेस्त्रातोऽनेनेति **वेदविदात्मरक्षितः** । **प्राज्ञो** हेयोपादेयबुद्धिमान् **अभिभूय** पराजित्य 'परीषहोपसर्गादीनिति गम्यम्' । सर्ववस्तु समतया पश्यतीत्येवंशीलः **सर्वदर्शी** यः **कस्मिंश्चित्** सचित्तादिवस्तुनि **न मूर्च्छितो** गृद्धः **स भिक्षु**रिति ॥२॥

अन्यच्च—

**अक्कोस-वहं विदित्तु धीरे मुणी चरे लाढे निच्चमायगुत्ते ।**
**अव्वग्गमणे असंपहिट्ठे जे कसिणं अहियासए स भिक्खू ॥३॥**

**व्याख्या**—आक्रोशोऽसभ्यालापो वधो घातोऽनयोर्द्वन्द्वे **आक्रोश-वधं** तद् **विदित्वा** स्वकर्मफलमेतदिति ज्ञात्वा । **धीरो**ऽक्षोभ्यः सम्यक् सोढेत्यर्थः । **मुनिश्चरेत्** पर्यटेद् 'अप्रतिबद्धविहारेणेति गम्यम्' । **लाढः** प्रधानः **नित्यं गुप्तो** रक्षितोऽसंयमस्थानेभ्य **आत्मा** येन **स** तथा । **अव्यग्रमना** अनाकुलचित्तो**ऽसम्प्रहृष्ट** आक्रोशादिषु न प्रहर्षवान् यदहं क्षमावानिति । **यः कृत्स्न**मुत्कृष्टादिभेदतः सर्वमाक्रोशवध**मध्यास्ते** सहते 'समतयेति गम्यते' । **स भिक्षु**रिति ।

अत्र दृष्टान्तः—

यत्येकः पुरि **चम्पायां** गच्छे स्वच्छाशयः क्वचित् ।
चतुरश्चतुरः साधून् क्षपकान् वरिवस्यति ॥१॥

वैयावृत्योद्यतः साधुः क्रियाकरणकर्मठः ।
परं क्षुधालुरत्यर्थं स चास्तेऽश्नन् मुहुर्मुहुः ॥२॥

तपस्विनान्यदेकेन खेलोत्सर्गाय याचितः ।
रक्षापात्रं स विस्मार्य तद् भोक्तुमुपचक्रमे ॥३॥

ततो रुष्टस्तपस्वी स आचुक्रोश भृशं तकम् ।
अनेकैः परुषैर्वाक्यैस्तपोऽजीर्णं हि रुट् यतः ॥४॥

परकार्यानपेक्षत्वादरे ! त्वं स्वोदरम्भरि ।
**कूरगड्डुक** इत्यस्याचख्ये सोऽनियतादनात् ॥५॥ युग्मम्

क्रोधाध्मातेन तेनाथ तस्य भोजनभाजने ।
भुञ्जानस्यैव चाहारं मुखात् खेलो निचिक्षिपे ॥६॥

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

तदा कूरघटासाधुरपसार्य ततः कफम् ।
मन्यमानः सिताक्षेपमिव तं भुक्तवान् स तत् ॥७॥

निःशूकः शान्तचेताः स नाक्रोष्टरि रुषं दधौ ।
क्रोधः सुगतिहन्ता हि भावनां भावयन्निति ॥८॥

यतः—

**"आक्रुष्टेन मतिमता तत्त्वार्थालोचने मतिः कार्या ।**
**यदि सत्यं कः कोपः स्यादनृतं किं नु कोपेन ?" ॥१॥**

***तथा चाक्रोश्यमानोऽपि क्षमावानहमित्यसौ ।***
***न माद्यत्यपि मानो हि प्रेत्य तद्वैपरीत्यकृत् ॥९॥***

शुशुचे च हृदा सोऽथ मन्निमित्तं तपस्वययम् ।
क्रुधो व्रतातिचाराच्च दुःखभाग् भवितेति हा ! ॥१०॥ **युग्मम्**

स **कूरगड्डुकः** साधुर्मुनेस्तस्य तपस्विनः ।
प्रशंसंस्तपस्तीव्रं निन्दन् स्वं धान्यकीटकम् ॥११॥

समतारससम्पूर्णो घातिकर्मचतुष्टयम् ।
क्षपयित्वा परं प्राप केवलज्ञानमुज्ज्वलम् ॥१२॥

विहारेण पुनानः क्ष्मां सम्बोध्य भविकान् जनान् ।
कृत्स्नकर्मक्षयं कृत्वा परमानन्दमाप सः ॥१३॥

इत्याक्रोशे हर्ष-रोषत्यागे **कूरगड्डुक**कथा ॥३॥

किञ्च—

**पंतं सयणासणं भइत्ता सीउण्हं विविहं च दंस-मसगं ।**
**अव्वग्गमणे असंपहिट्ठे जे कसिणं अहियासए स भिक्खू ॥४॥**

**व्याख्या—** **प्रान्तमसारं शयनासनमु**पलक्षणाद् 'भोजनाच्छादनादि' **भुक्त्वा** सेवित्वा शीतं चोष्णं च **शीतोष्णं** सेवित्वा **विविधं च** नानाप्रकारं **दंश-मशकं** 'प्राप्येति शेषः' । **अव्यग्रमना असम्प्रहृष्टः** प्रान्तशयनासनादिसेव्यहो ! अहमिति न प्रहर्षवान् इत्यादि प्राग्वत् ॥४॥

अपरं च—

**नो सक्कियमिच्छई न पूयं नो वि य वंदणगं कुओ पसंसं ?**
**से संजए सुव्वए तवस्सी सहिए आयगवेसए स भिक्खू ॥५॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—नो** नैव **सत्कृतं** सत्कारमभ्युत्थानानुगमनादिरूप**मिच्छत्य**भिलषति । **न पूजां** वस्त्रादिभिः, **नापि च वन्दनकं** द्वादशावर्तादि । **कुतः ? प्रशंसां** निजगुणोत्कीर्तनरूपां नैवेच्छतीत्यभिप्रायः । **स** एवंविधः **संयतः सुव्रतस्तपस्वी** विकृष्टतपाः **सहितः** सम्यग्ज्ञान—क्रियाभ्याम् । आत्मानं कर्मविगमाच्छुद्धं गवेषयती**त्यात्मगवेषको** यः **स भिक्षु**रिति ॥५॥

तथा—

**जेण पुण जहाइ जीवियं मोहं वा कसिणं नियच्छई ।**
**नर-नारिं पजहे सया तवस्सी न य कोऊहल्लं उवेइ स भिक्खू ॥६॥**

**व्याख्या—येन** हेतुना पुन**र्जहाति** त्यजति **जीवितं** संयमजीवितं **मोहं वा** कषाय-नोकषायरूपं मोहनीयं **कृत्स्नं** समस्तं **नियच्छति** बध्नाति । तदेवंविधं नरश्च नारी च **नर-नारि प्रजह्यात्** त्यजेद् यः **सदा तपस्वी** । **न च कुतूहलं** स्त्र्यादिविषयमभुक्तभोगतायां **कौतुकमु**पलक्षणाद्, 'भुक्तभोगतायां स्मृतिं च' **उपैति** गच्छति **स भिक्षु**रिति ॥६॥

सिंहविहारतया भिक्षुत्वमुक्त्वा पिण्डविशुद्ध्या तदाह—

**छिन्नं सरं भोममंतलिक्खं सुविणलक्खणदंडं वत्थुविज्जं ।**
**अंगवियारं सरस्स विजयं जो विज्जाहिं न जीवई स भिक्खू ॥७॥**

**व्याख्या—**छेदनं छिन्नं वस्त्रादीनां तद्विषयशुभाशुभसूचिका विद्या **छिन्नमि**त्युक्तैवं सर्वत्र । छिन्नादीनि यथा—

**"[१]अंजण-खंजण-कद्दमलित्ते मूसगभक्खिय अग्गिविदड्ढे ।**
**तुन्निय-कुट्टिय-पज्जवलीढे होइ विवागु सुहो असुहो वा ॥१॥**

**नवभागीकयवत्थे चउकूणंसा य मुहफला दिव्वा ।**
**पुव्वावर दो भागा आसुरिया आमयकरा य ॥२॥**

**दो दाहिणुत्तरंसा मज्झिमफलदायगा य माणुस्सा ।**
**वत्थस्स मज्झ रक्खसभागो मरणफलो होइ" ॥३॥**

---

१. अञ्जन-खञ्जन-कर्दमलिप्ते मूषकभक्षितेऽग्निविदग्धे ।
तूर्णित-कुट्टित-पर्यवलीढे भवति विपाकः शुभोऽशुभो वा ॥१॥

नवभागीकृतवस्त्रे चतुष्कोणांशाश्च मुखफला दिव्याः ।
पूर्वपरौ द्वौ भागौ आसुरावामयकरौ च ॥२॥

द्वौ दक्षिणोत्तरांशौ मध्यमफलदायकौ च मानुष्यौ ।
वस्त्रस्य मध्ये राक्षसभागो मरणात्मको भवति ॥३॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

**यन्त्रश्चायम्**—

| | | |
|---|---|---|
| देव | आसु. | देव |
| मनु. | राक्ष. | मनु. |
| देव | आसु. | देव |

तथा 'सरं'ति **स्वरस्वरूपाभिधानम्** । यथा—

**"सेज्जं[1] रवइ मऊरो कुक्कुडो रिसहं सरं ।**
**हंसो रवइ गंधारं मज्झिमं तु गवेलए** ॥१॥ इत्यादि ।

**सज्जेण लहइ वित्तिं कयं च न विणस्सई ।**
**गावो पुत्ता य मित्ता य नारीणं होइ वल्लहो** ॥२॥
**रिसहेण उ ईसरियं सेणावच्चं धणाणि य"** । इत्यादि ।

तथा **भौमं** भूकम्पादिलक्षणम् । यथा—

**"शब्देन महता भूमिर्यदा रसति कम्पते ।**
**सेनापतिरमात्यश्च राज-राष्ट्रं च पीड्यते"** ॥१॥ इत्यादि ।

**आन्तरिक्षमा**काशोद्भवगन्धर्वनगरादिरूपम् । यथा—

**"कपिलं सस्यघाताय माञ्जिष्ठं हरणं गवाम् ।**
**अव्यक्तवर्णं कुरुते बलक्षोभं न संशयः** ॥१॥

**गन्धर्वनगरं स्निग्धं सप्राकारं सतोरणम् ।**
**सौम्यां दिशं समाश्रित्य राज्ञस्तद्विजयङ्करम्"** ॥२॥ इत्यादि ।

तथा **स्वप्नं** स्वप्नगतं शुभाशुभकथनम् । यथा—

**"गाने रोदनं ब्रूयान्नर्तने वध-बन्धनम् ।**
**हसने शोचनं ज्ञेयं पठने कलहं तथा"** ॥१॥ इत्यादि ।

---

१. षड्जं रौति मयूरः कुर्कुट ऋषभं स्वरम् ।
हंसो रौति गान्धारं मध्यमं तु गवेलकः ॥१॥

षड्जेन लभते वित्तं कृतं च न विनश्यति ।
गावः पुत्राश्च मित्राणि च नारीणां भवति वल्लभः ॥२॥

ऋषभेण त्वैश्वर्यं सेनापत्यं धनानि च

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा **लक्षणं** स्त्री—पुंसोर्यथा—

"[1]**चक्खु-सिणेहे सुहिओ दंत-सिणेहे य भोयणं मिट्ठं ।**
**तय-नहेण य सोक्खं नह-नेहे होइ परमधणं**" ॥१॥ इत्यादि ।

तथा **दण्डो** यष्टिस्तत्स्वरूपकथनम् । यथा—"[2]**एगपव्वं पसंसंति**" इत्यादि । तथा **वास्तुविद्या** प्रासादादिलक्षणशास्त्रम् । **तथाङ्गविकारो**ऽङ्गस्फुरणादेः शुभाशुभकथनम् । यथा—"[3]**सिरफुरणे किर रज्जं**" इत्यादि । तथा **स्वरस्य** दुर्गा-शिवादिशब्दस्य **विजय**स्तद्विषयशुभाशुभकथनम् । यथा—

"[4]**सामा-सारस-वायस-कोसिय-सियवत्त-रासह-सिवाओ ।**
**जंबू—वसहा वामा पत्थाणे कज्जसिद्धिकरा**" ॥१॥ इत्यादि ।

ततो **य** एताभि**र्विद्याभिर्न जीवति** नैता एव जीविकाः प्रकल्पप्राणान् धारयति **स भिक्षु**रिति ॥७॥

यथा—

**मंतं मूलं विविहं विज्जचिंतं वमण-विरेयण-धूम-नित्त-सिणाणं ।**
**आउरे सरणं तिगिच्छियं च तं परिन्नाय परिव्वए स भिक्खू ॥८॥**

**व्याख्या—मन्त्रम्** ॐकारादिस्वाहापर्यन्तः । **मूलं** सिरिपुङ्खादि विविधम् । **वैद्यचिन्तां** नानापथ्यौषधादिव्यापाररूपाम् । यथा 'वर्जयेद् विदलं शूली' इत्यादि । **वमनमु**द्गिरणम् । **विरेचनं** कोष्ठशुद्धिरूपम् । **धूमं** मनःशिलादिसम्बन्धि । **नेत्रं** नेत्रसंस्कारकं सौवीराञ्जनादि । **स्नानम**पत्याद्यर्थं मन्त्रौषधिसंस्कृतोदकाभिषेचनम् । वमनादीनां द्वन्द्वः । 'आउरे सरणं' ति सुब्व्यत्ययात् **आतुरस्य** रोगादिपीडितस्य **सरणं** स्मरणं हा तात ! हा मातः ! इत्यादिरूपम् । **चिकित्सितं चा**त्मनो रोगप्रतीकाररूपम् । **तदि**ति यदनन्तरमुक्तं 'परिणाय' त्ति ज्ञपरिज्ञया **परिज्ञाय,** प्रत्याख्यानपरिज्ञया **प्रत्याख्याय** च **परिव्रजेत्** संयमाध्वनि यायाद् यः **स भिक्षु**रिति ॥८॥

---

१. चक्षुःस्नेहे सुखितो दन्तस्नेहे च भोजनमिष्टम् ।
त्वक्स्नेहेन च सौख्यं नखस्नेहे भवति परमधनम् ॥१॥

२. एकपर्वी प्रशंसन्ति ।

३. शिरःस्फुरणे किल राज्यम् ।

४. श्यामा-सारस-वायस-कौशिक-शतपत्र-रासभ-शिवाः ।
जम्बू-वृषभा वामाः प्रस्थाने कार्यसिद्धिकराः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अन्यच्च—

**खत्तिय-गण-उग्ग-रायपुत्ता माहण-भोइय विविहा य सिप्पिणो ।**
**नो तेसिं वयइ सिलोग-पूयं तं परिन्नाय परिव्वए स भिक्खू ॥९॥**

**व्याख्या—क्षत्रिया** राजानो, **गणा** मल्लादयः, **उग्रा** आरक्षकादयः, **राजपुत्रा** राजकुमारा एषां द्वन्द्वः । **माहना** ब्राह्मणाः, **भोगिका** भव्यवेषादिभोगवन्तो राजमान्याः । **विविधाश्च शिल्पिनः** सूत्रधारादयः । 'नो' **नैव तेषां** क्षत्रियादीनां **वदति श्लोकं** श्लाघां यथैते शोभना इति, **पूजां** च यथैतान् पूज्य इति । उभयत्र पापानुमत्यादिदोषसम्भवात् । **तदिति** श्लोकपूजादिकं द्विविधयापि परिज्ञया **परिज्ञाय परिव्रजेद्** यः **स भिक्षुरिति** ॥९॥

किञ्च—

**गिहिणो जे पव्वइएण दिट्ठा अप्पव्वइएण व संथुया हविज्ज ।**
**तेसिं इहलोइयप्फलट्ठा जो संथवं न करेइ स भिक्खू ॥१०॥**

**व्याख्या—गृहिणो ये प्रव्रजितेन** दीक्षितेन **दृष्टा** उपलक्षणात् 'परिचिताश्च' । **अप्रव्रजितेन वा** गृहस्थावस्थेन **संस्तुताः** परिचिता **भवेयुर्ये** गृहिण इति योज्यम् । 'तेसिं' ति **तैरुभयैरपि** परिचितैर्गृहिभि**रैहलोकिकफलार्थं** वस्त्रादिलाभनिमित्तं **यः संस्तवं** परिचयं **न करोति स भिक्षुरिति** ॥१०॥

तथा—

**सयणासण-भोयणं विविहं खाइम-साइमं परेसिं ।**
**अदए पडिसेहिए नियंठे जे तत्थ न पउस्सई स भिक्खू ॥११॥**

**व्याख्या—शयनासन-भोजनं** प्रतीतं **विविधमनेकप्रकारं खादिमं** खर्जूरादि, **स्वादिममेला**-लवङ्गादि उभयत्र द्वन्द्वः । 'परेसिं' ति **परेभ्यो** गृहस्थादिभ्यः । 'अदए' त्ति **अददद्भ्यः प्रतिषिद्धः** क्वचित् कारणेन याचमानो निवारितः सन् **निर्ग्रन्थो** मुक्तद्रव्य—भावग्रन्थो **यस्तत्रा**दातरि **न प्रद्वेषं** याति **स भिक्षुरिति** ॥११॥

तथा—

**जं किंचि आहार-पाणं विविहं खाइम-साइमं परेसिं लद्धुं ।**
**जो तं तिविहेण नाणुकंपे मण-वय-कायसुसंवुडे स भिक्खू ॥१२॥**

**व्याख्या—यत्किञ्चिदल्पमप्याहार-पानं** भक्त-पानीयं **विविधं खादिम-स्वादिमं** च **परेभ्यो** गृहस्थेभ्यो 'लद्धु'त्ति **लब्ध्वा** प्राप्य **यः** । 'तं' ति सुब्व्यत्ययात् **तेना**हारादिना **त्रिविधेन** मनो-वाक्-कायलक्षणेन **नानुकम्पते** बाल-ग्लानादीन् नोपकुरुते 'न स

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भिक्षुरिति शेषः' यस्तु **मनो-वाक्-कायैः सुसंवृतो** निरुद्धाहाराद्यभिलाषः सन् बालादीननुकम्पते **स भिक्षुरिति** ॥१२॥

किञ्च–

**आयामगं चेव जवोदणं च सीयं सोवीरं च जवोदगं च ।**
**नो हीलए पिंडं नीरसं तु अंत-पंतकुलाइं परिव्वए स भिक्खू ॥१३॥**

**व्याख्या–आयामकम**वस्त्रावणम् । **'चः** समुच्चये, **एवे**ति पूरणे' **यवोदनं** यवभक्तं शीतमन्त-प्रान्तोपलक्षणमिदम् । **सौवीरमा**रनालं **यवोदकं च** यवप्रक्षालनजलं तच्च **नो हीलयेद्** धिगिदं किमिदमनेनानिष्टेनेति न निन्देत् । **पिण्डमा**यामकादि । एवं **नीरसम**पि गतस्वादमपि । 'तुरप्यर्थे' अतो**ऽन्त-प्रान्तकुलानि** तुच्छगृहाणि दरिद्रकुलानि वा यः **परिव्रजेत् स भिक्षुरिति** ॥१३॥

अन्यच्च–

**सद्दा विविहा भवंति लोए दिव्वा माणुस्सया तहा तेरिच्छा ।**
**भीमा भयभेरवा उराला जे सुच्चा न विहिज्जई स भिक्खू ॥१४॥**

**व्याख्या–शब्दा विविधा** विमर्श-प्रद्वेषादिना क्रियमाणा बहुभेदा **भवन्ति । लोके दिव्या** देवसम्बन्धिना **मानुष्यास्तथा तैरश्चा भीमा** रौद्रा **भयभैरवा** अत्यन्तभयोत्पादका **उदारा** महान्तो **यः श्रुत्वा** प्रक्रमात् तादृशान् शब्दान् **न व्यथते** धर्मध्यानतो न चलति **स भिक्षुरिति** ॥१४॥

सम्यक्त्वस्थैर्यमाह–

**वायं विविहं समिच्च लोए सहिए खेयाणुगए य कोवियप्पा ।**
**पन्ने अभिभूय सव्वदंसी उवसंते अविहेडए स भिक्खू ॥१५॥**

**व्याख्या–वादं विविध**मनेकप्रकारं धर्मविषयम् । यथा–

**"मुण्डस्य भवति धर्मस्तथा जटाभिः सवाससां धर्मः ।**
**गृहवासेऽपि च धर्मो वनेऽपि वसतां भवति धर्मः" ॥१॥**

इत्यादि स्वस्वदर्शनाभिप्रायरूपं **समेत्य** ज्ञात्वा **लोके सहितः** साधुभिः स्वहितो वा खेदयति कर्मानिनेति **खेदः** संयम**स्तेनानुगतो** युक्तश्च कोविदो लब्धशास्त्रपरमार्थ आत्माऽस्येति **कोविदात्मा प्राज्ञो** धीमान् । **अभिभूय** पराजित्य 'परीषहादीनिति गम्यम्' । **सर्वदर्शी** सर्वसामान्यावबोधात्मकः **उपशान्तः** कषायोपशमेन **अविहेटको** न कस्यचिद् विबाधको यः **स भिक्षुरिति** ॥१५॥

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

तथा—

**असिप्पजीवी अगिहे अमित्ते जिइंदिए सव्वओ विप्पमुक्के ।**
**अणुक्कसाई लहुअप्पभक्खी चिच्चा गिहं एगचरे स भिक्खू ॥१६॥**
**त्ति बेमि ॥**

**व्याख्या**—न शिल्पेन चित्र—पत्रच्छेद्यादिविज्ञानेन जीवितुं शीलमस्ये**त्यशिल्पजीवि**। **अगृहो** मुक्तगृहः । 'अमित्ते'त्ति **अमित्रो**ऽभिष्वङ्गहेतुवयस्यरहितः 'उपलक्षणादशत्रुः' **जितेन्द्रियः** प्राग्वत् । **सर्वतो** बाह्याभ्यन्तराच्च ग्रन्थाद् **विप्रमुक्तः** । त**थाणुकषायी** स्वल्पकषायः । लघून्यसाराणि वल्लादीन्यल्पानि भक्षितुं शीलमस्येति **लघ्वल्पभक्षी** । **त्यक्त्वा गृहं** द्रव्य-भावभेदभिन्नम् । एको राग-द्वेषरहितश्चर**तीत्येकचरो** यः **स भिक्षुरिति ब्रवीमी**ति प्राग्वत् ॥१६॥ ग्रं० ११७-६॥

**इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां पञ्चदशं सभिक्ष्वध्ययनं समाप्तम् ॥१५॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# षोडशं ब्रह्मचर्यसमाधिस्थानाध्ययनम्

इह प्रागध्ययने भिक्षुगुणा उक्तास्ते च ब्रह्मचर्यवत एव स्युस्तच्च ब्रह्मगुप्तिज्ञानतोऽतस्तदभिधायकं षोडषाध्ययनमारभ्यते–

**सुअं मे आउसं ! तेणं भगवया एवमक्खायं । इह खलु थेरेहिं भगवंतेहिं दस बंभचेरसमाहिठाणा पन्नत्ता । जे भिक्खू सुच्चा निसम्म संजमबहुले संवरबहुले समाहिबहुले गुत्ते गुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरिज्जा ॥**

**व्याख्या–श्रुतं मयायुष्मन् ! तेन भगवतैवमाख्यातम्** । कथमित्याह–'यथेति गम्यम्' । **इह** प्रवचने '**खलु** निश्चये' **स्थविरैर्गण**धरै**र्भगवद्भिः** समग्रैश्वर्यादियुक्तै**र्दश ब्रह्मचर्यसमाधिस्थानानि प्रज्ञप्तानि** प्ररूपितानि । कोऽभिप्रायः ? नैषामियं स्वमनीषिका, किन्तु भगवताप्येवमाख्यातं मया श्रुतम् । ततोऽत्र मानास्थां कृथा इति । 'जे' त्ति **यानि** ब्रह्मचर्यस्थानानि **भिक्षुः श्रुत्वा** शब्दतो **निशम्या**वधार्यार्थतः । बहुलः प्रभूत उत्तरोत्तरस्थानावाप्त्या संयम आस्रवविरतिरूपोऽस्येति **बहुलसंयमो**ऽत एव **बहुलसंवरः** प्रभूतास्रवद्वारनिरोधः । ततो **बहुलसमाधिः**, समाधिश्चात्र चित्तस्वास्थ्यम् । सर्वत्र सूत्रत्वाद् बहुलशब्दस्य परनिपातः । **गुप्तो** मनो–वाक्–कायैरत एव **गुप्तेन्द्रियः** । तत एव गुप्तं नवगुप्तिसेवनाद् ब्रह्मेति ब्रह्मचर्यं चरितुमासेवितुं शीलमस्येति **गुप्तब्रह्मचारी सदा अप्रमत्तो विहरे**दप्रतिबद्धविहारितया चरेदिति ॥

**कयरे खलु थेरेहिं भगवंतेहिं दस बंभचेरसमाहिठाणा पन्नत्ता ? । जे भिक्खू सुच्चा निसम्म संजमबहुले संवरबहुले समाहिबहुले गुत्ते गुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरिज्जा । इमे खलु ते थेरेहिं भगवंतेहिं दस बंभचेरसमाहिठाणा पन्नत्ता जे भिक्खू सुच्चा निसम्म संजमबहुले संवरबहुले समाहिबहुले गुत्ते गुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरिज्जा । तं जहा–**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**विवित्ताइं सयणासणाइं सेवित्ता हवइ से निग्गंथे । नो इत्थी–पसु–पंडग–संसत्ताइं सयणासणाइं सेवित्ता हवइ । तं कहमिति चे आयरिय आह–निग्गंथस्स खलु इत्थि–पसु–पंडग–संसत्ताइं सयणासणाइं सेवमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिजज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ धम्माओ वा भंसिज्जा, तम्हा नो इत्थि–पसु–पंडग–संसत्ताइं सयणासणाइं सेवित्ता हवइ से निग्गंथे ॥१॥**

व्याख्या–**कतराणी**त्यादि प्रश्नसूत्रम्, **इमानी**त्यादि निर्वचनसूत्रं प्राग्वत् । तान्येवाह–तमित्यादि, **तद् यथे**त्युपन्यासे । **विविक्तानि** स्त्री–पशु–पण्डकैरनाकीर्णानि **शयनासनानि** 'उपलक्षणात् स्थानानि च' **सेवेत** भजेत यः **स निर्ग्रन्थो** द्रव्यभाव-ग्रन्थरहितो भवति । इत्थमन्वयेनाभिधायाव्युत्पन्नानुग्रहार्थममुमेवार्थं व्यतिरेकेणाह । 'नो' **नैव स्त्री–पशु–पण्डकसंसक्तानि शयनासनानि सेविता**पभोक्ता **भवति** । **तदि**त्यनन्तरोक्तं **केन प्रकारेणेति चेदेवं** यदि मन्यसे, अत्रोच्यते 'निग्गंथस्स'त्ति **निर्ग्रन्थस्य खलु** निश्चितं **स्त्र्यादिसंसक्तानि शयनासनादीनि सेवमानस्यो**पभुञ्जानस्य 'बंभयारिस्स'त्ति 'अपेर्गम्य-मानत्वाद्' **ब्रह्मचारिणो**ऽपि सतो **ब्रह्मचर्ये शङ्का वा** किमेताः सेवे उत नेति यद्वान्येषां शङ्का यथा किमसावेवंविधशयनासनाद्यासेवी ब्रह्मचार्युत नेति अथवात्मनः शङ्का स्त्र्यादि-भिरपहृतचित्ततया मोहोदयतः कदाचिदेतदासेवने जिनैस्तत्परिहारो दोषो वोक्तो भविष्यति नवेत्येवंरूपा । **काङ्क्षा वा** स्त्र्याद्यभिलाषरूपा **विचिकित्सा वा** किमेतावत्कष्टानुष्ठानफलं भविष्यति न वा ? तद् वरमेतदासेवनमेवास्त्वित्येवंरूपा **समुत्पद्येत** जायेत । **भेदं वा** विनाशं 'चारित्रस्येति गम्यम्' **लभेत, उन्मादं वा** कामग्रहात्मकं **प्राप्नुयात्** । **दीर्घ-कालिकं** प्रभूतकालभाविरोगो दाहज्वरादिरातङ्कश्चाशुघाती शूलादिस्ततो द्वन्द्वो **रोगातङ्कं भवेत्** । सम्भवति हि स्त्र्याद्यभिलाषातिरेकतोऽरोचकत्वं ततो रोगादीनि । **केवलिप्रज्ञप्ताद् धर्मात्** श्रुतचारित्ररूपाद् **भ्रश्येद**धः पतेदतिक्लिष्टकर्मोदयात् । यस्मादेवं **तस्मान्नो स्त्री**त्यादि सूत्रनिगमनं सुगममित्युक्तं प्रथमं स्थानम् ॥१॥

**णो इत्थीणं कहं कहित्ता हवइ से निग्गंथे । तं कहमिति चे आयरिय आह–निग्गंथस्स खलु इत्थीणं कहं कहेमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिजज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ वा**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**धम्माओ भंसिज्जा, तम्हा नो इत्थीणं कहं कहिज्जा ॥२॥**

**व्याख्या—नो स्त्रीणामे**काकिनीनामिति गम्यम् । **कथां** वाक्यप्रबन्धरूपां यदि वा स्त्रीणां कथां 'कर्णाटी सुरतोपचारचतुरा लाटी विदग्धप्रिया' इत्यादिकामथवा जाति-कुल-रूप-वेष-भेदाच्चतुर्विधां स्त्रीकथां **कथयिता भवति** यः **स निर्ग्रन्थो** न त्वन्य इत्याशयः । **तत् कथ**मित्यादि प्राग्वदिति द्वितीयं स्थानम् ॥२॥

**णो इत्थीणं सद्धिं सन्निसिज्जागए विहरित्ता हवइ से निग्गंथे । तं कहमिति चे आयरिय आह—निग्गंथस्स खलु इत्थीहिं सद्धिं सन्निसिज्जागयस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे इत्थीहिं सद्धिं सन्निसिज्जागए विहरिज्जा ॥३॥**

**व्याख्या—नो स्त्रीभिः सार्धं** सह सन्निषद्या सम्यक् पीठाद्यासनं तस्यां गतः स्थितः **सन्निषिद्यागतः** सन् **विहर्ता**-अवस्थाता **भवति** । कोऽर्थः ? स्त्रीभिः सहैकासने नोपविशेद्, उत्थितास्वपि हि तासु मुहूर्तं तत्र नोपवेष्टव्यमिति । य एवंविधः **स निर्ग्रन्थो** नान्य इत्याशयः । **तत् कथ**मित्यादि पूर्ववदिति तृतीयं स्थानम् ॥३॥

**णो इत्थीणं इंदिआइं मणोहराइं मणोरमाइं आलोइत्ता निज्झाइत्ता हवइ से निग्गंथे । तं कहमिति चे आयरिय आह—निग्गंथस्स खलु इत्थीणं इंदियाइं मणोहराइं मणोरमाइं आलोयमाणस्स निज्झायमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे इत्थीणं इंदियाइं मणोहराइं मणोरमाइं आलोएज्जा निज्झाइज्जा ॥४॥**

**व्याख्या—नो स्त्रीणां** नयनादीन्द्रियाणि, मनो हरन्ति दृष्टमात्राण्यप्याक्षिपन्तीति **मनोहराणि**, मनो रमयन्ति दर्शनान्तरमनुचिन्त्यमानान्याह्लादयन्तीति **मनोरमाणि**, **आलोकिता** ईषद् द्रष्टा **निर्ध्याता**-अतिशयेन चिन्तयिता **भवति** यः **स निर्ग्रन्थः** । शेषं स्पष्टमिति चतुर्थं स्थानम् ॥४॥

**णो इत्थीणं कुडुंतरंसि वा दूसंतरंसि वा भित्तिअंतरंसि वा कूइयसद्दं**

वा रुइयसद्दं वा गीयसद्दं वा हसियसद्दं वा थणियसद्दं वा कंदियसद्दं वा विलवियसद्दं वा सुणित्ता हवइ से निग्गंथे । तं कहमिति चे आयरिय आह—इत्थीणं कुड्डुंतरंसि वा दूसंतरंसि वा भित्तिअंतरंसि वा कूइयसद्दं वा रुइयसद्दं वा गीयसद्दं वा हसियसद्दं वा थणियसद्दं वा कंदियसद्दं वा विलवियसद्दं वा सुणमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिजज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे इत्थीणं कुड्डुंतरंसि वा दूसंतरंसि वा भित्तिअंतरंसि वा कूइयसद्दं वा रुइयसद्दं वा गीयसद्दं वा हसियसद्दं वा थणियसद्दं वा कंदियसद्दं वा विलवियसद्दं वा सुणमाणो विहरिज्जा ॥५॥

**व्याख्या**—कुड्यं लेष्टुकादिरचितं तेनानन्तरं व्यवधानं **कुड्यान्तरं तस्मिन् वा दूष्यं** वस्त्रं यवनिकारूपं **तदन्तरे वा भित्तिः** पक्वेष्टिकादिरचिता **तदन्तरे वा** 'स्थित्वेति शेषः' । **कूजितशब्दं** सुरतसमये कोकिलादिपक्षिभाषारूपं, **रुदितं शब्दं वा,** रतिसमयकृतं **क्रन्दितशब्दं वा,** प्रोषितभर्तृकादिकृताक्रन्दरूपं, **विलपितशब्दं वा** प्रलापरूपं **श्रोता** यो **न भवति स निर्ग्रन्थः** । शेषं प्रश्नप्रतिवचनाभिधायि प्राग्वदिति पञ्चमं स्थानम् ॥५॥

णो निग्गंथे पुव्वरयं पुवकीलियं अणुसरित्ता भवइ से निग्गंथे । तं कहमिति चे आयरिय आह—निग्गंथस्स खलु इत्थीणं पुव्वरयं पुव्वकीलियं अणुसरमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिजज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे इत्थीणं पुव्वरयं पुव्वकीलियं अणुसरिज्जा ॥६॥

**व्याख्या**—**नो निर्ग्रन्थः** पूर्वस्मिन् गृहस्थावस्थाकाले रतं स्त्र्यादिभिः सह विषयानु-भवनं **पूर्वरतं पूर्वक्रीडितं** वा स्त्र्यादिभिरेव पूर्वकालभाविद्यूतादिक्रीडात्मकं **अनुस्मर्ता**-अनुचिन्तयिता **भवति** यः **स निर्ग्रन्थः** । तत् कथमित्यादि शेषं प्राग्वदिति षष्ठं स्थानम् ॥६॥

णो पणीयं आहारं आहारित्ता भवइ से निग्गंथे । तं कहमिति चे आयरिय आह—निग्गंथस्स खलु पणीयं पाण—भोयणं आहारेमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुपज्जिजज्जा,

**भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे पणीयं आहारं आहारेज्जा ॥७॥**

**व्याख्या—नो प्रणीतं** गलद्बिन्दु 'उपलक्षणादन्यमप्यत्यन्तधातूद्रेककारिणम्' **आहार-मशनादिकमाहारयिता** भोक्ता **भवति** यः **स निर्ग्रन्थः** । शेषं स्पष्टम्, नवरं प्रणीतं पान—भोजनमिति तयोरेव मुख्यतया यतिभिराहार्यमाणत्वादन्यथा खाद्य—स्वाद्ये अपि प्रणीते त्याज्ये एवेति सप्तमं समाधिस्थानम् ॥७॥

**णो अइमायाए पाण—भोयणं आहारित्ता हवइ से निग्गंथे । तं कहमिति चे आयरिय आह—निग्गंथस्स खलु अइमायाए पाण—भोयणं आहारेमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुपज्जिजज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसेज्जा, तम्हा खलु नो निग्गंथे अइमायाए पाण—भोयणं आहारेज्जा ॥८॥**

**व्याख्या—नो अतिमात्रया—**

"[१]बत्तीसं किर कवला आहारो कुच्छिपूरओ भणिओ ।
पुरिसस्स महिलियाए अट्ठावीसं भवे कवला" ॥१॥

इत्यागमोक्तमात्रातिक्रमेण **पान—भोजनमाहारयिता भवति** यः **स निर्ग्रन्थः** । शेषं स्पष्ट-मित्यष्टमं स्थानम् ॥८॥

**णो विभूसाणुवाई हवइ से निग्गंथे । तं कहमिति चे आयरिय आह—विभूसावत्तिए विभूसियसरीरे इत्थिजणस्स अहिलसणिज्जे हवइ । तओ णं तस्स इत्थिजणेणं अभिलसमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिजज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसेज्जा, तम्हा खलु नो निग्गंथे विभूसाणुवाई सिया ॥९॥**

**व्याख्या—नो विभूषानुपाती** शरीरोपकरणादिषु स्नानधावनादिभिः संस्कारकर्ता

---

१. द्वात्रिंशत् किल कवला आहारः कुक्षिपूरको भणितः ।
पुरुषस्य महिलाया अष्टाविंशतिर्भवेत् कवलाः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**भवति** यः **स निर्ग्रन्थः । तत् कथमिति चेदुच्यते** 'विभूसावत्तिए'त्ति विभूषां वर्तयितुं कर्तुं शीलमस्येति विभूषावर्ती स एव **विभूषावर्तिको**ऽत एव **विभूषितशरीरः स्त्रीजनस्याभिलषणीयः** प्रार्थनीयो **भवति** । 'तओ'त्ति **ततस्तदभिलषणीयत्वतः 'णमित्यलङ्कारे' तस्य स्त्रीजनेनाभिलष्यमाणस्य ब्रह्मचारिणो**ऽपि **ब्रह्मचर्ये शङ्का**दीति नवमं स्थानम् ॥९॥

**णो सद्द-रूव-रस-गंध-फासाणुवाई हवइ से निग्गंथे । तं कहमिति चे आयरिय आह—निग्गंथस्स खलु सद्द-रूव-रस-गंध-फासाणुवाइस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ धम्माओ वा भंसेज्जा, तम्हा खलु नो निग्गंथे सद्दाइअणुवाई हवइ से निग्गंथे । दसमे बंभचेरसमाहिठाणे भवति ॥१०॥**

**व्याख्या—शब्दो** मन्मनादिः, **रूपं** चित्रादिगतं स्त्र्यादिसम्बन्धि, **रसो** मधुरादिः, **गन्धः** सुरभिः, **स्पर्शः** कोमलमृणालादिरेतान् रागहेतूननुपतत्य**नुयाती**त्येवंशीलः शब्दाद्यनुपाती **नो भवति** यः **स निर्ग्रन्थः** । **तत् कथमिति चे**दित्यादि सुगमम् । **दशमं ब्रह्मचर्यसमाधिस्थानं भवती**ति निगमनम् ॥१०॥

भवंति एत्थ सिलोगा, तं जहा—

**जं विवित्तमणाइन्नं रहियं थीजणेण य ।**
**बंभचेरस्स रक्खट्ठा आलयं तु निसेवए ॥१॥**

**व्याख्या—**भवन्त्यत्रोक्त एवार्थे श्लोकाः पद्यरूपाः । तद्यथा—'जं'ति सूत्रत्वाद् **यो विविक्तो** रहस्यभूतस्तत्रैव वास्तव्यस्त्र्याद्यभावात् । **अनाकीर्ण**स्तत्तत्प्रयोजनागतस्त्र्याद्यसङ्कुलः । **रहित**स्त्यक्तोकालचारिणा वन्दन—श्रुतश्रवणाद्यर्थमागतेन **स्त्रीजनेन च**शब्दात् पण्डकैः षिङ्गादिपुरुषैश्च, कालाकालचारित्वविभागस्त्वेवमागमे—

**"अट्ठमी-पक्खिए[१] मुत्तुं वायणाकालमेव य ।**
**सेसकालयमयंतीओ नेयाओ अकालचारीओ"** ॥१॥

**ब्रह्मचर्यस्य रक्षार्थं** पालनार्थं 'यत्—तदोर्नित्याभिसम्बन्धात् तमिति गम्यम्' **आलयं** उपाश्रयं '**तु** पूरणे' **निषेवते** भजते ॥१॥

---

१. अष्टमी-पाक्षिके मुक्त्वा वाचनाकालमेव च ।
शेषकालमायान्त्यो ज्ञेया अकालचार्यः ॥१॥

**मणपल्हायजणणी कामरागविवड्ढणी ।**
**बंभचेररओ भिक्खू थीकहं तु विवज्जए ॥२॥**

**व्याख्या–मनसः प्रह्लादो**ऽहो ! रूपातिशय इति सङ्कल्पजः प्रमोदस्**तस्य जननी** उत्पादिका । **कामरागो** विषयाभिष्वङ्गस्**तस्य विवर्द्धनी** तां **ब्रह्मचर्यरतो भिक्षुः स्त्रीकथां विवर्जयेत्** ॥२॥

**समं च संथवं थीहिं संकहं च अभिक्खणं ।**
**बंभचेररओ भिक्खू निच्चसो परिवज्जए ॥३॥**

**व्याख्या–समं च** सह **संस्तवं** परिचयं **स्त्रीभिः** 'एकासनोपवेशनादिनेति गम्यम्' । **सङ्कथां च** ताभिरेव समं सततं भाषणात्मिका**मभीक्ष्णं** पुनः पुनः **नित्यशो** नित्यं **परिवर्जयेत्** ॥३॥

**अंग-पच्चंग-संठाणं चारुल्लवियपेहियं ।**
**बंभचेररओ थीणं चक्खुगिज्झं विवज्जए ॥४॥**

**व्याख्या**–अङ्गानि शिरःप्रभृतीनि, प्रत्यङ्गानि कुच–कक्षादीनि, संस्थानमाकारविशेषः तेषां द्वन्द्वेऽ**ङ्ग–प्रत्यङ्ग–संस्थानम्** । **चारु** शोभनमुल्लपितं मन्मनभाषितादि, प्रेक्षितं चार्धकटाक्षनिरीक्षितादि, **उल्लपितं प्रेक्षितं ब्रह्मचर्यरतः स्त्रीणां** सम्बन्धि **चक्षुर्ग्राह्यं** सद् **विवर्जयेत्** । को भावः ? सज्जे हि चक्षुषि रूपग्रहणस्यावश्यम्भावित्वात् तद्दर्शनपरिहारः कर्तुमशक्य एव परं न तु रागवशात् पुनः पुनस्तन्निरीक्षणं युक्तमित्युक्तं च–

"[1]असक्कं रूवमद्दट्ठुं चक्खुगोयरमागयं ।
राग-द्दोसे उ जे तत्थ ते बुहो परिवज्जए "॥१॥ ॥४॥

**कूइयं रुइयं गीयं हसियं थणियं कंदियं ।**
**बंभचेररओ थीणं सोयगिज्झं विवज्जए ॥५॥**

**व्याख्या–कूजितादीनि** व्याख्यातान्येव, नवरं 'कुड्यान्तरादिष्विति' शेषः ॥५॥

**हासं किड्डं रइं दप्पं सहसा वित्तासियाणि य ।**
**बंभचेररओ थीणं नाणुचिंते कयाइ वि ॥६॥**

**व्याख्या–हासं** प्रतीतं, **क्रीडां** द्यूतादिरूपां, **रतिं** कान्ताङ्गजनितां प्रीतिं, **दर्पं**

---

१. अशक्यं रूपमद्रष्टुं चक्षुर्गोचरमागतम् ।
राग-द्वेषौ तु यौ तत्र तौ बुधः परिवर्जयेत् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मानिनीमानदलनोत्थं गर्वं, **सहसा वित्रासितानि च** पराङ्मुखदयितादेः सपदि त्रासोत्पादकान्यक्षिस्थगन–मर्मघट्टनादीनि **ब्रह्मचर्यरतः स्त्रीणां नानुचिन्तयेन्नानुस्मरेत्** 'पूर्वकृतानीति गम्यम्' ॥६॥

**पणीयं भत्तपाणं तु खिप्पं मयविवड्ढणं ।**
**बंभचेररओ भिक्खू निच्चसो परिवज्जए ॥७॥**

**व्याख्या–मदः** कामोद्रेकस्तस्य **विवर्धनं** विशेषतो वृद्धिहेतु । शेषं सुगमम् ॥७॥

**धम्मं लद्धं मियं काले जत्तत्थं पणिहाणवं ।**
**नाइमत्तं तु भुंजिज्जा बंभचेररओ सया ॥८॥**

**व्याख्या**–धर्मेण क्षान्त्यादिरूपेण हेतुना न तु भूतिकर्मादिना उत्पादितं **धर्म्यं लब्धं** प्राप्तं 'गृहस्थेभ्य इति गम्यम्' **मितं–**

"[1]**अद्धमसणस्स सव्वंजणस्स कुज्जा दवस्स दो भाए ।**
**वायपवियारणट्ठा छब्भागं ऊणयं कुज्जा**" ॥१॥

इत्यागमोक्तं मानान्वितम् 'आहारमिति गम्यम्' । **काले** प्रस्तावे **यात्राऽर्थं** संयमनिर्वाहार्थं न तु रूपाद्यर्थम् । **प्रणिधानवांश्चि**त्तस्वास्थ्योपेतो न तु राग–द्वेषवशगो **नातिमात्रं** मात्राऽतिरिक्तं **'तुरेवार्थे' भुञ्जीत ब्रह्मचर्यरतः सदा** । कदाचित् कारणतोऽतिमात्रस्याप्याहारस्यादुष्टत्वात् । यतः–

"[2]**कक्खडखेत्तचुओ वा दुब्बल अद्धाण पविसमाणो वा ।**
**खीराइगहण दीहं बहुं च उवमा अयकडिल्ले**" ॥१॥ ॥८॥

**विभूसं परिवज्जिजज्जा सरीरपरिमंडणं ।**
**बंभचेररओ भिक्खू सिंगारत्थं न धारए ॥९॥**

**व्याख्या–विभूषां** वस्त्राद्युपकरणगतां **परिवर्जयेत्** । **शरीरपरिमण्डनं** नख–केशादिसमारचनादि **ब्रह्मचर्यरतो भिक्षुः शृङ्गारार्थं** विलासार्थं **न धारयेन्** न कुर्यात् ॥९॥

**सद्दे रूवे य गंधे य रसे फासे तहेव य ।**
**पंचविहे कामगुणे निच्चसो परिवज्जए ॥१०॥**

---

१. अर्धमशनस्य सव्यञ्जनस्य कुर्याद् द्रव्यस्य द्वौ भागौ ।
वातप्रविचारणार्थं षड्भागमूनं कुर्यात् ॥१॥

२. रुक्षादिक्षेत्रच्युतो वा दुर्बलोऽध्वानं प्रविशन् वा ।
क्षीरादिग्रहणे दीर्घा बहु च उपमा 'अयःकडिल्लेन' ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–शब्दादीन् कामस्य गुणान्** साधनभूतानुपकारकान् **वर्जयेदि**ति ॥१०॥

यत् प्राक् प्रत्येकमुक्तं 'शङ्का वा स्यादित्यादि' तद् दृष्टान्तेनाह–

**आलओ थीजणाइन्नो थीकहा य मणोरमा ।**
**संथवो चेव नारीणं तासिं इंदियदरिसणं ॥११॥**

**कूइयं रुइयं गीयं हसियं भुत्तासियाणि य ।**
**पणीयं भत्तपाणं च अइमायं पाण-भोयणं ॥१२॥**

**गत्तभूसणमिट्ठं च कामभोगा य दुज्जया ।**
**नरस्सत्तगवेसिस्स विसं तालउडं जहा ॥१३॥**

**आसां व्याख्या–संस्तवः** परिचयः 'स चेहैकासनभोगेनेति प्रक्रमः' । शेषं स्पष्टम् ॥ **कूजितादी**नि कुड्यान्तराद्यवस्थितिनिषेधरूपाणि, भुक्तासितानि च 'स्मृतानीति शेषः' तत्र **भुक्तानि** भोगरूपाणि, **आसितानि** स्त्र्यादिभिरेव सहावस्थितानि 'हास्याद्युपलक्षणं चैतत्' शेषं सुगमम् ॥ **गात्रभूषणमिष्टं चे**ति 'चोऽप्यर्थः' तत इष्टमप्यभिलषितमप्यास्तां कृतं । तथा **कामभोगाः** शब्दादयः '**च**शब्दः समुच्चये' **दुर्ज्जया** इति कातरैरजेया इष्टाः सन्तः **नरस्य** 'उपलक्षणात् स्त्र्यादेश्च' **आत्मगवेषिणो विषं** तालपुटं **यथा,** तालपुटविषोपमा भवन्तीत्यर्थः । तालपुटं च सद्योघाति यत्रौष्ठपुटान्तरवर्तिनि तालमात्रकालविलम्बितो मृत्युः स्यात् तथा च स्त्रीजनाकीर्णालयादिरपि शङ्कादिकरणतः संयमात्मकभावजीवितस्येतरस्य च नाशहेतुरिति गाथात्रयार्थः ॥११-१२-१३॥

अथ निगमयति–

**दुज्जए कामभोगे य निच्चसो परिवज्जए ।**
**संकाट्ठाणाणि सव्वाणि वज्जिजज्जा पणिहाणवं ॥१४॥**

**व्याख्या–दुर्जयान् कामभोगान् नित्यशः परिवर्जयेत् । शङ्कास्थानानि** चानन्तरोक्तानि **सर्वाणि** दशापि **वर्जयेत् । प्रणिधानवा**नेकाग्रमनाः ॥१४॥

एतद्वर्जकश्च किं कुर्यादित्याह–

**धम्मारामे चरे भिक्खू धिइमं धम्मसारही ।**
**धम्मारामरए दंते बंभचेरसमाहिए ॥१५॥**

**व्याख्या**–धर्म आराम इव दुःखसन्तापतप्तानां जन्तूनां निवृत्तिहेतुतया वाञ्छित-फलप्रदानतश्च **धर्मारामस्तस्मिंश्चरेत्** प्रवर्तेत **भिक्षुः** । **धृतिश्चि**त्तस्वास्थ्यं **तद्वान्** । **धर्मसारथि**रन्येषां धर्मप्रवर्तयिता । धर्मे आरमन्ते इति धर्मारामाः सुसाधवस्तेषु रत आसक्तिमान्

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**धर्मारामरतो** न त्वेकाकी । तथा **दान्त** उपशान्तः **ब्रह्मचर्ये समाहितः** समाधिमान् ॥१५॥

ब्रह्मचर्यविशुद्धिमाहात्म्यमाह—

**देव-दाणव-गंधव्वा जक्ख-रक्खस-किंनरा ।**
**बंभयारिं नमंसंति दुक्करं जे करिंति तं ॥१६॥**

**व्याख्या—देवा** ज्योतिष्का वैमानिकाश्च, **दानवा** भवनपतयः, **गन्धर्वाद्याः किंनरान्ता** व्यन्तराः 'तदुपलक्षणं भूत-पिशाच-महोरग-किंपुरुषाणाम्' । ते सर्वेऽपि **ब्रह्मचारिणं** ब्रह्मचर्यवन्तं 'यतिमिति शेषः' **नमस्यन्ति** नमस्कुर्वन्ति । **दुष्करं** कातर-जनदुरनुचरं **यः करोति तदादिप्रक्रमाद्** ब्रह्मचर्यमिति ॥१६॥

अध्ययनोपसंहारमाह—

**एस धम्मे धुवे निच्चे सासए जिणदेसिए ।**
**सिद्धा सिज्झंति चाणेणं सिज्झिसंति तहावरे ॥१७॥ त्ति बेमि ॥**

**व्याख्या—एष धर्मो** ब्रह्मचर्यलक्षणो **ध्रुवः** स्थिरः परवादिभिरप्रकम्प्यतया प्रमाण-प्रतिष्ठित इत्यर्थः । **नित्यः** त्रिकालसम्भवात्, **शाश्वतः** सततभवनात् जिनदेशितः । अस्यैव त्रिकालविषयं फलमाह—**सिद्धाः** पूर्वमनन्तासूत्सर्पिण्यवसर्पिणीषु, **सिध्यन्ति च** महा-विदेहेषु, **अनेने**ति ब्रह्मचर्यलक्षणेन धर्मेण **सेत्स्यन्ति तथापरे**ऽनागताद्धायामनन्ताया-मुत्सर्पिण्या**मिति ब्रवीमी**ति पूर्ववत् ॥ अत्र दृष्टान्तकथा—

बभूव पुरि **चम्पायां सिंहसेनः** क्षमाऽधिपः ।
यत्कृपाणः कृपां चक्रे विमुखेष्वेव शत्रुषु ॥१॥

नैर्ग्रन्थशासनात्यन्तानुरक्तो धर्मतत्त्ववित् ।
अमात्यो **धर्मघोषा**ख्यस्तस्य कौशल्यभाजनम् ॥२॥

एकदा संसदासीने महीनेऽस्य सभासदः ।
मिथः प्रस्तावयामासुर्विचारं धर्मगोचरम् ॥३॥

बौद्धाक्षपाद-काणाद-कपिलादिमतानुगाः ।
सर्वे स्वाभिमतं धर्मं स्फूर्त्या निःशङ्कमूचिरे ॥४॥

**धर्मघोषे** तु दक्षेऽपि तूष्णीमाश्रित्य तिष्ठति ।
पर्यन्वयुङ्क्त भूपस्तमिव धर्मं पुमाकृतिम् ॥५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विज्ञा अविज्ञाः किंविज्ञा अपि सर्वे वदन्त्यमी ।
स्पर्द्धयेव निजां दृष्टिं न ब्रूते तु भवान् कुतः ? ॥६॥

*उत्कूजन्तुतमां काका बकाद्या अपि सर्वतः ।*
*श्रोत्रयोरभिमुख्यं तु करोति पिककूजितम् ॥७॥*

ततो नृपानुमत्यैष शुष्कवादपराङ्मुखः ।
बोधकल्पद्रुमाङ्कूरोत्पत्तिं वाञ्छन् नृपे जगौ ॥८॥

*शुष्कवादो विवादश्च धर्मवादस्तथाऽपरः ।*
*राजन् ! एष त्रिधा वादः कीर्तितः परमर्षिभिः ॥९॥*

*अत्यन्तमानिना सार्धं क्रूरचित्तेन वा दृढम् ।*
*धर्मद्विष्टेन मूढेन शुष्कवादः प्रकीर्तितः ॥१०॥*

*विजयेऽस्यातिपातादि लाघवं तत्पराजयात् ।*
*धर्मस्येति द्विधाऽप्येष तत्त्वतोऽनर्थवर्धनः ॥११॥*

*लब्धिख्यात्यर्थिना तु स्याद् दुःस्थितेनामहात्मना ।*
*छल-जातिप्रधानो यः स विवाद इति स्मृतः ॥१२॥*

*विजयो ह्यत्र सन्नीत्या दुर्लभस्तत्त्ववादिनः ।*
*तद्भावेऽप्यन्तरायादिदोषो दृष्टविघातकृत् ॥१३॥*

*परलोकप्रधानेन मध्यस्थेन तु धीमता ।*
*स्वशास्त्रज्ञाततत्त्वेन धर्मवाद उदाहृतः ॥१४॥*

*विजयेऽस्य फलं धर्मप्रतिपत्त्याद्यनिन्दितम् ।*
*आत्मनो मोहनाशश्च नियमात् तत्पराजयात् ॥१५॥*

*देशाद्यपेक्षया चेह विज्ञाय गुरु-लाघवम् ।*
*स्वान्यबोधाय सौम्येन वादः कार्यो विपश्चिता ॥१६॥*

*श्रौतं तत्त्वमिदं राजंस्तदेभिः पक्षपातिभिः ।*
*निरर्थं वाक्कलिं कृत्वा कः कुर्याद् गलशोषणम् ? ॥१७॥*

उत्तिष्ठन्त्वधुना सर्वे परीक्षां नृपतिः स्वयम् ।
तीर्थिकाणां विधातासौ धर्मभेदो हि यत्कृतः ॥१८॥

विसृज्येत्थं सभां राजानुमत्यामात्यपुङ्गवः ।
तानाहूयान्यदादत्त समस्यापदमित्यदः ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

'सकुंडलं वा वयणं नव त्ति'[1]

नगरे चेदमुद्घुष्टं य एनं पूरयिष्यति ।
तद्भक्तो भवितोर्वीशस्तस्मै दास्यति चेप्सितम् ॥२०॥

अथैतत् पदमादाय निर्जग्मुस्ते प्रावादुकाः ।
सप्तमेऽह्नि समाहूता नृपादेशेन मन्त्रिणा ॥२१॥

उपान्तःपुरिभित्त्येषोऽक्षेपयत् सूक्ष्मवालुकाः ।
अथ सम्भूय सर्वेऽपि हृष्टास्ते समुपागमन् ॥२२॥

यावदद्यापि नास्थानमध्यास्ते वसुधाधवः ।
गृह्यते दृक्फलं तावद् राजदारनिरीक्षणात् ॥२३॥

इत्यालोच्य ब्रह्मगुप्तिपरमार्थबहिष्कृताः ।
गत्वा ते जालमार्गेणापश्यन् शुद्धान्तयोषितः ॥२४॥

अलङ्कृतसभे राज्ञि तं झटित्युपतस्थिरे ।
पदं प्रथमतस्तत्र परिव्राडित्यपूरयत् ॥२५॥

**''भिक्खपविट्ठेण मएज्ज दिट्ठं विलयामुहं कमलविलासणित्तं ।**
**वक्खित्तचित्तेण न सुट्ठु णायं सकुंडलं वा वयणं नव त्ति'' ॥**[2]

श्रुत्वेदं नृपतिर्दध्यौ व्याक्षेपो ह्यस्य कारणम् ।
सकुण्डलेतराज्ञाने न पुनर्वीतरागता ॥२६॥

अहो ! आहारसदृशा उद्गाराः खल्वमुष्य यत् ।
गिरः सरागाश्चित्तस्थां व्यञ्जयन्ति सरागताम् ॥२७॥

प्रणाममात्रानर्होऽसौ वैराग्यज्ञानवर्जितः ।
इति निर्धार्य मुक्तेऽस्मिंस्तापसस्त्विदमूचिवान् ॥२८॥

**''फलोदएणं मि गिहं पविट्ठो तत्थासणत्था पमया वि दिट्ठा ।**
**वक्खित्तचित्तेण न सुट्ठु णायं सकुंडलं वा वयणं नव त्ति'' ॥**[3]

---

१. सकुण्डलं वा वदनं नवेति ।

२. भिक्षाप्रविष्टेन मयाऽद्य दृष्टं वनितामुखं कमलविलासनेत्रम् ।
व्याक्षिप्तचित्तेन न सुष्ठु ज्ञातं सकुण्डलं वा वदनं नवेति ॥

३. फलोदकार्थमहं गृहं प्रविष्टस्तत्रासनस्था प्रमदाऽपि दृष्टा ।
व्याक्षिप्तचित्तेन न सुष्ठु ज्ञातं सकुण्डलं वा वदनं नवेति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अयं फलोदकग्राही ततोऽप्यधिकपातकी ।
इति चिन्तयति क्ष्मापे शौद्धोदनिरदोऽवदत् ॥२९॥

**"[1]मालाविहारे मयि अज्ज दिट्ठा उवासिया कंचणभूसियंगी ।**
**वक्खित्तचित्तेण न सुट्ठु णायं सकुंडलं वा वयणं नव त्ति" ॥**

भूमानिदमपि श्रुत्वा निर्वैराग्यरसं वचः ।
सर्वानपि तिरस्कृत्य तानूचे मन्त्रिपुङ्गवम् ॥३०॥

अयि मन्त्रिन् ! वचोऽमीषां शृङ्गारागारसम्मुखम् ।
ब्रह्म-वैराग्यविमुखं किं यतित्वोचितं भवेत् ? ॥३१॥

अथ बद्धाञ्जलिर्मन्त्री पवित्रमभणद् वचः ।
अमी ज्ञातचरा एव निर्धर्माणः कुलिङ्गिनः ॥३२॥

जालमार्गेण शुद्धान्तं पश्यन्ति कथमन्यथा ।
सूर्यादिव निवार्या हि नारीभ्यो यतिभिर्दृशः ॥३३॥

इत्याख्याय वालुकासु गमागमनसाधकम् ।
अदर्शयन्नृपायैतत्पदसङ्क्रममिद्धधीः ॥३४॥

मिथ्याप्रवादव्यावृत्तप्रतिभोऽथ भुवः प्रभुः ।
कोऽपि जैनमुनिर्नागादित्युच्चैर्मन्त्रिणां जगौ ॥३५॥

आर्हतः क्षुल्लकोऽपीश ! सुमनाः सुक्रियः सुवाक् ।
इत्युक्त्वा गोचरगतं प्रातरेनमिहाह्वयत् ॥३६॥

समितो निर्विकाराक्षो निष्कषायो महामतिः ।
गाथापदं गृहीत्वाऽसौ नृपाग्रे तामपूरयत् ॥३७॥

**"[2]खंतस्स दंतस्स जिइंदियस्स अज्झप्पजोगे गयमाणसस्स ।**
**किं मज्झ एएण विचिंतिएण ? सकुंडलं वा वयणं नव त्ति" ॥**

क्षमा-जितेन्द्रियत्वाद्यो हेतुरत्र प्रपञ्चितः ।
सकुण्डलत्वाद्यज्ञाने न तु व्याक्षिप्तचित्तता ॥३८॥

---

१. मालाविहारे मयाऽद्य दृष्टा उपासिका कञ्चनभूषिताङ्गी ।
व्याक्षिप्तचित्तेन न सुष्ठु ज्ञातं सकुण्डलं वा वदनं नवेति ॥

२. क्षान्तस्य दान्तस्य जितेन्द्रियस्य, अध्यात्मयोगे गतमानसस्य ।
किं ममैतेन विचिन्तितेन ? सकुण्डलं वा वदनं नवेति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदेषोऽध्यात्मयोगानां सर्वेषामप्युपाश्रयः ।
इति निश्चित्य भूपोऽभूत् तद्धर्मश्रवणोन्मुखः ॥३९॥

स त्वार्द्र-शुष्कमृद्गोलद्वितयं भित्तिसीमनि ।
आहत्य गन्तुमारब्धो भणितश्च महीभुजा ॥४०॥

अनाख्याय भवान् धर्मं किमिति क्षुल्ल ! गच्छसि ।
सोऽवक् कथित एवैष मुग्धत्वाद् बुबुधे न तु ॥४१॥

पश्योभयोर्गोलकयोर्भित्तावलगदादिमः ।
परस्तु न तथा लग्नोऽनेनैतद् भूप ! भावितम् ॥४२॥

*शब्दादिविषयासक्ता ब्रह्मगुप्तिविवर्जिताः ।*
*कर्मपङ्कार्द्रभावात् ते लगन्ति भवभित्तिषु ॥४३॥*

*ये तु क्लेशलतामूलं कामिनीसङ्गमं विषम् ।*
*चिन्तयन्तो वीतरागा उद्युक्ता ब्रह्मगुप्तिषु ॥४४॥*

*क्षान्त्यादिगुणसौन्दर्यात् सिद्धियोषित्कटाक्षिताः ।*
*मुनयः शुष्कगोलाभाः क्वचिन्नैव लगन्ति ते ॥४५॥*

धर्मः कर्महरः कोऽस्ति शुद्धब्रह्मव्रतात् परः ? ।
इत्याख्याय गते क्षुल्ले नृपोऽभूत् परमार्हतः ॥४६॥

॥ इति ब्रह्मगुप्तिकथा ॥१७॥ ग्रं० २२०-१७॥

**इति शिष्यश्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां षोडशं ब्रह्मचर्यसमाधिस्थानाध्ययनं समाप्तम् ॥१६॥**

● ● ●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"धम्मारामे चरे भिक्खु,
धिइमं धम्मसारही ।
धम्मारामरए दंते;
बंभचेरसमाहिए ।।"

– उत्तरज्झयणाणि
अध्य–१६/गा.१५

"ધૃતિવાળો,
બીજાઓને ધર્મમાં
પ્રવર્તાવનાર હોવાથી
ધર્મસારથી,
ધર્મમાં રમનારા સુસાધુઓમાં
આસક્ત, ઉપશાંત,
બ્રહ્મચર્યમાં
સમાધિવાળો ભિક્ષુ
ધર્મરૂપી બગીચામાં વિચરે."

– ઉત્તરાધ્યયનસૂત્ર
અધ્ય–૧૬/ગા.૧૫

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org



Tejas Printers
AHMEDABAD M. 98253 47620

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org